उत्तमश्लोकतीर्थविरचितः

पूर्वमीमांसाचित्रपटः

स्वोपज्ञलघुन्यायसुधाटीकासहितः

PŪRVAMĪMĀMSĀ CITRAPAṬAḤ

with

LAGHUNYĀYASUDHĀṬĪKĀ

OF

UTTAMAŚLOKATĪRTHA

राष्ट्रियसंस्कृतविद्यापीठम्
[मानितविश्वविद्यालयः]
तिरुपतिः
१९९३

श्रीः

देहलीनगरविराजमान "भारतीय-
विद्याभवन" ग्रंथालयस्योपयोगाय
सादरं समर्प्यते संपादकेन-नावल्याकं.
श्री. देवनाथाचार्येण.

ना. श्री देवनाथाचार्यः
1-8-95

पूर्वमीमांसाचित्रपटः
लघुन्यायसुधाटीकासहितः

तिरुपतिराष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला—७

उत्तमश्लोकतीर्थविरचितः

पूर्वमीमांसाचित्रपटः

स्वोपज्ञलघुन्यायसुधाटीकासहितः

उभयमीमांसाकोविदेन

श्री ना. श्री. देवनाथताताचार्येण

संपादितः

Bhagwan's Sri Sankaracharya Sanskrit Mahavidyalaya * Bharatiya Vidya
111

तमसो मा ज्योतिर्गमय
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
(मानितविश्वविद्यालयः)

श्री शंकराचार्य संस्कृत महाविद्यालय
98-1-98
भारतीय विद्या भवन, नई दिल्ली-1

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
(मानितविश्वविद्यालयः)

१९९३

प्रथमं संस्करणम्

प्रकाशनवत्सरः - १९९३

सर्वेऽधिकाराः

तिरुपतिराष्ट्रियसंस्कृतविद्यापीठेन स्वायत्तीकृताः

मूल्यम् :

Bharatiya Vidya Bhavan's Sri Sankara Mahavidyalaya

प्रकाशकः

प्रो. रा. महादेवशर्मा

कुलपतिः

राष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

तिरुपतिः

मुद्रकः

चारित्र प्रिंटर्स्, रामानुजमार्गः, मैसूरु-५७० ००४

Rashtriya Sanskrit Vidyapeetha, Tirupati
Series No. 7

Pūrvamīmāmsā Citrapaṭaḥ
with
Laghunyāyasudhāṭīkā
of
UTTAMAŚLOKATĪRTHA

Edited by
N. S. DEVANATHA TATACHARYA

Rashtriya Sanskrit Vidyapeetha, Tirupati
[DEEMED UNIVERSITY]

1993

First Edition : 1993

Copy Rights Reserved

Price : Rs.

Published by :
Prof. R. MAHADEVAN
Vice-Chancellor
Rashtriya Sanskrit Vidyapeetha
(Deemed University)
Tirupati (A.P.)—517 507

Printed at :
Chaaritra Printers
8th Cross, Ramanuja Road
Mysore–570 004

प्रकाशकीयम्

कान्त्या निन्दितकुन्दलवपुर्न्यग्रोधमूले वसन्
कारुण्यामृतवारिभिर्मुनिजनान् संभावयन् वीक्षितैः ।
मोहध्वान्तविभेदनं विरचयन् बोधेन तत्तादृशा
देवस्तत्त्वमसीति बोधयतु मां मुद्रावता पाणिना ॥

निखिलेऽपि वाङ्मये वेदाः प्राचीनतमाः । ते च वेदाः कर्मकाण्डज्ञानकाण्डात्मना द्विधा विभक्ताः । तत्र कर्मकाण्डस्य सविशेषं तत्त्वमीमांसनार्थं प्रवृत्तं मीमांसाशास्त्रमतिदुरूहम् । द्वादशभिरध्यायैः संदब्धे मीमांसाशास्त्रे सन्ति भूयांसो ग्रन्थाः । तेषु लघुवार्तिकाख्यं पूर्वमीमांसाचित्रपटापराभिधं ग्रन्थरत्नमन्यतमम् । पूर्वमीमांसाशास्त्रीयाधिकरणार्थसंग्राहकस्य श्लोकात्मकस्यास्य ग्रन्थस्य लघुवार्तिकटीका–लघुन्यायसुधासंज्ञकं गद्यात्मकं द्वादशानामप्यध्यायानामर्थप्रतिपादकं व्याख्यारूपं ग्रन्थरत्नं चास्ते । मूलग्रन्थव्याख्याग्रन्थयोश्च कर्ता उत्तमश्लोकतीर्थः । उत्तमश्लोकतीर्थविरचितं मीमांसाचित्रपटाख्यं ग्रन्थरत्नं स्वोपज्ञलघुन्यायसुधाव्याख्यया सह प्रकाशयितुं नश्चेतः प्रमोदतेतमाम् ।

ग्रन्थस्यास्य संपादकाः वैदिकधुरन्धराः ना. श्री. देवनाथताताचार्याः अधिगतन्यायमीमांसावेदान्तशास्त्राः, अध्यापितबहुच्छात्राः, परिष्कृतसंपादितमीमांसादिग्रन्थाः, उभयमीमांसाकोविदप्रभृतिबिरुदभाजः, भारतराष्ट्रपतिपुरस्कृताः, सदाचारसंपन्नाश्च विराजन्ते । मीमांसाचित्रपटलघुन्यायसुधाव्याख्ययोः मूलव्याख्याग्रन्थयोरुभयोरपि कर्ता उत्तमश्लोकतीर्थ इति सुनिपुणं विचार्य सोपपत्तिकं प्रतिपादितमेतैः विद्वद्वर्यैः । ग्रन्थरत्नेऽस्मिन् दुरूहविचाराणां विशदीकरणार्थं संनिवेशितानां टिप्पणीनां परिशीलनेन ताताचार्याणां विमर्शकौशलं निशितमतित्वं च प्रस्फुटीभवति ।

अस्मिन् हि ग्रन्थे प्रतिपाद्यमानान् विषयान् पण्डितप्रकाण्डाः ग्रन्थसंपादकाः ना. श्री. देवनाथताताचार्याः संस्कृतोपोद्घाते, प्रो. के. टि. पाण्डुरङ्गिमहाभागाः आङ्ग्लोपोद्घाते च विस्तरेणावर्णयन्निति न तत्रास्ति वक्तव्यमधिकम् ।

अमूल्योऽयं ग्रन्थः न केवलं विद्यार्थिनां परं तु प्रौढानां विदुषामप्युपयोगी भविष्यतीत्यत्र नास्ति कोऽपि संदेहः ।

ग्रन्थस्यास्यामुखमाङ्ग्लभाषायां विलिख्य अनुगृहीतवद्भ्यः प्राच्यप्रतीच्यविद्यासंपन्नेभ्यः प्रो० के. टि. पाण्डुरङ्गिमहोदयेभ्यः कृतज्ञतापूर्वकं हार्दिकान् धन्यवादान् उपहरामः ।

ग्रन्थस्यास्य मुद्रणे साहाय्यमाचरितवद्भ्यः मैसूरुप्राच्यविद्यासंशोधनालयसंस्थायाः उपनिर्देशक-पदमलङ्कुर्वद्भ्यः विद्वद्भ्यः माळगिरामाचार्यमहाभागेभ्यः, मुद्रणशोधनकर्मणि साहाय्यमाचरितवद्भ्यः मैसूरुप्राच्यविद्यासंशोधनालयसंस्थायाः सहायकसंशोधकेभ्यः विद्वद्भ्यः टि. वि. सत्यनारायणमहोदयेभ्यः उपोद्घातादिभागं शोधितवद्भ्यः तिरुपतिराष्ट्रियसंस्कृतविद्यापीठे प्रवाचकपदमलङ्कुर्वद्भ्यः डा० लक्ष्मी-नरसिंहभट्टमहोदयेभ्यश्च सकार्तज्ञ्यं धन्यवादान् प्रकटयामः ।

ग्रन्थकर्त्रा उत्तमश्लोकतीर्थेन विश्वेश्वरप्रीत्यै विरचितः तिरुपतिराष्ट्रियसंस्कृतविद्यापीठेन प्रकाशितश्चायं मीमांसाचित्रपटाख्यो लघुन्यायसुधाव्याख्यायुतोऽयं ग्रन्थः भगवतो विश्वेश्वरस्य विदुषां च मोदाय कल्पतामित्याशास्महे ।

तिरुपतिः
२०-८-१९९३

रा. महादेवशर्मा
कुलपतिः

INTRODUCTION

I am very happy to associate myself by way of this brief introduction with the publication of a valuable Pūrvamīmamsā work viz., Laghuvārtika also known as Chitrapata with its commentary Laghunyāyasudhā of Uttamasloka tīrtha edited by Sri Devanatha Tatāchārya.

At the outset, I congratulate Sri Devanatha Tatāchārya on his very ably editing this small but very valuable Pūrvamīmāmsā work. His edition is based on the manuscript deposited at the Tanjore Sarsvati Mahal Library. He has consulted the manuscript deposited at Madras Govt. Oriental Manusrripts Library and also the earlier printed editions viz., edited by Dr. Chintamani of Madras University and Dr. Kamalanayana Sharma of Gangānātha Jha Institute of Alhabad. The text of Laghuvārtika is printed seperately and also along with the commentary Laghunyāya-sudhā. This helps the students to go through the Text without interruption and also consult the commentary when necessary. The Adhyāyas and pādās are mentioned. The Pūrvapaksha and Siddhanta are neatly arranged in separate paras. This arrange-ment is slightly disturbed by the Printer here and there. However its broad structure remains.

At a time when the traditional Scholarship was strong no such arrangement was necessary. The manuscripts consulted by the Editor were not arranged in this way. Sri Devanatha Tatāchārya has taken pains to arrange his edition in such a systamatic way. A Scholar of his eminence could do it with comparatively less effort. He has also added some very useful indices. The index of Viṣayavākyas and the index giving the differences of views of major writers are very helpful to the research scholars.

In his detailed introduction in Sanskrit, he discusses the problem of the authorship of the Text and the commentary. So far as the commentary viz., Laghu-nyāyasudhā is cocerned there is no difficulty about the authorship, The manuscripts mention Uttamaslokatīrtha as the author of the commentary and there is no other claimant. In respect of the Text viz., Laghuvārtika also called Chitrapata, the two earlier editors have expressed different opionion. Dr. Chintamani has assigned this work to Appaya Dixita and Dr Kamalanayana Sharma to Kumarila Bhatta. The present editor Sri Devanatha Tatācharya has argued that both these are not likely to be the authors of this Text. He assigns the authorship of the Text to Uttama-slokatīrtha the commentator of this work. A careful perusal of the reasons given by Sri Devanātha Tatācharya will convince that he is right. His main ground for not assigning it to Kumarila Bhatta is that nearly in half a dozen places the differences of opinion between the Śābarabhāshya and Vārtika are referred to in this work and Vārtika is mentioned by name. This makes it clear that a different writer than Kumarila is drawing the attention of the readers to these differences. The title

Laghuvārtika need not be taken to mean an abridged edition of Kumarila's Vārtika by Kumarila himself. In that case some key verses of Vārtika would have been certainly incorporated into it. The phrases, key expressions and the style of this Text are quite different from that of Kumarila. Further apart from summarising the Bhashya and Vārtika this work closely follows Śāstradipikā of Parthasarathi Misra. This also indicates that this is a later work.

The assignment of the authorship of this work to Appayya Dixit seems to have been based on two considerations. (1) The list of 108 works of Appayya Dixit contains the name of a work called Chitrapāta. (2) One or two manuscripts of this work carry the title Chitrapata. However, no manuscript mentions Appayya Dixit as its Author. Almost all manuscripts of Appaaya Dixit's other works mention his name. Therefore, the absence of his name in the manuscripts of this work makes his authorship doubtful. Śankara Bhatta who was quite familiar with Sri Appayya Dixita's works who has in fact refuted one of his works., viz., Vidhirasāyana by his Dushaṇa has also written a summary of Pūrvamīmamsā viz., Purvamimāmsāsāra Sangraha in verses. If he was aware of this work, he would not have repeated a same type of work. Therefore, this work is not the work of Sri Appayya Dixit. Sri Devanatha Tatācharya has given many more reasons io reject the authorship of both Kumarila and Appayya Dixit in his Sanskrit introduction. Sri Devanātha Tatācharya has suggested that Uttamaslokatīrtha himself is the author of both the Text and the commentary. Since he is the author of both, his name occurs at the end of the commentary. Its absence at the end of Text does not disprove his authorship.

As far the name Chitrapata, the manner in which the topics are presented in this work seems to be the reason. The topics are unfolded in the manner of pictures on a canvass. One can observe them in a sequence as seeing pictures on a canvass.

As regard this title being found in the list of Appayya Dixita's works, it has to be checked whether another work of the same title was written by him or the title of this work inadvertently got into the list of his works.

It is well known that a new era in Purvamīmāmsā commences with Khandadeva. Since this Text or its commentary which carefully records the differences between Bhashya and Vārtika and closely follows Śhāstradipikā, does not mention the differences between Khandadeva and the earlier writers even in respect of very important differences, this work has to be assigned a date before Khandadeva. As this summary of Purvamīmāmsā topics is more refined than that of Sankara bhatta's sangraha, the author seems to belong to a period between Sankarabhatta and Khandadeva. His reference to Visvesvara at the end of his commentary indicates that either he belonged to Vāranasi or lived in that City for quite some time.

Another important point to be noted in settling the authorship of this work

is that the āuthor of this work is also credited with the autharship of Vedanta work viz , Vyāsasutra Laghuvārtika and its comentary. Kumarila never dabbed in Vedanta while Appayya Dixita is not known to have written any short commentary on Vedanta sutra. Therefore, the authorship of the summary of these twin sūtraṣ cannot be assigned to them.

II

The literature of Pūrvamīmāmsā is very vast. Among the Sutras of different branches of Indian Philosophy and religion, the Jaimini Sutra of Purvmīmāmsā is the largest. It contains 2745 Sutras arranged into twelve chapters. Śabara's Bhashya, Kumarila's Vārtika, Śāstradipikā of Pārthasarathi are also quite extensive. There are about a thousand topics that are dealt with. It is imposible even for those who have great capacity to memorise to remember the Pūrvapaksha and Siddhanta of these topics. Therefore, the practice of writing summaries of these topics developed in Pūrvamīmāmsā. The present work is one such summary. Though the Jaimini sutras and the commentaries thereon, are large works and contain nearly a thousand topics as stated above these are well planned. The first chapter deals with the Pramāṇas and the remaining eleven chapters deal with the organisation of ritual programmes. That is why this system is called Karmamīmāmsā. The discussion of the organisation of ritual programmes needs the interpretation of Bramhāṇa passages, these Bramhaṇa passages have to be interpreted to determine the precise nature and the details of these riluals. For this purpose, Pūrvamīmāmsā has evolved a set of rules of interpretation. Therefore, this system is also called Vākya Śhāstra. To discuss as to what are the sources and the authority for Dharma ie., ritual programmes, and to point out that Śabda Pramāṇa, i.e., Veda is the only source and the authority for Dharma, this system probes into the epistemology also. Thus, Pūrvamīmāmsā has three dimensions viz., i) Programme organisation ii) Linguistics and iii) Epistemology. Pūrvamīmāmsā has made distinct contribution to the Indian thought in these three areas.

III

In evolving a methodology for ritual organisation, Pūrvāmimamsa has evolved such wel organised and detailed guidelines that these are useful for any programme organisation. To substantiate this observation, I will only mention the plan of Jaimini sutras in this respect spread over the chapters from II to XII. First Karmasvarūpa and Karmabheda i.e., identifying a programme and distinguishing different programmes are discussed. Then Śeṣa and Śeṣin or Anga and Pradhāna that is to say the guidelines to determine the main programmes or items and subordinate programmes or items are discussed. Next follows the discussion of Kratvartha and Puruṣartha i.e., the items that are meant for the programme and the items that

are meant for the person undertaking the programme in connection with the programme. Then, the Krama or sequence, and eligibility i.e., Adhikāra are discussed. These items are discussed in the chapters II to VI. These chapters are called Upadeśa Section. The seventh and eighth chapters discuss Atideśa in a general way and in respect of particular programmes and items. Purvamimamsā classifies the ritual programmes into two types Prakriti i.e., independently set programmes and Vikriti derived programmes. It is in the case of derived programmes that Atideśa or borrowing concurrent items from Prakriti is necessary. The provision for such Atideśa or borrowing needs two consequential adjustments. These are Ūha and Bādha, Ūha is substitution. For instance, if the deities in the Prakriti and Vikriti are different, the name of the deity in Prakriti has to be substituted by the name of the deity in Vikriti in the hymn. Such Ūha or substitution will be in respect of Mantra, Sāman and Sanskāra. Bādha is withdrawing or non-performance of certain items of Prakriti in Vikriti. Every item serves certain purpose in the ritual. If the purpose served in Prakriti by an item is not to be served in Vikriti that item has to be withdrawn. After discussing these consequential items of ritual organisation in the case of Vikriti, two important techniques of ritual organisation to effect the economy of effort are discussed. These are Tantra and Prasanga. Tantra is a technique of single performance with reference to many, while Prasanga is the technique of one item serving the purpose of another also. These two are intended to avoid repetition and economise the effort. These guidelines of ritual programme organisatson are formulated to efficiently organise the rituals and illustrated with ritual items. However, many of these could be applied to any other programme organisation. The underlying principles of these guidelines are discussed in detail in large works like Bhāsya, Vārtika and Śāstradipika. However, as these long discussions involve references to many ritual details, the comprehension of the emerging guideline and the driving point becomes difficult. This difficulty is solved by the short summaries like the present work which presents the emerging point of each Adhikarana lucidly and clearly. We may note a couple of instances from the present work.

१. पारार्थ्यं शेषमुच्यते

२. न विवक्ष्यं ग्रहैकत्वं
ग्रहत्वं तु विवक्षितम्

३. उच्चैष्ट्वाद्याः वेदधर्माः
स्युरुपक्रमगौरवात्

४. त्यागो द्रव्यस्य यागः
स्यात् देवतोद्देशपूर्वकः

५. द्रव्यभेदेपि यागादि-
क्रियाद्य नैव विभिद्यते

६. मुख्याभावे प्रतिनिधिः
देवतादिषु नास्त्यसौ

७. न स्वामिनः प्रतिनिधिः

८. अतिदेशः पदार्थाना-
मुपकारमुखान्यतः

९. स्याद्देशकालकर्तृणा-
माग्नेयादिषु तन्त्रता

१०- याजमानार्तिज्ययोः
प्रतिषेधे परं बलि

These are only a few instance of lucid and clear presentation of the driving points of the Adhikaranas. In order to realise the skill of the presentation of the author we may notice the summary of some of these topics by Śankara Bhatta in his Adhikaraṇa-Sārasagraha.

१· गृहैकत्वविवक्षा न
२· वेदधर्मस्तुच्चतादिः
३· यागस्य लक्षणं प्रोक्तम्
४· कर्मभेदो द्रव्यभेदे
५· कालाद्यैक्यं प्राकृतेष्टेः
६· आर्त्विज्यं बलिसंस्कारात्

This summary lacks both clarity and lucidity.

Another merit of the present work is, recording the differences between the Bhāshya and Vārtika. The instances of these differences are fully discussed by Sri Devanātha Tatācharya in his Sanskrit introduction. Therefore, I do not wish to repeat the same here.

IV

So far, I discussed Pūrvamīmāmsā contribution to the programme organisation. Now, I would like to briefly mention the contribution of Pūrvamīmāmsā to the Indian thought in the field of epistemology and linguistics though these items are not elaborated in the present text.

Pūrvamīmāmsā firmly states that Vedic injunction i.e., vidhi alone is the source and the authority of Dharma i.e., ritual programme. This necessitates them to make two points clear viz., i) what are the other Pramaṇas and how they are not helpful to convey Dharma. ii) What is the nature of vidhi i.e., Śabdapramāṇa and how it operates to convey the Dharma. It is in this connection that Jaimini discusses the nature of Pratyakṣa in the Pratyaksasutra (I-14) सत्संप्रयोगे पुरुषस्येंद्रियाणां बुद्धिजन्म तत्प्रत्यक्षम् and makes it clear in the same sutra that it cannot convey Dharma 'अनिमित्तं विद्यमानोपलम्भनत्वात्'. Pratyakṣa is capable of conveying only the objects that are present but not those belonging to the past or future. Commenting on this Sutra Śabara mentions the other Pramāṇa viz., Anumāna, Upamāna, Arthāpatti and Abhāva ie., Anupalabdhi. The last two are distinct contributions of Pūrvamīmāmsā to Indian epistemology. The Nyāya opposes Arthapatti and tries to include it in Anumāna. However, it is worthwhile to note the context in which Purvamīmāmsā proposed this pramāṇa. This Pramāṇa is utilised to conceive Apūrva an important concept of Pūrvamīmāmsā. Veda informs us that Yaga is the means for Svarga and Svarga is the result of Yaga. However, the two do not occur in continuity. The Yaga vanishes long before the Svarga is attained. Therfore, it is difficult to explain the the Kāryakāramabhāva between these two. To overcome this difficulty, Apūrva is envisaged. The Yaga produces Apūrva and Apūrva leads to Svarga. This Apūrva

is envisaged by Arthapatti Pramāṇa. The nature and the role of Arthapatti are explained as : अन्यथानुपपत्या यदुपपादककल्पनं तदर्थापत्तिः Here without envisating Apūrva the Kāryakāraṇabhāva of the Yaga and Svarga cannot be sustained. From this, it is clear that basically Arthapatti is conceived to reconcile vedic statements by introducing certain items to fill the gap as a necessary requirement to reconcile the Vedic statements. This Arthapatti Pramāṇa is utlised in a number of Adhikaranas in Pūrvamīmāmsā. It may be possible to meet such situations in laukika instances like देवदत्तो दिवा न भुङ्क्ते by considering it as a form of inference but in vedic instances it has its own special role.

Similarly, Abhāva or Anupalabdhi also serves a distinct purpose in Pūrvamīmāmsā. Purvamīmāmsā is primarily concerned with the items that are beyond sense perception i.e., Atindriya objects. This raises the question as to why should we accept the entities that are not known through our senses or could not even be inferred on the basis of the evidence perceived by the senses. This question can be resolved by determining the ground on which the existance or the non existence of any entity could be ascertained. The anupalabdhi pramāṇa determines this ground. The role of Anupalabdhi Pramāṇa is explained as : उपलम्भयोग्यत्वे सति अनुपलम्भनम् Whatever entities are capable of being grasped by the Pramāṇas, Pratyakṣa etc., if not grasped even when these Pramāṇas are effectively operative, then, their obsence is determined by the absence of their knowledge. Anupalabdhi literally means the absence of knowledge. The absence of the knowledge of the entities that are capable of being grasped by Pratyakṣa etc., even when these Pramāṇas are effectively operative, determines the absence of this entities. However, this Pramāṇa does not help to determine the absence of the entities such as Dharma, God etc., that are beyond the sense perception. Therefore, we cannot talk of the absence or non-existance of Dharma God etc, simply becasue we cannot know them by the operation of pramāṇas like Pratyakṣa. Mimamsakas primary interest in formulating the concept of Anupalabdhi pramāṇa is not so much to tell us as to how the absence of the entities is known but to tell us that the absence of the knowledge of Dharma, God etc., entities by the operation of Pratyakṣha etc., does not prove their absence since these entities are not capable of being known by Pratyakṣha etc pramāṇas at all. Just as the knowledge of the entities when the Pratyakṣha etc, Pramanas operate proves the presence of them, the absence of knowledge these entities proves their absence. This absence of knowledge itself is the evidence i.e., Pramāṇa for the absence of the entity concerned. However, the scope of this method extends only to those entities that are capable of of being grasped by Pratyakṣa etc, but not to those entities that are beyond Pratyakṣa etc. Thus, both Arthapatti and Anupalabdhi are conceived by Mimamsaka primarily for sustaining their concept of Atindriya entities. such as Dharma, Apurva etc.

Another important concept of Purvamimamsa in the context of epistemology is that of Prākatya or Jnātatā. According to this concept, all the objects have a

property called Prakatya i.e., the capacity to be revealed in knowledge. One can ascertain his acquiring the knowledge of an entity by the fact that it is revealed to him. The knowledge is not self evident but it could be ascertained only by the reveletion of the object. This makes the assertainment of the knowledge dependent upon the assertainment of the object. This processes is conceived to connteract the Vijnana Vadins' contention that there are no objects apart from the knowledge. The Vijnanavadins' contention is based on the position that the presence of the objects could be ascertained only by their knowledge. They cannot be independetly assertained. This shows that they are not there apart from the knowledge. To counter this objection the Mimāmsā conceived the concept of Prākatya and made the assertainment of the knowledge dependent upon the assertainment of the object, investing the objects with the property of Prākatya i.e., the capacity to be revealed. According to this doctrins of Prākatya, just as the presence of the light is assertained by the revelation of the objects. the presence of the knowledge is to be ascertained by the revelation of the objects. Thus the assertainment of knowledge is dependent upon the objects and not viceversa. Hence, the objects cannot be dismissed as mere forms of the knowledge.

The theory of Pramānya Svatastva i.e., self evident nature of the validity of knowledge is another distinct contribution of Purvamimamsa to Indian Epistemology.

V

The contribution of Pūrvamimamsa to the linguistics is equally significant. Mīmāmsā primarily depends upon Śabdapramāṇa and therefore, it goes deep into Śabdapramāṇa. The Apauruseyatva concept of Purvmīmāmsā has made the language autonomous at three important levels of the linguistic communication, viz., a) The relation between the word and meaning. (b) The formulation of a sentence (c) Determination of the purport of a passage or a discourse.

It is well known that Purvamimāmsā considers the relation between the word and meaning is natural and permanent. It is not caused by any human Agency or artificial device. A meaningful expression is always associated with its meaning. The relation between the two is autonomous.

Similarly. a Vedic sentence is not formulated by āny human agency. The words in a sentence āre intended to yield a syntactically organised meaning. The action is the centre of semantic organisation. Such an organised communication is the very nature and the purpose of the words in sentencc. Therefore, no human agency or any other artificial device is necessary to formulate a sentence.

तद्भूतानां क्रियार्थेन समाम्नायः अर्थस्य तन्त्रमित्तत्वात्

Thus at the level of the formulation of the sentence also language is autonomous.

To assertain the purport of a passage or a discourse also, Mīmāmsā has formulated certain guidelines such as Upakrama, Upasamhara etc, that are internal to the language and made the determination of purport of a passage of a discours autonomous. Thus, the concept of Apauruseyatva has far-reaching linguistic implications.

There are a few other linguistic concepts that constitute the contribution of Purvamīmāmsā. These are :

1) The concept of lakṣaṇavritti.
2) The concept of Ākānkṣā as a requirement for semantic organisation of a sentence.
3) The admissibility of foreign words and meanings in certain circumstances.
4) Commonality of Vedic words and laukika words

Besides these lingustic concepts, a number of other lingustically important points such as 'under what circumstances an attribute of a subject be taken into account, the gender or number are to be taken into account' etc, are discussed. A tabulation of these will be a very useful study.

The two theories of sentence meaning viz , Abhihitānvayavāda and Anvitābhidhānavāda are the most important contributions of Pūrvamīmamsā to the linguistic. All other systems of Indian Philosophy have adopted one of these two theories with some modification. The concept of Bhāvanā and its being the centre of semantic organisation is also an important point.

Finally, we may note how close are the Mimamsā guidelines of interpretation and the guidelines laid down by Maxwell for the interpretation of Law. We quote only a couple of guidelines.

1) The golden rule is that the words of statutue must prima facie be given their ordinary Meaning. (Maxwell)
   लोके एषु अर्थेषु पदानि सति संभवे तदर्थान्येव
2) Exposition of one act in the language of another in the same matter. (Maxwell)
   The criterion of समाख्या Purvamimamsa
3) Usage may determine the meaning of the language (Maxwell)
   योगाद् रूढिः बलीयसी (पू. मी)
4) The title is no part of law (Maxwell)
   नामधेय is not कर्मविधि (पू. मी)
5) The general statute is read as silently excluding the cases which are provided by special. (M.W)
   उत्सर्गापवादन्याय (पू. मी)

6) Construction has to be made of all parts together (M.W)
वाक्यभेदो दोषः
7) Personal acts and local customs.
रथकारन्याय and निषादस्थपतिन्याय आचारप्रामाण्य
8) To arrive at the real meaning, it is always necessary to get an exact idea of the object of the Act (M.W)
फल is a criterion to determine the purport (पू- मी)

These are only a few examples. The whole of Maxwell's book appears like a recounting of the Pūrvamīmāmsā guidelines of interpretation.

I have briefly stated above the Pūrvamīmāmsā contribution to the Indian thought in the areas of Programme organisation, Epistemology and Linguistics only to suggest the areas of research to our Research students. The present work viz., Laghuvārtika and its commentary are very helpful to easily identify the topics of research in these areas. By editing such a useful work, Sri Devanatha Tatācharya has rendered valuable service to the cause of Purvamīmāmsā study. The Rashtriya Sanskrit Vidyapeetha has fulfilled its acedemic duty by publishing this work. I congratulate the Editor of this work and the Vidyapeetha.

Darśanaratna, Mimamsa Bhuṣaṇa
K. T. Pandurangi
Upakulapathi of Poornaprajna Vidyapeetha, Bangalore
and Formerly Prof. of Sanskrit, Bangalore University.



मीमांसादर्शनकेसरी, राष्ट्रपतिसम्मानितः

श्री. उ.वे. नावल्पाक्कं देवनाथताताचार्यः

प्रकृतग्रन्थसम्पादकः

उपोद्घातः

वेदान्तलक्ष्मणमुनेः प्राप्तवेदान्तसंपदे ।
श्रीमते चतुराम्नायनृसिंहगुरवे नमः ॥
नमो जैमिनये येन न्यायवेश्मप्रभासिभिः ।
न्यायरत्नैस्समुत्कीर्णं ज्वलद्भिरिव भास्यते ॥

अयि भोः ! मीमांसारसास्वादपरिपूतान्तरङ्गाः सहृदयाः ! इदमिदानीमुपह्रियते भवतां पुरस्तात्, (१) 'लघुवार्तिकम्-अथवा-पूर्वमीमांसाचित्रपटः' इति समाख्यातम् अनुष्टुप्श्लोकात्मकम् अतिसंक्षिप्ततया पूर्वमीमांसाशास्त्रीयाधिकरणार्थसंग्राहकं ग्रन्थरत्नं, (२) तस्यैव व्याख्यारूपं 'लघुवार्तिकटीकालघुन्यायसुधा' इति समाख्यातं गद्यात्मकं विशदतमतया द्वादशाध्याय्यर्थप्रतिपापकं ग्रन्थान्तरञ्च । अनयोराद्यस्य प्रणेता 'कुमारिलभट्टः' इत्येके । 'अप्पय्यदीक्षितेन्द्राः' इत्यन्ये । अत्र औचित्यं कतरस्मिन् पक्षेऽस्तीति अत्रैव पश्चात् विचारयिष्यामः । अन्त्यस्य प्रणेता 'उत्तमश्लोकतीर्थः' इति सर्वैरेककण्ठ्येनाङ्गीकृतम् । संक्षिप्तोऽपि विशदतरोऽयं ग्रन्थः अगाधं मीमांसार्णवं गाहमानानां भृशमुपकुर्यादिति प्रतीक्षामहे । अनयोः श्लोकात्मको मूलभागः ३८८ श्लोकमितः । कण्ठस्थततया धर्तुं योग्यः । द्वादशानामप्यध्यायानां तत्र तत्र भाष्यवार्तिकयोर्योजनाभेदमप्यसन्त्यज्य प्रमेयभागं करतलामलकी करोत्येषः ।

तंजावूर् सरस्वतीमहाल्मातृकालयीयोऽयं ग्रंथः । तत्र हि असंख्याताः मातृकाः-तालपत्रमय्यः-कागजमय्यश्च-नानाभाषासु निपुणैर्विद्वद्भिः तदा तदा विरचितानां-नानाशास्त्रकलासंबन्धानां ग्रन्थानां लिखितरूपमापन्नाः सश्रद्धं परिपाल्यमाना विलसन्ति । तासामन्यतमैवेयं मातृका, 'लघुवार्तिकम्' अथवा 'पूर्वमीमांसाकारिकाचित्रपटः' इति । इयं तालपत्रात्मिका । अस्याः तंजावूर् सरस्वतीमहाल् अङ्कसङ्केतः —B. 9883-b/D.6975 इति तंजावूर् सरस्वतीमहाल्ग्रन्थालयीयसूचीपत्रे एतन्मातृकाविषयनिर्देशपराणि पुटानि वाचकानाम् उपयोगाय अत्र प्रदर्श्यन्ते —

[1]पूर्वमीमांसाकारिका — चित्रपटः

6975. PŪRVAMĪMĀMSĀKĀRIKĀ—CHITRAPATAH

Burnell's Catalogue No. 9883-b Page 95. Right column

Substance—Palm leaf. Size $18\frac{3}{4} \times 2$ inches. Leaves–9.
Lines—10–12 to a Page. Script—Grantha,
No. of Granthas—500, Author—?. Complete. Not printed.

---

[1] तत्रत्य सूचीपत्रात् जेराक्स् उपायेन संपादितं प्रतिरूपमिदम् ।
(A descriptive Catalogue of Sanskrit Manuscripts pages 5139–5142)

Beginning :

अथातो धर्मजिज्ञासा धर्मोऽर्थो विधिचोदितः ।
तत्प्रमाणं परीक्ष्यं स्यान्नाक्षाद्यैस्तत्प्रमीयते ॥
विधिस्तस्मिन् मानमेव नित्यशब्दः पदात्मकः ।
नित्यानि वेदवाक्यानि नानित्यानि समाख्यया ॥

प्रथमस्य प्रथमः पादः

मन्त्रार्थवादप्रमुखाः प्रमाणानीति वार्तिके ।
स्युरर्थवादा स्तुत्यर्था विधिवन्निगदास्तथा ॥
हेतुवन्निगदास्तद्वन्मन्त्राः स्मृत्युपकारिणः ॥

द्वितीयः

स्यात्स्मृतीनां प्रमाणत्वं मूलवेदानुमानतः ।
न तु श्रुतिविरुद्धानां न च मूलान्तरस्पृशाम् ॥
श्रौतक्रमविरोधेन नाचामस्मृत्यमानता ।
अर्था यवादिशब्दानां वाक्यशेषानुसारिणः ॥
अर्थाविरोधे मानत्वं म्लेच्छव्यवहृतैरपि ।
....वेदाः कल्पसूत्राणि डोलकाद्यव्यवस्थितम् ॥
मानं व्याकरणं नान्ये शब्दार्था लोकवेदयोः ।
शब्दार्थ आकृतिर्व्यक्तौ लक्षणाक्षेपसंभवात् ॥
अविरोधादभयवाक् निन्द्यन्ते वार्त्तिकेन या ।
श्रुतिस्मृत्योः विरोधे द्राक् विस्रम्भश्रुतिबोधिते ॥
यद्याचारे विगानं स्यान्नादृत्योऽदृष्टहेतुकः ।
बाह्यशास्त्रं च नापेक्ष्यं शिष्टाचारस्य मानता ॥
बलीयस्यार्यविहृतिः म्लेच्छानां व्यवहारतः ।
स्मृत्याचारविरोधे च नाचारस्य प्रमाणता ।
निवृदादिपदार्थश्च स्तोत्रीया नवकादिकः ॥

तृतीयः

प्रामाण्यमुद्भिदादीनां विशेषेण च वार्त्तिके ।
कर्मनामोद्भिदादिः स्याच्चित्राज्यादिपदं तथा ॥

तथावारस्तथा श्येनो वाजपेयपदं तथा ।
आग्नेयादिर्गुणविधिर्जात्यर्थे बर्हिराज्यके ॥
यौगिकप्रोक्षणीशब्दः निर्मन्थ्योऽपि तथाविधः ।
नाम स्याद्वैश्वदेवाष्टकपालादि च संस्कृतिः ॥
तत्कार्यकार्यतापत्तौ निमित्तत्वं क्वचिद्भजेत् ।
क्वचिदेकप्रभवता क्वापि तेन स्वरूपता ॥
क्वचित्प्रशस्तता तत्र निमित्तत्वं प्रपद्यते ।
क्वचिद्भूमा क्वचिल्लिंगसमुदायस्तु केवलम् ॥
सन्दिग्धव्यञ्जनद्रव्यं निर्णेयं वाक्यशेषतः ।
अवदानैः स्रुवादीनां सामर्थ्येन व्यवस्थितिः ॥
कारिकाः ॥ प्रथमोऽध्यायः ॥

End :

जपस्तुत्यादिमन्त्राणां धर्मार्थत्वात्समुच्चयः ।
याज्यानुवाक्यायुगळमनेकं स्याद्विकल्पितम् ॥
समुच्चयाः कथास्सोमे गुदयागे समुच्चयः ।
अग्न्याधेयं दक्षिणाः स्युः संख्याभेदाद्विकल्पिताः ॥
जाधनीनां ? पशुगणे न भवेत्तु समुच्चयः ।
वार्क्षादिना स्यात्काम्येन नित्यो (ह्य)स्य विवर्तनम् ॥
काम्यो नाहवनीयस्य आधानादेरभावतः ।
तत्र नाधानसंस्कारः नित्यो (ह्य)स्य न धारणम् ॥
कश्चिदेव परार्थानि कुर्याद्बहुषु यष्टृषु ।
एषु यः कश्चिदेव स्यात् सत्रे गृहपतिर्मतः ॥
सर्वेऽपि सर्वान् .... संस्कारानञ्जनादिकान् ।
याजमानार्त्विज्योर्विप्रतिषेधं परं बली ।
आर्त्विज्यं ब्राह्मणा एव कुर्युः सर्वेषु कर्मसु ॥ ३८९ ॥

Colophon :

४॥ का ३० द्वादशोऽध्यायः ।

चित्रपटस्समाप्तः

Subject : Pūrvamimāmsākārikā, known as Citrapaṭa.

Remarks :—The Ms. is in good condition. The other work contained herein is Vyāsasūtrakarikā. After the colophon is given

कामादिदोषदूराय कल्याणगुणशालिने ।
अस्मद्देशिकभूताय गुरवे करवै नमः ॥

The author of this work is not known. The work is a metrical recast of the Mīmāmsāsūtras. This work is called Citrapaṭa also. The first part, described separately in the Vedanta section, is Vyāsasūtrasañgati available only up to the I Adhyāya. The whole work seems to be called by the name 'Pūrvottaramimāmsāsaṅgati'. In the following Ms. the same work is called Mīmāmsāsiddhāntāryā. though there are only few Ārya verses in the work.

Dr. Burnell does not notice this work under this number.

The whole of this Ms. has been copied in this library. Vide T.V. No. 296. It may be here mentioned that lists of the 108 works of Appayyadikṣita contain a name 'Citrapaṭa'.

अस्यैव श्लोकरूपस्य ग्रन्थस्य प्रत्येकपुटसंख्यादानेन आदौ संनिवेशः कल्पितोऽस्त्यस्मिन् पुस्तके । अस्या एव मातृकायाः छायाचित्रात्मकानि द्वित्राणां पुटानां प्रतिरूपाणि च अस्मिन् पुस्तके संयोजितानि सन्ति प्रेक्षावतां उपयोगाय ।

एतद्व्याख्यारूपा मातृका तु कागजपत्रमयी । तस्याः तंजावूर् सरस्वतीमहाल् अङ्कसङ्केतः (इदमपि पूर्ववत् तंजावूर् सरस्वतीमहाल्मातृकालयसूचीपत्रात् संपादितमेव) इत्यादिकं अत्र संयोजितमस्ति प्रेक्षावतां सौकर्याय —

लघुवार्तिकटीका — लघुन्यायसुधा

6803. LAGHUVĀRTIKATĪKĀ LAGHUNYĀYASUDHĀ

J. L. Collection No. 948.

Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—423 (2–9 are missing). Lines-6 to a page. Script-Devanāgari No. of Granthas—6340. Autor—Uttamaślokatirtha. Incomplete. Not printed.

Beginning :

श्रीगणेशाय नमः

श्रीदक्षिणामूर्तये नमः

अर्थवादमन्त्रनामधेयानि न धर्मे प्रमाणानि । तेभ्यस्तत्प्रमित्यनुदयात् अर्थवादानाञ्चाख्यायिकादिप्रतिपादनेन निराकांक्षतया सन्निहितविध्येकवाक्यत्त्वायोऽगात् । अध्ययनविधेश्च तदंशे अदृष्टार्थत्वादिति चेत् मन्त्रार्थवादप्रमुखाः प्रमाणनीति वार्त्तिके ।

End :

आर्त्विज्यमध्ययनसम्पन्नास्त्रयोऽपि कुर्युः याजनाध्यापनप्रतिग्रहा ब्राह्मणस्यैव वृत्त्युपाया इति नियमस्य पुरुषार्थत्वात् । तदुक्तम् ॥ धने पुरुषः प्रत्यवेयान्न क्रतुवैगुण्यं (?) । अतस्त्रयोऽप्यृत्विजः सर्वकर्मस्विति चेदार्त्विज्यं ब्राह्मणा एव कुर्युः सर्वेषु कर्मसु ॥ ब्राह्मणानामार्त्विज्यमिति यज्ञसूत्रकारः क्रत्वर्थे वापि स्मरति । याज्ञवल्क्योऽपि ॥

'प्रतिग्रहोऽधिकोऽपि चित्रे याजनाध्यापने तथा' इति ।

श्रीमद्रामायणेऽपि

'क्षत्रियो याजको यस्य चण्डालस्य विशेषतः ।
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः ॥'

इति क्षत्रियस्य याजकत्त्वनिराकरणात्क्रतुवैगुण्यमेव दर्शितम् । 'राजयाजकयाज्यस्य यथा हविः ।' इति हविर्नाशेन क्रतुवैगुण्यमेव दर्शयति । लिं .... नि (?) च ब्राह्मणानामिदं हविरित्यादीनि तत्र तत्रोपलभ्यन्ते । तस्माद्ब्राह्मणानामेवार्त्विज्यम् ॥ २६ ॥

Colophon :

जैमिनीयन्यायपुष्पमालेयं परमेश्वर ।
त्वत्पादयुग्मभूषास्तु ऋजुना मां पथा नय ॥ १ ॥
विश्वेश्वरप्रेरितेन श्रितविश्वेशमूर्तिना ।
उत्तमश्लोकतीर्थेन तत्प्रीत्यै ग्रथिता स्फुटम् ॥ २ ॥

इति लघुवार्त्तिकटीकायां लघुन्यायसुधारूपायां द्वादशस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः । लिखितं हरिपाण्डे ब्राह्मण । गाम्भीरेरिदम् ।

Subject : Laghuvārttikaṭikā otherwise known as Laghunyāya-sudhā I-XII.

Remarks : The Ms. is in good condition, On the title page is given.

इदं पुस्तकं रंगभट्टभट्टगोस्वामिनाम् ॥

On the last sheet is given.

गंभीरराजात्मजस्येदम् ॥

Laghunyāyasudhā is a running comentary on a small scale on Kumārila's Vārttika. It is called in the colophon Laghuvārttikatikā. Its author is Uttama Śloka Tirtha. Perhaps he is identical with the Vedāntic writer of the same name the author of the Vedāntalaghusūtravārttik, etc., and the preceptor of Svayamprakāśayati.

अनयोरुभयोर्मातृकयोः अन्यासाञ्च कासाञ्चित् मुद्रणेन प्रकाशनं कर्तव्यमिति मतिरस्माकमासीत् । तंजावूर् सरस्वतीमहाल्मातृकालये उपपञ्चविंशतिवर्षकालं नैरन्तर्येण उषितवतामस्माकम् अयमभिलाषो नैसर्गिक एव । तत्काल एव बह्वीनां मीमांसामातृकाणां संमुद्रय प्रकाशनं कृतमस्माभिः । ततो निवृत्तानामप्यस्माकम् अनुपशान्तैवासीदपूर्वमातृकासंपादने प्रकाशने च प्रवृत्तिः । तिरुप्पदीकेन्द्रीय-संस्कृतविद्यापीठे 'मीमांशाशास्त्रचूडामणि' कक्ष्याप्रवचने उद्युक्तानामस्माकं तत्समकालमेव एतद्ग्रन्थ-संपादनमपि चिकीर्षितमभूत् । श्रीमन्तः नानाभाषाभिज्ञाः— सकलशास्त्रेषु कृतभूरिपरिश्रमाः सहृदय-श्रेष्ठाः ब्रह्मश्री डा० एम्. डी. बालसुब्रह्मण्यशास्त्रिणः तदानीं प्रधानाध्यक्षः (Principal) आसन् । तेऽपि स्वयम् एवंविधकर्मसु स्वरसत एव व्यापृताः अस्माकम् एतदपेक्षितसकलविधसौकर्यसंविधानेन साहाय्यमकुर्वन् । इदानीं तत्रैव उपकुलपतिपदमलंकुर्वाणाः श्रीमन्तः सर्वतन्त्रस्वतन्त्राः एन् एस्. रामानुजताताचार्या अपि नानाप्रकारसहयोगप्रदानेन सादरम् अस्मान् प्रोत्साहितवन्तः । तेत एतद्-ग्रन्थसंपादनं सुसाधमभूत् । तेषां विषये मदीयां कृतज्ञतां धन्यवादांश्च समर्पयामि ।

तंजावूर् सरस्वतीमहाल्मातृकालयः विश्वविख्यातः । तत्रत्यानामेव मातृकाणामन्यतमा इयं अद्यास्माभिस्संपाद्य मुद्रापिता । अस्याः मुद्रणालयोपयोगिप्रत्यादर्शसंपादनं कर्तुकामानामस्माकं, तदा-नीन्तननिर्वाहकाः सर्वप्रकारेणापि अपेक्षितं संव्यदधुः । किंचित्कालं सरस्वतीमहाल्ग्रन्थालय एव नैरन्तर्येण संनिधाय मातृकायाः प्रतिरूपसंपादनमस्माभिः कृतम् । अस्माकं प्रत्येकस्थानप्रदानेन— अपेक्षितसकलसौकर्यप्रदानेन च तैः बह्वपकृतं न विस्मरणार्हम् । अनन्तरञ्च एवमेव कार्यकरण-मस्माकमसाध्यमभूत् । अतः अस्मदभ्यर्थनामुररीकृत्य मातृकायाः समग्रायाः छायाचित्रग्रहणेन रूपान्तरं

संपाद्य दत्त्वा तिरुप्पदीविद्यापीठ एव स्वस्थाने वर्तमानानामस्माकम् एतद्ग्रन्थसंपादने ते साहाय्यमारचयन् । अपूर्वाणां नानाशास्त्रसंबन्धिनीनां मातृकाणां प्रकाशने नैरन्तर्येण व्यापृतानां तेषां नैसर्गिकमेवेदम् । तेषामपि विषये हार्दां कृतज्ञतां निवेदयामि ।

ग्रन्थपरिचयः

अयं ग्रन्थः पूर्वमीमांसाशास्त्रप्रमेयार्थानां संक्षेपेण प्रतिपादकः प्रकरणग्रन्थः । अगाधं मीमांसार्णवं प्रविविक्षूणां नौकायमानोऽयं पूर्वोत्तरमीमांसापारदृश्वना 'उत्तमश्लोकतीर्था'भिख्येन मीमांसकवरेण्येन विरचितः । द्वादशानामप्यध्यायानामर्थान् सूत्र-भाष्य-वार्तिकाद्यनुसारेण सुविशदं संक्षेपेणायं प्रतिपादयति । 'लघुवार्तिकम्' इति ग्रन्थकर्त्रैव दत्तनाम्नधेयम् अनुष्टुप्श्लोकात्मकं चतुश्शतादीषन्न्यूनश्लोकरूपं मूलं, तद्व्याख्यारूपं 'लघुन्यायसुधा' इति ग्रन्थकर्त्रैव व्यपदिष्टं गद्यरूपं व्याख्यानञ्चात्रान्तर्भवतः । अस्य व्याख्येयस्य 'लघुवार्तिक'स्य मातृकाः तत्र तत्र विलसन्ति — (१) तंजावूर् सरस्वतीमहाल्मातृकालये (२) मद्रनगरस्थराजकीयप्राच्यमातृकालये (३) मद्रनगरस्थअडयार् ग्रन्थालये (४) वाराणस्यां 'सरस्वतीभवन' ग्रन्थालये (५) प्रयागराजक्षेत्रे गङ्गानाथझासंस्कृतविद्यापीठे अन्यत्र च । व्याख्यारूपः 'लघुन्यायसुधा' ग्रन्थोऽपि तंजावूर् सरस्वतीमहालये वर्तते परिपूर्णः । मद्रनगरविराजमानप्राच्यमातृकालयोऽपि— तथा जम्मुनगरस्थमहाराजसंस्कृतविद्यापीठेऽपि । अत्र व्याख्याग्रन्थस्य प्रणेता 'उत्तमश्लोकतीर्थः' इत्यत्र न कोऽपि विवादः । मूलग्रन्थस्य तु कर्ता कः ? इत्यत्र विभिन्नोऽभिप्रायो वर्तते ।

ग्रन्थशैली

अस्मिन् ग्रन्थे समग्रस्य द्वादशाध्यायात्मकस्य पूर्वमीमांसाशास्त्रस्य प्रमेयम् अधिकरणरचनाप्रकारेणैव संक्षेपेण प्रतिपाद्यते । तत्तदधिकरणपूर्वपक्षावसाने 'इति प्राप्ते' इति पूर्वग्रन्थेषु लेखनं संप्रदायसिद्धम् । सिद्धान्तोपक्रमे च 'अभिधीयते' इति निर्देशः साम्प्रदायिकः । अस्मिन् ग्रन्थे तु न तथा । पूर्वपक्षावसाने, 'इति चेत्' इति लिख्यते । सिद्धान्तस्य अनुपदं लेखनं क्रियते । क्वचित्क्वचित् 'तन्न' इति पूर्वपक्षनिषेधार्थं पदमपि लिख्यते । लेखकः नूनं ग्रन्थकारादन्य एव । तत्र तत्र बहुधा अनुपपन्नं लेखनं परिदृश्यमानम् इममंशमाविष्करोति । अन्ते 'लिखितं हरिपाण्डे ब्राह्मणा' इति मातृकायामेव निर्दिश्यते ग्रन्थकर्तुरन्यो लेखक इति । प्राचीनग्रन्थेषु शास्त्रदीपिकामेव प्राधान्येनानुसरत्ययं ग्रन्थकारः । तत्र तत्र साक्षात् पङ्क्त्यनुवादोऽपि दृश्यते । कारिकारूपे मूलग्रन्थे विद्यमानानां पदानां तात्पर्यं सुनिपुणं विवृणोति । कारिकारूपमूलग्रन्थस्य श्लोकसंख्या ३८८ अलहाबाद्मुद्रणेऽपि ईषन्न्यूना श्लोकसंख्या भवति । ग्रन्थारंभे मङ्गलश्लोको न लिखितः । साक्षात् ग्रन्थलेखनमेव उपक्रान्तं दृश्यते । अवसाने परं श्लोकद्वयेन स्वाभीष्टदेवतां 'विश्वनाथं' ध्यायन् स्वनामापि उल्लिखति ।

ग्रन्थारम्भे इष्टदेवताध्यानरूपं–तन्नमस्काररूपञ्च मानसिकं–कायिकं च मङ्गलं नूनं कृतमनेन स्यात् वाचिकन्तु मङ्गलं अन्त एवोपलभ्यते। पादानाम् अध्यायानाञ्च आरम्भावसानादिक तत्र तत्र निर्दिश्यते। इयं लघुन्यायसुधा, श्रीपार्थसारथिमिश्रविरचितां शास्त्रदीपिकामेव भूयिष्ठमनुसरति। तत्रत्याः विषया एव अभिप्रायभेदास्पदेषु स्थलेषु अस्मित् ग्रन्थे आद्रियन्ते। श्रीपार्थसारथिमिश्रेषु सुदृढभक्तिरेतद्ग्रन्थकारस्य। ग्रन्थं परिशीलतयतामयं विषयः स्पष्टीभवेत्। किञ्चिदेवात्र प्रदर्श्यते।

द्वितीयाध्याये द्वितीयपादे सप्तममधिकरणं संख्याधिकरणमिति व्यपदिश्यते। अत्र 'तिस्र आहुतीर्जुहोति' इति वाक्यमुदाहृत्य वृत्तिकारेण विचारः कृतः। तत्र मन्दफलत्वमुद्भाव्य, 'सप्तदश प्राजापत्यान् पशूनालभते' इति वाक्यमादाय भाष्यकारेण अधिकरणरचना कृता। अस्मिन् ग्रन्थे पूर्वतनवाक्यमेकान्ततः उपेक्षितम्। समनन्तरवाक्यमेवोदाहृत्य विचारः कृतोऽस्ति।

तृतीयाध्याये प्रथमे पादे षष्ठमरुणाधिकरणम्। तत्र विचारो रुचिरोऽत्र।

चतुर्थाध्याये द्वितीयपादे द्वादशाधिकरणे 'अप्रतिग्रहीतृत्वे सति–त्यज्यमानद्रव्योद्देश्यत्वे सति विधिगम्यत्वं देवतात्वम्' इति देवतालक्षणम्।

चतुर्थाध्याये तृतीयपादे पञ्चमं विश्वजिदधिकरणम्। शास्त्रदीपिकानुसारेण अधिकरणरचना कृतात्र। चतुर्थाध्याये तृतीयपादे सप्तमाधिकरणे, विश्वजिद्यागस्य स्वर्गफलकत्वनिरूपणक्रमः रुचिरतरः। अत्र 'सर्वथापि त एवोभयलिङ्गात्' इत्युत्तरमीमांसासूत्रमुदाहृतं ग्रन्थकारेण।

चतुर्थाध्याये चतुर्थपादे चतुर्थमधिकरणं 'आमनहोमानां साङ्ग्रहण्यङ्गत्वं प्रतिपादयति। अत्र शास्त्रदीपिकानुसारी विचारोऽस्मिन्नपि ग्रन्थे कृतः। पञ्चमाध्याये प्रथमपादे षष्ठमधिकरणं पाठक्रमं निरूपयति। तत्र निरूपणे विशिष्य विचारः कृतोऽत्र। पञ्चमाध्याये प्रथमपादे नवममधिकरणं मुख्यक्रमनिरूपणपरम्। अत्रापि विचारे विशेषोऽस्मिन् ग्रंथे

दशमाध्याये अष्टमपादान्ते द्वित्रेष्वधिकरणेषु उपांशुयाजाख्ययागविषयको विचारो वर्तते। तत्र एतस्मिन् ग्रन्थे १६-अधिकरणे, १७-अधिकरणे च उपांशुयाजे देवतानियमः—तस्य पौर्णमासीकालमात्रे अनुष्ठानं वैकल्पिकविष्ण्वादिदेवताकत्वञ्च प्रतिपाद्यते। (पुटे २८२–२८३)

सूत्रभाष्यादिपूर्वग्रन्थेष्वप्ययमेव प्रकार आदृतः। अधिकरणसंख्यायान्तु किञ्चित्तारतम्यं दृश्यते। शास्त्रदीपिकायामप्ययमेव प्रकारो दृश्यते। अमावास्याकाले उपांशुयाजो नास्तीत्यत्र 'तथा चान्यार्थदर्शनम्' (पू.मी. १०-८-५८) इति सूत्रेण प्रमाणवचनमुपस्थापयति भगवान् जैमिनिः। 'चतुर्दशामावास्यायामाहुतयो हूयन्ते–त्रयोदशामावास्यायाम्' इतीदमेव वचनं तत्र प्रमाणम्। अनेन वचनेन

अमावास्यापौर्णमासीकालिकयोर्दर्शपूर्णमासयागयोः समुदिताहुतिसंख्या बोध्यते। अत्र च आहुति-पदेन 'वषट्'कार समकालं क्रियमाणो होमः निर्दिश्यते। तथाविधाश्च होमाः पौर्णमास्यां चतुर्दश वर्तन्ते—पञ्च प्रयाजाः, द्वावाज्यभागौ, आग्नेयोपांशुयाजाग्नीषोमीयाख्यानि त्रीणि प्रधानानि स्विष्टकृदेकः त्रयोऽनूयाजाः-इत्येवं चतुर्दशाहुतयो भवन्ति। अमावास्यायान्तु एवं न भवति। त्रयोदशैवाहुतयस्तत्र भवन्ति। तत्र उपांशुयाजाभावात्। तद्यथा-प्रयाजाः पञ्च, द्वावाज्यभागौ, द्वे एव प्रधानाहुती (आग्नेयपुरोडाशस्य एका-ऐन्द्रदधिपयोयागयोः संप्रतिपन्नदेवताकत्वेन एक एव सोमः) स्विष्टकृदेकः, त्रयोऽनूयाजाः, इति।

यदि अमावास्यायामप्युपांशुयाजः स्यात् तदा तत्रापि चतुर्दशैवाहुतयः-प्रधानाहुतीनां तिसृणां संभवात्। एवं सति 'त्रयोदशामावास्यायाम्' इति वचनमनुपपन्नार्थकमापद्येत।' इति तस्य सूत्रस्यार्थः भाष्यादिग्रन्थेषु विवृतः। शास्त्रदीपिकायामप्ययमेव मार्ग आदृतो दृश्यते। लघुन्यायसुधाग्रन्थश्च भूयिष्ठं शास्त्रदीपिकामेवानुसरति। अतोऽत्रापि स एव मार्ग आश्रितः। 'पर्वद्वयेऽप्युपांशुयाजश्चेत्, 'चतुर्दश पौर्णमास्यामाहुतयो भवन्ति-त्रयोदशामावास्यायाम्' इति वषट्कारान्ते आहवनीयाधिकरणक-होमानां संख्यानुवादिलिङ्गानुपपत्तिश्च। तस्मात्पौर्णमास्यामेवोपांशुयाजः।' इति एतद्ग्रन्थपङ्क्तयः।

श्रीखण्डदेवमिश्रविरचितायां भाट्टदीपिकायाम् अयमंशः दूषितो दृश्यते। अमावास्यायामप्युपांशुयाजानुष्ठानम् अस्तीति शाङ्खायनशाखावचनानुसारेण स्थापयति खण्डदेवमिश्रः। आहुतिसंख्यातारतम्यबोधकवचनस्य, एतद्वचनबलात्, वैकल्पिकत्वमुपांशुयाजस्य कल्पयित्वा निर्वाहः कर्तव्य इति। (भाट्टदीपिकायां १०-८-१६ पुटे ७७६) अध्वरमीमांसाकुतूहलवृत्तावपि एतदधिकरणावसाने अयं प्रश्नः उपपादितो दृश्यते। तत्रत्याः पङ्क्तयः-'यद्यपि कौषीतब्राह्मणे' अग्निं प्रथमं देवतानां यजति, अथ पौर्णमास्यामग्नीषोमौ यजति तौ वा उपांश्वनिरुक्तौ भवतः' इत्युक्त्वा, 'अमावास्यायामिन्द्राग्नी यजति, सन्नयन्नमावास्यायामिन्द्रं यजति-असन्नयन् पुरोडाशावान्तरेणोपांश्वाज्यस्य यजति-असन्नयन् सान्नाय्यस्यान्तरेणोपांश्वाज्यस्य यजति' इति श्रुतं, तथापि शाखान्तरविषयेऽधिकरणप्रवृत्तिः' इति। (अध्वरमीमांसाकुतूहलवृत्तिः-पुटे १५७९ १०-८-२०)इति सूत्रतात्पर्यवर्णनावसरे तत्र लिखितमस्ति—

> 'ये त्वाश्वलायनाः कालविधिमनिच्छन्तः पर्वद्वयेऽप्युपांशुयाजमाहुः, ते कथमिव 'त्रयोदशामावास्याया'मिति लिङ्गं समर्थयेरन्? कालविध्यभावे च पौर्णमासीवाक्येनानुवादासंभवात् पूर्णमासशब्देनापि न फले विनियुज्येतेति प्राधान्यमुपांशुयाजस्य न स्यात्, आज्यभागादिवदङ्गता स्यात्-इत्यास्तां तावत्' इति।

(शास्त्रदीपिका-१०-८-१८ पुटे ७९०) खण्डदेवमिश्रात् वासुदेवदीक्षिताच्च प्राचीनः एतद्ग्रन्थकारः निर्विशङ्कं शास्त्रदीपिकाकारोक्तं पक्षमेव स्वग्रन्थे प्रतिपादयति।

हविरार्तिन्यायः

अस्मिन् ग्रन्थे १४९ तमे पुटे ६-४-६ अधिकरणे अयं न्यायः निरूप्यते। अस्मिन्नधिकरणे सूत्रभाष्यवार्तिकादिव्याकरणग्रन्थेषु आकरग्रन्थेषु केनचित्प्रकारेण न्यायशरीरं निरूपितं वर्तते। तत्र व्याख्यातॄणां नैकविधोऽभिप्रायो वर्वर्ति। 'अन्यतरहविरार्तिरेवात्र निमित्तमिति सूत्रभाष्यादिगतं निर्णयं पश्चात्तनव्याख्यातारो न स्वरसतया अङ्गीकुर्वन्ति। तैत्तिरीयशाखायां दर्शपूर्णमासप्रकरणे अयं विषयो विविच्यते। सायं दुग्धनाशे एकं प्रायश्चित्तं प्रथममुच्यतेऽत्र। अनन्तरं प्रातर्दुग्धनाशे अन्यत्प्रायश्चित्तमुच्यते। ततः उभयहविर्नाशे तृतीयं प्रायश्चित्तं विभिन्नतया विधीयते। अयं तृतीयप्रायश्चित्तविधिरेवैतदधिकरणविचारविषयः। अस्याप्यन्यतरहविर्नाशविषयत्वे पूर्वोपदिष्टैकैकहविर्नाशप्रायश्चित्तानतिरिक्तत्वापत्तिः—पुनः पृथगुपदेशवैयर्थ्यञ्च।

अत्र शास्त्रदीपिका, भाष्याद्यनुसारेणैव वर्तते। पार्थसारथिमिश्रैरेव प्रणीतं तन्त्ररत्नम्। तत्र अन्यथा सिद्धान्तितम्। 'उभयार्तिरेव निमित्तं, किन्तदुभयमित्याकांक्षायां प्रकरणात् हविरिति लभ्यते इति। भाट्टदीपिकायां श्रीखण्डदेवमिश्रेणाप्ययमेव पक्षः 'वस्तुतस्तु ..... ' इत्यादिना स्वीकृतः। अध्वरमीमांसाकुतूहलवृत्तिकारस्तु,तैत्तिरीयशाखातोऽन्यत्र सूत्रभाष्याद्युदाहरणविषयभूतं वाक्यम् अस्ति इति कथयन्, 'तादृशं वाक्यं शाखान्तरे वर्तते' इति सूत्रप्रवृत्तेरेवानुमेयम् इति वदति।

मीमांसाभाष्यकारेणाप्यलिखिते तैत्तिरीयशाखास्थेऽस्मिन्वचनेऽपि तदनुसारात् युगपदुभयार्तिरेव निमित्तं युक्तेत्याह वस्तुतस्त्विति' (शंभुभट्टीये ६-४-६ पुटे ७६१) इति भाट्टदीपिकाव्याख्याता शम्भुभट्टोऽपि उभयार्तेर्निमित्तत्वं द्रढयति।

'वस्तुतस्तु उभयार्तिरेवात्र निमित्तम्। न च तस्यापि नित्यत्वान्निमित्तत्वानुपपत्तिः, प्रकरणादेव हविर्विशेषविषयत्वोपपत्तेः। इतरथा भवन्मतेऽपि दधिपयोविषयत्वानुपपत्तेः। अतो दोहद्वयनाश एवेदं प्रायश्चित्तम्। हविः पदमेव त्वविवक्षितम्। अधिकरणन्तु हविः प्राप्त्यभावं कृत्वा चिन्तया' इति भाट्टदीपिकापङ्क्तयोऽत्र भाव्याः। तन्त्ररत्नेऽप्येवमेवोक्तम्। अत एवायं उत्तमश्लोकतीर्थः भाष्यशास्त्रदीपिकाद्युपपादितमेवार्थं स्वरसतः अधिकरणे प्रतिपाद्य, अन्ते लिखति — 'तैत्तिरीयश्रुत्यनादरेणेदमधिकरणम्' इति। अतिसंक्षिप्तमपीदं वाक्यं पूर्वतनतन्त्ररत्नाख्यग्रन्थसमालोचनमनेन कृतमिति सुष्ठु बोधयति। एकादशाध्याये चतुर्थपादे विंशमधिकरणं हविष्कृदाह्वानविचारात्मकम्। अत्रापि विचारे विशेषोऽस्मिन् ग्रन्थे वर्तते।

द्वादशाध्याये द्वितीयपादे सप्तममधिकरणं सुब्रह्मण्याह्वानविषयकम्। अत्रापि अस्मिन् ग्रन्थे विशेषो वर्तते। द्वादशाध्याये तृतीयपादे सप्तदशमधिकरणं क्रियमाणानुवादिमन्त्रविचारात्मकम्। अत्रापि एतस्मिन् ग्रन्थे विशेषविचारः कृतो वर्तते।

ग्रन्थकर्ता

ग्रन्थान्ते, 'विश्वश्वरप्रेरितेन श्रितविश्वेशमूर्तिना ।
उत्तमश्लोकतीर्थेन तत्प्रीत्यै ग्रथितः स्फुटम् ॥'

इति श्लोके स्वनाम 'उत्तमश्लोकतीर्थ' इति ग्रन्थकारः स्वयमेव निर्दिशति । काशीक्षेत्रविराजमान विश्वनाथ' स्वामिभक्तोऽयमिति स्पष्टं ज्ञायते अस्मात् श्लोकात् । काशीपुण्यक्षेत्रवासी उदग्देशीयो ब्राह्मण इति च ऊहितुमस्त्यवसरः । 'तीर्थ' पदं अन्ते सन्निवेश्य (उत्तमश्लोकतीर्थः इत्यादिरीत्या) नामधेयपरिकल्पनं दक्षिणदेशे न खलु दृश्यते । अयञ्च 'स्वयंप्रकाशयतेः' आचार्य इति वदन्ति । यथा पूर्वमीमांसायां, तथैव उत्तरमीमांसायामपि प्ररूढं ज्ञानमस्यास्तीति ज्ञायते । उत्तरमीमांसार्थानां संक्षेपेण प्रतिपादको ग्रन्थोऽप्यनेन कश्चित् विरचित इति ज्ञायते । तस्य 'नाम' 'स्वरूपम्' इत्यादिक मन्वेष्टव्यम् । यदि तदपि लभ्यते, तदा अमन्दमानन्दं विन्देमहि ।

नवमांध्याये प्रथमपादे चतुर्थमधिकरणं 'देवताधिकरणम्' इति व्यपदिश्यते । 'देवता वा प्रयोजयेदतिथिवत् भोजनस्य तदर्थत्वात्' इत्येदधिकरणपूर्वपक्षसूत्रम् । 'अपि वा शब्दपूर्वत्वात् यज्ञकर्म स्याद् गुणत्वे देवतास्तुतिः' इति सिद्धान्तसूत्रम् । (पूर्वमीमांसादर्शने ९-१-६-९) इदं प्रसिद्धमेवाधिकरणम् । यागेनाराधिता देवता तृप्ता सती यजमानाय स्वर्गाधिफलं प्रयच्छतीत्यतो देवताप्रीत्यर्थानां प्रोक्षणावघातादिधर्माणां देवताप्रयुक्तत्वमेव, नापूर्वप्रयुक्तत्वमिति पूर्वपक्षं प्रापय्य, अपूर्वप्रयुक्तत्वमेव धर्माणां युक्तं न तु देवताप्रयुक्तत्वम् । देवता यागस्याङ्गभूता-व्रीह्यादिद्रव्यवत् । अतः तस्याः प्राधान्यं फलप्रदातृत्वञ्च नैवोपपद्यते इति धर्माणामपूर्वप्रयुक्तत्वं सिद्धान्तयति सूत्रकारः । अत्र भाष्ये देवताविग्रहादिसत्ता महतासंरम्भेण दूषिता दरीदृश्यते । आस्तिकाग्रेसराणां वैदिकानां महतीयं शिरोवेदना । वेदार्थपरिज्ञानस्य मीमांसाशास्त्रमेकमेव निस्समाभ्यधिकम् आलम्बनम् । तादृशेऽस्मिन्नेव शास्त्रे यदि देवतासद्भावादिकं निराक्रियते, तर्हि जितं नास्तिकैः । प्रत्यक्षादिभिर्देवतासद्भावादिकमधिगन्तुमशक्नुवाना वयं वेदमेव तत्र प्रमाणीकुर्महे । तत्रैव चेत् सा निराक्रियते ; का गतिः ? ईश्वरस्यापि देवतास्वन्यतमस्य समानन्यायेन सद्भावो निराकृत-एवात्र भवति । अतो 'निरीश्वर'वादित्वं मीमांसकानां संपद्यते । अन्यशास्त्रकाराः इमं महत्तरं विपर्यासं न सहन्ते । ईश्वरस्य सर्वासामन्यासां देवतानाञ्च सद्भावं महता संरम्भेण ते साधयन्ति । जैमिनिं पूर्वमीमांसासूत्रकारं व्यासशिष्यत्वेन प्रसिद्धं ते स्वपक्षानुगुण्येन नयन्ति । एतदधिकरणसूत्राणां देवताविग्रहादिसत्त्वेऽपि उपपन्नतरत्वं तैः प्रपञ्चितमस्ति । अस्मिन्नधिकरणे श्रीखण्डदेवमिश्रः स्वकीयभाट्टदीपिकाग्रन्थे, 'इति जैमिनिमतनिष्कर्षः । मम त्वेवं वदतो वाणी दुष्यतीति हरिस्मरणमेव शरणम्' इति लिखन्

देवताविग्रहाद्यस्वीकारे अनाश्वासं स्पष्टमुद्घोषयति । तद्व्याख्याता शम्भुभट्टश्च, 'ननु सर्वदेवनानां विग्रहस्वीकारे नास्तिकत्वापत्तिरित्यत आह-जैमिनिमतनिष्कर्ष इति' इतीदं वाक्यमवतारयति । श्रीमन्निगमान्तमहादेशिकैरपि एवमेव निर्विण्णहृदयैः-'सेश्वरमीमांसा' इत्येको ग्रन्थः विरचितः । एवमेवैतद्ग्रन्थकारोऽपि देवताविग्रहादिनिराकरणे स्वस्यातृप्तिं दर्शयति । अस्मिन् ग्रन्थेऽपि इदम् अधिकरणं नवमाध्याये प्रथमपादे स्वस्थाने समुपतिष्ठते । अधिकरणं तु 'सप्तमम्' अत्र । पूर्वग्रन्थेषु तु 'चतुर्थमिदमधिकरणम् । पादादौ केषञ्चिद्वर्णकाणां पृथगधिकरणत्वेन परिगणनमत्र कारणम् । तत्र ग्रन्थकारो लिखति, 'अत्र यद्वक्तव्यं, तत् शारीरके 'फलमतमुपपत्तेः' इत्यधिकरणे निपुणतरमुपपादयिष्यत इति नात्रोच्यते' इति । शारीरकमीमांसायां तृतीयाध्यायस्य द्वितीये पादे अन्तिममिदमधिकरणं 'फलाधिकरणम्' इति व्यपदिश्यते । तत्र सिद्धान्तप्रतिपादकम् उपक्रमस्थं सूत्रमिदं, पूर्वतन्त्रे नावमिकाधिकरणे शाबरभाष्यादौ उपपादितस्य अर्थस्य साक्षात् खण्डनरूपम् । अयमेव ग्रन्थकारः शारीरकशास्त्रस्यापि एवंविधं प्रकरणं ग्रन्थं लिखितवान् । तत्र प्राप्तावसरत्वादस्य विषयस्यात्रोपपादनं न कृतमनेन । श्रीपार्थसारथिमिश्रविरचितां शास्त्रदीपिकामेव सश्रद्धमनुसृत्य इमं ग्रन्थं लिखितवानयं, अस्मिन्विषये परं तत्रानादरं प्रदर्शयति । 'मन्दधियस्तु श्रद्धालवस्तात्पर्यमजानाना भ्राम्यन्तु नाम देवता फलं प्रयच्छतीति । वस्तुतः कर्मण एव तत् ।' इति अस्मिन्नेव देवताधिकरणे पार्थसारथिमिश्रविलिखितां पङ्क्तिं देवताविग्रहादिनिराकरणे संरम्भातिशयञ्च तस्य जानात्येवायम् । तथापि तत्रानादरेण तद्दूषणप्रवृत्तो ब्रह्ममीमांसाशास्त्रे तत्करिष्यामीति प्रतिजानीते । स ग्रन्थः कुत्रापि स्यादेव नूनम् । तत्र अयं विषयोऽवश्यमेव सहृदयैरनुभाव्यः । तथा चतुर्थाध्याये तृतीयपादे सप्तमाधिकरणे विश्वजिद्यागस्य स्वर्गफलकत्वसाधनपरे, 'सर्वथापि त एवोभयलिङ्गात्' इति उत्तरमीमांसासूत्रं प्रमाणत्वेनोपन्यस्यत्ययं ग्रन्थकारः । पूर्वमीमांसान्यायानामेवोत्तरमीमांसायाम् उपजीवनं प्रसिद्धम् । न तु क्वचिदपि वैपरीत्यमस्य दृष्टम् । अस्मिन्नेव ग्रन्थे नूतनतया अयं संप्रदायस्समाश्रितो दृश्यते ।

ग्रन्थकर्तुः कालः

उत्तमश्लोकतीर्थाभिधस्य एतद्ग्रन्थप्रणेतुः कालः चतुर्दशशतकक्रैस्तवाब्द इति (१४–ए.डि.) ज्ञायते । स्वग्रन्थे न कुत्रापि स्वकालमयं निर्दिशति । तंजावूर् सरस्वतीमहाल् मातृकालये कागजपत्रेषु लिखितोऽयं ग्रन्थस्समुपलभ्यते । तमेवावलंब्य अस्माभिरस्य संपादनं कृतम् । तस्य अङ्कसङ्केतः, J.L. 928/D. 6803 इति । अत्र विद्यमानस्य J.L. इत्यक्षरद्वयस्य 'जम्बुनाथभट्ट लाण्डगो' इति पूर्णं रूपम् । महाराष्ट्रब्राह्मणस्य कस्यचित् नामधेयमिदम् । अयञ्च महाराष्ट्रब्राह्मणः ऋग्वेदशाखाध्यायी तंजावूर्महाराष्ट्रराजवंशपुरोहितः आसीत् । शरभोजी–II महाराष्ट्रराजः एकोनविंश-

क्रैस्तवशतकादौ तंजावूर्नगरे राजा अभूत्। 800 A.D. to 183८ A.D. अस्य कालः, जम्बुनाथभट्टलाण्डगे नामकः तत्पुरोहितोऽपि एतत्कालिक एव। अयं स्वयं प्रौढविद्वान् सन् अन्येषां महापण्डितानां स्वसमकालीनानां स्वप्राक्कालीनानाञ्च ग्रन्थान् सश्रद्धं सङ्कलयामास। उत्तरभारते काशी-पुण्यक्षेत्रादारभ्य दक्षिणभारते तंजापुरपर्यन्ते विस्तीर्णे प्रदेशे अयं मातृकासङ्कलनं कृतवान्। तदा-नीन्तनस्य शरभोजी-II राज्ञः अपूर्वग्रन्थसंपादने अनितरसाधारणी श्रद्धा आसीदिति सुविदितमेवैतत्। काशीक्षेत्रयात्रां कृतवानयं महाराजः यात्राकाले तत्र तत्र ग्रामेषु नगरेषु च निवसतां विद्वद्वरेण्यानां सकाशात् सहस्रसंख्याकाः मातृकाः समादाय सुरक्षितास्ताः तंजापुरं नीत्वा स्वकीये राजवंशीय-मातृकालये प्रतिष्ठापयामास। अत एव तस्य मातृकालयस्य नामधेयं एतन्नामघटितमेव परिकल्पितम्। 'तंजावूर्महाराजाशरभोजीसरस्वतीमहाल्लैब्ररि' इत्येवास्य मातृकालयस्य परिपूर्णं नाम। तत्पुरोहितः जम्बुनाथभट्टलाण्डगे इत्ययमपि 'यथा राजा तथा प्रजाः' इति न्यायेन स्वयमपि मातृकासङ्कलन-मकरोत्। तथा संपादिताः मातृकास्सर्वाः स्वस्थाने सुरक्षिताः स्थापयांबभूव। 'विजयविलासः' इति नामापि कल्पितं तस्य मातृकागारस्य तेन। तत्सुतः 'मानं भट्टः' इति विसृतः तास्सर्वाः मातृकाः 'सरस्वतीमहाल्' मातृकालयाय प्रददौ। इमा एव मातृकाः तत्र J. L. Collection इति नाम्ना निर्दिश्यन्ते। तदन्तर्भूतैवेयं 'लघुन्यायसुधा' एवञ्च एकोनविंशक्रैस्तवशतकारम्भे संगृहीतस्य अस्य ग्रन्थस्य प्रणयनम् अष्टादशशतके वा ततोऽपि पूर्वकाले वा वृत्तं स्यात्। अयं उत्तमश्लोकतीर्थः स्वयंप्रकाशयतेर्गुरुरिति ज्ञायते। सुप्रसिद्धानाम् अप्पय्यदीक्षितेन्द्राणां कालनिर्णये न कोऽपि क्लेशोऽस्ति। तत्समकालीनस्य 'चिन्नबोम्म'राजस्य काल चारित्रकैः दृढतरं निर्णीतो वर्तते। स एवैतेषामपि कालः। ७२-वर्षमित एतेषां जीवितकालः। 1520 to 1592A.D. इति केचित् एतेषां कालं निर्णयन्ति। अन्ये तु 1550 to 1620 A.D. इति। सर्वदा षोडशशतककालीनोऽय-मित्यत्र नास्ति विशयलेशोऽपि। एतदवलम्बनेन प्रकृतग्रन्थप्रणेतुः उत्तमश्लोकतीर्थस्य कालं निर्णीय तत्त्वं उद्घाटयितुं प्रयतामहे। ग्रन्थकर्तुः कालनिर्णयेन सहैव 'लघुवार्तिक' नाम्नः मूलग्रन्थस्य कर्ता कः? इत्ययमपि विषयोऽविभागेन दृष्टत्वान्निरूप्यते।

पूर्वमीमांसाभाष्यस्य विस्तृतं वार्तिकं प्रणीतवान् कुमारिलभट्ट एवास्य लघुवार्तिकस्यापि प्रणेता इति केषाञ्चिदभिप्रायः। अन्योऽप्यभिप्रायोऽस्ति। प्रथमतः इमं पक्षं निरूप्य अनन्तरं पक्षान्तर-निरूपणे प्रवेक्ष्यामः।

कुमारिलभट्टपादानां 'वार्तिककारः' इत्यपि नामान्तरेण व्यवहारः मीमांसाशास्त्रग्रन्थेषु सुप्रसिद्धः। तत्कृतेः शाबरभाष्यव्याख्यानस्य द्वादशाध्यायव्यापिनः त्रीणि नामानि। (१) श्लोकवार्तिकम् (२) तन्त्रवार्तिकम् (३) टुप्टीका इतीमान्येव तानि। अस्य वार्तिकग्रन्थस्य विस्तारातिशयेन गुरुत्वं

संभावितमेव। प्रकृतग्रन्थस्य च 'लघुवार्तिकं' इति नाम दृश्यते। विशेषणानां व्यावर्तकत्व-स्वाभाव्यात्, अत्रत्येन 'लघु'पदेन 'गुरु'रेव व्यावृत्तिः कल्पयितव्या भवति। 'वार्तिकम्' इति नाम-धेयन्तु उभयत्र तुल्यम्। अतो 'गुरु'वार्तिकप्रणेता कुमारिलभट्ट एवास्य 'लघुवार्तिकस्या'पि प्रणेता इति केचिदभिप्रयन्ति। 'इष्टं हि विदुषां लोके समासव्यासधारणम्' अयमेव ग्रन्थः, अलहाबाद् गङ्गानाथझासंस्कृतविद्यापीठेन मुद्राप्य प्रकाशितो विराजते। तत्र पूर्वोक्त एव पक्षः साभिनिवेशं स्थापितो दृश्यते। केन्द्रीयसंस्कृतविद्यापीठग्रन्थमालायाः सप्तविंशं पुष्पं १९८७ तमे क्रिस्ताब्दे मुद्राप्य प्रकाशितं विराजते। तत्रत्यमुखपत्रे —

राष्ट्रीयसंस्कृतसंस्थानम्, नवदेहली

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला–२७

कुमारिलस्वामिप्रणीतम्

लघुवार्तिकम्

संपादकः

डा० कमलनयनशर्मा

इति विस्पष्टं लिखितं मुद्रापितञ्च वर्तते। तंजावूर् सरस्वतीमहाल्ग्रन्थालयीयमातृकासूचीपत्रे च लघु-वार्तिकटीका लघुन्यायसुधाख्यमातृकाप्रस्तावे अन्ते —'Laghu Nyāyāsudha is a running commentary on a small scale on Kumarila's Vartika' इति मुद्रापितमस्ति (पुटे 5019)। एतद्ग्रन्थसंपादकाः डा० कमलनयनशर्मामहोदयाश्च स्वकीयायां 'प्रस्तावनाय' उपक्रमे;

"अयि मीमांसाविद्यावदातसहृदयविद्वांसः। समुपह्रियतेतमां तत्रभवतां भवतां समक्षं, स्कन्दावतारभट्टपादकुमारिलविरचितं विद्वत्तल्लजगोष्ठीषु बहुकालादेव सबहुमानं परि-चर्चितमिदं 'लघुवार्तिकं' नाम ग्रन्थरत्नम्। अयञ्च ग्रन्थः मीमांसाशास्त्रीयशृङ्खलाया अत्यावश्यकावयवभूतः चिरकालात् विनष्ट इवासीदिति, विद्वत्सु चर्चा आसीदस्य ग्रन्थरत्नस्य, परन्तु न केनापि दृष्टः प्रकाशितग्रन्थरूपेण। परमसौभाग्यस्यायं विषयः मीमांसककुलाय यदिदं ग्रन्थरत्नं प्रकाश्यते विज्ञैः विद्यापीठीयैरधिकारिभिः।"

इति लिखन्ति। सुमहानेतेषामभिनिवेशः अस्य 'लघुवार्तिक' ग्रन्थस्य कुमारिलभट्टप्रणीतत्वे। इमं विषयमत्रैव पश्चात् सुनिपुणं विचारयिष्यामः।

द्विनामा चायं ग्रन्थः। अस्यैव 'चित्रपटः' इति, 'पूर्वमीमांसाकारिकाचित्रपटः' इति च नामान्तरमस्ति। ग्रन्थ एक एव नाम्न्येव परं भेदः। तंजावूर् सरस्वतीमहाल्ग्रन्थालये तालपत्रमये

अस्मिन् ग्रन्थे, 'पूर्वमीमांसाकारिकाचित्रपटः' इतीदमेव नाम लिखितमस्ति। अलहाबाद्विद्वांसः श्रीकमलनयनशर्माणः स्वकीयप्रस्तावनायां लिखन्ति — 'तस्मात् 'पूर्वमीमांसाकरिकाचित्रपटो'वेति नामोट्टङ्कनं भ्रमोत्पादकमेव प्रतिभाति' इति। कुमारिलभट्टविरचितत्वपक्षपातिनामेतेषां, 'वार्तिक'पद-घटितं ग्रन्थनामैवाभिमतं भवति। तेन हि स्वरसतः वार्तिककारस्य कुमारिलस्योपस्थितिर्जायते।

अस्मन्मीमांसाचार्यैः सुगृहीतनामधेयैः प्रातस्मरणीयैः टि.टि. ताताचार्यवर्यैः पञ्चनदसंस्कृत-महाकलाशालामलंकृतवद्भिः १९२५ तमे वर्षे 'मीमांसाभ्युदयो'नाम कश्चन अतिप्रौढो विमर्शग्रन्थो लिखितो मुद्रापितश्च वर्तते। तत्र 'अनुबन्धे' ३९ तमे पुटे तैर्लिखितमस्ति —

'लघुवार्तिक'मित्यपि किञ्चित् कुमारिलकृतं आत्रच्ट् निर्दिशति'

इति। प्रसिद्धतरसूचीपत्रसङ्कलने कृतं निर्देशं तथैवानूदितवन्त एते। न तु स ग्रन्थो दृष्टचर एतेषाम्। अत एव निर्देशानुवादमात्रेणोपरता एते, तदुपरि न किमपि व्यलिखन्। अत इदं ज्ञायते—आपात-प्रतीतौ 'वार्तिकम्' इति ग्रन्थनाम प्रसिद्धान् कुमारिलभट्टपादानेव स्मारयति–तदवलम्बनेनैव पश्चात्तना तदीयामिमां कृतिं प्रख्यापयन्ति इति।

प्रयागराजपुण्यक्षेत्रे विद्यमानायाम् एतद्ग्रन्थमातृकायाम्, अस्य ग्रन्थस्य कुमारिलभट्टप्रणीतत्वं स्पष्टतरं निर्दिष्टमस्ति इति, तद्ग्रन्थसंपादकाः श्रीमन्तः डा० कमलनयनशर्ममहोदया लिखन्ति। अयं पक्षः 'पूर्वं' एव भवति। न तूत्तरः। 'उवाच पवनव्याधेर्गिरमुत्तरपक्षयन्' इतिवत्। अत्र भूयस्योऽनुपपत्तयः विद्यन्ते। ताः तटस्थानां वाचकमहाशयानां पुरस्तादुपस्थापयामः।

ततः पूर्वम् अवश्यवक्तव्यं कञ्चन विषयं प्रतिपादयामः।

प्रयागराजपुण्यक्षेत्रे श्रीगङ्गानाथझासंस्कृतविद्यापीठे प्रकाशितोऽयं ग्रन्थो द्वित्रिवर्षेभ्यः पूर्वम्।

तिरुपदीकेन्द्रीयसंस्कृतविद्यापीठस्य प्रकाशनमिदमस्मत्संपादितस्य **तस्यैव ग्रन्थस्य**। विद्या-पीठाधिकृतानां–तत्र तत्रत्यानां विदुषाञ्च परस्परमकृतसङ्केतानामेवेयं प्रवृत्तिः, 'पिष्टपेषण'रूपे अस्मिन् प्रारम्भे निदानमिति नेदं तिरोहितं समेषाम्। इतः परमेवंविधाः प्रारम्भाः यत्नतः परिहर्तव्याः।

परन्तु अस्मिन् 'पिष्टपेषणे' एकः आश्वासहेतुरस्ति। 'दिष्ट्या धूमाकुलितदृष्टेरपि यज-मानस्य अग्नावेवाहुतिः पतिता' इति महाकविकालिदासश्रीसूक्तेरत्र स्मरणं जायते। इलहाबाद्ग्रन्थः अनाद्यन्तः। अस्मदीयस्तु सादिःसान्तश्च–संपूर्णः इति यावत्। अत्र विषये इलहाबाद्ग्रन्थसंपा-दकानां 'डा० कमलनयनशर्मामहोदयानां व्यवसायोऽभिनन्दनीयः। अनादिम् अनन्तञ्च व्याख्यानग्रन्थं ते बहुप्रयत्नपूर्वकं संपाद्य मुद्रापितवन्तः। ग्रन्थस्य मनोहरत्वेनाकृष्टास्ते प्रेक्षावतामुपकाराय इत्थमकार्षुः।

'उत्पत्स्यते मम च कोऽपि समानधर्मा' इति महाकवेः भवभूतेः श्रीसूक्तिः तेषां मनसि नूनं प्ररूढा आसीत्। 'असंपूर्णं गन्थं पश्यन्तोऽन्ये विद्वांसः कदाचित् कुतश्चित् संपूर्णग्रन्थप्रकाशनं नूनं कुर्युः। इदमसंपूर्णग्रन्थप्रकाशनमेवान्यान् विदुष्टः संपूर्णग्रन्थप्रकाशनाय प्रचोदयेत्।' इति तेषां सहृदयधौरेयाणां तात्पर्यं, दिष्ट्या अस्मत्प्रकाशनेन साफल्यं प्रापितम्। अत्रोऽत्र न क्लेशस्यावकाशः, अपि तु प्रमोदस्यैव।

इलाहाबाद्ग्रन्थप्रकाशने प्रधानसंपादकाः (General Editor) डा० जि. सि. त्रिपाठिमहोदयाः स्वकीये संक्षिप्त आंग्लभाषामये उपोद्घाते —

'Dr. Kamalanayana Sharma, the editor of this work, firmly believes that 'Laghuvārtikam' has really come out of the pen of the great Kumarila a critcal and thorough study of the text will enable the scholars to determine, whether the work can be realy be assigned to Kumarila. May be later scholar completes this work by presenting the relevent manuscripts from Varanasi and Tanjore."[1] इति लिखितवन्तः।

उभयं तत्रभवता प्रतीक्षितं, यच्च ग्रन्थस्यास्य संपूर्णस्य प्रकाशनं – यच्च प्रसिद्धकुमारिलभट्टादन्य एवास्य लघुवार्तिकस्य कर्ता स्यात् इति। दिष्ट्या उभयस्याप्यस्य अस्मदीयमेतद्ग्रन्थप्रकाशनं पूरकं सम्पन्नमिति मोमुद्यामहे। अनेनैव प्रकाशनेन आद्यो विषयो निर्व्यूढः। द्वितीयमपि समुचितैर्हेतुभिः निरूपयिष्यामः।

तत्र, व्याख्यारूपो 'लघुन्यायसुधा' नामकोऽयं ग्रन्थः तत्रभवता 'उत्तमश्लोकेन' विरचितः इत्यत्र न संदेहलवस्याप्यवकाशः।

'विश्वेश्वरप्रेरितेन श्रितविश्वेशमूर्तिना।
उत्तमश्लोकतीर्थेनु तत्प्रीत्यै ग्रथितः स्फुटम्॥

इति ग्रन्थान्ते 'स्फुटं' स्वनामनिर्देशात्। 'लघुवार्तिकमि'ति समाख्याते श्लोकात्मके संक्षिप्त मूलग्रन्थ एव विवादो वर्तते। अयं भट्टकुमारिलप्रणीत एव इति इलहाबाद्मुद्रणसंपादकानां डा० कमलनयनशर्मणां दृढोऽभिनिवेशो लक्ष्यते। स्वसंपादितस्य ग्रन्थस्य प्रथमतरे पत्रे (Title page) संशयविपर्ययोरवकाशं विनैव तैः सुनिश्चिततया —

कुमारिलस्वामिप्रणीतम्

लघुवार्तिकम्

इत्येव मुद्रापितं विराजते। 'प्रस्तावनाया'श्च महता संरम्भेण एतत्प्रसाधिकायुक्तयः तैः प्रपञ्चिताः।

---

[1] Vide—foreword to 'लघुवार्तिक' by G. C Thripati, Allahabad editor.

तदन्ते च :

'गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥'

इति श्लोको लिखितो दृश्यते । द्वेधा अस्य तात्पर्यं वर्णयितुं शक्यते —

१) मदीया उत्प्रेक्षा प्रामादिकी स्यादपि कदाचित् ।

२) अत्र ये दोषमुद्भावयन्ति, ते दुर्जनाः । ये समादधति, ते सज्जनाः इति । अनयोः कतरदभिप्रेतं तत्रभवतां लेखकानामिति न वयं जानीमः । स्वाभिप्रायं परम् अत्र विशदीकर्तुं प्रयतामहे ।

'लघुवार्तिक' नामा अयं ग्रन्थः कुमारिलभट्टादन्येनैव प्रणीतः स्यादित्यस्माकमभ्यूहः । तत्र प्रथमतरो हेतुः इलाहाबादप्रकाशनस्य प्रधानसंपादकस्य सम्भावनैव । श्रीकमलनयनशर्मणां 'प्रस्तावनां' सम्यक् परीक्षितवान् अयं प्रधानसंपादकः लिखति —

'Dr. Kamalanayana Sarma, the editor of this work, firmly believes that 'Laghuvartikam' has really come out of the pen of the great Kumarila. A critical and through study of the text will enable the scholars to determine, whether the work can realy be assigned to Kumarila.' इति ।

(१) इमाः पङ्क्तयः श्रीकमलनयनशर्मणाम् अभ्यूहे अस्य प्रधानसंपादकस्य अनाश्वासं सूचयन्ति नूनम् । तस्य मनसि किं वा कारणमभिसंहितमत्रासीदिति न वयं विद्मः । एतेषामभिप्रायमेवावलम्ब्य समुचितहेत्वन्तरान्वेषणे प्रवर्तामहे ।

(२) 'पूर्वमीमांसाचित्रपट' नामकं ग्रन्थमधिकृत्य तत्रभवान् व. अ. रामस्वामिशास्त्री श्रीवाचस्पतिमिश्रविरचित 'तत्त्वबिन्दु' नामकग्रन्थोपोद्घाते आंग्लभाषामये लिखति 'अप्पय्यदीक्षित-कृतिष्वन्यतमः अयं पूर्वमीमांसाचित्रपटः' इति । तस्य व्याख्यानरूपां 'लघुवार्तिकटीका–लघुन्यायसुधा' इतीमाञ्च कृतिं नामतो निर्दिशति तत्रैव, परन्तु व्याख्याग्रन्थनिर्मातुर्नाम न निर्दिष्टमत्र । कारणं किमिति न ज्ञायते । तत्रत्याः पङ्क्तयः —

His Mayūkhāvalī is a running commentary on the Sāstradeepikā. It is however presumed that one descendant of Appayya Dīkṣita of the same name might have written this work; but this also found included in the list of 108 works of Appayya Dīkṣita. His 'Chitrapaṭā'[1] is a summary in verse of the contents of the Adhikaranas of the 12 Adyāyas of the Pūrvamīmāmsa Śāstra like Maṇḍanamisra's 'Mīmāmsāṣāstra nukramaṇī. It is called by its commentator, 'Laghuvārtika' as its commentary is known as 'Laghunyāya Sudhā.' इति ।

अयम् आंग्लभाषामयः उपोद्घातः, 'मीमांसकरत्न' 'मीमांसाविशारद' 'वेदशिरोमणिः' इत्यादि-

1 It is now in course of publication in parts in the JOR, Madras (1934 and 1935)

बिरुदबृन्दालङ्कृतेन, तदानीं (in 1936 A.D) अण्णामलैविश्वविद्यालये अध्यापकपदमलङ्कृतवता, M.A. बिरुदधारिणा वि.ए. रामस्वामिशास्त्रिमहाशयेन १९७ पुटेषु निपुणतरं विलिखितो विराजते। अस्य उपोद्घातस्य नाम 'पूर्वमीमांसाशास्त्रम्' इत्येव दत्तं लेखकेन। अत्यद्भुतमिदं मीमांसाशास्त्रसर्वस्व-प्रतिपादकं विदुषामुपजीव्यं भवति। 'महामहोपाध्याय' Prof. S. कुप्पुस्वामिशास्त्रिवर्याः त्रिषु पुटेषु आङ्ग्लभाषामयं प्रस्तावमस्य लिखितवन्तः। तथा अण्णामलैविश्वविद्यालयसंस्कृतविभागाध्यक्षेण (तदानीं) 'K. रामपिषोरटी' नामकेन च त्रिषु पुटेषु संक्षिप्तः उपोद्घातोऽत्र विलिख्य (आङ्ग्लभाषायां) योजितोऽस्ति। अस्मिन् अतिगहने विमर्शे क्वापि कोणे 'कुमारिलकृतिः लघुवार्तिकम्' इति निर्देशो न दृश्यते। 'पूर्वमीमांसाचित्रपट' नाम्नोऽस्य श्लोकरूपस्य ग्रन्थस्य अप्पय्यदीक्षितकृतित्वमेव तु प्रसाध्यते। इतः ५५-वत्सरेभ्यः पूर्वम् उल्लिखितोऽयं विषयः– 'अप्पय्यदीक्षितेन्द्राणामेव कृतिरियं इति। अयं द्वितीयो हेतुः।

३) 'केटलागस्–केटलागोरम्' इति सर्वसूचीपत्रसङ्कलनात्मकः कोशो मद्रनगरविश्वविद्यालये विराजते। तत्र इमाः पङ्क्तयस्सन्ति —

'चित्रपट' MIM metrical summary of the 12 chapters of Jaimini's Pūrvamīmāmsā Sūtras by Appayya Deekshita–I son of Rangarājādhvarin. इति।

अत्रापि विस्पष्टतया अप्पय्यदीक्षितकृतिरेव 'चित्रपटः' इति जोघुष्यते। अयं तृतीयो हेतुः। अत्रैव एतद्दृढीकरणाय, तंजावूर् सरस्वतीमहाल्मातृकालये Dr. A. C. Burnell अनेन लिखितं सूचीपत्रं, मद्रनगरविराजमानम् अडयार् मातृकालयसूचीपत्रम्, उज्जयिनीमातृकालयस्थसूचीपत्रम् इत्यादीनि सुबहूनि संप्रतिपत्त्यर्हाणि सूचीपत्राण्यपि प्रदर्शितानि विलसन्ति।

४) तंजावूर् सरस्वतीमहाल्मातृकालये अयं 'चित्रपटः' वर्तते। तस्य अङ्कसङ्केतः B 9883 b/D 6975 इति तालपत्रमयी मातृकेयम्। लघुवार्तिकपदेन व्यपदिश्यमान एवायं 'चित्रपट' ग्रन्थोऽपि। नानयोर्भेदः। नामैवान्यत्। अस्य स्वरूपनिरूपणावसरे सूचीपत्रे 'Author ?' इति प्रश्नमात्रं सूचयित्वा कर्तृनामनिर्देशं विनैव इतरविषयाणां परं यथासम्प्रदायं निरूपणं कृतमस्ति। अन्ते च —

'The author of this work is not known. .... It may be here mentioned that list of the 108 works of Appayya Dikshita contain a name 'Chitrapata'.'

इति लिखितमस्ति। अतः अप्पय्यदीक्षितकृतिरेवेयमित्यत्र इदमपि प्रमाणीभवति।

५) तंजावूरसरस्वतीमहाल्मातृकालय एव, इदानीमस्माभिः संपादितस्य प्राकाश्यं नीयमानस्य ग्रन्थस्याधारभूता कागजमयी मातृकाप्यस्ति। तस्याः अङ्कसङ्केतः–J. L. Collection No. 928 D 6803 इति। 'लघुवार्तिकटीका लघुन्यायसुधा' इति तत्र अस्याः मातृकायाः नाम दत्तमस्ति।

अस्याः प्रणेता 'उत्तमश्लोकतीर्थः' इति स्पष्टं निर्दिष्टमस्त्यत्र। अत्रापि श्लोकरूपस्य 'लघुवार्तिक' 'चित्रपट' शब्दाभ्यां तत्र तत्र निर्दिष्टस्य ग्रन्थस्य, व्याख्यानग्रन्थस्य मध्ये मध्ये लेखनं कृतमस्ति। अस्या मातृकायाः स्वरूपनिरूपणावसाने –

'Laghunyāyasudha is a running commentary on a small scale on 'Kumarila's Vārtika.' It is called in the colophon 'Laghuvārtikaṭīkā.' Its author is 'Uttamaśloka-tīrtha'. Perhaps he is identified with the vedantik writer of the same name, the author of the 'Vedantalaghusūtravārtikas' etc. and the preceptor of 'Swyamprakāśayatī'. इति लिखितमस्ति।

अत्र कुमारिलभट्टस्य संक्षिप्तरूपो ग्रन्थः 'लघुवार्तिक' मिति निर्देशः कृतः। अयं 'वार्तिक' पददर्शनसञ्जातव्यामोहमूलक एव। पूर्वप्रदर्शितहेतूनामनन्यथासिद्धत्वात्।

६) मद्रनगरविश्वविद्यालयप्राध्यापकेन– R. तङ्गसामिमहाशयेन 1980 तमे क्रिस्ताब्दे अद्वैत-वेदान्तग्रन्थानां ग्रन्थकर्तॄणां च स्वरूपकालादिविमर्शरूपो [1]ग्रन्थ एको मुद्राप्य प्रकाशितः। तत्र प्रकृत-ग्रन्थप्रणेतुः उत्तमश्लोकतीर्थस्य प्रस्तावे लिखत्येषः, '1250 to 1350 A.D. अस्योत्तमश्लोकस्य काल' इति। अन्येषां मते 1400 A.D. अस्य कालः स्यादित्यपि सम्भावयति। प्रेक्षावतां संप्रत्ययाय तत्रत्याः पङ्क्तयः अधो लिख्यन्ते – पुटे 104

51–लघुवार्तिकम्।

वेदान्तसूत्रलघुवार्तिकनामा अयं ग्रन्थः आनुष्टुभेण[2]छन्दसा विरचितः। कुत्रचिदेकेन पादेन एकैकस्याधिकरणस्य, कुत्रचिदेकेन श्लोकेन अधिकरणार्थस्य च सङ्ग्राहकः। चौखांबामुद्रणालये मुद्रितः। अस्य व्याख्यापि मूलकृतैव कृता 'न्यायसुधा'ख्या। 'लघुन्यायसुधा' इत्यपि व्यवहारः। अस्य कर्ता 'उत्तमश्लोक' इति – शुद्धानन्दशिष्य इति च ग्रन्थात् ज्ञायते। शुद्धानन्दस्य शिष्यः आनन्दगिरिरिति च प्रसिद्धम्। यदि स एवायं शुद्धानन्दः स्यात्, तर्हि उत्तमश्लोकः आनन्दगिरि-सामयिकः सतीर्थ्यश्चेति, त्रयोदशशतकापरार्धादारब्दकालवासीति (1250–1350 A.D.) निश्चेतुं शक्यते। श्रीकण्ठशास्त्री तु, 'लक्ष्मीधरगुरोर्नाम 'अनन्तानन्दगिरिः' इति। सः 'आनन्दगिरिः' इति व्यवह्रियते। लक्ष्मीधरशिष्येषु शुद्धानन्दः कश्चनासीत्। तस्य च 'स्वयंप्रकाशः शिष्यः'। इति भारतीयत्रैमासिकैतिहासिकपत्रिकायाश्चतुर्दशतमे भागे (I.H.Q. vol. XIV) प्रतिपादयति। यद्येवं, शुद्धानन्दशिष्यौ स्वयंप्रकाशोत्तमश्लोकौ इति स्वीक्रियते, तर्हि चतुर्दशशतकीयोऽयमिति (1400 A.D.) सिद्ध्यति। वाराणसीवासी चायमुत्तमश्लोकः।' इति।

---

1 Advaita Vedanta Literature—A Bibliographical survey by Dr. Thangasami, University of Madras—1980

2 णत्वं कथम् ?

तथा अस्मिन्नेव ग्रन्थे पुटे - 105

(४) लघुवार्तिकव्याख्या-लघुन्यायसुधा

लघुवार्तिकस्य व्याख्यात्मकोऽयं ग्रन्थः वारणासीसंस्कृतग्रन्थमालायां मुद्रितः। अस्य कर्ता मूलग्रन्थकारः उत्तमश्लोकः शुद्धानन्दशिष्यः त्रयोदशशतकीय इति प्रपञ्चितं पुरस्तात्'

इति;

तथा पुटे-134

(472) लघुवार्तिकम् .... उत्तमश्लोकः

(473) लघुवार्तिकव्याख्या न्यायसुधा उत्तमश्लोकः।

इति;

तथा पुटे - 231

(९) लघुवार्तिकम् अस्य कर्ता न सुरेश्वर;। परं तु उत्तमश्लोक इति निश्चयः।

इति,

तथा पुटे - 321

(२४) उत्तमश्लोकः (1250 to 1350 A.D.) उत्तमश्लोकोऽयं शुद्धानन्दशिष्य इति ग्रन्थात् ज्ञायते। आनन्दगिरिस्तु शुद्धानन्दस्यापि शिष्यः। यद्येवं, तर्हि आनन्दगिरिसामयिकः सतीर्थ्यश्चेति सिद्ध्यति। श्रीकण्ठशास्त्री तु, आनन्दगिरिकालं, (1114-1228 A.D.) इति (I.H Q. Vol. XIV) वदति। लक्ष्मीधरगुरोः 'अनन्तानन्दगिरिः' इति नाम। लक्ष्मीधरस्य शिष्येषु शुद्धानन्दः कश्चनासीत्; यस्य च शिष्यः स्वयंप्रकाशः इति प्रतिपादयति। यद्येवं, शुद्धानन्दशिष्यौ स्वयंप्रकाशोत्तमश्लोकौ द्वावपि सामयिकौ सतीर्थ्यौ चेति (1400 A.D.) कालिकाविति सिद्ध्यति। ग्रन्थेषु, विश्वनाथस्य विशालनयननाथस्य च नमस्कृतिप्रकाशनात् वाराणसीवासीति ज्ञायते।

इति

तथा १) लघुवार्तिकम् (B.S.S. 205)

वेदान्तलघुवार्तिकापरनामायं ग्रन्थः आनुष्टुभेण[1] छन्दसा रचितः, कुत्रचिदेकेन पादेन एकैकाधिकरणस्य सङ्ग्राहकः मुद्रितश्च।

२) न्यायसुधा (B.S.S. 205)

लघुवार्तिकव्याख्यात्मकोऽयं ग्रन्थः, 'लघुवाक्यसुधा' 'लघुन्यायसुधा' इत्यपि व्यवह्रियते। इति

तथा पुटे - 273

---

1 णत्वं कथम् ?

(1520-1593 A.D.) इति अप्पय्यदीक्षितवंश्यैः महालिङ्गशास्त्रिभिः प्रतिपादितम् । (J.O.R. Vol. III p. 160)

इति

तथा पुटे-276

19-चित्रपटः (लघुवार्तिकम्) J.O.R. Vol. III मुद्रितः ।

इति,

तथा पुटे-277

47 - पूर्वमीमांसाविषयसंग्रहदीपिका । (J.O.R. Vol. IX 321)

इति च ।

७) अस्य 'चित्रपट' ग्रन्थस्य मुद्रापणं कृतं पूर्वमेव मद्रनगरे 1934 A.D. संवत्सरे । J.O.R. इति संक्षिप्तनाम्ना व्यवह्रियमाणायां 'Journal of Research' इति सञ्चिकायाम् अयं मुद्रापितः । संपादकश्चास्य मुद्रापणस्य, T. R. चिन्तामणिः इति सुप्रसिद्धस्तदानीन्तनो विद्वान् । तस्मिन्मुद्रणे व्याख्याग्रन्थो 'लघुन्यायसुधा'ख्यो नान्तर्भावितः । कारिकारूपं मूलमात्रं मुद्रापितं वर्तते । तत्र आरम्भे -

'चित्रपटः'

'श्रीमदप्पय्यदीक्षितविरचितः'

इति विस्पष्टं मुद्रापितं वरीवर्ति । अन्ते च 'इति श्रीमदद्वैतविद्याचार्य-
श्रीरङ्गराजाध्वरिसूनोः अप्पय्यदीक्षितस्य कृतौ चित्रपटे
द्वादशोऽध्यायः ।

चित्रपटः समाप्तः

इति स्पष्टं मुद्रापितमस्ति । अस्मिन्मुद्रणे ग्रन्थस्यास्य 'लघुवार्तिक'मिति नाम न कुत्रापि निर्दिश्यते । अनेन अप्पय्यदीक्षितविरचित एवायं ग्रन्थ इति निश्चीयते ।

८) तथा, 1933 तमे क्रिस्ताब्दे, महाविदुषा, ब्रह्मश्री को. वै. सुब्रह्मण्यशास्त्रिणा सम्पाद्य मुद्रापितः 'अप्पय्यदीक्षितेन्द्रविजयः' इति ग्रन्थः । तत्र अप्पयदीक्षितविरचितानां शताधिकानां ग्रन्थानां नामानि निर्दिष्टानि सन्ति । तस्यां पट्टिकायां पुटे 103

'मीमांसायाश्चित्रपटस्तथाविधिरसायनम्'

इति,

तथा पुटे 105

'मीमांसाधिजिगमीषूणामत्यन्तमुपकारकः चित्रपटः' इति च मुद्रापितं वर्तते। अत्र लघुवार्तिकमिति एतस्य ग्रन्थस्य नामोल्लेखो नास्ति। परन्तु स एवायं ग्रन्थः। नामैवान्यत्। अतोऽयं न कुमारिल भट्टविरचित इति निश्चीयते।

एतावता अस्मिन्विषये तटस्थानाम् अभिप्रायः प्रदर्शितः। इतः परं ग्रन्थस्यान्तः प्रविश्य परीक्षणं क्रियते।

९) लघुवार्तिकमिति व्यपदिश्यमानोऽयं ग्रन्थः न कुमारिलभट्टप्रणीतः। कथम्? श्लोकात्मके अस्मिन् ग्रन्थे असकृत् 'वार्तिककारमतम्' तेनैव नाम्ना निर्दिश्यते। भाष्यकारमतं च भाष्यकारस्य नामनिर्देशपूर्वकं तत्र तत्र निरूप्यते। 'कुमारिलभट्टादन्यत्वं' एतद्ग्रन्थकर्तुः भाष्यकारादन्यत्वमिव स्वरसतः प्रतीयते एभिर्निर्देशैः।

'मन्त्रार्थवादप्रमुखाः प्रमाणानीति वार्तिके' इति श्लोकः प्रथमाध्यायद्वितीयपादोपक्रमे वर्तते। इलाहाबादमुद्रणेऽपि अयं श्लोकार्धभागः एवमेव विराजते।

अत्र व्याख्याने. 'वार्तिकग्रहणेन भाष्ये अर्थवादमात्रस्य प्रामाण्यमत्रोक्तमिति दर्शितम्' इति पङ्क्तिरस्ति। 'वार्तिके' इति प्रथमपुरुषतात्पर्येण लिखन् ग्रन्थकारः, न वार्तिककार एव भवेत्कदाचिदपि। 'मत्कृतौ' इति हि निर्देशस्तदा सम्भाव्यते।

'आविरोधादाचयवात् भिद्यन्ते वार्तिके नयाः' इत्ययं श्लोकार्धभागः प्रथमाध्यायतृतीयपादे दृश्यते। इलहाबाद्मुद्रणेऽपि अयं श्लोकार्धभागः वर्तत एव। परन्तु 'अविरोधादौचयवात् भिद्यन्ते वार्तिके नयाः।" इति अशुद्धं मुद्रणं तत्र दृश्यते। काममस्त्वेतत्।

अत्र लघुन्यायसुधाख्ये व्याख्याग्रन्थे —

" एवं यथाभाष्यं आपादपरिसमाप्तेरधिकरणान्यनुक्रम्य, विरोधाधिकरणात् यववराहाधिकरणान्तं वार्तिककारीयं विशेषं दर्शयितुमाह –

"अविरोधादाचयवात् भिद्यन्ते वार्तिके नयाः।' इति, इत्यवतारिकापूर्वकं श्लोकानां व्याख्यानं क्रियते। लघुवार्तिकप्रणेता कुमारिलश्चेदभविष्यत् 'भिद्यन्ते मत्कृतौ नयाः' इत्येव निरदेक्ष्यत। न त्वेवमस्ति! एवं प्रथमाध्याये चतुर्थपादे (१७) भूमाधिकरणे " तस्मान्मन्त्रानुवादेनोपधानविधिः – इति भाष्यकारः। लिङ्गप्रकरणयोरुपधानैकान्तिकत्वाभावात्' उपधानस्य चयनविध्यर्थसिद्धत्वात् मन्त्रे नियमविधिः इति वार्तिककारः। उभयथापि सृष्टिशब्दः सृष्टिमन्त्रसमुदायगतं सृष्टिबहुत्वमुपलक्ष्य तद्वति सृष्ट्यसृष्टिसमुदाये गौणः इति। तदाह 'क्वचिद्भूमा' इति। इति व्याख्यानपङ्क्तयो वर्तन्ते।

अत्र लघुवार्तिकप्रणेतुः कुमारिलभट्टादन्यत्वं व्याख्याता विस्पष्टमवगमयति। 'इति वार्तिककारः' इत्यत्र, 'इति स्वमतं' इति हि तदा लिखितव्यं व्याख्यात्रा ?

१०) एवम् अस्मिन् लघुवार्तिकग्रन्थे ग्रन्थकर्तुः वार्तिककारात्कुमारिलभट्टादन्यत्वं तत्र तत्र प्रतिपाद्यते। विस्तरपरिजिहीर्षया तादृशानि स्थलानि परम् अत्र निर्दिशामः। रसिकाः सहृदयाः ताटस्थ्यमविमुञ्चन्तः वस्तुतत्त्वं विभावयन्तु।

तृतीयाध्याये प्रथमपादे द्वादशाधिकरणे 'वार्तिकेनास्त्ययं नयः'

तथा 3-4-10 'प्रतिग्रहो निषेधार्थो वार्तिकेनास्त्ययं नयः'

3-4-19 'अथ वार्तिके' कृत्स्ने हविषि ....'

3-5-7 'मतं वार्तिककारस्य सुब्रह्मण्यं विनेति तु'

4-2-14 'लक्षणानीमानि भाष्ये प्रयोगप्रक्रियास्वापि।
वार्तिके त्वश्रुते यागे सौर्यादौ यागकल्पना॥'

9-4-3 'न्यायद्वयं वक्ष्यमाणं टुप्टीकायां प्रवर्तते'

9-3-1 'साङ्गान्तेऽग्निविमोको हि वार्तिके संप्रदर्शितः'

11-1-1 'भाष्येऽङ्गोपकृतिस्तथा'

'इदमधिकरणं निष्प्रयोजनम्। उपकारभेदाभेदयोः अनुष्ठानविशेषाभावत्। इति वार्तिककारोऽधिकरणद्वयमेकीचकार।'

इत्यादिस्थलेषु पूर्वोपदर्शितवाक्यसमानानुपूर्वीकाः श्लोका दृश्यन्ते। अत्र चक्षुर्व्यापारयितव्यं प्रक्षावद्भिः।

११) लघुन्यायसुधाकारस्य उत्तमश्लोकतीर्थस्य कालः 14 A.D. इति स्पष्टं ज्ञायते। कुमारिलभट्टपादानां कालस्तु, सप्तमं शतकं (7 A.D.) षट्शतसंवत्सरकालः अन्तराले वर्तते। सुदीर्घे कालेऽस्मिन् अयमुत्तमश्लोकतीर्थ एवास्य 'लघुवार्तिकस्य व्याख्यां कृतवान्। अतिसंक्षिप्तोऽयं लघुवार्तिकग्रन्थो व्याख्यानसापेक्ष इति स्पष्टमेतत्। श्लोकस्यैकस्य अर्धांशेन पादेन तदेकदेशेनापि अस्मिन् ग्रन्थे मीमांसान्यायास्संगृह्यन्ते। तत्र व्याख्यानस्य सुतरामावश्यकता वरीवर्ति। यदीयं प्रसिद्धस्य कुमारिलभट्टस्यैव कृतिरभविष्यत्, षट्शतसंवत्सरपरिमिते अतिदीर्घे अन्तरालकाले, तदा तदा विलक्षणशेमुषीकतया विख्यातैः मीमांसकवरेण्यैः इयं अव्याख्याता नैवाभविष्यत्। अतोऽपि नेयं कुमारिलकृतिरिति निश्चीयते। अस्य लघुवार्तिकस्य अप्पय्यदीक्षितविरचितत्वेऽपि न तावदौचित्यमस्ति। उत्तमश्लोकतीर्थेन लघुन्यायसुधाप्रणेत्रैव इदं लघुवार्तिकमपि प्रणीतमित्यस्माकमभिप्रायः। अस्मिन्नपि तृतीयपक्षे उपपत्तयस्सन्ति।

उत्तमश्लोकतीर्थः पूर्वोत्तरमीमांसाधिकरणार्थसंग्राहकं 'लघुवार्तिकं' नामानं श्लोकरूपं ग्रन्थं, तद्व्याख्यां लघुन्यायसुधां च रचितवानिति, स चतुर्दशशतककालिकः अप्पय्यदीक्षितात् प्राचीनः इति च ज्ञायते। विशेषणानां व्यावर्तकत्वस्वाभाव्यात् अत्रत्यो 'लघु' शब्दः 'गुरु' व्यावर्तको भवति। 'गुरु' वार्तिकं कुमारिलभट्टपादैर्विरचितम्, उत्तमश्लोकविरचितं तु 'लघु'वार्तिकम्। भट्टसोमेश्वरेण 'गुरु' वार्तिकव्याख्या 'गुरु'न्यायसुधा विरचिता। उत्तमश्लोकेन तु 'लघु'न्यायसुधा विरचिता। भट्टकुमारिलेन भट्टसोमेश्वरेण च कृतौ व्याख्येयव्याख्यानरूपौ ग्रन्थौ पूर्वमीमांसामात्रविश्रान्तौ। उत्तमश्लोकविरचितस्तु ग्रन्थः कृत्स्नस्य पूर्वोत्तरमीमांसात्मकस्य शास्त्रस्य संग्राहकः इति चावगम्यते।

तंजावूर् मातृकालयसूचीपत्रे, 'चित्रपट' इत्यस्य ग्रन्थस्य विवरणावसरे, उत्तमश्लोकप्रणीतत्वेन संभाव्यमानस्यास्य 'कर्ता न ज्ञायते' इति निर्दिष्टमस्ति। कारणम्? मातृकायां ग्रन्थकर्तुर्निर्देशाभाव एव। अथापि तस्यामेव मातृकायां विद्यमानोऽन्यो ग्रन्थः तत्र प्रदर्शितोऽस्ति। तस्य च नाम, 'व्याससूत्रकारिका' इति निर्दिष्टम्। 'व्याससूत्रसङ्गतिः' इत्यपि, 'मीमांसासिद्धान्तार्या' इत्यपि अयमेव ग्रन्थो व्यपदिश्यते तत्र। अयं च ब्रह्मसूत्रार्थविवरणपरः। 'चित्रपट'स्तु पूर्वमीमांसार्थसंग्रहपरः। सम्पूर्णस्यास्य ग्रन्थस्य नाम 'पूर्वोत्तरमीमांसासङ्गतिः' इत्यपि तत्रैव निर्दिष्टमस्ति। अनेनेदं विस्पष्टं ज्ञातुं शक्यते (अज्ञातेन) एकेनैव ग्रन्थकारेण पूर्वोत्तरमीमांसार्थसङ्ग्राहकतया विरचितोऽयं ग्रन्थ इति। तत्रैव 'लघुवार्तिकटीका-लघुन्यायसुधा' इति ग्रन्थविवरणावसरे ग्रन्थकर्ता 'उत्तमश्लोकतीर्थः' इति जोघुष्यते। कुतः? मातृकायां कर्तृनाम्नो निर्दिष्टत्वादेव। 'चित्रपटः' 'लघुवार्तिकम्' इति च नार्थान्तरम्। अतः 'चित्रपट' ग्रन्थप्रणेता उत्तमश्लोकतीर्थ एवेति सिद्ध्यति। पूर्वमीमांसायामेव विश्रान्तः कुमारिलभट्टः व्याससूत्रार्थसंग्रहात्मकं ग्रन्थं रचयितुं नैव प्रवर्तेत। अतोऽपि पूर्वोत्तरमीमांसाव्यापी अयं ग्रन्थः न कुमारिलकृतः इति निश्चप्रचम्।

अथास्य श्लोकरूपस्य मूलभागस्य 'चित्रपटः' इति नाम कदा सञ्जातम्? कथन्तरां 'चतुरधिकशत' प्रबन्धनिर्मातुरप्पय्यदीक्षितस्य ग्रन्थनामावल्यां 'चित्रपट'स्याप्यन्यतमत्वेन निर्देश उपपद्यते? कथन्तमां च [1]J.O.R. सञ्चिकायां तदानीन्तनविमर्शकधौरेयेण अतिप्रौढविदुषा, T. R चिन्तामणि महाशयेन निर्विशङ्कम् अप्पय्यदीक्षितविरचितत्वेन 'चित्रपट'ग्रन्थस्य मुद्रापणं प्रकाशनं च कृतं विराजते?

अस्य संपादकः चिन्तामणिमहोदयः तदाधारतया पञ्च मातृकाः अवलम्बितवान्। ताः स्वकीये उपोद्घाते विवृणोति।

---

1 Vide J.O.R. 1934— तत्र इत्थं मुद्रापितं वर्तते "चित्रपटः"

॥ श्रीमदप्पय्यदीक्षितविरचितः ॥

इत्युपक्रमे ;

इति श्रीमदद्वैतविद्याचार्यश्रीरङ्गराजाध्वारिसूनोः
अप्पय्यदीक्षितस्य कृतौ चित्रपटे

द्वादशोऽध्यायः

इत्युपसंहारे च मुद्रितं वर्तते। लघुवार्तिकमिति कृतनामधेयस्य अनुष्टुप्श्लोकात्मकस्य, लघुन्यायसुधाख्यव्याख्याग्रन्थमूलभूतस्य आदितः आन्तं मुद्रापणमत्र कृतमस्ति। अतो नाममात्रे भेदः 'चित्रपटस्य' 'लघुवार्तिकस्य' च इत्येतत् दृढीकृतं भवति। संपादकः चिन्तामणिमहाशयश्च स्वकीये संक्षिप्ते उपयुक्ततरे आङ्ग्लोपोद्घाते उत्तमश्लोकतीर्थं, तच्छिष्यं स्वयंप्रकाशयतिञ्च निर्दिशन् अस्य 'चित्रपट'स्य 'लघुवार्तिक'मिति नाम, व्याख्यात्रा उत्तमश्लोकतीर्थेन कृतमिति वदति। मूले व्याख्याने च 'लघु' शब्दस्संयोजितोऽत्र। अतोऽपि ज्ञायते उत्तमश्लोकतीर्थ एवोभयोः प्रणेता इति। 'चित्रपट' इति नामत्वस्य अर्वाचीनैरेव कल्पितम् – तथा अप्पय्यदीक्षितकृतत्वञ्च। व्याख्याता उत्तमश्लोकतीर्थः 'चित्रपटः' इति ग्रन्थनामा नैवाजानात्। अन्यथा कथं तस्य नाम्नः परित्यागो घटते? तासां द्वे अडयार् मातृकालयीये। एका [1]तंजावूर् सरस्वतीमहाल्ग्रन्थालयीया। द्वे मद्रनगरस्थप्राच्यमातृकालयीये। एतासु आदावन्ते च कर्तृनामानिर्देशः अडयार् मातृकयोः – सरस्वतीमहाल्मातृकायां वा नास्ति। मद्रनगरप्राच्यमातृकालयीयां परमस्ति। इदमेवाश्रित्य आदावन्ते च अप्पय्यदीक्षितकृतमिति मुद्रापितं तेन। कासुचिन्मातृकासु कर्तृनामनिर्देशाभावस्य किं कारणम्? इति न विचारितं तेन।

अडयार् मातृकालयीयमातृकायां, अप्पय्यदीक्षितविरचितानां विधिरसायनोपक्रमपराक्रमादिग्रन्थानां मध्ये 'चित्रपट'स्यापि लेखनं कृतमस्ति इति अस्मत्प्रियसुहृदः डा० एस्. शङ्करनारायणमहाशयाः ज्ञापयन्ति। अतः तन्मध्यपतितस्तद्ग्रहणेन गृह्यते इति न्यायमवलम्ब्य चित्रपटस्यापि अप्पय्यदीक्षितविरचितत्वमास्थेयमापतति किमिदमेवालम्? एवं – क्वचिदत्यन्ताविद्यमानस्य – क्वचित् कुशकाशवलम्बनेन साधयितव्यस्य क्वचिदेव प्रत्यक्षस्य कर्तृनामनिर्देशस्य विनाविचारं सहसा मुद्रापणं कृतं संपादकेन। इदं पश्यन्तोऽन्येऽपि संशयलवं विनैव अप्पय्यदीक्षितकृतमिदमिति विश्वस्युरेव। अस्माकमपि तादृश्येव परिस्थितिरादावासीत्। अलहाबादमुद्रितस्य अस्यैव ग्रन्थस्य यदृच्छया दर्शनं जातमस्माकम्। तत एव कारणात् संदेहो जातः। तत्र हि भट्टकुमारिलप्रणीतत्वमस्य चित्रपटस्य सुधीरमुद्घुष्यते।

एकस्यैव ग्रन्थस्य द्वौ कर्तारौ न कथञ्चन भवितुमर्हतः। तस्मादन्यतरपक्षस्याप्रामाणिकत्वं अवर्जनीयम्। तच्च कतरस्य? इति प्रश्नोऽस्माकं मनसि प्रसरमलभत। तदर्थं विमर्शे क्रियमाणे

---

[1] इमामेवावलम्ब्य अस्मदीयमिदं मुद्रणं संपादितम्।

हन्त ! उभयोरपि पक्षयोरप्रामाणिकत्वं निरचैष्म । 'मुरारेस्तृतीयः पन्थाः' इति न्यायेन एतदुभयातिरिक्तः तृतीय एव पक्षः प्रामाणिक इति मतिरस्माकमुदभूत् । 'उत्तमश्लोकतीर्थ एव मूलस्य च व्याख्यानस्य च कर्ता' इत्ययमेव स तृतीयः पक्षः । अयमेवास्मदभिमतः । एतस्यैव पक्षस्यावलम्बनेन 'उत्तमश्लोकविरचितः पूर्वमीमांसाचित्रपटः' इति ग्रन्थारम्भे मुद्रापितमस्माभिः । उपपत्तिभूमा चास्मत्पक्षस्य वर्वर्ति । तदत्र त्रयः पक्षाः प्रत्युपस्थिताः —

१) कुमारिलभट्टस्यैव कृतिरियम् ।

२) अप्पय्यदीक्षितकृतिरेवेयम् ।

३) उत्तमश्लोकतीर्थस्यैवेयं कृतिः ।

इति ।

तेषु प्रथमपक्षे अनुपपत्तयः पूर्वमेव दर्शिताः ।

द्वितीयपक्षेऽप्यनुपपत्तयो भूयस्यो विलसन्ति यथा —

१) चित्रपटग्रन्थस्य आदावन्ते वा अप्पय्यदीक्षितविरचितो मङ्गलश्लोकः समाप्तिद्योतकः श्लोको न कुत्रापि विद्यते ।

२) ग्रन्थमध्ये अध्यायपादादिसमाप्तावप्येवमेव कर्तृनामादिकं नैव निर्दिश्यते (इत्यप्पय्यदीक्षितकृतौ चित्रपटे .... इत्येवमादिः)

३) व्याख्यात्रा उत्तमश्लोकतीर्थेन च आदावन्ते वा 'अप्पय्यदीक्षितकृतं चित्रपटं व्याख्यास्ये' इत्येवं न लिख्यते । सर्व एव हि मूलकारादन्ये व्याख्यानकर्तारः एवं किञ्चिद्विलिखन्ति ।

'भारती कालिदासस्य दुर्व्याख्या विषमूर्छिता ।
एषा संजीविनीव्याख्या तामद्योज्जीवयिष्यति ॥'

इति मल्लिनाथसूरिर्लिखति । एवमन्येऽपि बहवः । अत्र तु तथाभूतं न किञ्चित्पश्यामः ।

४) यदि दीक्षितेन्द्रा एवास्य मूलग्रन्थस्य प्रणेतारः स्युः, तर्हि – एतद्व्याख्यानमपि तैरेव कृतं स्यात् । मूलस्य अतिसंक्षिप्तत्वेन शास्त्रप्रमेयभागस्य स्वारसिकतया बोधासंभवात् । अस्य चांशस्य स्वेनैव ज्ञातत्वावश्यंभावाच्च । यथा – विधिरसायनस्य–यथा वा–वादनक्षत्रमालायाः–स्वोपज्ञमेव व्याख्यानं परिकल्पितं दीक्षितेन्द्रैः । यथा च श्रीमन्निगमान्तमहादेशिकाः, स्वकृतेस्तत्त्वमुक्ताकलापस्य दुरूहबह्वर्थगर्भतया 'सर्वार्थसिद्धि' नाम्नीं व्याख्यां स्वयमेव व्यरीरचन् । 'इष्टं हि विदुषां लोके समासव्यासधारणम्' ।

५) श्लोकेषु तत्र तत्र अस्पष्टार्थानां पदानां विवरणं कुर्वन्–अथवा–क्वचित् स्थितस्य कस्य-

चित्पदस्य उत्तरत्र अनुषङ्गेण आकाङ्क्षोपशमं प्रदर्शयन्वा–व्याख्याकारः मूलग्रन्थस्यापि स्वोपज्ञत्वं द्रढयति। यथा जैमिनीयन्यायमालायां विसरे च, तथैवात्रापि व्याख्यानरीतिमध्यक्षयामः।

६) अप्पय्यदीक्षितकालात् शतद्वयवर्षमिते प्राक्काले उत्तमश्लोकतीर्थः आसीदिति ऐतिहासिकैः सोपपत्तिकं व्यवस्थानं कृतमस्ति। तत्कथं प्राक्कालिकः पश्चाद् भविष्यतः विदुषः कृतेर्व्याख्यानं कुर्यात्?

७) सुविस्तीर्णे पूर्वमीमांसाशास्त्रप्रमेये तत्र तत्र व्याख्यातॄणां गोष्ठ्यां अभिप्रायभेदो वर्तत एव। उत्तमश्लोकतीर्थः स्वग्रन्थे कुत्रापि अप्पय्यदीक्षिताभिप्रायं नैवानुवदति। पार्थसारथिमिश्रविरचितां शास्त्रदीपिकां, तत्कृतं तन्त्ररत्नं च बहुषु स्थलेषु अनुस्सरन्नयं दीक्षितेन्द्रमतं न कुत्रापि विवृणोति। अतः दीक्षितात्प्राक्कालिक एवायमिति निश्चप्रचम्। अतोऽस्य मूलग्रन्थस्य अप्पय्यदीक्षितविरचितत्वं सर्वप्रकारेणापि न घटते।

८) मद्रनगरप्राच्यविद्यालयीयमातृकाया अन्यासु एतन्मूलग्रन्थमातृकासु, अस्य अप्पय्यदीक्षितविरचितत्वं नैव दृश्यते। न चैता मातृका अनाद्यन्ताः, येन कर्तृनामनिर्देशयुक्तो भागो विनष्ट इति शङ्क्येत। संपूर्णा एवैता मातृकाः। आदौ वा अन्ते वा नास्ति कर्तृनिर्देशः। सूचीपत्रकारा अपि 'अस्य कर्ता न ज्ञायते' इति लिखन्ति। एतावत् विमर्शनं तेऽपि कृतवन्तश्चेत् तत्त्वमुद्घाटयेयुः। अतित्वरया कार्यं कुर्वाणानां तेषां ईदृशस्य परामर्शस्यावकाशः कथं स्यात्? अतस्ते तथा व्यलिखन्। नेदमुपालम्भमर्हति।

९) अन्ततः आर्. तङ्गसामिमहाशयैर्मुद्रापिते अद्वैतवेदान्तग्रन्थानां ग्रन्थकर्तॄणां च सङ्कलनात्मके ग्रन्थे-इदं लघुवार्तिकं उत्तमश्लोकतीर्थविरचितमित्येव समुचिताभिरुपपत्तिभिः प्रसाधितं वर्तते। अयं विषयः पश्चादेवास्माभिर्ज्ञातः। अस्मदभिप्रायानुकूलत्वेन अस्माभिः परिगृहीतः।

अतः उत्तमश्लोकतीर्थ एव 'लघुवार्तिक' नाम्नः श्लोकरूपस्य मूलग्रन्थस्य, तद्व्याख्यारूपस्य 'लघुन्यायसुधा'ख्यस्य ग्रन्थस्य च कर्ता इत्यस्माकं अभिप्रायः। अस्य मूलग्रन्थस्य 'चित्रपटः' इति नाम, तथा अप्पय्यदीक्षितकृतत्वं च अर्वाचीनैः परिकल्पितं स्यात्। उत्तरभारते 'चित्रपटः' इति नाम अस्य ग्रन्थस्य नास्ति। दक्षिणभारते परं वर्तते। बहुग्रन्थप्रणेतृभिरप्पय्यदीक्षितेन्द्रैः 'चित्रपटः' इति नाम्नापि कश्चित् ग्रन्थः विरचितः स्यादपि। तस्यानुपलंभात् तन्नाम अस्य 'लघुवार्तिक'स्य विनिवेशितं स्यात्। अथवा चित्रपट' नामको ग्रन्थः अप्पय्यदीक्षितैः नैव विरचितः स्यात्। अर्वाचीनानां कल्पनैव तथा स्यात्। अत एव 'तङ्गसामि' कृते पूर्वोक्ते ग्रन्थे अप्पय्यदीक्षितविरचितानां ग्रन्थानां संख्यादानावसरे तत्संख्या–११२ इति दर्शिता। १०४ इत्येवानया भवितव्यम्।

कथमष्टानामधिकानां ग्रन्थानां अप्पय्यदीक्षितविरचितत्वम् ? इत्याशङ्क्य केषाञ्चित् ग्रन्थानां अन्यकृतानामपि अप्पयदीक्षितविरचितत्वं अर्वाचीनैः परिकल्पितं स्यात् इति वस्तुतत्त्वं निरूपितं तद्ग्रन्थकारेण । एताभिरुपपत्तिभिः उपरिदर्शितोऽस्मदीयोऽभिप्रायः ताटस्थ्यमपरित्यजद्भिः प्रामाणिकैः समालोचनीयः । यदि असत्पक्षः अनुपपन्न इति ते सोपपत्तिकं निरूपयन्ति, तत्र हार्दं स्वागतं व्याहरामः । अस्माभिरपि स्वोत्प्रेक्षया अभ्यूहमात्रं कृतम् । नात्रास्माकमभिनिवेशः । 'अन्या तटस्थचिन्ता हि विमर्दाभ्यधिकोदया ।' 'स्वाज्ञानज्ञानिनो विरलाः' इति निरपवादोऽयमुत्सर्गः अस्मानपि न बहिर्भावयेदिति सुविदितमेवेदम् । अलमतिपल्लवितेन ।

अथ 'हसन्ति दुर्जनास्तत्र' इति दोषदर्शननिन्दा, या कृता तत्र किञ्चिदुच्यते ।

मीमांसाशास्त्रे भूयांसो ग्रन्था विराजन्ते । तेषु सर्वेषु पश्चात्कालिका ग्रन्थकाराः प्राक्तनग्रन्थेषु दोषानुद्भावयन्ति । सूत्रकाराभिमतं विषयं भाष्यकारः – तदुक्तं वार्तिककारः – तदुक्तं अर्वाचीनग्रन्थकाराश्च बहुधा दूषयन्त एव सन्ति । न ते सर्वे दुर्जनाः । परन्तु वस्तुतत्त्वस्य प्रमोषो मा भूदिति तेषां तात्पर्यम् । कथमनुपपन्नोऽर्थः पूर्वैः प्रतिपादितः ? यस्य समीकरणायार्वाचीनाः प्रवर्तन्ते इति शङ्का जायत एवात्र । इदमत्र तत्त्वं खनिप्रदेशान् सुवर्णादीनां उद्धरणं बहुक्लेशसाध्यमेव, नात्र संशयः । आदौ उद्धियमाणं सुवर्णादिकं पाषाणादिपदार्थान्तरमिश्रमेव स्यात् । तस्य नानाप्रकारेण शोधनं क्रियते । अन्ते च पण्यवीथ्यां रत्नापणेषु द्रष्टृमनोहारीणि आभरणादीनि विक्रयार्थं स्थापितानि विराजन्ते । नूनमिमान्याभरणानि सर्वाणि आदौ खनिप्रदेशोद्धृतवस्त्वन्तरमिश्रसुवर्णप्रभूतान्येव । खनिं विना सुवर्णलाभाप्रसक्तेः । तथापि आपणस्थमेव सुवर्णं सर्वानानन्दयति । स एव न्यायोऽत्रापि । पूर्वपूर्वापेक्षया उत्तरोत्तरस्या प्रवृत्तिरौचित्यातिशयवती । न केवलं मीमांसाशास्त्र एवैवम्, शास्त्रान्तरेष्वपि भूयिष्ठमुपलभ्यत एवैष संप्रदायः । अत एव 'यथोत्तरं मुनीनां प्रामाण्यं' इति वैयाकरणा निर्वहन्ति । बहूनां अष्टाध्यायीसूत्राणां अकरणं न्याय्यमिति पश्चात्तना निरूपयन्ति । न तावता पाणिने श्रैष्ठ्यं हीयते । वेदान्तमार्गे च द्वैताद्वैतविशिष्टाद्वैतसंप्रदायानुसारिणां वादप्रतिवादपरंपरा अविश्रान्ता उपर्युपरि वर्धमाना परिदृश्यते । न कस्यापि दौर्जन्यमन्ये ग्रान्थिका अभिप्रयन्ति तत्र । 'समादधति सज्जनाः' इति प्रकृतश्लोकचतुर्थपादप्रदर्शिते पर्वण्येव तेषां स्थानं भवति ।

'न चात्रातीव कर्तव्यं दोषदृष्टिपरं मनः ।
दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते ॥'

(श्लोकवार्तिकम् १-१-१-४)

इति वदन् कुमारिलभट्टः, स्वग्रन्थे दोषदर्शनं प्रतिषेधति । तथा ये दोषं पश्यन्ति, तेषामेव मनसि पूर्वतरं प्ररूढो दोषः – वस्तुतो ग्रन्थे अविद्यमाना एव विद्यमानवत् प्रकाशते – पित्तोपहतचक्षुषः

पुरुषस्य पीतशङ्खविज्ञानवत् इति दोषदृष्टिपरान् निन्दति। तावती प्रतिपत्तिः स्वग्रन्थे तस्य। एवं वदन्नयं पूर्वग्रन्थेषु दोषदर्शनं यथेच्छं करोत्येव। एकमेवोदाहरणं प्रदर्शयामः। प्रथमाध्याये तृतीयपादे द्वितीयमधिकरणं 'विरोधाधिकरणं' इति व्यपदिश्यते। अत्र 'हेतुदर्शनाच्च' इति सूत्रं 'अधिकरणान्तरं वा' इति भाष्ये व्याख्यातम्। अत्र वार्तिककारो लिखति इदं भाष्यमनुपपन्नमिति। तत्रेमाः पङ्क्तयः – 'एतावत्त्विहाधिकरणद्वयेऽपि वक्तव्यम्' इत्युपक्रम्य,

"कठमैत्रायणीयादिपठितश्रुतिमूलिकाः।
दृश्यन्तेस्मृतयः सर्वा यदोपनयनादिषु॥
तदा तन्मध्यपात्येकं वाक्यं किञ्चिदपि स्मृतेः।
मूलान्तरोद्भवं वक्तुं जिह्वा नो न प्रवर्तते॥
बाधिता च स्मृतिर्भूत्वा काचिन्न्यायविदा यदा।
श्रूयते नचिरादेव शाखान्तरगता श्रुतिः॥
तदा का ते मुखच्छाया स्यान्नैयायिकमानिनः?
बाधाबाधानवस्थानं ध्रुवमेवं प्रसज्यते॥

इत्यादिना भाष्यकारं क्रूरतरैर्वाक्यैर्दूषयति। अन्ते च, 'एतद्धि जैमिनिना अत्यन्तं हितोपदेशिना जिज्ञासुभ्यः प्रतिपाद्यते;

'यावदेकं श्रुतौ कर्म स्मृतौ चान्यत्प्रतीयते।
तावत्तयोर्विरुद्धत्वे श्रौतानुष्ठानमिष्यते॥'

इत्युपसंह्रियतेऽयं भाष्यदूषणपटलः।

तृतीयाध्याये चतुर्थपादे,

'अतः परं षट्सूत्राणि भाष्यकारेण न लिखितानि। .... सन्ति च जैमिनिरेव प्रकाराण्यप्यनत्यन्तसारभूतानि सूत्राणि।'

इति लिखन् वार्तिककारः सूत्रकारं जैमिनिमपि नोपेक्षते निन्दितुम्।

प्रसिद्धमीमांसकः श्रीखण्डदेवमिश्रः सर्वानेव प्राचीनान् ग्रन्थकारान् निर्विशङ्कं दूषयति। तच्छिष्यः शम्भुभट्टस्तु स्वाचार्यमपि तत्र तत्र खण्डन्नेव गच्छति।

अप्पय्यदीक्षितेन्द्राः, 'मीमांसकमूर्धन्यः' इति खण्डदेवमिश्रेण श्लाघ्यन्ते। ब्रह्मसूत्रशाङ्करभाष्यव्याख्यानपरंपरायां 'परिमलं' इति ग्रन्थः एतैरेव कृतः। तत्र 'नाना शब्दादिभेदात्' इति सूत्र-

व्याख्याने (ब्रह्मसूत्रं ३-३-४२) 'त्रिधात्विष्टे 'रुदाहरणे कर्तव्ये, 'त्रैधातवीवेष्टि'रुदाहृता तैः। त्रिधात्विष्टेः त्रैधातवीयेष्टेश्च बहुप्रकारेण साम्यमस्त्येव। तथापि नानयोरैक्यम्। अनयोरिष्ट्योः भेदमजानन्तो दीक्षितेन्द्राः व्यत्यस्तनामनिर्देशमकार्षुः। मुंबईनगरे निर्णयसागरमुद्रणालये 1938A.D. संवत्सरे मुद्रितोऽयं ग्रन्थः। महामहोपाध्यायबिरुदालङ्कृताः अनन्तकृष्णशास्त्रिणः अस्य ग्रन्थस्य संपादकाः। तत्र 838 तमे पुटे विस्पष्टं दृश्यते – इयम् अनुपपन्नार्था पङ्क्तिः। अस्माभिरेवायं विषयः इदंप्रथमतया प्राकाश्यं नीतः। किमनेन दीक्षितेन्द्राणां श्रैष्ठ्यं हीयते ?

एवं जिज्ञासाधिकरणे अन्यैर्ग्रन्थकारैः महता संरम्भेण अध्ययनविधेरर्थज्ञानार्थत्वं यत् प्रसाधितं तत् अध्वरमीमांसाकुतूहलवृत्तिकारेण वासुदेवदीक्षितेन परित्यक्तम्। अयं कुतूहलवृत्तिकारा एकादशाध्याये तृतीयपादे त्रयोदश धिकरणे,

वस्तुतस्तु[1] 'उपरिष्टात्सोमानाम्' इत्यत्र सोमशब्देन हारियो जनात् प्राग्भाविनः सर्वे सोगयागा उच्यन्ते, न तु हारियो जनः। एवं हि वाजसनेयके श्रूयते – 'यद्यत्र मैत्रावरुणो वामदेव्यमनुशंसति, तदेषां वपाभिः प्रचरेयुः अथेष्टा अनूयाजाः स्युः अव्यूहेहस्रुचावथैषां हविर्भिः प्रचरेयुः' इति। 'उपरिष्टात्सोमाना 'मित्यनेनाप्ययमेव काल उच्यते' संभवत्येकवाक्यत्वे वाक्यभेदायोगात्। तत्कथमस्मिन् प्रत्यक्षवचने जाग्रति, भगवता जैमिनिना हारियोजनान्ते प्राजापत्यप्रचार इति निर्णीतम् ? कथं वा भाष्यवार्तिककारप्रभृतिभिस्तथैवानुमोदितमिति न जानीमः। यदि तु सर्वज्ञैस्तैः शाखान्तरे तथाविधं वचनं दृष्टं स्यात्, तर्हि किमधिकरणप्रवृत्त्या ?' इति लिखति –

'आकरग्रन्थेषु सर्वेष्वेव दोषमुद्भावयन्नयं न खलु दोषैकवक्, अपितु वस्तुतत्त्वावबोधनैकबद्धश्रद्धः।'

महानगरेषु विशाले राजमार्गे चैत्यप्रदेशेषु हरित-रक्तदीपानां तदा तदा स्फुरणं भवति। रक्तदीपस्फुरणं, स्वोल्लङ्घने महान्तमनर्थं आपतन्तं सूचयति। हितपर्यवसायिनमिमं यथासर्वेऽभिनन्दन्ति, बहुमन्यन्ते च, तथैवात्रापि वस्तुस्थितिः। दोषोद्भावनं न दौर्जन्यहेतुर्भवति। अपितु 'समादधति सज्जना' इति पूर्वोक्तश्लोकचतुर्थपादविषयतामेवापादयेदिति अस्माकमुत्प्रेक्षा। अत एव निर्विशङ्कं स्वाभिप्रायोऽस्माभिराविष्कृतोऽत्र। यद्यत्र केनाप्यन्येन अनुपपत्तिरुद्भाव्येत समुचितयुक्तिभिः सज्जा एव तस्य स्वागतव्याहारे वयम्। निर्मत्सरास्तु प्रेक्षावन्तः तत्त्वं निर्णेष्यन्ति। अलमेतावता।

'अर्थवाद एषः। दोषं तु तावत्कथय, येन प्रतिविधीयते।'

(उत्तररामचरिते-प्रथमाङ्के रामवचनम्)

---

[1] अध्वरमीपांसाकुतूहलवृत्तिः Vol. IV. page 1693

'पश्यति परेषु दोषानसतोऽपि जनस्सतोऽपि नैव गुणान् ।
विपरीतमिदं स्वस्मिन् महिमा मोहाञ्जनस्यैषः ॥ '

(सुभाषितनीवीग्रन्थे श्रीमद्वेदान्तदेशिकः)

इति महाकवेर्भवभूतेर्वचनं, श्रीमन्निगमान्तमहादेशिकश्रीसूक्तिं च स्मरामः ।

ग्रन्थसंपादनप्रकारः

इदंप्रथमततया मुद्राप्यमाणोऽयं ग्रन्थः, वाचकानां यथा उपयोगयोग्यः संपद्येत तथाऽस्य संपादनं कर्तव्यमिति मतिरस्माकमासीत् । प्राचीनस्य अद्यतनस्य च कालस्य अस्ति महान् भेदः । प्राञ्चः क्लेशसहनशीलाः व्यवसायपूर्णाश्च व्यराजन्त । आधुनिकसौकर्यातिशयविहीना अपि ते नित्य-सन्तुष्टान्तरङ्गा एवासन् । काशी रामेश्वरयात्रा, तीर्थयात्रा–इत्यादिकं पादचारिभिरेव तैः चिरकाल-व्यापितया सश्रद्धमनुष्ठितम् । अद्य तु वयं द्रुततमगतिषु विमानेषु यातायातं कुर्मः । अयं लाघव पक्षपातः, इतरविषयेष्विव विद्याभ्याससंप्रदायेऽपि निरर्गलतया सङ्क्रान्तः । व्युत्पित्सवो माणवकाः विमर्शसरणीप्रविष्टाश्च-सर्वग्रन्थेषु 'अकाराद्यनुक्रमणी' प्रभृति लघूपायान् नियमेन प्रतीक्षन्ते । तादृश लघूपायरहितं मुद्रणं नैवाद्रियन्ते । प्राञ्चस्तु न तथा । बहुषु तालपत्रमातृकासु अस्माकं प्रत्यक्षोऽयं विषयः–यत् ग्रन्तस्याभ्यन्तरे न क्वापि–अध्याय–पादप्रभृतिलेखनं स्यात् । तत्रत्यैकपङ्क्तिपठनमात्रेण इदं सर्वं स्वववगममासीत्तेषाम् । एवंविधशक्तिरहितानामुपहासोऽपि वृद्धैः क्रियेत । अद्य तु सर्वमिदं विपरीतं संवृत्तम् । आगामिकाले तु न शक्यते वक्तुं कीदृशो वा परिणामः स्यादिति । एतदालोच्य अस्या मातृकायाः संपादने अस्माभिः किञ्चित्कृतम् ।

१) मातृका तावत् व्याख्येय व्याख्यानोभयगर्भिता वर्तते । व्याख्येयं 'लघुवार्तिकं' इति –'पूर्वमीमांसाचित्रपटः' इति च व्यपदिश्यते । व्यपदेश एव भेदो न ग्रन्थस्वरूपे । तदिदं व्याख्येयं अनुष्टुप्श्लोकरूपम् । तद्व्याख्यानरूपो ग्रन्थः 'लघुवार्तिकटीका लघुन्याससुधा' इति व्यपदिश्यते । अयं ग्रन्थः गद्यरूपः । इदमुभयमपि परस्परं अविभक्तं सङ्कीर्णमेव लिखितं वर्तते मातृकायाम् । प्रौढानां व्युत्पन्नानां मीमांसकानां अक्लेशेनैवानयोर्भेदपरिज्ञानं सुशकमेव । अप्रौढानान्तु अनयोर्विवेको न सुशकः । अतः श्लोकरूपो व्याख्येयो मूलभागः व्याख्यानरूपाद्गद्यभागात् पृथक् कृतोऽस्माभिर्मुद्रणे । स्थूलानि चाक्षराणि तस्य परिकल्पितानि । व्याख्यानभागस्य च तदपेक्षया सूक्ष्माण्यक्षराणि कल्पितानि । मूलभागस्य व्याख्यानभागस्य च असङ्कीर्णतया पृथक् पृथगेव पङ्क्तिभेदप्रदर्शनपूर्वकं मुद्रणं कृतम् । एतेन व्युत्पित्सूनां अक्लेशेन ग्रन्थस्वरूपपरिज्ञानं भवेदिति प्रतीक्षामहे ।

२) प्रत्यधिकरणं तत्तन्नामानि पार्थक्येन भिन्नपङ्क्तौ आदावन्ते च दत्तानि सन्ति–तत्तत्-संख्यानिर्देशेन सह। मातृकायामेवं निर्देशो नास्ति। इदमपि वाचकानां सौकर्यमुद्दिश्यैव कृतमस्माभिः।

३) मातृकायां तत्र तत्र अनन्विताः पङ्क्तयो वर्तन्ते। तत्र किंकर्तव्यम्? संपादकानां महतीयं शिरोवेदना। द्विविधश्चात्राभिप्रायो वर्वर्ति– (अ) मातृकामवलम्ब्य ग्रन्थं समुद्धरामो वयम्। नात्र स्वातन्त्र्यमस्माकं युज्यते। यथैव मातृकायां पाठो वर्तते स तथैवावैरूप्येण मुद्रापयितव्यः। गुणं वा दोषं वा वाचका अनुसंदधताम्। अस्माकं मनसि यद्वर्तते तदपि नोपेक्ष्यम्। अधस्तात् टिप्पणे तत्प्रदर्शयितव्यमङ्कसङ्केतपूर्वकम्। तेन वाचकानां ईषत् चक्षुरुन्मीलनं कृतमिव स्यात्। इत्येकः पक्षः। (आ) मातृका सर्वाभ्यर्हिता न भवति। सापि हि केनचित्पुरुषेण लिखितैव स्वहस्तेन। लेखकस्य मनसि प्ररूढानां भ्रमप्रमादादीनां मातृकायामवतारस्य अनिवारितप्रसरा प्रसक्तिरस्त्येव। ग्रन्थप्रणेतुर्विषये यावानस्माकं बहुमानः सर्वोऽपि मातृकालेखकस्यापि विषयेनातिदेशमर्हति। अतः स्पष्टायामनुपपत्तौ, संपादकेन तस्य शोधनं स्वबुद्ध्यनुसारेण कार्यमेव। शोधितस्यैव च ग्रन्थस्य मुद्रापणं कर्तव्यम्। मातृकागतस्तु अनुपपन्नः पाठः नोपेक्षामर्हति, मातृकासमारूढत्वादेव। अतस्तस्याङ्कसङ्केतपूर्वकं टिप्पणेऽधस्तात् प्रदर्शनमावश्यकम्। इति अपरः पक्षः। इमावुभावपि पक्षावुपपत्तिमन्तावेव। अतः अनयोरुभयोरपि पक्षयोरनुधावनं कृतमस्माभिरत्र। दृष्ट्वा वाचकाः प्रमाणम्।

४) मुद्रितपुस्तके प्रतिपुटं ग्रन्थनाम आदितः आन्तं दत्तमस्ति। वामभागे 'लघुवार्तिकटीका' इति, दक्षिणभागे 'लघुन्यायसुधा' इति च। ग्रन्थकर्त्रैव अस्य ग्रन्थस्य इदं नामद्वयं परिकल्पितम्। अतस्तस्य द्वेधाविभागेन एकमर्धं एकस्मिन् पुटे, अर्धान्तरमन्यस्मिन्पुटे च निवेशितवन्तस्स्मः।

५) एकैकस्मिन्नपि पुटे लब्धास्पदस्याधिकरणस्य-पादस्य-अध्यायस्य च संख्या आदितः आन्तं उपरितनकोणे संयोजितास्माभिः सहस्राधिकरणाभरितेऽस्मिन्मीमांसाशास्त्रे प्रमेयबाहुल्यात् गहनं वनं प्रविष्टा इव प्रेक्षावन्तः क्लिष्टा मा भूवन्निति; एकैकपुटेऽपि सद्यः विषयपरिशीलनमन्तरैव झडिति तत्तदध्यायादिसंख्या अनायासेन ज्ञायतामिति च। हन्त! हन्त!! मुद्रणालयनिर्वाहकैः एकान्ततः परित्यक्तोऽयमंश इति विषण्णा एव स्मः। अस्मद्धस्तलिखिते मुद्रणार्थे प्रत्यादर्शे अद्यापि स्पष्टतरं विराजतेऽयमंशः। इदमरण्यरुदितं संवृत्तम्।

६) मातृकायां बहुषु स्थलेषु अवश्यलेखनीयो विषयः परित्यक्तः। ग्रन्तकर्तुः अयं दोषः? अथवा लेखकस्य? इति न ज्ञायते। प्रेक्षावतामाकांक्षा कथं शाम्येदिति तत्र तत्र अधोभागे टिप्पण्यां शेषपूरणमस्माभिः कृतमस्ति।

७) लघुवार्तिकं – इति वा - 'पूर्वमीमांसाचित्रपटः' इति वा व्यपदिश्यमानस्य श्लोकरूपस्य मूलभागस्य परं प्रत्येकं मुद्रणममपि कृतं, तदपि अन्ते संयोजितमस्त्यत्र। तंजावूर् सरस्वतीमहाल् ग्रन्थालये तालपत्रात्मिकायां मातृकायां प्रत्येकं वर्ततेऽयं ग्रन्थः। तदनुसारेण इदं मुद्रणं निर्व्यूढम्। व्याख्याग्रन्थे मध्ये मध्ये लब्धास्पदस्य अस्य मूलभागस्य प्रत्येकमातृकागतस्य च काचित्कः भेदोऽस्ति। स तत्र तत्र अधो भागे टिप्पण्यां सूचितोऽस्त्यस्माभिः।

८) पूर्वपक्षः सिद्धान्तश्च अनुत्स्यूततया मातृकायां लिखितौ स्तः। पूर्वपक्षस्य पार्थक्येन प्रदर्शनं - तथा सिद्धान्तस्य च, कृतमस्माभिः। प्रेक्षावतां वाचकानां सौकर्याय इदं कृतम्।

९) शुद्धिपत्रिकापि संयोजितास्त्यत्र। तस्याः आवश्यकता सर्वग्रन्थतुल्यमत्रापि सञ्जाता। अस्मन्मीमांसाचार्याणां डि. टि. ताताचार्याणां श्रीसूक्तिः —

'ग्रन्थानां मुद्रणावसरे समापतन्त्योऽशुद्धयः परममायाविन्यो मे भान्ति, यस्मादत्यन्तं जागरूकैरन्विष्यमाणा अपि तदानीं क्वापि तिरोभवन्त्यो न चक्षुषि पतन्ति, अवसिते च शोधनावसरे यत्रैव चिरमन्विष्टं तत्रैव सुस्पष्टमात्मानं प्रकाशयन्ति। अपि चैता नान्यं तथा वञ्चयन्ति यथा ग्रन्थकारमेव शोधनाय प्रवृत्तम्।

सत्यस्मिन् साधारणकारणे, नगरान्तरस्थो मुद्रणालय इतीदमपरं कारणं, यदत्र बह्व्योऽशुद्धयो भवन्ति। सम्यक् शोधयित्वा प्रेषितायापि हि निरूपणापत्रिकायां (Proof Sheet) चरममुद्रणाय सङ्घट्यमानास्वक्षरपङ्क्तिषु कानिचिदक्षराणि गलितानि भवन्ति, कानिचिच्च विपर्यस्तानि भवन्ति। न च तानि दूरे स्थितेन सद्यो दृष्ट्वा शोधयितुं शक्यन्ते। तस्मादाङ्ग्लमुद्रणवदत्यन्तशुद्धिसंपादनाय कृतेऽपि महति यत्ने इदं शोधतपत्रघटनमत्रापरिहार्यमासीदिति सखेदं निवेद्यते' इति।

(मीमांसाभ्युदयः–पुटे ६)।

प्रकृतमुद्रणे समुपजातस्य वैरूप्यस्य इमान्येव कारणानि। अतः शोधनिकासंमेलनमपरिहार्यमभवत्।

तत्राप्येतस्मिन् मुद्रणे, असंभाविता बहवो दोषाः प्रसरमलभन्त। बहुषु स्थलेषु नूतनाः पङ्क्तयः – संपादकेनालिखिताः – मुद्रितास्सन्ति। तथा बहुत्र मुद्रणार्थं लिखिताः पङ्क्तयः परित्यक्ता अपि। इदं शोधनिकायां कथं वा प्रदर्श्यताम्? कथं कथमपि प्रदर्शने कृतेऽपि ग्रन्थमध्ये तस्य समुपस्थापनं कथम्? कथन्तरां वाचकानां तदभावप्रयुक्ता काङ्क्षोपशमः? कथन्तमां यथावस्थितवाक्यार्थावगमः? इति महानेवायं शिरोभ्रमोऽस्माकमुदभूत्। तथा एक-द्वि-त्रि-चतुः-पञ्चाक्षर वैरूप्यकृता दोषाश्चानन्ताः लब्धप्रसारा अत्र। शुद्धाशुद्धपत्रिकां पश्यतामयं विषयस्श्ववगमस्स्यात्। सर्वस्याप्यस्य निदानं, मुद्रणकाले प्रूफ् (Proof) निरीक्षणार्थं अस्माकमत्यन्तमसंबन्ध एव। न जानीमो

वयं केन वा इदं कृतमिति । परिपूर्णतया मुद्रणं प्रापितस्य ग्रन्थस्य एकं प्रतिरूपमेवास्माभिः इदं-प्रथमतया दृष्टम् । अस्माकमपि परिश्रमस्य वैफल्यं – वाचकानाञ्च सुमहदसौकर्यं – इतीदमुभयं अनेन श्रद्धावैफल्येन युगपदेव समुत्पादितम् । ग्रन्थसौष्ठवञ्च दूरापसारितम् । नितरां शोचनीयमिद-मापतितम् । 'एका क्रिया व्यर्थकरी बभूव' गतन्तु गतमेव हि !!!

१०) लघुवार्तिकश्लोकानामकाराद्यनुक्रमणीव संयोजितास्ति । यद्यपि एकमधिकरणं, श्लोक-स्यार्धेन पादेन पादैकदेशेन च संगृह्यतेऽत्र, तथापि इयमनुक्रमणी नानुपयुक्ता स्यादिति अस्माकं संभावना ।

११) विषयवाक्यानामकाराद्यनुक्रमणी च संयोजितास्त्यत्र । सुविस्तीर्णेऽस्मिन् मीमांसाशास्त्रे सहस्राधिकानि विषयवाक्यानि सन्ति । तानि च क्वचित् पूर्णतया – क्वचिदपूर्णतया च ग्रन्थेषु समुपदर्शितानि वर्तन्ते । तेषमाकरोऽपि नोपदर्शितः । सर्वस्याप्यस्य शास्त्रस्य विषयवाक्यानि परि-पूर्णतया तत्तदाकरसंदर्शनपूर्वकं 'विषयवाक्यदीपिका' इति शीर्षकेण मुद्राप्य प्रकाशयितव्यानीति चिरायाभिलाषोऽस्त्यस्माकम् । इमं सन्दर्भं तदर्थं विनियोक्तुकामा अभूम । न त्वेतदद्यापि निर्व्यूढम् । यथावस्थितानि विषयवाक्यानि परं अकाराद्यनुक्रमेणमुद्रापितवन्तस्स्मः । प्रेक्षावताम् अयमपि उपयुक्त-तरः स्यादिति मतिरस्माकम् ।

१२) 'केचित्पक्षः' अस्मिन् ग्रन्थे तत्र तत्र 'केचित्' इति केषाञ्चित् अभिप्रायवर्णनं क्रियते । तत्सर्वमेकानुबन्धरूपेण प्रकाशितमस्त्यत्र । इत्थं व्यपदिश्यमानाः 'केचित्' एतद्ग्रन्थकार-समकालीनाः – अथवा – प्राक्कालीनाः ग्रन्थलेखकाः, अथवा – प्रवचनकर्तार एव नूनं भवेयुः । एतद्ग्रन्थप्रणेत्रा च तेषामभिप्रायो ज्ञातचरः । तत्र बहुमानश्चास्य वर्तते । अत एव तत्र तत्र तान् स्मरन् प्रकाशयति । पूर्वतनेषु ग्रन्थेष्वन्विष्य इदं समुद्धर्तव्यम् । अपेक्षितानां ग्रन्थानामलाभात् प्रयत्न-गौरवभयाच्च इमं व्यापरं प्रेक्षावतां वाचकसहृदयानामेव सकाशे समर्पितवानस्मि । तादृशस्थलानां परं अस्मिन्ननुबन्धे प्रकाशनं कृतमस्ति ।

१३) अस्मिन् ग्रन्थे नाम्ना निर्दिष्टाः केचित् ग्रन्थकाराः – तेषां ग्रन्थाश्च । ते सर्वेऽपि अनु-बन्धे (४) सङ्कलय्य प्रदर्शितास्सन्ति । विमर्शकानां सौकर्यमनेन संपद्येतेति ।

१३) ग्रन्थान्तरेभ्यः अस्य ग्रन्थस्य क्वाचित्को भेदो विषयनिरूपणे तत्र तत्र दृश्यते । सोऽपि संक्षेपेण अनुबन्धे (५) संप्रदर्शितो वर्तते । ग्रन्थे च तत्तत्स्थले अयं विषयो निरूपित एवास्ति ।

१५) एतद्ग्रन्थसंपादनकाले उपयुक्तानां ग्रन्थान्तराणां पट्टिकापि अनुबन्धे (६) प्रत्तास्ति ।

अत्रास्मत्सहकारिणः

१) चिरायुः एन्. श्रीनिवासन् हरिकथाकालक्षेपप्रवचनधुरन्धरः – तंजावूर् सरस्वतीमहाल् प्रधानसंस्कृतपण्डितः

२) ब्रह्मश्री डा० एस. शङ्करनारायणशास्त्रिमहोदयाः, मद्रनगरविराजमाने अडयार् – ग्रन्थालये विमर्शकपदवीमलङ्कुर्वन्तः सहृदयश्रेष्ठाः अस्मत्प्रियसुहृदः

३) ब्रह्मश्री प्रो० वीळिनाथन्महोदयाः, मद्रनगरविश्वविद्यालयप्रधानसंस्कृताध्यापकाः

४) डा० उ. वे. पद्मनाभाचार्याः, मद्रनगरविश्वविद्यालयीय विमर्शकपदमधितिष्ठन्तः

५) श्री उ. वे. वि. श्रीवत्साङ्काचार्याः, मद्रनगरे महिलापुरे विराजमान संस्कृतमहापाठशाला-व्याकरणप्रधानाध्यापकाः

६) ब्रह्मश्री शेषाद्रिनाथशास्त्रिवर्याः, मद्रनगरे महिलापुरे विराजमानायाः संस्कृतमहापाठशालायाः प्रधानाध्यक्षाः

एतदुपोद्घातलेखनावसरे अस्माकं तदा तदा समुपजातं विचिकित्सापनोदनेन अपेक्षितमातृका-गतविषयविनिवेदनेन च बहुधा समुदतेजयन् एते उदारहृदयास्सहृदयाः धन्यवादान् बहून् समर्प्य कृतज्ञतया सह एषां नाम स्मरामः ।

ग्रन्थस्यास्य सुष्ठु मुद्रणं कृतवद्भ्यः मैसूरुनगरस्थ चारित्रमुद्रणालयनिर्वाहकेभ्यः सुरसरस्वती-समुपासकेभ्यः श्री एस्. चन्द्रशेखरमहोदयेभ्यः धन्यवादं वितरामि ।

पिष्टपेषणप्रायमपि आदरातिशयात् पुनः पुनर्विज्ञाप्यतेऽन्तर्वाणिजनेभ्यः भ्रमप्रमादादयः पुरुषदोषाः सहजाः अस्मिन् ग्रन्थे नूनं लब्धप्रसरा भवेयुरेव । मम विषये अनुकम्पां कृत्वा क्षन्तव्या एते ज्ञाप-यितव्याश्च अस्मभ्यं, तेन कृतार्था भवेम । इति शम् ।

इति विद्वज्जनविधेयः

नावल्पाकं श्री देवनाथताताचार्यः

वहननस्सपागसंवंधित्वाश्रवणाछुक्रवराविवश्यद्वारापितदपत्नीतेस्तंदुजा[illegible]

२१

[illegible]डवैद्यगुणपमेवदर्शिनंराजपाजकृपाम्पस्विनंश्पन्दिथाहविरिनेहविनीशेनकृडवैद्यगुणपमे
पतिजिनिवब्राह्मणानामिदंहविरिसादानिवत्रनवोपत्र[illegible]नस्याह्ब्राह्मणानिनार्द्विजोपहा॥
नैषिनीपमापपुष्पमालेपरमेश्वर॥त्वसादधुग्मभूषकृकुनामापथामपा॥दिरेश्वरपो
जिनाविश्वेशमूर्त्रिना॥उत्तमश्लोकतीर्थेनतस्मातेपथिन[illegible]॥ ॥[illegible]
धुमापसुधारापापद्वादशसाधापस्पदुर्य[illegible]॥श्रीगोपालाय॥ ॥
॥ ॥लिखितंहरिपांडेब्राह्मण॥ह॥ [illegible] ॥ह॥ ह॥ ॥[illegible]

पत्रसंख्या ४३१ [illegible]

400
Last
४३१







श्रीः

लघुवार्तिकटीकायाः लघुन्यायसुधायाः विषयानुक्रमणिका

विषयाः	अधिकरण संख्या	पुटम्
प्रथमाध्याये - द्वितीयपादे		
अर्थवादानां स्तुत्यर्थत्वेन प्रामाण्यम्	1	1
विधिवन्निगदानामपि	2	2
हेतुवन्निगदानामपि	3	,,
मन्त्राणां स्मारकत्वेन प्रामाण्यम्	4	,,
प्रथमाध्याये तृतीयपादे —		
स्मृतीनां वेदमूलकत्वेन प्रामाण्यम्	1	3
श्रुतिविरुद्धानान्तु न	2	,,
लोभादिमूलानामपि न	3	,,
पदार्थानामेव प्राबल्यम्	4	4
यववराहाधिकरणम्	5	,,
पिकनेमाधिकरणम्	6	,,
कल्पसूत्राधिकरणम्	7	5
होलाकाधिकरणम्	8	,,
व्याकरणाधिकरणम्	9	6
लोकवेदाधिकरणम्	10	,,
आकृत्यधिकरणम्	11	,,
अनुयाजोत्कर्षणेऽपि नोत्कृष्यौ दक्षिणाग्निकौ ।
दर्शे वेद्यपकर्षेऽपि न [3]तत्प्रागपकर्षणम् ॥ १५७ ॥

उत्कर्षो नाग्निहोत्रस्य भवेत्सान्तपनीयया ।
उक्थ्येन स्यात् षोडशिन उत्कर्षस्तत्परात्तया ॥ १३८ ॥

इति प्रथमः पादः

स्यात्पदार्थानुसमयः प्राजापत्यपशुव्रजे ।
सहस्राद्यश्वदाने च काण्डानुसमयो भवेत् ॥ १३९ ॥

एकैकेनानुसमयो मुष्ट्यादिषु न युज्यते ।
अवदानं प्रदानान्तमापरिव्याणमञ्जनम् ॥ १४० ॥

प्राजापत्यावदानानां न काण्डोऽनुसमीयते ।
नानाबीजेषु मुसलोलूखलं नैव भिद्यते ॥ १४१ ॥

पृषदाज्ये पात्रभेदः स्यादन्ते वैकृताहुतिः ।
देवनाद्यपकर्षस्स्यादभिषेकापकर्षणे ॥ १४२ ॥

पूर्वं सावित्रहोमादिदीक्षणीयेष्टितो भवेत् ।
स्याद्रुक्मप्रतिमोकादि पश्चाद्दीक्षितसंस्कृतेः ॥ १४३ ॥

इति द्वितीयः पादः

---

[1] प्रातर्मध्यंदिने साय ... ... । ”
[2] यूपकर्मापकर्षे स्यात् .... । ”
[3] .... प्राचामपकर्षणम् । ”

प्रयाजैकादशत्वादि सर्वसंपाद्यमिष्यते ।
स्वस्वस्थानविवृद्धचैव षट्त्वाद्युपसदां भवेत् ॥ १४४ ॥

सामिधेनीष्वधाय्यानामन्त एव निवेशनम् ।
[1]साम्नामागम्यमानानां गायत्र्यादिषु वेशनम् ॥ १४५ ॥

औपानुवाक्यं क्रत्वग्निशेषोंऽश्वादिग्रहेष्टकम् ।
इष्टकामध्यमचितौ प्रत्यक्षब्राह्मणोदिता[1] ॥ १४६ ॥

पूर्वं लोकं पृणायास्स्युर्मध्यमायामपि त्रिमाः ।
अग्निहोत्रादिकर्माणि पवमानेष्टचनन्तरम् ॥ १४७ ॥

अग्नित्रतानि क्रत्वन्ते इष्टचन्ते दीक्षितव्रतम् ।
काम्यनैमित्तिकेष्टीनां न पाठक्रमतः क्रमः ॥ १४८ ॥

अग्निष्टोमस्य निर्देशो य एतेनेत्यसौ मतः ।
संस्थान्तरगवादीनामथान्येनेत्ययं समः ॥ १४९ ॥

न चायमेकस्तोमानां निर्देशस्सर्वगो मतः ।

इति तृतीयः पादः

पाठश्श्रुतेरर्थतश्च दुर्बलः क्रमसाधने ॥ १५० ॥

प्रवृत्तिक्रमतो मुख्यक्रमस्तु बलवान् भवेत् ।
आधानस्येष्टिपूर्वत्वं सोमपूर्वत्वमप्युभौ ॥ १५१ ॥

ब्राह्मणस्याप्युभौ कल्पौ हविरेकं हि कृष्यते ।
नर्त्वाद्यनादरवचस्सोमार्थं परिगृह्यते ॥ १५६ ॥

ब्राह्मणस्य पुरोडाशमात्रमुत्कर्षमृच्छति ।
सद्यो विकृतयस्सोमादूर्ध्वं सान्नाय्यविक्रिया ॥ १५७ ॥

---

[1] 'स्तोमवृद्धौ तथागन्तोरन्त एव निवेशनम्' ।
इत्येकमर्धं 'क' मातृकायामत्र वर्तते ।

[1] .... प्रत्यक्षब्राह्मणोदिताः । (क)

तथा सोमविकाराणामूर्ध्वमिष्टयोरनुष्ठितिः ।

इति पञ्चमोऽध्यायः—२५ कारिकाः ।

अथ षष्ठोऽध्यायः

संबध्यन्ते फलत्वेन स्वर्गाद्याः कामनान्विताः ॥ १५८ ॥
[1]मूकदेवतिरश्चान्तु नास्ति कर्मस्वधिक्रिया ।
स्त्रीपुंसयोरधिकृतिस्सहैव स्यात्तयोस्तु सा ॥ १५९ ॥
क्षौमे वसानौ स्त्रीपुंसौ याव[2]दुक्तावधि स्त्रियाः ।
त्रयाणामेव वर्णानां भवेद्यागेष्वधिक्रिया ॥ १६० ॥
अधिकारी भवेद्द्रव्यहीनस्तत्समुपार्जनात् ।
अङ्गहीनोऽपि तस्यैव समाधानेऽधिकारवान् ॥ १६१ ॥
यस्याप्रतिसमाधेयं तन्न तस्यास्त्यधिक्रिया ।
स्याद्धानमत्र्यार्षेयस्य रथकारो न यौगिकः ॥ १६२ ॥
निषाद एव स्थपतिश्चरौ रौद्रेऽधिकारवान् ।

इति प्रथमः पादः

सत्राधिकारिणां कृत्स्नमेकैकस्य फलं भवेत् ॥ १६३ ॥
एकोऽधिकारी दर्शादौ समाप्यारंभयुक्क्रिया ।
गेहादि न समाप्यं स्यात् फलेच्छापगमे सति ॥ १६४ ॥
भक्षणं लशुनादीनां फलाय न निषिद्ध्यते ।
आरभ्यैवोपनयनादभिवादादयस्स्मृताः ॥ १६५ ॥

---

[1] मूकादेश्च इति युक्तं भाति । देवपदस्यात्र योजनं चिन्त्यम् ।"

[2] .... यावदुक्तादिकंस्त्रियाः । (क)

अग्निहोत्रादिकं कार्यं प्रदोषादिषु जीवता ।
तच्च प्रतिप्रदोषादि कालमावर्तते सदा ॥ १६६ ॥
आवर्तते निमित्तेषु स्कन्नहोमादिकं तथा ।
अभिवादाद्यपि तथैवावर्तेत निमित्ततः ॥ १६७ ॥
सोमविद्याप्रजं नित्यं तत्त्रयाणामपीति च ।

इति द्वितीयः पादः ।

नित्यं कार्यं यथाशक्ति काम्यं सगुणमेव तु ॥ १६८ ॥
द्रव्यभेदेऽपि यागादिक्रिया नैव विभिद्यते ।
मुख्याभावे प्रतिनिधिर्देवतादिषु नास्त्यसौ ॥ १६९ ॥
माषाद्या न प्रतिनिधिस्थानमर्हन्त्ययज्ञियाः ।
न स्वामिनः प्रतिनिधिस्सत्रे तस्याप्यसौ भवेत् ॥ १७० ॥
न स स्वामी कर्मकृत्त्वात् स्वामिधर्मा तथाप्यसौ ।
[1]सकृत् प्रतिनिधातव्यं सति कल्पान्तरेऽपि तत् ॥ १७१ ॥
[2]पूतकेऽपि विधिस्सोमसदृक्षुनियमात्मकः ।
[3]प्रतिनिध्यपचारे च श्रुतस्यैव सदृङ्मतम् ॥ १७२ ॥
[4]प्रतिनिध्यर्थिना मुख्ये लब्धे तस्यैव संग्रहः ।
अमुख्ये संस्कृते मुख्ये लब्धेऽपि स्यादयं नयः ॥ १७३ ॥
नियुक्ते तु पशौ तस्मिन्न पुनर्मुख्यसंग्रहः ।
द्रव्यसंस्कारयोर्द्रव्यमर्थोऽर्थद्रव्ययोर्बली ॥ १७४ ॥

---

[1] सदृक् प्रतिनिधातव्यं .... । ,,
[2] पूतीकेषुविधिस्सोम .... । ,,
[3] प्रतिनिध्यपचारश्चेन्मुख्यस्यैव सदृक्श्रुतम् । ,,
[4] 'पूतीकनाशेद्धि सदृक् नचेत्सोमसदृग्भवेत्-इत्येकमर्धमधिकमत्र ,,

व्रीहीणां न प्रतिनिधिः पर्याप्तौ द्व्यवदानयोः ।

इति तृतीयः पादः

अवत्तनाशे होमार्थं पुरोडाशान्तरं भवेत् ॥ १७५ ॥

[1]इडाद्यर्थावत्तनाशे तत्तद्भक्षस्य लोपनम् ।

कर्मप्रविष्टैः कर्तव्यमिडाशेषादिभक्षणम् ॥ १७६ ॥

भिन्ने जुहोतीत्यादिस्स्यात् कृत्स्नावयवभेदयोः ।

क्षामे निमित्ते यत्कृस्स्न[2] क्षामतावेव तद्भवेत् ॥ १७७ ॥

हविरातिनिमित्तं यदेकार्तावपि तन्मतम् ।

द्वाभ्यां भवति होमाभिषवाभ्यां सोमभक्षणम् ॥ १७८ ॥

द्वयोरग्न्योरनुगतौ पुनराधानमिष्यते ।

ऐन्द्रं कर्मान्तरं दर्शात् [3]दर्शं प्रत्यामनेन्न तत् ॥ १७९ ॥

सत्रायागूर्याप्रवृतौ विश्वजिद्याग इष्यते ।

व्रते कालविधिर्वत्सैः स्यादसन्नयतोऽपि सः ॥ १८० ॥

कालार्थ एव[4]संबंधः प्रस्तरे शाखयात्विति ।

इति चतुर्थः पादः

विधिरभ्युदये पूर्वदेवतापनये मतः ॥ ११८ ॥

लुप्तस्तत्रोपांशुयाजो देवताप[5]नये भवेत् ।

अनिरुप्ते निरुप्ते च प्रायश्चित्तमिदं समम् ॥ १८२ ॥

---

[1] 'न्यायेनैवं वचनतस्त्वाज्येनैव समापनम्' इत्येकमर्धमधिकमत्र "

[2] .... क्षाधतावेव .... । "

[3] .... दर्शेप्रत्यामनेन्नतत् "

[4] कालार्थ एव संयोगः .... । "

[5] .... देवतापनयाद्भवेत् । "

निर्वापो वैकृतीभ्यस्स्यादनिरुप्ते यदोदयः ।
किञ्चिन्निरुप्ते शेषस्य तूष्णीं निर्वाप इष्यते ॥ १८३ ॥

स्यादसन्नयतोऽप्येषा प्रायश्चित्तिर्निमित्ततः ।
अक्रीतराजकस्यापि सत्रोत्थानेऽस्ति विश्वजित् ॥ १८४ ॥

द्वादश प्रकृतौ दीक्षाः विना[1]कल्पान्तराणि वा ।
द्वादशाहे द्वादशत्वं [2]दीक्षाणां नियतन्तु हि ॥ १८५ ॥

गव्यदीक्षाकालविधौ भवेन्माघ्येव[3]पौर्णिमा ।
उत्कर्षेऽवभृथस्य स्युर्नाग्निहोत्रादिकाःक्रियाः ॥ १८६ ॥

न तत्र प्रतिहोमास्स्युः कर्तव्याकरणे हि ते ।
तथैवावभृथादूर्ध्वमि[4]ष्टयुत्कर्षेऽपि नैव ते ॥ १८७ ॥

भवेयुः प्रतिहोमा यद्यतिपत्तिक्रमेण ते ।
भिन्ने प्रकृत एव स्याज्जुहोतिस्तन्निमित्तकः ॥ १८८ ॥

व्यापन्नमित्यभोज्यं स्यात्केशकीटादिदूषितम् ।
प्रायश्चित्तमपच्छेदयौगपद्ये[5]ऽपि भिद्यते ॥ १८९ ॥

तत्र द्वयोर्विकल्पस्स्यात्[6] पौर्वापर्ये परं बली ।
पश्चादुद्गात्रपच्छेदे सर्वस्वं स्यात्पुनःक्रतौ ॥ १९० ॥

---

1 .... श्रुतकल्पत्रयन्तुवा । ''
2 .... दीक्षाणां नियतन्तु वै । ''
3 .... माध्येव पूर्णिमा । ''
4 .... इष्टयुत्कर्षेऽपि नैव ताः । ''
5 .... यौगपद्येऽपि विद्यते । ''
6 .... पौर्वापर्ये परं बलि । ''

आवृत्तिरह्नस्तस्यैवापच्छेदोऽ[1]हर्गणो यदि ।

इति पञ्चमः पादः

सत्रेषु भिन्नकल्पानामधिकारो न विद्यते ॥ १९१ ॥
पुरोहितश्च राजा चाधिकृतो द्वंद्वतस्सह ।
सत्रेषु ब्राह्मणा एव भवेयुरधिकारिणः ॥ १९२ ॥
तत्रापि वैश्वामित्रास्स्युस्समकल्पैस्सहेतरैः ।
तत्रापि साग्निकास्तेषां पात्रं साधारणं मतम् ॥ १९३ ॥
त्रयोऽप्यध्वरकल्पादौ वर्णास्स्युरधिकारिणः ।

इति षष्ठः पादः

स्वदाने देयमात्मीयं नभूमिर्न तु[2]रङ्गमाः ॥ १९४ ॥
नासत्संपाद्य दातव्यं न शुश्रूषुश्च शूद्रकः ।
यावत्स्याद्दक्षिणाकाले दातव्य तावदेव[3]तु ॥ १९५ ॥
भृत्यर्थं सकलं देयं क्रतुभुक्तचर्थवर्जितम् ।
सर्ववेद[4]समेवस्यादहीने विश्वजित्यपि ॥ १९६ ॥
सर्ववेदसमिष्टं यदधिकं द्वादशाच्छतात् ।
भृतिभेदोऽपरिमितं तच्च पूर्वाधिकं भवेत् ॥ १९७ ॥
स्तुति[5]स्स्याद्वार्ष्णिकीत्यादौ तत्तद्गोत्रादिकीर्तनम् ।
भवे[6]द्वैश्वसृजे सत्रे संवत्सरपदं दिने ॥ १९८ ॥

इति सप्तमः पादः

---

[1] .... पच्छेदोऽहर्गणोयदि । ,,
[2] .... भूमिर्न तुरङ्गमः । ,,
[3] .... दातव्यं तावदेव हि । ,,
[1] सर्ववेतसमेव .... । ,,
[2] ,, ... । ,,
[3] स्तुतिस्स्यात्परकृत्यादौ तत्तद्गोत्रस्य कीर्तनम् । ,,

न संस्कृते चतुर्होता तथा नोपनयाहुतिः ।
नैवात्र स्यपतीष्टिस्स्यान्नावकीर्णिपशुस्तथा ॥ १९९ ॥
[1]कर्माण्युपायनादीनि स्मार्तोदगयनादिके ।
उत्तरत्र तु पित्र्याणि कार्याणि स्मृतिचोदिते ॥ २०० ॥
सत्रेऽपि याश्चाक्रयणं पयोव्रतमुखानि च ।
न [2]कालनियमे जीर्णे पशुश्छागो विशेषतः ॥ २०१ ॥

इति षष्ठोऽध्यायः—४४ कारिकाः ।

अथ सप्तमोऽध्यायः

व्यवस्थातोऽतिदेशोऽस्ति श्येनाङ्गानामिषावसौ ।
पञ्चसञ्चर[3]गोऽयं स्यात्सविधिस्तुतिगोचरः ॥ २०२ ॥
ऐन्द्राग्नैककपालस्थोऽप्येवमेव भवेदसौ ।
तत्र प्राघासिकाङ्गानां प्रदेशो वैश्वकर्मणे ॥ २०३ ॥

इति प्रथमः पादः

रथन्तरादिसंज्ञत्वात् प्रदेशो गीतिगोचरः

इति द्वितीयः पादः

[3]अग्निहोत्रेऽतिदेशस्स्यात् प्रायणीये न यौगिके ।
विश्वजित्सर्वपृष्ठेऽस्ति प्रघासावभृथे तथा ॥ २०४ ॥
तत्र द्रव्यं तुषादि स्यात् अतिदेशोऽस्ति वैष्णवे ।
न निर्मथ्याज्यबर्हिष्वप्यतिदेशो गुणे विधेः ॥ २०५ ॥

---

[1] कर्माण्युपनयादीनि .... । (क)
[2] न कालनियमोऽजीर्णे .... । ”
[3] पञ्चसञ्चरणेऽयं स्यात् .... । ”
[4] अग्निहोत्रे प्रदेशस्स्यात् .... । ”

प्राकृतं स्यात्प्रणयनं तत्तु म[1]ध्यमयोर्भवेत् ।
[2]यद्यपूर्वं तत्तयोरित्येकाधिकरणं मतम् ॥ २०६ ॥
धर्माप्तिस्स्वरसामैककपालादिषु लिङ्गता ।
वासोऽनसोः क्रिया नास्ति आज्यदोहाग्न्यसंस्कृतिः ॥
न यूपकर्मोपशये नाग्नौ पृष्ठास्सधर्मकाः ।

इति तृतीयः पादः

सौर्यादावस्ति धर्माप्तिः वैदिकी सा सदक्त्वतः ॥ २०८ ॥
गाबामयनिके ज्योतिराद्या एकाहधर्मकाः ।

इति सप्तमोऽध्यायः—७ कारिकाः ।

अथ अष्टमोऽध्यायः

एकस्मादेव धर्माणामतिदेशो व्यवस्थया ॥ २०९ ॥
यत्र यद्धर्मलिङ्गं स्यात्तत्र तद्धर्मसंक्रमः ।
अपूर्वस्सोम इष्टीनां प्रकृतिर्दर्शपूर्णिमे ॥ २१० ॥
दैक्षस्यापि पशोस्सैव पशूनां दैक्ष इष्यते ।
सौत्य एकादशिन्यास्स्यात् गणानां सा पुनर्भवेत् ॥ २११ ॥
अव्यक्तचोदनानान्तु सोमः प्रकृतिरिष्यते ।
द्वादशाहोऽहर्गणानां गव्यस्स्यादयनस्पृशाम् ॥ २१२ ॥
उत्तरेषामादिमस्स्यात् साद्यस्क्रादि निकायिषु ।
फलादीनां विकृतिषु न भवेदतिदेशनम् ॥ २१३ ॥
तथैप गुणकामानामपि नास्त्यतिदेशनम् ।
न सौर्यादिषु[3]होतुस्स्याद्व्यवस्था पर्वभेदतः ॥ २१४ ॥

---

[1] ... ... तत्तुप्रथमयोर्भवेन् । (क)
[2] अयंश्लोकोनास्ति 'क' मातृकायाम् ,,
[3] वासोऽनसोः क्रयादाप्तिः ... ... ।

आग्नेयो देवतैक्येन सौर्यप्रकृतिरिष्यते ।
आग्नेयपयसोर्द्रव्यसाम्यात्सान्नाय्यधर्मता ॥ २१५ ॥
कृष्णलेष्वौषधा धर्मा आज्यधर्मा मधूदके ।

इति प्रथमः पादः

सुरावजिनयोरिष्टिः, सान्नाय्यं प्रकृतिः पशोः ॥ २१६ ॥
तत्रापि श्रुतमामिक्षाशृतैकप्रकृतिर्मता ।*
अहीनसत्रप्रकृतिर्द्वादशाहो व्यवस्थया ॥ २१७ ॥
सपञ्चदशरात्रन्तु सत्रं स्यात्कौण्डपायिनाम् ।

इति द्वितीय पादः

———

हविर्भेदे देवतायास्साम्येन प्रकृतिस्थितिः ॥ २१८ ॥
सप्तरात्रे तु नानाह्नां प्रवृत्तिस्संघसाम्यतः ।
षडहावृत्तिरेव स्याच्चत्वारष्षडहा इति ॥ २१९ ॥
संस्थागणशतोक्थ्यादौ धर्मास्स्युर्द्वादशाहिकाः ।
शतोक्थ्यादिगतोक्थ्यादिष्वेकाहाद्धर्मसंक्रमः ॥ २२० ॥
ग्राह्या उत्पत्तिगायत्र्यो बृहस्पतिसवे मताः ।

इति तृतीयः पादः

दर्विहोमाः कर्मनाम वैदिकानामपीष्यते ॥ २२१ ॥
जुहोतिचोदनानां स्यात्, अपूर्वा एव ते मताः ।

इति अष्टमोऽध्यायः – १३ कारिकाः

अथ नवमोऽध्यायः

प्रयोक्त्रपूर्वं धर्माणां स्याच्चैतत्सान्निपातिनाम् ॥ २२२ ॥

---

* आश्रितैकप्रकृतिः आमिक्षेति न्याय्यम् । यतः आमिक्षायां पयसो धर्म एव न्याय्यः ।

निमित्तश्चापि तेषान्तदित्येवं वर्णकत्रयम् ।
प्रोक्षणं हन्तिपिंषिभ्यां सोमापूर्वैश्च वाग्यमः ॥ २२३ ॥
देवताफलसंबन्धस्ता[1]भ्यां वा न प्रयुज्यते ।
न देवतातिथिन्यायाद्यज्ञे प्राधान्यमश्नुते ॥ २२४ ॥
[2]व्रीह्याद्यैश्च प्रयुज्यन्ते न प्रोक्षणमुखान्यपि ।
सोमोद्भवेनापूर्वेण नोपांशुत्वं प्रयुज्यते ॥ २२५ ॥
प्रणीतावाग्यमोऽप्येवं नैष्टिकेन प्रयुज्यते ।
प्रतीष्टिकं नाग्निधर्मः पत्न्यन्तत्वं विनोत्तमम् ॥ २२६ ॥
अभ्यासस्सामिधेनीनां स्थानधर्मत्वमृच्छति ।
आरम्भणीयानावृत्ताविष्टयोरावृत्तिमश्नुते ॥ २२७ ॥
[3]नान्वाधानाङ्गमारंभणीया पुंसस्तु संस्कृतिः ।
न निर्वापे सवित्रश्विपूष्णामूहः प्रवर्तते ॥ २२८ ॥
तस्मिन्नग्निपदन्तूह्यं समवेताभिधानतः ।
तथा मांसपुरोडाशे चोह्यं धान्यपदं भवेत् ॥ २२९ ॥
इडामन्त्रे यज्ञपतेर्नोहस्सत्रेषु विद्यते ।
विद्यते यजमानस्य सूक्तवाके फलित्वतः ॥ २३० ॥
आग्नेयसुब्रह्मण्यायां नोह्या हरिवदादयः ।
न तस्यै शृतमित्यादिर्बस्ते चोहं प्रपद्यते ॥ २३१ ॥
पशुसामानविध्यश्चेन्मेष्यां लुप्तो[4]मनुर्भवेत् ।
नियतस्स्यादिराशब्दः प्रगोतस्स प्रयुज्यते ॥ २३२ ॥

इति प्रथमः पादः

गीतयस्सामशब्दोक्ताः स्यादूहश्च सकर्तृकः ।
साम संस्कारकर्म स्यात् तद्भवेत्प्रत्यृचं तृचे ॥ २३३ ॥

---

[1] .... ताभ्यां नैव प्रयुज्यते । (क)
[2] व्रीह्याद्यैर्न प्रयुज्यन्ते प्रोक्षणप्रमुखान्यपि । ,,
[3] नान्वारंभाङ्गमेषेतीमौ न्यायौ वृत्तिभाष्ययोः ,,
[4] .... लुप्तोऽध्रिगुर्भवेत् । ,,

प्रगेयं तत्समास्वेव [1]रूढमुत्तरयोरिति ।
त्रैशोकं विषमत्वेऽपि बृहत्योर्भवतीति च ॥ २३४ ॥

बृहदथन्तरे गेये प्रगाथ[2]ककुभोरपि ।
प्रागाथिकबृहत्योश्च स्याद्यौधाजयरौरवम् ॥ २३५ ॥

प्रागाथिकानुष्टुभोश्च श्यावाश्वांधीगवे मते ।
द्वयोर्द्वयोः प्रग्रथनात् तृचत्वं बार्हतेषु च ॥ २३६ ॥

गीतिभेदा विकल्पेरन् नऋक्सामे उभे स्मृते ।*
प्रगीतया चोपस्थानं तानश्च[4] क्रतुषु स्मृतः ॥ २३७ ॥

साम्नां स्यादुत्तरासूहः आयीभावविकारतः ।
स्तोभा अप्यतिदिश्येरन् विवर्णमधिकन्तु ते ॥ २३८ ॥

व्रीह्यादिस्थानमापन्नाः स्युर्नीवारनखादयः ।
परिधौयूपधर्माप्तिस्स्यान्नियोजनसाधने ॥ २३९ ॥

शृतदध्नोरभ्युदये प्रणीताकार्यमिष्यते ।
रथन्तरबृहद्धर्मा यथाशब्दं व्यवस्थिताः ॥ २४० ॥

कण्वे समुच्चितास्ते च गोसवादौ व्यवस्थिताः ।
[5]विकृतावतिदेशोऽस्ति नैव पार्वणहोमयोः ॥ २४१ ॥

विभज्यैव प्रयोक्तव्यौ पर्वणोस्तौ यथायथम् ।
समिदाद्याः प्रयाजास्तु स्युरारादुपकारकाः ॥ २४२ ॥

इति द्वितीयः पादः

---

* ऋक्सामनी इति साधुपदम् ।

[1] अयं श्लोकतुरीयांशः क मातृकाकां नास्ति । ”

[2] .... प्रगाथककुभोर्मते । ”

[3] इदं श्लोकार्धं 'क' मातृकायां नास्ति । ”

[4] .... तानश्च मनुषु स्मृतः । ”

[5] गोसवे तु व्यवस्थैव धर्माणां सामगत्वतः इत्यर्धमधिकमत्र 'क' मातृकायाम् ।

द्रव्यदेवतमूह्यं स्यात् तथा द्रव्यविशेषणम् ।
यूपस्य लौकिके स्पर्शे प्रायश्चित्तमुदीरितम् ॥ २४३ ॥

द्वावप्यूह्यौ द्विपशुकप्रयोगे पाशमन्त्रकौ ।
पाशानित्येष मन्त्रोऽपि निवेशं प्रकृतौ भजेत् ॥ २४४ ॥

प्रकृतौ पत्न्यनेकत्वे पत्नीमित्यस्य नोह्यता ।
विकृतौ तदनेकत्वेऽप्यूह्यतास्य न विद्यते ॥ २४५ ॥

तथोक्थ्यादेरैकविध्ये प्रास्मा इत्यस्य नोह्यता ।
व्रीहिप्रतिनिधावूहो नीवारादौ न विद्यते ॥ २४६ ॥

नोह्यास्स्युः पश्वनेकत्वे संसर्गिद्रव्यवाचकाः ।
तत्रत्वभ्यसितव्यत्वमेकधेति पदं व्रजेत् ॥ २४७ ॥

[1]देवताद्वयमेव स्यात् पशौ मेधपतिद्रव्यम् ।
तत्रैकवचनान्तस्य नास्त्यूहो बहुदैवते ॥ २४८ ॥

देवतारूपभेदे तु तत्राप्यूहः प्रवर्तते ।

इति तृतीयः पादः

———

वंक्रीणां पश्वनेकत्वे समस्य वचनं मतम् ॥ २४९ ॥

प्राकृतेऽश्वादिवंक्रीणां समस्यैव वचो भवेत् ।
[2]प्राकृतस्यापि करणं समस्तप्रतिषेधतः ॥ २५० ॥

न्यायद्वयं वक्ष्यमाणं टुप्टोकायामुदीरितम् ।
निषिद्धोऽपि चतुस्त्रिंशन्मन्त्रः पक्षे प्रवर्तते ॥ २५१ ॥

उरूकेति वपायां स्यात् प्रशसेति प्रशस्तयोः ।
श्येनमित्यादिकं तस्य कार्त्स्न्यस्य प्रतिपादकम् ॥ २५२ ॥

---

[1] इदमर्धं 'क' मातृकायां नास्ति ।
[2] इदमर्धं अनन्तरश्लोकात्परत्र वर्तते

[1]दर्शार्थं नाग्निहोत्रार्थं कालोद्वानं निमित्तकम् ।
तद्वद्गतश्रियो धार्ये न[2]दर्शाद्युद्धृते मनुः ॥ २५३ ॥

प्रदेयधर्मः पयसि श्रपणार्थे[3] न विद्यते ।
कर्तव्योऽभ्यु[4]दयेष्टेस्तु तदर्थेन हविष्मताम् ॥ २५४ ॥

पशु[5]कामेष्टिषु तयोः न कर्तव्यस्तयोस्तु सः ।
[6]पय अदौ तथा सोम संस्कारार्थेऽपि नास्ति सः ॥ २५५ ॥

[7]स्यात्पर्यग्निकृतोत्सर्गः तदन्ताङ्गततेर्विधिः ।
आज्येन शेषमित्येष यागान्तरविधिर्भवेन् ॥ २५६ ॥

इति नवमोऽध्यायः — ३५ कारिकाः ॥

अथ दशमोऽध्यायः

अतिदेशः पदार्थानामुप[8]कारमुखान्मकः ।
कृष्णलेनावाघतश्च विष्णोरावाहनं न च ॥ २५७ ॥

आरंभणीया नाङ्गेषु दीक्षणीयादि[9]कादिषु ।
नानुमत्यादिषु तथा नापि [10]स्वस्मिन्प्रवर्तते ॥ २५८ ॥

---

[4] दर्शार्थं नाग्निहोत्रस्य .... । (क)
[2] .... न दर्शाद्युद्धृतौ मनुः । ''
[3] .... पयस्यर्थे न विद्यते । ''
[4] कर्तव्योऽभ्युदये स स्यात् । ''
[5] पशुकामेष्टिगो न सः । ''
[6] मिश्रणे पय आदीनां सोमधर्मो न विद्यते । ''
[7] अश्ववेघपशूत्सर्गे तदन्ताङ्गततेर्विधिः । ''
[8] .... मुखो मतः । ''
[9] .... दीक्षणीयादिकेष्टिषु । ''
[10] .... नापि स्वस्यां प्रवर्तते । ''

यूपाहुतिः खलेवाल्यां नास्ति स्थाण्वाहुतिस्तथा ।
प्रयाजो वक्ष्यमाणानां भवेत्संस्कृतिरुत्तमः ॥ २५८ ॥

नाज्यभागौ पशुगतः पुरोडाशश्च संस्कृतिः ।
चरुरोदनभेदेन स्यात्स्थाल्या[1]मेव पच्यते ॥ २५९ ॥

तस्मिन्पेषः [2]संयमनं संवापस्तापनं तथा ।
उपधानं सप्रथनं श्लक्ष्णीकरण[3]भावना ॥ २६० ॥

अध्यूहनं प्रज्वलनं [4]व्यत्यासासादनं तथा ।
कर्तव्यत्वं न [5]भजते प्रयोजनविलोपतः ॥ २६१ ॥

इति प्रथमः पादः

श्रुतत्वात्कृष्णले पाको नास्त्युपस्तरणादिकम् ।
[6]श्रुतेर्भक्षणमप्यस्ति भक्षोपहतयस्सह ॥ २६२ ॥

ब्रह्मेतरेषां नो भक्षः भक्षास्तस्यापि कालतः ।
चतुर्धाकृतिनिर्देशावपि तत्र न विद्यते ॥ २६३ ॥

ऋत्विग्दत्तं भृतिस्तेषां न हविश्शेषभक्षणम् ।
तेषां न सत्रे वरणं नापि स्यात्तत्र दक्षिणा ॥ २६४ ॥

शमनीयो न सत्राङ्गं तत्कुर्युस्सत्रिणः पृथक् ।
संहत्य करणेऽपि स्युस्तदन्ये तत्र ऋत्विजः ॥ २६५ ॥

---

1 चरुरोदनभेदस्स्यात् तत् स्थाल्यामेव पच्यते .... ,,
2 .... संयवनं । ,,
3 .... भावनम् । ,,
4 .... व्युद्धृत्यासादनं तथा । ,,
5 .... न लभते .... । ,,
6 श्रुतेर्भक्षणमस्त्यस्मिन् ,, । ,,

BVBSSMV

111

[1]अश्वादिदानं कामेष्टावदृष्टैकप्रयोजनम् ।
द्वेष्याय दानमप्येवमस्थियागस्तु जीवताम् ॥ २६६ ॥

लुप्यते जपसंस्कारो [2]मृतस्यैष भवेद्यदि ।
कर्तव्यमेव तत्रापि शुक्रान्वारंभणादिकम् ॥ २६७ ॥

गुणकामास्तत्र न स्युस्सदोमानादिसंश्रयाः ।
नायुराशास्त इत्याद्याः[3] न च स्युर्होतृकामतः ॥ २६८ ॥

सर्वस्वारस्समाप्यस्स्यान्मृते कर्मास्थियज्ञवत् ।
आयुराशास्त इत्येतत् तत्र स्याद्यावदार्भवम् ॥ २६९ ॥

ऋतुयाज्यावृतिस्सत्रेऽप्यदृष्टार्थत्वतो भवेत् ।
निर्वापः पवमानेष्टौ [5]गुणलोपान्न लभ्यते ॥ २७० ॥

संख्यामुष्टिविरोधे स्यान्निर्वापे मुष्टिलोपनम् ।
गोरसाधारणैर्धेनुत्वाद्यैश्छागो निवर्तते ॥ २७१ ॥

साधारणैस्तु श्वेतादिगुणैर्नासौ निवर्तते ।
निवृत्तिं खदिरत्वादिः खले बाल्यादिषु व्रजेत् ॥ २७२ ॥

तस्यां न स्युश्छेदनाद्याः स्युस्तु पर्यूहणादयः ।
प्राकृतक्रमभेदेऽपि न पदार्थो निवर्तते ॥ २७३ ॥

न प्राकृतक्रमान्यत्वा[6]त्पदार्थोपकृतेष्वपि ।

इति द्वितीयः पादः

———

[1] गवादिदानं .... । (क)
[2] .... मृतस्यैव । ,,
[3] .... न च स्युर्होतृकामनाः । ,,
[4] .... गुणलोपान्न लुप्यते । ,,
[5] .... पदार्थोऽप्राकृतो भवेत् । ,,

Acc-111

एकादशप्रयाजादौ गुणमात्राविधिर्मतः ॥ २७४ ॥

हिरण्यगर्भमन्त्रस्स्यादुत्तराधारसंश्रयः ।
[1]प्राकृते यूपकार्यादौ परिध्यामिर्विधीयते ॥ २७५ ॥

उत्करादौ गुणस्यैव विधिरासादनादिके ।
[2]अग्नौ दीक्षाहुतीनां स्यात् प्राकृतीभिस्समुच्चयः ॥ २७६ ॥

प्राकृत्या न समुच्चेया पुनराधेयदक्षिणा ।
अन्वाहार्यस्याग्रयणे वासो वत्सं निवर्तकम् ॥ २७७ ॥

[3]तदन्वाहार्यधर्मस्स्यात् वत्से पाको न विद्यते ।
नापि वाससि पाकस्स्यात् न तयोरभिधारणम् ॥ २७८ ॥

द्वादशं शतमित्येषा संख्या गोमात्रसंश्रया ।
विभज्य दक्षिणा देया विभागस्स्यात्समाख्यया ॥ २७९ ॥

सर्वस्या दक्षिणायास्स्यात् भुवि धेनुर्निवर्तिका ।
एकां पञ्च गवामेव[4] कृत्स्नस्यापि त्रिवत्सकम् ॥ २८० ॥

प्राकाशदानमध्वर्युभागस्यैव निवर्तकम् ।
श्यावोऽश्वस्सकलस्यापि स्यात्सोमचमसस्तथा ॥ २८१ ॥

[6]वाक्यैस्येतु ब्रह्मभाववाक्यस्यैव निवर्तकम् ।
यजुर्युक्तस्तु नाध्वर्युभागस्य विनिवर्तकः ॥ २८२ ॥

इति तृतीय पादः

---

[1] इदमर्धं 'क' मातृकायां नास्ति ।
[2] अग्नौ दीक्षार्थमन्त्राणां प्राकृतैस्स्यात्समुच्चयः ।
[3] तत्रान्वाहार्यधर्मस्स्यात् वत्से पाको निवर्तते ।
[4] .... कृत्स्नस्यापि त्रिवर्षकः ।
[5] वाक्यैक्ये तु ब्रह्मभागमात्रस्यैव निवर्तकः ।

नक्षत्रेष्ट्युपहोमाद्या नानारिष्टादिबाधकाः ।
कुशकार्ये विधानाच्च तेषां स्युर्बाधकाश्शराः ॥ २८३ ॥

स्याद्रथस्य तु घोषस्तु बाधको मन्त्रदर्भयोः ।
बार्हस्पत्यादिभिर्नैव बाध्यन्ते प्राकृता ग्रहाः ॥ २८४ ॥

प्राजापत्यैर्न दैक्षाद्याः[1] नानूयाजास्तथामनैः ।
पत्नीभिर्नोपगा गुग्गुल्वाद्यैर्न नवनीतकम् ॥ २८५ ॥

तार्येण नाहतं न श्लोकाद्यैर्गायत्रमुख्यकम् ।
कौत्सकाण्वजनित्रादि सामभिर्बाध्यते तु तत् ॥ २८६ ॥

तदुद्वापं तानि कुर्युस्स्वस्वसंख्यानुसारतः ।
आवापो राजसामादेरुभयं पवमानगम् ॥ २८७ ॥

[2]विधिस्थपदमेव स्यात् सौर्यादिविकृतिष्वपि ।
अग्निः पावक इत्यादौ सगुणं तेषु तद्भवेत् ॥ २८८ ॥

[3]गुणोबुधन्वन्त्वादिः स्यात् नाधानेष्वाज्यभागयोः ।
अनुबंध्यावनस्पत्योः स्यातामुस्त्रावनस्पती ॥ २८९ ॥

[4]स्यातामवभृथावग्नीवरुणौ स्विष्टकृद्गुणौ ।
छिद्रापिधान्यां सर्वेषु अगुणस्स्विष्टकृद्भवेत् ॥ २९० ॥

अनुयाजस्स्विष्टकृतः तृतीयस्संकृति[5]र्मता ।
याज्यानुवाक्यावचनं न भजेदर्थकर्मताम् ॥ २९१ ॥

ऊहो मनोतामन्त्रस्य वायव्यादौ न विद्यते ।
स्वयोनावेव गेयं स्यात् साम कण्वरथन्तरम् ॥ २९२ ॥

---

* न्यायमालायां कारिकायां च बृधन्वत्तादिरिति पाठः । ”

1 .... नानूयाजास्तथामने । (क)

2 विधिस्थमग्न्यादिपदं नियतं निगमेष्वपि । अधिकपाठः ”

3 गुणो बुधन्वदादिःस्यात .... । ”

4 स्यातामावभृथावग्नी .... । ”

5 .... र्मतः । ”

गानमुत्तरयोस्तस्यस्त्रयोन्युत्तरयोर्भवेत् ।
[1]ग्रहान्यत्वेन विकृतिः नैव स्यात् स्तोत्रशस्त्रयोः ॥ २९३ ॥
ऊह आज्यपशब्दस्य पृषदाज्येन विद्यते ।

इति चतुर्थः पादः

आदितस्स्यादुपादानं त्रिकपादादिषु क्रमात् ॥ २९४ ॥
एकत्रिकक्रतोर्मध्यंदिन आद्ये तृचे मतम् ।
तस्मिन् धूर्गानमभ्याससंपाद्यं तृचसंश्रयम् ॥ २९५ ॥
[2]दशरात्रोऽहर्गणेषु मध्यमस्संप्रवर्तते ।
नाद्योपादाननियमो मन्त्रेष्वाधूननादिषु ॥ २९६ ॥
समागमेन संख्यायाः पूरणं स्तोमवृद्धिषु ।
[3]भवेदेतासु तु बहिष्पवमानेष्वृगागमः ॥ २९७ ॥
आग्नेयीनामागमस्स्यात् सामिधेनीविवृद्धिषु ।
षोडशी प्रकृतावेव स्याद्राजन्यनिमित्तकः ॥ २९८ ॥
तद्ग्रहस्स्यादाग्रयाणात् तृतीयसवने तु सः ।
स राजन्यनिमित्तोऽपि भवेत् सस्तुतशस्त्रकः ॥ २९९ ॥
सकलानां द्विरात्राणां [4]उत्तरेऽहन्ययं मतः ।
अहीनस्य चतुर्थेऽहन्येकत्रैव भवेदसौ ॥ ३०० ॥

---

[2] ग्रहान्यत्वेऽपिविकृतिः .... । ”
[3] दशारात्रोऽहर्गणेषु प्रथमस्संप्रवर्तते । ”
[1] भवेदेतस्यतु .... । (क)
[2] .... उत्तरेऽहन्यसौ मतः । ”

उत्क्रष्टव्या विषुवति [1]त्वहन्याग्रयणाग्रता ।
[2]जगत्यां साम यच्च यात् जगत्साम तदुच्यते ॥ ३०१ ॥
[3]उपाग्रवत्योरग्रत्वं संसवादिषु नो भवेत् ।
ग्राह्यस्स्वस्थान एवैन्द्रवायवः पाठलक्षिते ॥ ३०२ ॥
गुणकामाधिकारेऽपि ग्राह्यस्स्वस्थान एव सः ।
शुक्रामंथीग्रहादेस्तु विधौ स्यात्प्रतिकर्षणम् ॥ ३०३ ॥
तदैन्द्रवायवात्पूर्वं कृष्यते सादनं तथा ।
ग्रहसाधनकर्षेऽपि प्रदानं नैव कृष्यते ॥ ३०४ ॥
[4]त्र्यनीकायामादितोऽह्नोरनिमित्तोऽग्रताविधिः ।
व्यूढो विकारोऽनीकानां गव्ये स्वस्थानवृद्धयः ॥ ३०५ ॥
[5]छन्दोव्यतिक्रमो व्यूढो मन्त्रैकविषयो मतः ।

॥ इति पञ्चमः पादः ॥

बृहद्रथन्तरादीनां गानं कार्यं तृचे मतम् ॥ ३०६ ॥
कालार्थ एव संयोगो[6] वीक्षणं स्वर्दृशोर्भवेत् ।
गव्यादि पृष्ठ्यषडहे नान्वहं पृष्ठसामनी ॥ ३०७ ॥
द्वादशाहैकादशिन्यां विभज्यालंभ इष्यते ।
[7]न पृष्ठानां विश्वजिति बृहत्स्तोत्रे निवेशनम् ॥ ३०८ ॥

---

1 .... त्वहन्नाग्रयणाग्रता । ''
2 जगत्यां साम यत् तस्मात् .... । ''
3 उपाग्रवत्योरग्र्यत्वं .... । ''
4 त्र्यणीकायामादि .... । ''
5 छन्दोव्यतिक्रमो व्यूढो .... । ''
6 ....वीक्षणस्वर्दृशोर्भवेत् । ''
7 निपृष्ठानां विश्वजिति .... । (क)

[1]वैरूपसामेत्यादेस्स्यात् पृष्ठ एव निवेशनम् ।
त्रिवृदग्निष्टुदित्यादौ स्तोत्रियानवके त्रिवृत् ॥ ३०९ ॥

सामद्वयं संसवादौ पृष्ठस्तोत्रस्य साधनम् ।
षडहप्रातिलोम्येऽपि तदन्ते मधुभोजनम् ॥ ३१० ॥

[2]आवृत्तिश्च षडावृत्तौ न मध्वाशस्य विद्यते ।
[3]अव्याप्ते षडहावृत्तौ तस्याप्यावृत्तिरापतेत् ॥ ३११ ॥

सत्रेऽपि स्यान्मध्वशनं मानसं नाहरन्तरम् ।
सत्राणि बहवः कुर्युः' त एवार्त्विज्यकारिणः ॥ ३१२ ॥

सत्राहीनावभिमतावासियज्यादिलक्षणौ ।
न भिन्ने प्रत्यहं पौण्डरीकेऽयुतसहस्रके ॥ ३१३ ॥

विभज्य नयनं तेषां न सर्वास्स्युर्मनोर्ऋचः ।
मानोपहृत्योर्वासस्स्यात् अहीने तत्तु भिद्यते ॥ ३१४ ॥

स्यादुपावहृतेरेव काले तद्वाससो ग्रहः ।

इति षष्ठः पादः

पश्वङ्गानि हवींषि स्युस्तान्यप्येकादशैव तु ॥ ३१५ ॥

इज्याशेषात्त्विष्टकृन्न[4]होत्रेऽध्यूध्निस्तु विक्रिया ।
वनिष्टुर्निहितः [5]पात्रेऽप्याग्नीधे तस्य विक्रिया ॥ ३१६ ॥

प्रैषानुवचनाभ्यां स्यात्प्रशास्तुरपि भक्षणम् ।
स भक्षयेद्भागमेकं कुर्वन्कार्यद्वयीमपि ॥ ३१७ ॥

---

[1] वैरूपसामेत्यादौ स्यात् .... । ''
[2] आवृत्तिष्वडहावृत्तौ न मध्वाशस्य युज्यते । ''
[3] व्यवेतषडहावृत्तौ .... । ''
[4] .... अध्यूध्निर्होत्रैडविक्रिया । ''
[5] .... पात्रेऽप्याग्नीध्रैडस्य विक्रिया । ''

भक्षः प्रतिप्रस्थातुर्न वपाश्रपणकारिणः ।
[1]अपूर्वो गृहमेधी स्यादाज्यभागविधानतः ॥ ३१८ ॥

ततोऽधिकं यावदुक्तं स्यात्स्विष्टकृदिडादिकम् ।
स्विष्टकृत्परिसंख्यात्वे[2] प्राशित्रादीर्न वारयेत् ॥ ३१९ ॥

प्रायणीयातिथ्ययोर्न विकल्प्ये शंखिडान्तते ।
पूर्वाभ्यामेव कृतयोः शंखिडाभ्यां समापनम् ॥ ३२० ॥

स्युरपूर्वा उपसदस्त्रौवाघारविधानतः ।
अपूर्वोऽवभृथोऽपि स्यादाज्यभागविधानतः ॥ ३२१ ॥

बृहद्यवादिनियतं यत्र तस्य पुनर्विधिः ।
[3]प्राकृतानां विकल्पादि न श्रुतैर्द्रव्यदेवतैः ॥ ३२२ ॥

नाप्यौदुम्बर'यूपेण खादिरस्य समुच्चयः ।
बाधन्ते वैकृताश्शुद्धा व्रीहयः प्राकृतान्यवान् ॥ ३२३ ॥

सर्वेषु पञ्चावत्तत्वं पश्वङ्गेषु प्रवर्तते ।

इति सप्तमः पादः

पर्युदासो न होतारं न सोम इति तु स्तुतिः ॥ ३२४ ॥

नातिरात्रे निषेधस्स्यात् , अनाहुतिरिति स्तुतिः ।
अभिघार्या नाभिघार्या[5] इत्याद्याश्च स्तुतिर्भवेत् ॥ ३२५ ॥

---

[1] अपूर्वो गृहमेधीयः .... । क
[2] .... प्राशित्रादि निवारयेत् । ,,
[3] प्रकृतानां विकल्पादिर्नश्रुतैर्द्रव्यदैवतैः । ।
[4] नाप्यौदुंबरयूपेन स्वादिरस्य समुच्चयः । । ,,
[5] .... इत्याद्यापि स्तुतिर्भवेत् । ,,

[1]अग्न्याधेये सामगानान्न ब्रह्मेति निषिध्यते ।
दीक्षितो न जुहोतीति पुरुषार्थो निषिद्ध्यते ॥ ३२६ ॥

पदेनाहवनीयस्य सामान्यस्य निवर्तनम् ।
वैमृधादौ सामिधेनीसाप्तदश्योपसंहृतिः ॥ ३२७ ॥

न भवेद्दर्विहोमेषु स्वाहाकारोपसंहृतिः ।
अग्न्यतिग्राह्ययोरस्ति विकृतावतिदेशनम् ॥ ३२८ ॥

स्याद्द्विरेवावदातव्यं पुरोडाशादिकं हविः ।
चतुर्गृहीतन्तु भवेदुपांशुयजने हविः ॥ ३२९ ॥

[2]सान्नाय्येनेत्विति विधेः पूर्वभागे भवेत्स्तुतिः ।
उपांशुयाजे स्यादाज्यं हविर्धौवविधानतः ॥ ३३० ॥

देवता तस्य तु भवेत् [3]मान्त्रिकीषु च काचन ।
तत्रापि स्युर्विकल्पेन तिस्रो विष्ण्वादिदेवताः ॥ ३३१ ॥

स पौर्णमास्यामेव स्यात् , अपि प्राक् सोमयागतः।

इति दशमोऽध्यायः—७६ कारिकाः।

अथ एकादशोऽध्यायः

आग्नेयादिफलं तन्त्रं भाष्येऽङ्गोपकृतिस्तथा ॥ ३३२ ॥

सा भवेदखिलैरङ्गैः[4] काम्यावृत्त्याधिकं फलम् ।
यावत्फलोदयं हन्तिस्सकृत्सर्वौषधे त्वसौ ॥ ३३३ ॥

सकृदङ्गानुष्ठितिस्स्यात् त्रयः कार्याः कपिञ्जलाः ।
यावत्स्वं दोहने गावो दर्शाङ्गानान्तु तन्त्रता ॥ ३३४ ॥

---

[1] अग्न्याधेये सामगानं न ब्रह्मेति । ”
[2] इदं श्लोकार्धं नास्ति .... । (क)
[3] .... तान्त्रिकीष्वेव काचन । ”
[4] .... काम्यावृत्त्यादिकं फलम् । ”

[1]सहप्रदानं हविषोः न कृष्णग्रीवयोर्भवेत् ।

इति प्रथमः पादः

— —

स्यादेशकालकर्तृणामाग्नेयादिषु तन्त्रता ॥ ३३५ ॥
अङ्गानां मुख्यदेशाद्याः स्युः प्रयोगाङ्गभावतः ।
दर्शे च पूर्णमासेन नाङ्गानामस्ति तन्त्रता ॥ ३३६ ॥
हविष्यध्वरकल्पायामप्येवं संघभेदतः ।
प्राजापत्ये पशुगणे भवेत्तन्त्रं वसाहुतिः ॥ ३३७ ॥
भिन्नदेवेषु पशुषु न सा तन्त्रत्वमश्नुते ।
भवेद्यूपाहुतिस्तन्त्रं [2]यूपैकादशिनीगता ॥ ३३८ ॥
अप्स्वेवावभृथस्य स्यादङ्गानामप्यनुष्ठितिः ।
अङ्गावृत्तिर्देशभेदात् प्रधानेषु विहारयोः ॥ ३३९ ॥
तन्त्रेणैवोपकुर्वन्ति[3] त्रयो ब्रह्मादयस्तयोः ।
आपराग्निकहोमानामावृत्तिः कर्तृभेदतः ॥ ३४० ॥
ब्रह्मसाम्नीत्येष विधिरालंभोत्कर्षगोचरः ।
त्रींस्त्रीनिति विधिस्त्वेष स्यात्पश्वन्तरगोचरः ॥ ३४१ ॥
अङ्गानां दशपेयाभिषेचनीये न तन्त्रता ।
निष्कासेनेति वारुण्या न प्रचारान्तरे विधिः ॥ ३४२ ॥
निष्कास इत्यपि तथा नैव कर्मान्तरे विधिः ।

इति द्वितीयः पादः

— —

---

[1] सहप्रधानं व्यवधेर्न .... । ''
[2] .... पश्वेकादशिनीगता । ''
[1] .... त्रयो ब्रह्मादयस्तथा । ''

वेद्यादेर्वचनान्मुख्यभिन्नकालादिसंगतिः ॥ ३४३ ॥

सर्वेषु तन्त्रमाधानं यूपस्सोमपशुत्रये ।
तत्तक्षणाद्यपि तथा तन्त्रं स्यादपि तत्स्वरुः ॥ ३४४ ॥

अहर्गणे विषाणायाः प्रासनं चरमेऽहनि ।
अन्त्याह्वाने वाग्विसर्गो नानाबीजावहन्तिषु ॥ ३४५ ॥

पशौ पौरोडाशिके स्यादाह्वाने वाग्विसर्जनम् ।
प्रधानमात्रापवर्गे[1] भवेच्चाग्निविमोचनम्[2] ॥ ३४६ ॥

+[3]सुब्रह्मण्योपसत्काला तन्त्रेण स्यादहर्गणे ।
'भिद्येत सुत्याकाले तु कालभेदेन सान्वहम् ॥ ३४७ ॥

प्रतिप्रयोगं देशादिभेदापेक्षा[5] न विद्यते ।
आन्तात्पात्राणि धार्येरन् प्रतिपत्तिविधानतः ॥ ३४८ ॥

आरभ्य पवमानेष्टिं भवत्येषां विधारणम् ।
ऊर्ध्वं सकलसोमानां प्राजापत्यप्रचारणम् ॥ ३४९ ॥

उत्कृष्यन्ते पदापेक्षाः शब्दा हरिवदादयः ।

इति तृतीयः पादः

— —

अङ्गावृत्तिः कर्तृभेदात् भिन्नदक्षिणकर्मणाम् ॥ ३५० ॥

राजसूये कर्तृभेदेऽप्यधिष्ठानं न भिद्यते ।
भवत्यवेष्टौ पञ्चानां हविषां भिन्नतन्त्रता ॥ ३५१ ॥

+ सुब्रह्मण्याह्वानं उपसत्कालीनमिति उपसत्काल इति सप्तमी न्याय्या ।

[1] .... भवेदग्निविमोचनम् । ''

[2] साङ्गान्तेऽग्निविमोकोहि वार्तिके संप्रदर्शितः । अधिक पाठः ''

[3] सुब्रह्मण्योपसत्काला तन्त्रेण .... । ''

[4] भिद्येत सुत्याकालातु .... । ''

[5] .... न युज्यते । ''

कामाय तन्त्रभेदस्स्यात्पवमानहविस्त्रये ।
[1]स्याद् द्वादशाहसुत्यानां तन्त्रं दीक्षोपसद्गुणाः ॥ ३५२ ॥
सुत्याकालास्तु भिद्यन्ते सवनीयादिका गुणाः ।
सुब्रह्मण्योपसत्काला नाह्नामभ्यासमृच्छति ॥ ३५३ ॥
कुंभीहृदयशूलाद्यास्तन्त्रं स्युः पाशुके गणे ।
तथैव भिन्नदैवत्ये न तु जात्यन्तरे तथा ॥ ३५४ ॥
कपालानि न तन्त्रं स्युरनेकाश्वप्रतिग्रहे ।
[2]सकृदुद्धन्तिमन्त्रोऽपि नानाबीजेषु भिद्यते ॥ ३५५ ॥
निर्वापादिबहुत्वेन तन्मन्त्रावृत्तिरिष्यते ।
त्रिर्वेदिं प्रोक्षतीत्यादौ मन्त्र आदौ सकृद्भवेत् ॥ ३५६ ॥
[3]कण्डूनां यौगपद्यं चेत् कृष्यैत्वेति मनुस्सकृत् ।
सकृन्मध्ये प्रबोधादावपि स्वप्नादिमन्त्रकः ॥ ३५७ ॥
सकृत्प्रस्थानमन्त्रस्स्याद्विश्रम्य गमनेष्वपि ।
[4]भिद्यते प्रत्युपरवं मन्त्रः खननसाधनः ॥ ३५८ ॥
हविष्कृदग्निगुमुखा भिद्यन्ते कालभेदतः ।

इति एकादशोऽध्यायः—३५ कारिकाः ॥

अथ द्वादशोऽध्यायः

पश्वर्थानुष्ठितैरङ्गैः पुरोडाशेऽप्युक्रिया ॥ ३५९ ॥

---

[1] स्युर्द्वादशाहसुत्यानां .... । ”
[2] सकृद्भवेद्धन्तिमन्त्रः .... । ”
[3] कण्डूनां यौगपद्येऽपि .... । ”
[4] भिद्यथे प्रत्युपरम .... । ”

तत्राज्यभागौ कर्तव्यौ स्यातां तौ न पशौ यदि ।
सौमिकीष्टिषु वेदिस्स्यात् [1]तत्पात्राणि तु नेष्टिषु ॥ ३६० ॥

शामित्रोऽग्निः पुरोडाशश्रपणे न प्रसज्यते ।
श्रप्यं प्राजहिते [2]कुण्डपायिनामयने हविः ॥ ३६१ ॥

सवनीयादिनिर्वापो न हविर्धानयोर्भवेत् ।
प्रायणीयादिषु पृथक्जागरः सौमिकाद्भवेत् ॥ ३६२ ॥

अध्वर्युमन्त्रा भिन्नास्स्युः प्राघासिकविहारयोः ।
इष्टिकर्मसु सोमाङ्गेष्वन्वाधानं न [3]भिद्यते ॥ ३६३ ॥

व्रतोपायनमप्येवं सोमाङ्गेनैव सिद्धितः ।
ग्रहणार्थान्वाहितिश्चेत् दीक्षेष्टौ सा परं भवेत् ॥ ३६४ ॥

सोमेष्टिषु न कर्तव्यं पत्नीसंनहनं तथा ।
आरण्यभुक्तिरप्येवं कर्तव्यं शेषभक्षणम् ॥ ३६५ ॥

अन्वाहार्यं न दातव्यं भक्षणन्त्वृत्विजां भवेत् ।
तासु होतुर्वरणमप्यदृष्टार्थत्वतो भवेत् ॥ ३६६ ॥

प्रोक्षणं सकृदेव स्यादातिथ्येष्ट्यादिबर्हिषा
तस्याः स्तरणमन्त्रस्स्यादावर्त्य पशुकर्मणि ॥ ३६७ ॥

पशौ सन्नाहहरणमन्त्रयोर्नास्त्यनुष्ठितिः ।

इति प्रथमः पादः

अग्नयो गार्हपत्याद्याः वैदिकेष्वेव कर्मसु ॥ ३६८ ॥

नियतस्स्यात्पुरोडाशस्सवनीयपशावपि ।
सवनीयेषु न पृथगाह्वानं स्याद्धविष्कृतः ॥ ३६९ ॥

---

1 .... पात्राणि तु नेष्टिषु ।
2 .... कौण्डपायिनामयनेहविः । ”
3 .... विद्यते ।

तथैव सौम्यचर्वादौ पाशुकेनैव सिद्धितः ।
निशीष्टौ दर्शसंयुक्तमङ्गजातं प्रसज्यते ॥ ३७० ॥

आरंभणीया विकृतौ विकृत्यर्था प्रसज्यते
विरुद्धसमवाये स्याद् भूयसामनुरोधनम् ॥ ३७१ ॥

तत्र तत्समतायाश्च भवेन्मुख्यानुरोधनम् ।
सुत्यायां नियतं पर्व द्विधर्मा परिधिर्भवेत् ॥ ३७२ ॥

तत्र न स्युर्यूपधर्मा ये स्वधर्मविरोधिनः ।
पशुतन्त्रान्तर्गतत्वात् पुरोडाशाः [2]प्रसङ्गिणः ॥ ३७३ ॥

विकृतिश्चेत्प्रकृत्येकतन्त्रा सा तन्त्रिणी भवेत् ।
बर्हिराग्रयणे कांस्यभोजिन्यायेन पुष्पितम् ॥ ३७४ ॥

[3]द्यावापृथिव्यस्यैतत्स्यात्तावता नैव तन्त्रिता ।

इति द्वितीयः पादः

वत्सत्वग्वाससोर्भिन्नकार्यत्वेन समुच्चयः ॥ ३७५ ॥

[4]अग्नौ दैक्षपशौ तत्र प्रसङ्गिहविरष्टकम् ।
समुच्चिता ऋजुत्वाद्याः व्रीह्याद्यास्तु विकल्पिताः ॥ ३७६ ॥

वैश्वानरी पाथिकृतीत्याद्या अपि विकल्पिताः ।
भिन्न[5]स्कन्नादिहोमानां दर्शादिषु समुच्चयः ॥ ३७७ ॥

मन्त्राध्ययनधर्माणां कर्मकालेषु नादरः ।
कार्यः प्रयोगो मन्त्राणां स्वस्वरेणैव कर्मसु ॥ ३७८ ॥

---

[1] नारंभणीया विकृतौ प्रकृत्यर्था प्रसज्यते । ''
[2] .... पुरोडाशाः प्रसङ्गिनः । ''
[3] द्यावापृथिव्यस्यैवस्यात्तावता नैव तन्त्रिता । ''
[4] अग्नौ दैक्षपशोस्तन्त्रप्रसङ्गिहविरष्टकम् । ''
[5] इदमर्धं 'क' मातृकायां नास्ति । ''

ये पुनर्ब्राह्मणाधीतास्तेषां भवति तत्स्वरः ।
मन्त्राणामवसानेन कर्मादीन् सन्निपातयेत् ॥ ३७९ ॥

समान एव न्यायोऽयं वसुधाराहुतिष्वपि ।
स्यादाघारेऽप्ययं न्यायः मन्त्रा ग्राह्या विकल्पिताः ॥ ३८० ॥

चतुर्भिरभ्रिमित्यादौ भवेत्तेषां समुच्चयः ।
उरु प्रथस्वेत्यादीनां न भवेत्तु समुच्चयः ॥ ३८१ ॥

समुच्चयो भवेदेव क्रियमाणानुवादिनाम् ।

इति तृतीयः पादः

जपस्तुत्यादिमन्त्राणां धर्मार्थत्वात्समुच्चयः ॥ ३८२ ॥

याज्यानुवाक्यायुगलमनेकं स्याद्विकल्पितम् ।
[1]समुच्चेयाः क्रयास्सोमे गुदयागे समुच्चयः ॥ ३८३ ॥

अग्न्याधेये दक्षिणास्स्युस्संख्याभेदाद्विकल्पिताः ।
जाघनीनां पशुगणे न भवेत्तु समुच्चयः ॥ ३८४ ॥

[2]वार्क्ष्यादिना स्यात्काम्येन नित्योख्यविनिवर्तनम् ।
काम्यो नाहवनीयस्स्यादाधानादेरभावतः ॥ ३८५ ॥

[3]तत्र नाधानसंस्कारो नित्योख्यस्य न धारणम् ।
कश्चिदेव परार्थानि कुर्याद्बहुषु यष्टृषु ॥ ३८६ ॥

---

[1] समुच्चेयाः क्रयास्सर्वे .... । "

[2] वार्क्षादिना स्यात्काम्येन .... । "

[3] तेषु नाधानसंस्कारः .... । "

[1]येषु यः कश्चिदेव स्यात् सत्रे गृहपतिर्मतः ।
[2]सर्वे (त्रे)ऽपि सर्वान्कुर्वीरन् संस्कारानञ्जनादिकान् ॥ ३८७ ॥

याजमानार्त्विज्ययोर्विप्रतिषेधे परं बली ।
आर्त्विज्यं ब्राह्मणा एव कुर्युस्सर्वेषु कर्मसु ॥ ३८८ ॥

इति द्वादशोऽध्यायः— २७ कारिकाः ।

— —

इति पूर्वमीमांसा-चित्रपटस्समाप्तः

———

कामादिदोषदूराय कल्याणगुणशालिने ।
अस्मद्देशिकभूताय गुरवे करवै नमः ॥

हरिः ओम्

शुभमस्तु

श्री शारदाम्बायै नमः

श्री त्यागेश्वराय नमः

---

[1] तेषु यः कश्चिदेवस्यात् .... । "
[2] सर्वेऽपि सत्रे कुर्वीरन् .... । "
[3] .... विप्रतिषेधे परं बलि । "

॥ श्रीः ॥

श्रीगणेशाय नमः

श्रीदक्षिणामूर्तये नमः

लघुवार्तिकटीका लघुन्यायसुधा

प्रथमाध्याये द्वितीय पादः

अर्थवादाधिकरणम् (१)

अर्थवादमन्त्रनामधेयानि न धर्मे प्रमाणानि । तेभ्यस्तत्प्रमित्यनुदयात् । अर्थवादनाञ्चाख्यायिकादिप्रतिपादनेन निराकांक्षतया सन्निहितविध्येकवाक्यत्वायोगात् । अध्ययनविधेस्तदंशेऽदृष्टार्थत्वात् इति चेत् ;

" मन्त्रार्थवादप्रमुखाः प्रमाणानीति वार्तिके "

धर्म इति शेषः । प्रमुखशब्दो नामधेयपरः । वार्तिकग्रहणेन, भाष्ये अर्थवादमात्रस्य प्रामाण्यमत्रोक्तमिति दर्शितम् । अध्ययनविधेर्दृष्टार्थत्वस्य सति संभवे त्यागायोगात्, तद्वशेनैवार्थवादानां प्राशस्त्यतात्पर्यकत्वावगमात्, लक्षणया विध्यपेक्षितसमर्पणेन तदेकवाक्यतया सिद्धमर्थवादानां धर्मे प्रामाण्यम् । तदाह —

" स्युरर्थवादास्स्तुत्यर्थाः "

इति । मन्त्रनामधेययोरपि तद्वशेनैव तदेकवाक्यतया प्रामाण्यम् ।

इत्यर्थवादाधिकरणम् ॥ १ ॥

विधिवन्निगदाधिकरणम् (२)

ऊर्जोऽवरुद्ध्या इत्येवमादौ चतुर्थ्यादिना ऊर्गवरोधादीनां फलत्वावगमात्, तस्य च हेत्वाकांक्षायां " औदुंबरो यूपो भवति " इत्यादिना सिद्धवदुपदिष्टस्य औदुंबरत्वादेः सिद्धसाध्यसमभिव्याहारन्यायेन हेतुत्वेनान्वयात् फलपरत्वमिति चेत् ;

विधिवन्निगदास्तथा ॥ १ ॥

विधिवत् = अज्ञातफलादि ज्ञापकवत् निगद्यन्त इति तथोक्ताः । तथा = स्तुत्यर्था इत्यर्थः । विध्यभावे भवनाक्षिप्तभावनायां पुरुषार्थभाव्यकत्वाभावेन औदुंबरतादेरेव भावतापत्त्या ऊर्जोऽवरुद्ध्या

इत्यादेरेवार्थवादात् पुरुषार्थभाव्यकत्वाय, 'भवती'ति लेट्परिग्रहात्। आम्नोत्यन्तार्थवादादेव तत्परिग्रहे, फले विधीयमानायाः सिद्धरूपायास्तस्याः दध्यादिविदाश्रयाकांक्षिण्याः तदलाभात्, "औदुम्बरता यूपोद्देशेन विधीयते" तस्याः, 'उर्ग्वा' इत्यादिः "ऊर्जोऽवरुद्ध्या" इत्यन्तोऽर्थवादतया स्तुत्यर्थ इति।

इति विधिवन्निगदाधिकरणम् ॥ २ ॥

हेतुवन्निगदादिकरणम् (३)

"तेन ह्यन्नं क्रियते" इत्यादौ हिशब्दश्रुत्या हेतुत्वावगमात् तस्य च व्याप्तिवचनोत्थापकतया सर्वान्नकरणविधिकल्पकत्वेन प्रयोजनवत्तरत्वात् हेतुपरत्वमिति चेत्;

"हेतुवन्निगदास्तद्वत्"

शूर्पेण जुहोतीति वेदेनैव अनन्यापेक्षेण शूर्पस्य होमकरणत्वप्रतीतेः हेत्वनपेक्षणात् कल्पितव्याप्तिवचनसिद्धसाधनत्वेन दर्वीपिठरादिना प्रत्यक्षवचनविहितशूर्पस्य विकल्पसमुच्चयानुपपत्तेश्चार्थवादत्वम्। "नह्यत्रानूयाजा इज्यन्ते" इत्यादौ तु हेतुत्वसंभवात् तत्परत्वम्।

इति हेतुवन्निगदाधिकरणम् ॥ ३ ॥

मन्त्राधिकरणम् (४)

मन्त्राणामनुष्ठेयार्थस्मारकत्वेनोपकारकत्वे निर्वापादीनां मन्त्रार्थानां कल्पसूत्रादिनापि स्मरणोपपत्त्या नियमेनाम्नानाप्राप्तेरदृष्टार्थत्वम्। एवञ्च मन्त्रविनियोजकब्राह्मणवाक्यमर्थवत्। इतरथा परिसंख्यापतेः इति चेत्;

मन्त्रास्स्मृत्युपकारिणः।

अनुष्ठेयार्थस्मृतिद्वारा क्रतूपकारिण इत्यर्थः। जपोपयोगिनां दृष्टालाभेनादृष्टार्थत्वेऽपि समवेतार्थाभिधायिनां दृष्टसंभवे, अदृष्टार्थत्वानुपपत्तेः, मन्त्रनियमस्य दृष्टाभावेऽदृष्टत्वात्। ब्राह्मणवाक्यानाञ्च प्राप्तपरिसंख्यादिना अर्थवत्त्वात्, मन्त्राणां दृष्टार्थत्वम्। यद्यप्यर्थवादाधिकरणे मन्त्राणां पदार्थविधया प्रयोगविध्यर्थे प्रामाण्मुक्तम्; यद्यपि च मन्त्राणामङ्गत्वे द्वारविशेषचिन्ता तृतीये सङ्गता; तथाऽपि, स्वार्थेऽपि संभावितं प्रामाण्यत्रैव विचार्यमिति सङ्गतिः।

इति मन्त्राधिकरणम् ॥ ४ ॥

इति लघुवार्तिकटीकायां प्रथमस्याध्यायस्य
द्वितीयपादः ॥

अथ प्रथमाध्यायस्य तृतीयपादः

स्मृत्यधिकरणम् (१)

स्मृतीनां न धर्मे प्रामाण्यम् । पौरुषेयत्वेन दोषशङ्ककलङ्कितत्वात् । न प्रत्यक्षवेदमूलकत्वेन । स्मृतिवैय्यर्थ्यात् । नोच्छिन्नशाखामूलकत्वेन, शाखेयत्तायाः परंपरया सर्वजनीनत्वेन, तदुच्छेदासंभवात् । तस्मात् भ्रममूलत्वेनाप्रामाण्यमिति चेत् ;

स्यात् स्मृतीनां प्रमाण्यत्वं मूलवेदानुमानतः ॥ २ ॥

शिष्टकृतत्वात् तत्परिग्रहाच्चवेदानुमापकत्वेन प्रामाण्यं स्यात् । विप्रकीर्णशाखामूलकत्वाच्च नांधपरंपरा । सर्वशाखाध्ययनाभावात् , कथञ्चित् तद्दर्शनेऽपि सर्वोपसंहारासामर्थ्याद्वा तदुपसंहारफलं स्मृतिप्रणयनम् । अतः स्मृतयः प्रमाणम् ।

इति स्मृत्यधिकरणम् ॥ १ ॥

विरोधाधिकरणम् (२)

"औदुंबरी सर्वा वेष्टयितव्या" इत्यादीनां प्रत्यक्षस्पर्शनश्रुतिविरुद्धानामपि स्मृतीनां उक्तहेतुनामूलानुमानात् विरुद्धार्थकयोरपि ग्रहणाग्रहणविधिवत् विकल्पेन प्रामाण्यमिति चेत् ;

न च श्रुतिविरुद्धानां,

प्रत्यक्षश्रुतिविरुद्धानां स्मृतीनां न प्रामाण्यम् । वह्निशैत्यानुमानवत् प्रत्यक्षश्रुतिविरोधे तदनुमानानुदयात् । अतुल्यप्रमाणत्वेन विकल्पानापादकत्वाच्चेति ।

इति विरोधिकरणम् ॥ २ ॥

"वैसर्जनहोमीयं वासोऽध्वर्युः प्रतिगृह्णाति"

इत्यादीनां उक्तहेतुना तदनुमानात् प्रत्यक्षश्रुत्यविरोधाच्च प्रामाण्यमिति चेत् ;

न च मूलान्तरस्पृशाम् ।

रागादिदृष्टमूलान्तरवतां अनुपपत्त्येकशरणवेदमूलकत्वाकल्पनात् न प्रामाण्यम् ॥ ३ ॥

पदार्थप्राबल्याधिकरणम् (४)

"आचान्तेन कर्तव्यम्" इत्येवमादीनां स्मृतीनां, "वेदं कृत्वा वेदिं करोति" इत्यादिप्रत्यक्षश्रुतिविरुद्धार्थकत्वादप्रामाण्यम् । न चाचमनादिपदार्थात्मकप्रबलप्रमेयावष्टब्धत्वात् स्मृतीनां, पदार्थगुणक्रमादिप्रतिपादकश्रुतितः प्राबल्यमिति वाच्यम् ; पूर्वभाविप्रमाणगतत्वेन श्रुतित्वकृतप्राबल्यस्यैव ज्यायस्त्वात् इति चेत् ;

श्रौतक्रमविरोधेन नाचाम स्मृत्यमानता ॥ ३ ॥

श्रौतक्रमविरोधेन हेतुना या आचमनस्मृत्यमानता सानेत्यर्थः । सर्वपदार्थप्राप्तिसापेक्षक्रमबोधकश्रुतेः तत्प्रापकप्रमाणाविरोधेन नेतव्यत्वात् प्रमेयविरोधोपजीवनेनैव प्रमाणयोर्विरोधात् प्रथमभाविप्रबलप्रमेयावष्टब्धत्वेन स्मृतेरेव दुर्बलप्रमेयावष्टब्धश्रुतितो बलवत्त्वाच्चेति ।

इति पदार्थप्राबल्याधिकरणम् ॥ ४ ॥

यववराहाधिकरणम् (५)

यववराहवेतसशब्दानां प्रियंगुवायसजंबूषु, दीर्घशूकप्रियंगुवंजुलेषु च प्रयोगप्रत्यययोरविशेषादुभयार्थत्वमिति चेत् ;

अर्थाद्यवादिशब्दानां वाक्यशेषानुसारिणः ।

"यत्रान्या ओषधयो म्लायन्ते, अथैते मोदमाना इवोत्तिष्ठन्ति" "वराहं गावोऽनुधावन्ति" "अप्सुजो वेतसः" इति वाक्यशेषोपोद्बलितस्य दीर्घशूकादिषु प्रयोगस्य प्रबलत्वात् ; 'यवमयश्चरुः' 'वाराही उपानहौ' 'वैतसे कटे प्राजापत्यांश्चिनोति' इत्यत्र दीर्घशूकादिरेव शब्दार्थः । अन्यत्र गौण्यापि प्रयोगप्रत्ययोपपत्तेरिति ।

इति यववराहाधिकरणम् ॥ ५ ॥

पिकनेमाधिकरणम् (६)

पिकनेमसततामरसादिशब्दाः न म्लेच्छप्रसिद्धार्थाः । दृष्टार्थव्यवहारमात्रकारिषु अदृष्टानपेक्षेषु तेषु विप्लुतिसंभवेन अविश्वसनीयत्वात् । किन्तु निगमनिरुक्तव्याकरणप्रसिद्धार्था एव । अन्यथा निगमादिवैयर्थ्यात् ; इति चेत् —

अन्या विरोधे मानत्वं म्लेच्छव्यवहृतेरपि ॥ ४ ॥

आर्यप्रसिद्ध्यविरोधे म्लेच्छप्रसिद्धेरपि शब्दार्थनिर्णये मानत्वमित्यर्थः । पिकादिशब्दाः वेदादिषु सत्त्वान्न विप्लुताः । आर्येष्वप्रसिद्धार्थत्वान्नार्थविप्लवः । निगमादीनामुभयत्राप्यप्रसिद्धेषु सावकाशत्वात् । अतो म्लेच्छप्रसिद्धार्था इति ।

इति पिकनेमाधिकरणम् ॥ ६ ॥

कल्पसूत्राधिकरणम् (७)

कल्पसूत्राणि वेदवत् अन्यानपेक्षप्रमाणानि । प्रत्यक्षवेदार्थानां तेषु बहुलमुपलंभेन शाखान्तरतुल्यत्वात् । अन्यथा तत्करणवैयर्थ्यात् । नित्यब्रह्मयज्ञविधिविषयत्वात् । भारद्वाजादि समाख्यायाश्च काठकादिवदुपपत्तेः इति चेत् ;

न वेदाः कल्पसूत्राणि

दृढकर्तृस्मरणात् न काठकादितुल्यानि। नित्यब्रह्मयज्ञविधिविषयत्वस्य प्रवाहनित्यतयाप्युपपत्तेः। तत्प्रणयनस्य चोपसंहारासमर्थान्प्रत्यर्थवत्त्वादिति।

इति कल्पसूत्रादिकरणम् ॥ ७ ॥

होलाकाधिकरणम् (८)

होलाकाद्याचाराः मानवातिरिक्ताश्च स्मृतयो न सर्वान्प्रति प्रमाणानि। तेषां कैश्चिदेवाचरणात् स्मृतीनाञ्च कैश्चिदेव पाठात्, तन्मूलवेदस्यापि तत्संबंधानुमानात् इति चेत् —

होलाकाद्यव्यवस्थितम्।

स्मृतौ पुरुषविशेषानुपादानात् सर्वान्प्रति प्रामाण्योपपत्तेः। अध्ययननियमस्य च, कर्तुस्तच्चरणतया अन्यथासिद्धत्वात्। आचरितृष्वन्यव्यावृत्तधर्मविशेषाभावेन तेन सामान्यश्रुत्यनुमानाविघातात्। अनाचरणस्य चालस्यादिनाप्युपपत्तेः होलाकादि सर्वान्प्रति प्रमाणम्।

इति होलाकाधिकरणम् ॥ ८ ॥

व्याकरणाधिकरणम् (९)

न व्याकरणं मानम्–निर्मूलत्वात्। 'साधूनेव प्रयुञ्जीत' इति स्मृतेः, मूलवेदे साधुपदप्रवृत्तिनिमित्तनिरुक्तेः, अनादिवाचकत्वस्य गाव्यादिष्वपि संबन्धुरस्मरणेन गतत्वात्। प्रतीतिजनकत्वस्याप्यविशेषात्। अत एव न प्रतीतये प्रयोगनियमः। धर्माय नियम इति चेत्; न निर्मूलत्वादेव। व्याकरणान्तरमूलत्वे अंधपरंपरा च। अत एव "गवादय एव साधवो न गाव्यादयः" इति न स्वरूपनियमोऽपि विगीतत्वनैष्फल्यवेदबाधपूर्वापरविरोधेभ्यश्च[1] इति चेत् —

मानं व्याकरणम्

अनादिवाचकत्वस्यैव साधुशब्दप्रवृत्तिनिमित्तत्वात्। गाव्यादिशब्दे वाचकशक्तिजे तदपरिज्ञानात्, पार्श्वस्थस्य शक्तिभ्रमेणान्यान्प्रति प्रयोगोपपत्त्या शक्तिकल्पनायोगात्। तथा च साधूनेव प्रयुञ्जीतेत्येको वेदो धर्मार्थं प्रयोगनियमाय कल्प्यते। गवादय एव साधव इति स्वरूपनियमे व्याकरणान्तरं मूलम्।

[1] सुशब्दज्ञानाद्धर्मः, न प्रयोगाद्धर्म इति विगीतत्वम्। रक्षोहादेः अध्येतृभ्यो मीमांसायाश्च सिद्धेर्नैष्फल्यम्। 'यदकालयंस्तत्कालेयस्य कालेयत्वं' 'ततो वसु वामं समभवत् तद्वामदेव्यम्' इति च वेदविरुद्धम्। 'कलेर्ढक्' 'वामदेवाड्डयड्यौ इति। अर्थप्रयुक्तशब्दानुशासनप्रतिज्ञानां बाधस्य च तथात्वात्। तद्व्याकरणापरव्याकरणाच्च। धासस्य निरवयवतधर्मपदाघटितत्वात् पूर्वापरविरोधः।

गाव्यादिव्यावृत्तगवादिशब्दस्वरूपस्य श्रोत्रप्रत्यक्षत्वान्नान्धपरंपरा। विरुद्धप्रयोजनकथनस्य ग्रहणादि श्रुतिवदुपपत्तेः। छांदसवर्णागमलोपस्वरविनाशे ऊहादीनां प्रयोजनत्वात्। वेदविरुद्धस्य वेष्टनस्मृतिवत् अप्रामाण्यात्। वाक्यनिरवयवत्वादीनां न्यायाभावेनाप्रामाण्येऽपि अन्यत्र प्रामाण्योपपत्तेरिति।

इति व्याकरणाधिकरणम् ॥ ९ ॥

लोकवेदाधिकरणम् (१०)

लोकवेदयोः शब्दौ भिन्नौ, छांदसवर्णागमलोपस्वरस्वाध्यायानध्ययननियमादिरूपविरुद्धधर्मवत्त्वात्। अत एवचार्थभेदः 'हिरण्यपर्णं' 'उत्ताना वै देवगवाः' इति वेदाच्च, इति चेत्—

नान्ये शब्दार्था लोकवेदयोः ॥ ५ ॥

गवादि-शब्दास्तदर्थाश्च लोकवेदयोर्नान्ये, एकत्वप्रत्यभिज्ञानात्। ब्राह्मणासः-त्मना-इत्यादौ वर्णमात्रस्य न्यूनाधिकभावेऽपि पदैक्यावगमात्। स्वाध्यायनियमस्वरयोः प्रमाणाभावेन पदभेदानापादकत्वात्। हिरण्यपर्णेत्यादीनाञ्चार्थवादतया स्वार्थातात्पर्यकत्वात, हिरण्यादिशब्दानां लोकप्रसिद्धार्थकत्वाच्चेति।

इति लोकवेदाधिकरणम् ॥ १० ॥

आकृत्यधिकरणम् (११)

आकृतिविशिष्टाव्यक्तिश्शब्दार्थः, नाकृतिमात्रम्। तत्र विधिनिषेधानां, गुणादिशब्दसामानाधिकरण्यस्य, लिङ्गकारकसंख्यादेश्चानन्वयात्, इति चेत् —

शब्दार्थ आकृतिर्व्यक्तौ लक्षणाक्षेपसंभवात्।

"विशेष्यं नाभिधागच्छेत् क्षीणशक्तिर्विशेषणे" इति नागृहीतविशेषणान्यायेन जातिरेव शब्दार्थः। विधिनिषेधादीनां जातिव्यक्त्योरभेदात् व्यक्तौ लक्षणया वोपपत्तेरिति।

इत्याकृत्यधिकरणम् ॥ ११ ॥

एवं यथाभाष्यं आपादपरिसमाप्तेरधिकरणान्यनुक्रम्य, विरोधाधिकरणात् यववराहाधिकरणान्तं वार्तिककारीयं विशेषं दर्शयितुमाह —

आविरोधादाचयवात् भिद्यन्ते वार्तिके नयाः ॥ ६ ॥

"औदुंबरी सर्वा वेष्टयितव्या" इत्यस्य प्रत्यक्षस्पर्शनश्रुतिविरोधेऽपि मूलवेदानुमानं भवत्येव। सर्वशाखोपलंभासंभवेन तन्मूलवेदस्य सर्वत्राभावानिश्चयात्। तत्संशयस्य चाप्रतिबन्धकत्वात्। अनुमितस्य च तस्य पुरुषान्तरेण शाखान्तरे प्रत्यक्षसंभवेन आत्मीयपरकीयप्रत्यक्षश्रुत्यर्थयोर्विल्पस्यैव युक्तत्वात्। परप्रत्ययानादरेण स्वप्रत्ययविश्वासात् स्पर्शनानुष्ठानेऽपि अप्रामाण्यानिश्चयात्, अननुष्ठानलक्षणमप्रामाण्यं

वेष्ठनस्मृतेः । तदाह —

श्रुतिस्मृत्योर्विरोधे हि विस्रम्भः श्रुतिबोधिते ॥ १२ ॥

शाक्यशास्त्रं मन्वादिग्रन्थवत् प्रसिद्धवैदिकैरग्निहोत्रादिभिः कर्तृसामान्याभावेऽपि चतुर्भ्योऽपि वेदेभ्यो भिन्नप्रस्थानवेदमूलकत्वेन प्रमाणमिति चेत् —

" बाह्यशास्त्रञ्चानपेक्षम् "

अत्यन्तवेदविद्वेषिभिः पुरुषापशदैः कृतं तत् अवैदिकमप्रमाणञ्चेति शिष्टानां स्मरणात् अनुपपत्त्येकशरणवेदमूलकत्वाकल्पनात् न तत्प्रमाणम् । अतो नापेक्षणीयम् । तदीयमहिंसादिवचनमपि न प्रमाणम् । 'वेदो धर्ममूलम्' इत्यादिना चतुर्दशानामेव विद्यास्थानानां धर्मप्रमाणत्वनियमादिति । १३ ।

वसन्तोत्सवादय आचारा न प्रमाणम् । स्मर्तृभिः "सदाचारः प्रमाण "मिति निबन्धनेऽपि विशिष्यानिबन्धनात् व्यतिक्रमसाहसदर्शनाच्च, इति चेत् —

शिष्टाचारस्य मानता ॥ ७ ॥

धर्मबुद्ध्यानुष्ठीयमानाचारस्य मानता । लाघविकैः स्मर्तृभिर्विशिष्यानिबन्धेऽपि, व्यतिक्रमसाहसादेः रागादिमूलकत्वेनाधर्मत्वेऽपि अन्यत्र तदभावात् ।

यद्याचारे विगानं स्यान्नादृत्योदृष्टहेतुकः । इति ।

इति शिष्टाचारप्रामाण्याधिकरणम् ॥ १४ ॥

पीलुशब्दस्य म्लेच्छैः हस्तिनि प्रयोगात्–आर्यैः वृक्षविशेषे प्रयोगात्–धर्मनिर्णये शास्त्रविदामाचार्याणां प्राबल्येऽपि शब्दार्थनिर्णये द्वयोस्तुल्यत्वात्, अवध्यस्मरणेनानादित्वस्य तुल्यत्वात्, नानार्थत्वमिति चेत् —

बलिन्यार्यव्यवहृतिर्म्लेच्छानां व्ययहारतः ॥ ८ ॥

प्रतिपादकत्वस्य समत्वेऽपि नोभयोः शक्तिग्राहकत्वम्, अनेकशक्तिकल्पनागौरवात् । आर्याणां धर्मलिप्सया शब्दार्थविप्लवे यत्नवत्त्वात् म्लेच्छानां दृष्टव्यवहारमात्रपराणां प्रयोगस्य गौण्याप्युपपत्तेः । गौणत्वपरिज्ञानादन्यस्य शक्तिभ्रमोपपत्तेः । अतो न नानार्थत्वम् । तस्माद्बलिन्यार्यप्रसिद्धिः ।

इत्यार्यप्रसिद्धिप्राबल्याधिकरणम् ॥ १५ ॥

मातुलसुतापरिणयनाद्याचाराणां, "मातुलस्य सुतामूढ्वा" इत्यादिस्मृतीनाञ्च वेदमूलकत्वेन विकल्पेन प्रामाण्यम् । द्वयोरपि साक्षाद्वेदानुमापकत्वस्य तुल्यत्वात्, इति चेत् —

स्मृत्याचारविरोधे च नाचारस्य प्रमाणता ।

मातुलदुहितृपरिणनात् पक्षे धर्मः—पक्षे अधर्मश्चेति विकल्पानुपपत्तेः । आचरितृणां वेदार्थोपसंहाराशक्त्या, तस्य स्मृतिकल्पनेनैव वेदकल्पकत्वात् । स्मृतेः कर्तव्यताबोधकत्वात् । आचारस्य विमर्शपूर्वकं कर्तव्यताकल्पनद्वारा शब्दकल्पकत्वाच्च व्यवधानम् । तस्य रागादिमूलान्तरस्य स्पष्टत्वाच्च । तस्मात् स्मृतिविरुद्धाचाराणामप्रामाण्यम् ।

इति स्मृत्याचारविरोधे स्मृतिप्राबल्याधिकरणम् ॥ १६ ॥

त्रिवृच्चर्वश्वबालाधिकरणम् (१७)

त्रिवृच्चर्वश्वबालादिशब्दाः लोकात् त्रैगुण्यादीनां वाचकाः । वाक्यशेषात्तु स्तोत्रीपानवकादीनाम् । अतो नानार्थाः । धर्मनिर्णये वेदस्य प्राबल्येऽपि शक्तिग्रहे उभयोस्तुल्यत्वम् । लोकस्य वा प्राबल्यम् । अतः त्रिवृद्बहिष्पवमानं—आदित्यः प्रायणीयः पयसि चरुः—आश्वबालः प्रस्तरः—इत्यादिविधौ विकल्पेनोभयग्रहणम् । इति चेत् —

त्रिवृदादिपदार्थश्च स्तोत्रीयानवकादिकम् ॥ ९ ॥

विधिस्तुत्योरेकवाक्यत्वमेकवाक्यत्वेनैवोपपद्यते इति वाक्यशेषप्रसिद्धा एव विधिभिर्ग्राह्याः । लौकिकेऽर्थे अनेकार्थत्व परिहाराय चरुशब्दे लक्षणा, अश्वबालैक्षवीशब्दयोर्यौगिकत्वं, अतो न विकल्पः, रूढेर्बलवत्त्वादिति ।

इति त्रिवृच्चर्वश्वबालाधिकरणम् ॥ १७ ॥

इति लघुवार्तिकटीकायां प्रथमस्याध्यायस्य तृतीयपादः ।

अथ प्रथमाध्याये चतुर्थः पादः

नामधेयप्रामाण्याधिकरणम् (१)

अग्रिमाधिकरण चतुष्टयोदाहरणपदानि उद्भिदादीनी न धर्मे प्रमाणानि । त्र्यंशवेदानन्तर्भावात् । स्तुतिबुद्ध्यजननान्नार्थवादाः । उत्तमपुरुषान्तत्वाभावान्मन्त्रत्वप्रसिद्ध्यभावाच्च न मन्त्राः । भावना तदंशत्रयाप्रतिपादकत्वात् न विधयः । पदश्रुत्युपात्तधात्वर्थावरोधाद्भावनायाः, न करणसमर्पकाः उद्भिदादयः । उद्भिदादि संज्ञगुणस्याप्रसिद्धेर्नविधेयगुणस्य । अग्रिमाधिकरणसिद्धान्तेषु वक्ष्यमाणदूषणगणग्रासाच्च । न च नामत्वेन धात्वर्थपरिच्छेदकत्वम् । तस्य वैयर्थ्यात् । इति चेत् ।

प्रामाण्यमुद्भिदादीनामविशेषेण वार्तिके ।

सर्वस्य वेदस्याध्ययनविध्यधीनग्रहणस्याविशेण हेतुना प्रामाण्यम् । वार्तिकग्रहणेन भाष्ये नेदमधिकरण-

मिति सूचितम् । विध्यन्तर्भावस्य स्पष्टत्वात् । अग्रिमाधिकरणपूर्वपक्षसिद्धान्ताभ्यां गुणविधित्वेन नामधेयत्वेन वा प्रामाण्यम् । अर्थवादाधिकरणोक्तस्मारणार्थमिदमधिकरणम् ।

इति नामधेयप्रामाण्याधिकरणम् ॥ १ ॥

उद्भिदधिकरणम् (२)

उद्भिदादयो यौगिकाः ऊर्ध्वविदारणकर्तृत्वादिना खनित्रादिविधेयगुणसमर्पकाः । प्रवृत्तिविशेषकरत्वात्, प्रगोजनवत्त्वाच्च । विश्वजित्सर्वपृष्ठोऽतिरात्रः—यदाग्नेयः–इत्यादावनेकगुणोपादानेन विशिष्टकर्मविधानात्, तदाश्रयणेन पश्वादिफले गुणविधानान्नानुवाद्यकर्मालाभः । न वा मत्वर्थलक्षणा । न च तेषामसन्निधानात् कथं तदाश्रयणेन विधानमिति वाच्यम्; अत्र पूर्वपक्षे एकोपपदाख्यातेषु सर्वत्र गुणमात्रविधानेन विश्वजिदादिवाक्यविहितकर्मण एवानुवाद्यतया असन्निधानाभावात् । प्रकृतज्योतिष्टोमयागाश्रयणेन वा विधानम् । अगत्या ज्योतिष्टोमवाक्ये गुणविशिष्टकर्मविधानम् । काम्यत्वाच्चोत्पत्तिशिष्टनित्यगुणबाधकत्वम् इति चेत् —

कर्मनामोद्भिदादि स्यात्

फले गुणविधौ धात्वर्थस्योद्देश्यत्वोपादेयत्वयोरभावात्, धातोरत्यन्तपारार्थ्यम् उपपदविधिश्च स्यात् । दध्नेन्द्रियकामस्येत्यादावगत्या तदाश्रयणम् । अथ कर्मणि गुणविधानं दध्ना जुहोतीतिवत्; तदा धातुपारार्थ्योपपदार्थविधानफलपदानर्थक्यादयो दोषाः । विशिष्टविधौ मत्वर्थलक्षणादोषः । सोमादावगत्या तदाश्रयणम् । तस्मात् उद्भेदनं पशूनां करोतीति व्युत्पत्त्या कर्मनाम स्यात् । संकल्पाद्युपयोगेन-भेदकतया गुणफलोपबंधतया वा सर्वत्र नाम्नः सप्रयोजनत्वं प्रवृत्तिविशेषकरत्वञ्चेति ।

इत्युद्भिदधिकरणम् ॥ २ ॥

चित्राधिकरणम् (३)

चित्रया यजेत पशुकाम इत्यत्र चित्राशब्देनाग्नीषोमीयपशुयागानुवादेन चित्रत्वस्त्रीत्वविशिष्टकरणकारकं विधीयते । अर्थाक्षिप्तसाध्यांशानुवादेन वैयधिकरण्येन विधानान्न मत्वर्थलक्षणा । एकपदोपात्तत्वाच्च विशिष्टस्य न वाक्यभेदः । पशुकामपदमर्प्याजनाङ्गतया प्राप्तानुवादः । पञ्चदशान्याज्यानि –सप्तदशानि पृष्ठानि इत्यत्रापि, आज्यैस्स्तुवते, पृष्ठैस्स्तुवते, इत्युत्सन्नयोः स्तोत्रयोरङ्गत्वेन तत्तत्संख्या युक्तानि आज्यानि पृष्ठानि च यथाक्रमं स्थापनक्रियोपरक्तत्वेनावान्तरप्रकरणेन विधीयन्ते । गुणवाक्यप्राप्ताज्यपृष्ठानुवादमात्रं आज्यपृष्ठपदमुत्पत्तिवाक्ययोः । इति चेत्—

चित्राज्यादिपदं तथा ॥ १० ॥

नामधेयम् । अग्नीषोमीयं पशुमालभत इत्यत्र, अग्नीषोमीयेन पशुना यजेतेति विपरिणामात् कारकप्राप्तेः तद्विशेषणतया चित्रत्वस्त्रीत्वयोर्विधाने विध्यावृत्त्या वाक्यभेदः, फलपदानर्थक्यञ्च । प्रकृतफलाकांक्ष-दध्यादियागातिक्रमश्चेति दोषाः चित्रयेति गुणविधौ । पञ्चदशानि-सप्तदशानीत्यत्रापि द्रव्यसंख्ययोः प्राप्तकर्मणि विधानाद्वाक्यभेदः । यदा जिमीयुस्तदाज्यानामाज्यत्वम्-आपो वा ऋत्वियमाहन् इत्यादि-नामत्वग्रहकार्थवाद विरोधश्च । आख्यातसामानाधिकरण्याच्च नामधेयानीति ।

इति चित्राधिकरणम् ॥ ३ ॥

तत्प्रख्याधिकरणम् (४)

अग्निहोत्रं जुहोतीत्यत्र, अग्नये होत्रं-हविरस्मिन्निति समासान्तर्वर्तिन्या चतुर्थ्या अग्नेर्देवतात्व-प्रतीतेः तद्विशिष्टहोमविधानं-अविहितदेवताकदर्विहोमादौ देवतामात्रविधानं वा । अग्निहोत्रनामक-कर्मविधौ दध्यादिवाक्यैः द्रव्यलाभेऽपि देवताऽलाभत् । यदग्नये चेत्यस्यचानेकगुणोपादानेन विशिष्टकर्मविधित्वादरूपत्वम् । द्विणीयानुपपत्तिश्च नाग्नि स्यात् । आधारमाघारयतीत्यत्रापि द्वितीयान्तशब्देन क्षरणसमर्थं द्रव्यं संस्कार्यं निर्दिश्याख्यातेन क्षारणं संस्कारकर्म विधीयते । तच्च संस्कृतं द्रव्यापेक्षप्रकृतोपांशुयाजार्थमित्याधारलक्षणगुणः उपांशुयाजे विधीयते । नामत्वे पूर्ववत् द्वितीया न स्यात् । इति चेत् —

तथाऽऽघारः

इदमुपलक्षणमग्निहोत्रमित्यपि द्रष्टव्यम् । यदग्नये चेत्यत्र कारकद्वयं चार्थसमुच्चयविशिष्टं क्रियायां विधीयते, गौश्चाश्वश्चेतिवत् । विधेयैक्य इव विधेयतावच्छेदकैक्येऽपि वाक्यभेदाभावात् । अग्ज्योतिर्ज्योतिरग्निस्स्वाहेति सायं जुहोतीति विहितमन्त्रप्राप्ताग्न्यनुवादेन प्रजापतिसमुच्चयो वा विधीयते । न च वाक्यद्वयवैयर्थ्यम् ; कारकद्वयविधिपक्षेऽपि मन्त्रयोर्लिङ्गादेव प्राप्त्या विनियोजक-वचनद्वयवैयर्थ्यात् । न च मिश्रलिङ्गमन्त्रविधिपर्युदस्तयोः प्रतिप्रसवविधिः इति वाच्यम्; इति करणविनि-योगस्य वाक्यीयतया दुर्बलत्वे ततो लिङ्गविनियोज्ययोः पर्युदासाप्रसक्तेः । न चतुर्थीतो मन्त्रवर्णस्य-दुर्बलतया, तया तत्प्राप्त्यनुवादायोग इति वाच्यम्; कारकद्वये क्रियासंबंधस्य प्राथम्येन चशब्दार्थ-समुच्चयसंबंधस्य चरमतया क्रियासंबंधवेलायां विधेयतावछेदकैक्यालाभेन वाक्भेदप्रसंगात्कर्मान्तरविधित्वा-पत्त्या दुर्बलस्यापि प्रबलेनानुवादस्याङ्गीकार्यत्वात् । गौश्चाश्वश्चेत्यत्र तु कारकविभक्त्यश्रवणेन समुच्चितरूप एव तदध्याहारात् । तस्माद्रूपलाभादग्निहोत्रशब्दो नामधेयम् । द्वितीया च तृतीयार्थलक्षिकेति । आधार-माघारयतीत्यत्रापि तत्संज्ञके कर्मणि विहिते, इन्द्र ऊर्ध्वोऽवर इत्याघारयतीति विहितमन्त्रवर्णात्

देवताप्राप्तौ, चतुर्गृहीतं वा एतदभूत् । तस्याधारमाधार्य' इति क्षरणसमर्थद्रव्यप्राप्तौ च तत्प्रवृत्तिनिमित्तकं नामधेयम् । द्रव्यदेवतासंबंधलब्धयागत्वमस्याधारस्य भवति । द्वितीया च पूर्ववत् तृतीयार्थेत्ययुभयं नामधेयम् ।

इति तत्प्रख्याधिकरणम् ॥ ४ ॥

तद्व्यपदेशाधिकरणम् (५)

श्येनेनाभिचरन् यजेतेत्यादौ श्येनादिद्रव्याणां प्रकृतज्योतिष्टोमाश्रयणेन फले विधानं, तद्विशिष्टकर्मान्तरविधानं वा । वरं चानर्थक्यान्मत्वर्थलक्षणा । वाक्यशेषप्रदर्शितगुणयोगेन नामत्वे गौणत्वापत्त्या अत्यन्तपरोक्षवृत्तिता स्यात् । लक्षणायान्तु, तद्वत्यपि वर्तमानः श्येनादिशब्दो दण्डीं प्रैषानितिवत् विशेषणपर इति चेत्—

तथा श्येनः

फले गुणविधौ धातुपारार्थ्यादयो दोषाः । तेन तस्योपमेयत्वानुपपत्तिश्च । विशिष्टविधिपक्षे गौरवम् । मत्वर्थलक्षणा च । अतोऽनन्यपरवाक्यशेषप्रदर्शितगुणयोगान्नामधेयमिति ।

इति तद्व्यपदेशाधिकरणम् ॥ ५ ॥

वाजपेयाधिकरणम् (६)

वाजपेयेन स्वाराज्यकामो यजेत- उद्भिदा यजेत पशुकामः—इत्यादौ तत्तद्गुणविशिष्टकर्मविधिः। तन्त्रसंबंधान्न मत्वर्थलक्षणा। यजेतेत्यत्र पदश्रुत्या यागभावनयोः संबंधसामान्यमेव प्रतीयते । न तु यागे कर्मत्वं करणत्वं वा । तद्वाचिविभक्तिविशेषाभावात् । तच्च संबंधसामान्यं, गुणसंबंधमपेक्ष्य यागकर्मत्वे–फलसंबंधमपेक्ष्य यागकरणत्वे च पर्यवस्यति । यथा वा भावना, साध्यकरणेति कर्तव्यताभिरवैरूप्येण संबध्यते; एवं यागोऽपि गुणफलाभ्यामिति चेत् —

वाजपेयपदं तथा ।

यागभावनयोस्संबंधसामान्ये गुणफलयोस्तया संबंधयोग्यतैव न स्यात् । दध्ना जुहोतीतिवद्याग कर्मिकैव सा गुणसंबंधस्ययोग्या । यागकरणिकैव फलसंबंधस्य । न युगपत्सैव यागकर्मिका यागकरणिका च प्रतिपत्तुं शक्या । सकृत्प्रयुक्ताख्यातस्यैकसंसर्गबोधकत्वात् । उभयबोधनञ्चावृत्त्या विना नेति न तन्त्रसंबंधः । भावनायास्तु क्रियात्वात् युक्तो वैरूप्येण त्रितयसंबंधः । यागस्य तु कारकत्वात्, कर्मत्वे गुणसंबन्धः करणत्वे फलसम्बन्धः न युगपदुभयसंबंध इति वैरूप्यम् । एवं फलं

प्रति उपादानविधानगुणभावाद्यागस्य, गुणं प्रति तूद्देश्यानुवाद्यप्रधानत्वाद्वैरूप्यम् । अतो विशिष्टविधौ मत्वर्थलक्षणैव । तद्वरं सुराग्रहान् गृह्णातीति विहितवाजपेयसंबंधनिमित्तं तत्प्रख्यन्यायेन नामधेयं वाजपेयपदम् ।

इति वाजपेयाधिकरणम् ॥ ६ ॥

आग्नेयाधिकरणम् (७)

आग्नेयोऽष्टाकपालो भवतीत्यत्र भवनेन भावकव्यापाराक्षिप्तभावनाक्षेपात् , तस्याश्चावच्छेदक धात्वर्थाकांक्षायां, स्थानप्रमाणप्राप्तमन्त्रवर्णादग्निदेवताया उपांशुयाजवत्प्राप्तेः, अष्टाकपालस्य तस्याश्च तत्प्रख्यन्यायेनाग्नेयपदं नामधेयम् । न चाग्नीषोमीयब्राह्मणस्य प्राथम्यात् मन्त्रस्य च वैपरीत्यात् स्थानालाभ इति वाच्यम् । तैत्तिरीयस्य तथात्वेऽपि एतत्पूर्वपक्षस्य शाखान्तरमूलकत्वादिति चेत् :-

आग्नेयादिर्गुणविधिः

आग्नेय इति तद्धितात्प्रतिपन्नद्रव्यदेवतासंबंधेन यागकल्पनोपपत्तौ न जघन्यप्रमाणमन्त्रवर्ण-प्राप्तदेवतासंबंधेन तत्कल्पना युक्ता । यागावगमात्प्राक् देवतासमर्पकमन्त्राकांक्षयोरभावेन स्थाना-प्रकरणादिकल्पनया श्रुतिकल्पनायोगाच्च । आघारे तु प्रत्यक्षवचनविहितमन्त्रवशात् देवतासंबंधे युक्ता यागत्वकल्पना । उपांशुयाजे तु प्रत्यक्षयजिश्रवणात्तदाकांक्षया मन्त्रविनियोजकश्रुतिकल्पनम् । अतश्चाग्नेयवाक्ये द्रव्यदेवताविशिष्टयागभावनाविधिरित्याग्नेयशब्दो गुणविधिः ।

इत्याग्नेयाधिकरणम् (७)

बर्हिराज्यपुरोडाशाधिकरणम् (८)

बर्हिराज्यादिशब्दा याज्ञिकप्रसिद्ध्या संस्कारवाचिनः । जातौ पृथग्जनप्रसिद्धितः । तस्याः प्रबलत्वादिति चेत्-

जात्यर्थे बर्हिराज्यके ॥ ११ ॥

बर्हिराज्यपदे जातिवाचके इत्यर्थः । स्वार्थे कः । लोकप्रसिद्धजातेरव्यभिचारात् , संस्कारस्य तु व्यभिचारादिति ।

इति बर्हिराज्यपुरोडाशाधिकरणम् ॥ ८ ॥

प्रोक्षण्यधिकरणम् (९)

प्रोक्षणीशब्दोऽपि संस्कारव्यभिचारात् जातिवाची । प्रकृष्टोक्षणसाधनत्वरूपावयवप्रसिद्धितो रूढेर्बलवत्त्वादिति चेत् —

यौगिकः प्रोक्षणीशब्दः

क्लृप्ताया रूढेर्बलवत्त्वेऽपि, अत्र कल्प्यावयवयोगादेव प्रयोगोपपत्तौ नापरिदृष्टरूढिकल्पनेति ।

इति प्रोक्षण्यधिकरणम् ॥ ९ ॥

निर्मन्थ्याधिकरणम् (१०)

निर्मथ्यशब्दो न पूर्ववद्यौगिकः । मथनकर्मत्वस्य पाकसाधने अभावात् । आद्यस्य नष्टत्वेन भूतपूर्वगत्यापि अभावादिति चेत् —

निर्मथ्योऽपि तथाविधः

यौगिकः । तद्वंश्यत्वेनापि प्रयोगोपपत्तौ न रूढिः कल्प्येति ।

इति निर्मथ्याधिकरणम् ॥ १० ॥

वैश्वदेवाधिकरणम् (११)

वैश्वदेवेन यजेतेत्यत्र प्रकृताग्नेयादियागेषु आमिक्षायागवर्जं विश्वेदेवा देवता विधीयन्ते । आनर्थक्यप्रतिहतिन्यायेनोत्पत्तिशिष्टैरप्यग्न्यादिभिर्विकल्पन्ते । तन्नामककर्मविधौ रूपालाभः । देवताविशिष्टकर्मविधौगौरवम् । 'अष्टौ हवींषि' 'त्रिंशत्संपद्यन्ते' इति लिङ्गानुपपत्तिश्च । प्रकृतानुवादे च वैयर्थ्यम् । न च प्राचीनप्रवणदेशसंबंधस्तत्फलम् ; तथापि आमिक्षायागस्यैव प्रवृत्तिनिमित्तसत्त्वेनानुवादापत्त्या तस्यैव तत्प्राप्तेरष्टस्वपि तदलाभादिति चेत्

नाम स्याद्वैश्वदेवः

अष्टानामपि यागानां लिङ्गसमवायात् छत्रिन्यायेन, 'यद्विश्वेदेवास्समयन्त' इत्यादिवाक्यशेषप्रदर्शितविश्वदेवसंबंधेन तत्प्रख्यन्यायेन वा वैश्वदेवशब्दो नाम स्यात् । तेन चैकाभिधाने नैकसमुदायापत्तौ, 'प्राचीनप्रवणे वैश्वदेवेन यजेत' इति विहितदेशसंबंधः समस्तस्य सिद्ध्यतीति ।

इति वैश्वदेवाधिकरणम् ॥ ११ ॥

वैश्वानरेष्ट्यधिकरणम् (१२)

'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते' इत्युपक्रम्य, 'यदष्टाकपालो भवति' इत्यादिना श्रुता अष्टाकपालादिशब्दाः तत्प्रख्यन्यायेन वैश्वानरयागस्य नामधेयानि । द्वादशत्वसंख्यापरिच्छिन्नकपालश्रपितपुरोडाशद्रव्यकयागे, अष्टाकपालादिद्रव्यान्तराणामप्राप्तेः । अत एव नार्थवादाः ।

अहिहितानां स्तुत्यसंभवात्। न च पञ्चापि द्रव्याण्युत्पत्तिशिष्टतयोत्पन्नशिष्टतया-वा समशिष्टानि विकल्पेनाङ्गानि भवन्तीति युक्तम्; निर्वपेदित्यनेनाष्टाकपालादिशब्दानां प्रथमान्तानांमनन्वयेनाद्यपक्षासिद्धेः। उत्पत्तौ द्वादशकपालस्याविवक्षाकारणाभावेन तस्योत्पत्तिशिष्टतया द्वितीयस्याप्यसिद्धेः। अतोऽष्टाकपालादिद्रव्याणि वैश्वानरयागाश्रयणेन ब्रह्मवर्चसादिफले विधीयन्ते इति चेत् :-

अष्टाकपालादिवचस्स्तुतिः ॥ १२ ॥

भवतीत्यत्र विधिपुरुषव्यापारयोरश्रवणात् देवतासंबंधाप्रतीत्याऽऽग्नेयादिन्यायानवतारात्। आश्रयक्रियाननुवादात्-एकोपक्रमाव सानतया प्रतीतैकवाक्यता भङ्गप्रसङ्गाच्च, एकादशकपालेऽष्टत्वादि संबंधमात्रेण तद्द्वारा तद्द्रव्यककर्मस्तावकोऽष्टाकपालादिशब्दः।

इति वैश्वानरेष्ट्यधिकरणम् ॥ १२ ॥

तत्सिद्ध्यधिकरणम् (१३)

यजमानः प्रस्तरः-इत्यादौ प्राथमिकयजमानादिशब्दमुख्यार्थत्वानुरोधेन प्रस्तरादिशब्दलक्षिते तत्कार्ये यजमानो विधीयते इति चेत्-

तत्कार्यकारिता भक्तौ निमित्तत्वं क्वचिद्व्रजेत्।

स्रुग्धारणे प्रस्तरकार्ये विनियुक्तस्य स्रुगन्वारंभणादिस्वपदार्थकरणविरोधात्, सूक्तवाके नाहवनीये प्रस्तरवत् प्रहरणे एककपालवच्च सर्वहोमे कर्मासमाप्त्या निष्फलत्वापत्तिः। सर्वस्वारवत् समाप्तिप्रैषाभावात्। तस्मादुत्तरं बर्हिषः प्रस्तरँसादयतीति विधिशेषो यागसिद्धिकरत्वरूपस्वगुणलक्षणया तद्वति प्रस्तरे गौणो यजमानशब्दः प्रस्तरं स्तोतुम्। सिंहो देवदत्त इतिवत्।

इति तत्सिद्ध्यधिकरणम् ॥ १३ ॥

जात्यधिकरणम् (१४)

अग्निर्वै ब्राह्मण इत्यत्रापि गुणविधित्वमुद्भाव्य ब्राह्मणप्रशंसार्थप्रजापतिमुखजातत्वलक्षणगुणयोगेनाग्निशब्दो ब्राह्मणे वर्तत इत्याह-

क्वचिदेकप्रभवता

निमित्तत्वं प्रपद्यत इत्यनेनान्वयः।

इति जात्यधिकरणम् ॥ १४ ॥

सारूप्याधिकरणम् (१५)

आदित्यो यूप इत्यत्रापि अञ्जननिमित्तप्रत्यक्षग्राह्यतेजस्वित्वलक्षणगुणयोगादादित्यशब्दो

यूपे वर्तत इत्याह–

क्वापितेन सरूपता ॥ १३ ॥

इति सारूप्याधिकरणम् ॥ १५ ॥

प्रशंसाधिकरणम् (१६)

अपशवो वा अन्ये गोअश्वेभ्यः पशव इत्यत्र, नञ्समासान्तर्गतपशुशब्देन तत्कार्यं यागसाधनत्वं लक्षयित्वा नञा तन्निषिध्यते। इति चेत्–

क्वचित्प्रशस्तता तत्र निमित्तत्वं प्रपद्यते।

अजोऽग्नीषोमीय इत्यादिना विरोधात् निषेधानुपपत्तेः गवाश्वं स्तोतुं निन्द्यन्ते पश्वन्तराणि 'अपशव' इति। पशुशब्देन गवाश्वगतप्राशस्त्यं लक्षयित्वा, तत् पश्वन्तरे नञा निषिध्यते। अपशुशब्दार्थघटादिगता प्रशस्तत्वगुणयोगात् अजादिपशावपशुशब्दो वर्तते। प्रशस्तता निमित्तमिति तु तदभावे प्रतियोगितया तत्कोटिनिविष्टत्वात्।

इति प्रशंसाधिकरणम् (१६)

भूमाधिकरणम् (१७)

सृष्टीरुपदधातीत्यत्र, सृष्टिलिङ्गा मन्त्रा उपधानाङ्गत्वेन विधीयन्ते– नैवम्। लिङ्गप्रकरणभ्यां प्राप्तेषु मन्त्रेषु पुनर्विधानं, सृष्टिपदरहितानां 'एकया स्तुवत' इत्यादीनां परिसंख्यार्थमिति त्रैदोष्यं स्यात्। परिसंख्यातानामन्यत्राविनियोगाद्वैयर्थ्यञ्च। तस्मान्मन्त्रानुवादेनोपधानविधिः इति भाष्यकारः।

लिङ्गप्रकरणयोरुपधानैकान्तिकत्वाभावात्, उपधानस्य चयनविध्यर्थसिद्धत्वात् मन्त्रे नियमविधिरिति वार्तिककारः।

उभयथापि सृष्टिशब्दः सृष्टिमन्त्रसमुदायगतं सृष्टिबहुत्वमुपलक्ष्य तद्वति सृष्ट्यसृष्टिसमुदाये गौण इति। तदाह—

'क्वचिद्भूमा' इति।

इति भूमाधिकरणम् ॥ १७ ॥

लिङ्गसमवायाधिकरणम् (१८)

प्राणभृत उपदधातीत्यत्रापि तुल्यो विचारः। प्राणभृच्छब्दः अयं पुरोभुवः तस्य प्राणः....." इत्यादिमन्त्रगतप्राणभृत्समदायं लक्षयित्वा तद्वति प्राणभृदप्राणभृत्समुदाये गौण इति। तदाह–

क्वचिल्लिङ्गसमवायस्तु केवलः ॥ १४ ॥

इति केवल इति भूमव्यावृत्त्यर्थः।

इति लिङ्गसमवायाधिकरणम् (१८)

अक्ताधिकरणम् (१९)

अक्ताश्शर्करा उपदधातीत्यत्र द्रवद्रव्येण केनचिदञ्जनम्। अक्तत्वस्य द्रवद्रव्यमात्र साध्यत्वात् विधेः प्रधानत्वात्–उपक्रमस्थत्वात्–अप्राप्तार्थत्वात्। अर्थवादस्य तद्विपरीतस्य घृताघृतसमुदायलक्षकत्वमिति चेत्–

संदिग्धमञ्जनद्रव्यं निर्णेयं वाक्यशेषतः।

अक्तत्वान्यथानुपपत्तिप्रतिपन्नद्रवद्रव्यसामान्यस्याननुष्ठेयतया विशेषाकांक्षायां, असति विशेषप्रमाणे वयः कश्चिद्गृह्येत। अर्थवादसमर्पिते विशेषे नान्यग्रहणं प्रमाणवत्। न च विधेस्सङ्कोचः; घृतेऽपि द्रवद्रव्यत्वस्य पर्याप्तत्वात्। तस्मात्तेनैवाञ्जनम्।

इत्यक्ताधिकरणम् ॥ १९ ॥

सामर्थ्याधिकरणम् (२०)

स्रुवेणावद्यति-स्वधितिनावद्यति–हस्तेनावद्यति-इत्यादौ, सामर्थ्यात् श्रुतेर्बलवत्त्वात् मांसपुरोडाशद्रवद्रव्याणि सर्वैरवदेयानि इति चेत् –

अवदाने स्रुवादीनां सामर्थ्येन व्यवस्थितिः ॥ १५ ॥

आख्यातानां शक्तिसहकारेणार्थबोधकत्वात् लिङ्गेनापि श्रुतिसङ्कोच इति।

इति सामर्थ्याधिकरणम् ॥ २० ॥

इति लघुवार्तिकटीकायां प्रथमस्याध्यायस्य

चतुर्थः पादः

समाप्तश्चाध्यायः

॥ अथ द्वितीयोऽध्यायः ॥

तत्र प्रथमः पादः

प्रतिपदाधिकरणम् (१)

सोमेन यजेतेत्यादिकं अदृष्टार्थकवाक्यजातगतक्रियाकारकपदजातं, क्रियाकारकसंबन्धपरित्यागेन समप्रधानतया भावनाकरणं समर्पयत् प्रत्येकमपूर्वकल्पकम्, प्रधानाख्यातार्थभावनान्वयसंभवे उपपदार्थस्य धात्वर्थानन्वयात्। ननु सोमेन यजेतेत्यस्य यागस्य ज्योतिष्टोमवाक्ये फलसाधनत्वप्रतीतेः, कथं सोमपदार्थस्य फलभावनान्वय इति चेत्; एतदधिकरणद्वयसिद्धवत्कारेण गुणविधिनामधेयविचारस्य कृततया अत्र पूर्वपक्षे ज्योतिष्टोमगुणधात्वर्थयोः स्वर्गभावनाकरणत्वं, सोमवाक्येऽप्युभयोरध्याहृतफलकभावनाकरणत्वमिति चेत् —

धर्मः प्रतिपदं नास्ति

सोमधात्वर्थयोः भावनाकरणत्वे, भावनाभाव्यनिर्वर्तकत्वस्यैव तत्करणत्वरूपतया द्वयोः फलजनकत्वापत्तौ फलापूर्वद्वयं स्यात्। न चाग्नेयादीनामेकफलापूर्वजनकत्ववत् इहाऽपि स्यादिति शङ्क्यम्; तेषां समुच्चितानां कारकान्वयेन तथात्वेऽपि अत्र सोमे पृथक्करणविभक्तिश्रवणेन यजेतेत्यत्राऽपि यजेः स्वार्थविशेषितकारकलक्षकतया समुच्चित्य द्वयोः कारकानन्वयेनापूर्वद्वयकल्पनावश्यंभावात्। एकवाक्योपादानादारुण्यादिवत् कारकाणां समुच्चयेऽपि कारके समुच्चित्यासंबन्धात्। तस्माल्लाघवादेकं भावनाकरणं इतरत्तदर्थम्।

इति प्रतिपदाधिकरणम् ॥ १ ॥

भावार्थाधिकरणम् (२)

फलस्य साध्यस्य सिद्धसाधनाकांक्षत्वात् उपपदार्थस्य करणत्वम्। धात्वर्थस्तु करणानुग्राहकतया तदन्वयी, इति चेत् —

भावार्थेभ्यश्च तज्जनिः।

पदश्रुत्या धात्वर्थ एव स्वसाधननिष्पन्नः क्रियाकरणम्। अन्यस्य वाक्येन तत्संबन्धः। तच्च दुर्बलं श्रुतेः। सिद्धरूपद्रव्ये यागादेरदृष्टोपकारकत्वापत्त्या गौरवतादवस्थ्याच्च। तस्माद्धात्वर्थ एव भावनाकरणम्। तत एव चापूर्वम्। धात्वर्थातिरिक्ता च भावना। यजतीत्यस्य यागं करोतीति विवरणात्। कृधात्वर्थरूपतिप्प्रत्ययान्वयव्यतिरेकानुविधायिज्ञानविषयत्वात् तद्वाच्या प्रकृतधात्वर्थातिरिक्ता। स्वास्थ्यकामः शयीतेत्यादौ धातोरकर्मकत्वेऽपि स्वास्थ्यादिकर्मिका। ओदनं पचेतेत्यादौ धात्वर्थकर्मकर्मिका च सिद्धकर्तृकक्रियावाच्याख्यातेषु अवगम्यत इति।

इति भावार्थाधिकरणम् ॥ २ ॥

अपूर्वाधिकरणम् (३)

अख्यातस्यापूर्वकल्पकत्वमसिद्धम् । यजेत स्वर्गकाम इत्यादौ धात्वर्थस्यैव स्वर्गसाधनत्वबोधनात् । न च विनष्टस्य कालान्तरफलाजनकत्वात् तत्कल्पनम् । तथात्वे तेनैवान्यथा सिद्ध्यायातात् । तस्य व्यापारादिरूपत्वे इन्द्रियादावेतत्सन्निकर्षस्येव यागाभावेऽभावापातात् । अतश्शास्त्राद्विनष्टस्यापि जनकत्वं–तावदवस्थानं वा–तृतीयादिक्षणे फलबलादयोग्यत्वञ्चेति चेत् ;

अस्ति धर्मश्चिरस्थायी

न तावद्वेदो विनष्टस्य साधनत्वं ब्रूते । यागे श्रुतं साधनत्वं, अजनितव्यापारे न संभवतीति तन्निर्वाहाय लोकानुसारात्तत्कल्पनम् । फलोपपत्तये कल्प्यमानं स्मृतिजनकभावनासंस्कारवत् तदाश्रये कल्प्यते । स्वध्वंसव्यापारकत्वे; फलानन्त्यं–प्रतियोगितदभावयोरेकत्र जनकत्वं–कीर्तनादिना तन्नाशासंभवः–आरादुपकाङ्गवैफल्यापत्तिश्च स्यात् । तद्ध्वंसस्य तेन विनापि भावात् । तृतीयादिक्षणेऽयोग्यत्वकल्पनञ्च प्रमाणविरुद्धम् । तस्मादस्ति धर्मश्चिरस्थायी । तत्प्रक्रियात्वित्थम्—दृष्टार्थधात्वर्थातिरिक्ते धात्वर्थे यत्र यत्र निरपेक्षकारकशक्तिप्रमितिः, तत्र तत्रैकमपूर्वमिति ।

इत्यपूर्वाधिकरणम् ॥ ३ ॥

तानिद्वैधाधिकरणम् (४)

व्रीहीनवहन्ति, पिष्टं संयौति, इत्यादावपि विध्यनुपपत्त्या कल्प्यमानमपूर्वं धात्वर्थादेव । अन्यथा अपूर्वद्वयकल्पनागौरवम् । तथा च व्रीडीनवहन्ति–पिष्टं संयौति—इति क्रियाप्रधानता इति चेत्—

गुणस्संयवनादिकः ॥ १६ ॥

श्रुतविनियोगभङ्गप्रसङ्गात् न प्रधानकर्मत्वं धात्वर्थस्य । कर्मकारकेतुषविमोकादिदृष्टातिशयजनकत्वात् । द्रव्यस्य च पुरोडाशद्वारा यागसाधनत्वात् न कुतोऽप्यदृष्टम् । विधेस्त्वप्राप्तांशपरिपूरणरूपनियमफलकत्वात्, तस्य च दृष्टाभावेनादृष्टार्थत्वात् । तस्मात् गुणकर्म संयवनादि ।

इति तानिद्वैधाधिकरणम् ॥ ४ ॥

संमार्गाधिकरणम् (५)

व्रीहीन्प्रोक्षति–स्रुचस्संमार्ष्टि—इत्यादौ दृष्टोपकाराभावत्, प्रोक्षणादीनां न गुणकर्मत्वम् । द्वितीयया द्रव्यप्राधान्यावगमात् तत्त्वमिति चेत् ; बल्बजान् शिखण्डकान्कुरु—इति लोके, सक्तून्जुहोतीति वेदे च तस्याः प्राधान्यव्यभिचारात् । तथा च व्रीहिभिः प्रोक्षतीत्यादिना विपरिणामात् प्रधानकर्मत्वमिति चेत् —

प्रोक्षतीत्याद्यपि तथा

गुणकर्म । न दृष्टोपकारजनकत्वं गुणकर्मत्वम् । किन्तु, द्वितीयान्तशब्देन द्रव्यमुद्दिश्य विधीयमानत्वम् । न च द्वितीयायाः कर्मत्वे व्यभिचारः–उक्तस्थले तस्याः करणत्वलक्षकत्वात् । तस्य तद्वाच्यत्वे परशोः करणत्वविवक्षायां 'परशुम्' इति स्यात् । पाणिनिनापि 'कर्तुरीप्सिततमं कर्म' इत्यादिसूत्रद्वयेन, ईप्सिततदितरसाधारणं साध्यत्वं कर्मत्वम्—इत्यनुगमय्य 'कर्मणि द्वितीया' इत्युक्तम् । तन्मूलप्रयोगाच्च लोकवेदयोः स्पष्टाः । अतो गुणकर्म प्रोक्षणादि ।

इति संमार्गाधिकरणम् ॥ ५ ॥

स्तुतशस्त्राधिकरणम् (३)

आज्यैस्स्तुवते—प्रउगं शंसति—इत्यादिना विहिते प्रगीताप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानात्मके स्तोत्रशस्त्रे गुणकर्मणी । गुणे कीर्त्यमाने गुणिन्यां देवतायां स्मृतिः संस्कारो जायते । संस्कृतायाश्च याज्यादिसंस्कृताया इव यागाङ्गतेति दृष्टार्थ इति चेत् —

प्रधानं स्तौतिशंसती ।

आख्यातयोः स्मृतितात्पर्ये स्तुतिरूपस्वार्थपरिपरित्यागेन तल्लक्षकता स्यात् वक्रालकान्तो देवदत्तः इत्यत्रेव । यो वक्रालकान्तस्तमानयेत्यत्रान्यतात्पर्ये स्तुत्यप्रतीतेः । न श्रुतिबाधेन दृष्टार्थता युक्ता, अतिप्रसङ्गात् । अतोऽदृष्टार्थे प्रधानकर्मणी स्तोत्रशस्त्रे । एवं माहेन्द्रग्रहयजिसन्निधाविन्द्रस्तुत्युपपत्तिः । अन्यथा लक्षणाद्यापत्तिरिति ।

इति स्तुतशस्त्राधिकरणम् ॥ ६ ॥

मन्त्रगताख्यातानामविधायकत्वाधिकरणम् (७)

याभिर्यजते ददातीत्यादिमन्त्रस्थाख्यातशब्दा विधायकाः । पञ्चमलकारतया अप्रवृत्तप्रवर्तनस्वारस्यात् अभ्यासेन कर्मान्तरमिति चेत् —

ददाति यजतीत्याद्या मन्त्रस्थानविधायकाः ॥ २७ ॥

यच्छब्दाद्युपहतविधिशक्तिकत्वात्–प्राप्तार्थत्वात्–अन्यरपत्वाच्च । अप्राप्तार्थतया विधिपरत्वे भवन्त्येवविधायका इति ।

इति मन्त्रगताख्यातानामविधायकत्वाधिकरणम् ॥ ७ ॥

मन्त्राधिकरणम् (८)

प्रसङ्गात् 'अहे बुध्निय मन्त्रं मे गोपाय' इति वाक्यस्थमन्त्रपदस्य प्रवृत्तिनिमित्तमुच्यते ।

मन्त्रास्ते ये प्रयोगार्थमनुष्ठेयाभिधायकाः ।

प्रयोगसमवाय्यर्थाभिधायकत्वं मन्त्रत्वम् । ब्राह्मणन्तूक्तार्थस्य विधायकम् । इति न तत्रातिप्रसङ्गः । याज्ञिप्रसिद्धिविषयत्वस्योपलक्षणमिदम् ।

इति मन्त्रलक्षणाधिकरणम् ॥ ८ ॥

ब्राह्मणलक्षणाधिकरणम् (९)

एतद् ब्राह्मण ऐन्द्राग्न इत्यादिवाक्यस्थब्राह्मणपदप्रवृत्तिनिमित्तमुच्यते —

वेदेषु मन्त्रभागान्यो भागो ब्राह्मणमुच्यते ॥ १८ ॥

मन्त्रभिन्नवेदत्वं ब्राहणत्वम् ।

इति ब्राह्मणलक्षणाधिकरणम् ॥ ९ ॥

ऊहादीनामनन्तताधिकरणम् (१०)

*ऊहप्रवरनामानि मन्त्रैकवाक्यत्वात् मन्त्रकार्यकरत्वाच्च मन्त्राः इति चेत् —

ऊहप्रवरनामानि प्रपद्यन्ते न मन्त्रताम् ।

रथघोषेऽतिप्रसक्तेर्नतत्कार्यकरत्वं तत्त्वे प्रयोजकम् । तदेकवाक्यत्वमपि अध्ययनबहिर्भूतत्वादप्रयोजकम् । अतो न मन्त्रा ऊहादयः ।

इत्यूहप्रवरनाम्नाममन्त्रत्वाधिकरणम् ॥ १० ॥

ऋग्लक्षणाधिकरणम् (२२)

ऋचस्सामानि यजूँषि—इत्यत्र ऋगादिपदप्रवत्तिनिमित्तानि क्रमेणोच्यन्ते —

---

* पदान्तरस्थाने पदान्तरप्रक्षेपः ऊहः । यथा—अग्नये त्वा जुष्टं निर्वपामि—इति मन्त्रे, सौर्ययागे अतिदेशेन प्राप्ते, अग्निपदमुद्धृत्य तत्स्थाने सूर्यपदं प्रक्षिप्यते—मन्त्रस्वरूपञ्च—'सूर्याय त्वा जुष्टं निर्वपामि' इति विपरिणम्यते । अत्रत्यस्य सूर्यपदस्य मन्त्रघटकत्वेऽपि मन्त्रत्वं नास्ति । वेदाध्ययनसंप्रदायागतत्वाभावात्, आधुनिकैरेव बुद्धिपूर्वकं संयोज्यमानत्वाच्च ।

एवमेव प्रवराणामपि न मन्त्रत्वम् । यागं अनुतिष्ठतो यजमानस्य, तत्साहाय्यं कुर्वतां ऋत्विजां वा यद्गोत्रं तत्प्रवर्तकानामृषीणां नामानि (भार्गव-च्यावन-आप्नवान-और्व-जामदग्न्य) इत्यादीनि प्रवरशब्देन व्यवह्रियन्ते । तान्यपि यागकाले अवश्यं कीर्तनीयानि । तथापि तेषां न मन्त्रत्वम् । पूर्वोक्तात् कारणादेव ।

तथा —यजमानस्य ऋत्विजां वा प्रातिस्विकं नामधेयमपि यागानुष्ठानकाले अवश्यं कीर्त्यते । तथापि तस्य न मन्त्रत्वम् । कारणं पूर्वोक्तमेव—सं

पादबन्धवती ऋक् स्यात्

पादबद्धत्वे सति एकप्रयोजनकमन्त्रत्वमेकऋक्त्वम् । इति ऋग्लक्षणाधिकरणम् ॥ ११ ॥

सामलक्षणाधिकरणम् (१२)

गीतिः सामेति गीयते ॥ १९ ॥

मन्त्रत्वे सति गानत्वं सामत्वम् । इति सामलक्षणाधिकरणम् ॥ १२ ॥

यजुर्लक्षणाधिकरणम् (१३)

यजुर्मन्त्रस्तदितरः

ऋक्सामाभ्यामन्यत्वे सति मन्त्रत्वं यजुष्ट्वम् । इति यजुर्लक्षणाधिकरणम् ॥ १३ ॥

निगदाधिकरणम् (१४)

परसंबोधनार्था मन्त्रा निगदाः यजुर्भ्योऽन्ये । 'इमे निगदाः इमानि यजूंषि' इति व्यपदेश-भेदात् । उच्चैस्त्वोपांशुत्वरूपविरुद्धधर्मयोगाच्चेति चेत् —

निगदोऽपि भवेद्यजुः

व्यपदेशो गोबलीवर्दन्यायेनोपपन्नः । प्रयोजननशात्प्राप्तोच्चैस्त्वानुवादः 'उच्चैर्निगदेने'ति । यजुष्ट्वाव-च्छिन्ने 'उपांशुयजुषा' इति वाचनिकमप्युपांशुत्वं, अङ्गत्वात्—मन्त्रप्रयोजनेन सामर्थ्यप्राप्तेनाप्युच्चै-स्त्वेन बाध्यते । शिष्टाकोपन्यायात् । उपांशुत्वविधेर्नियमविधित्वे लघुत्वात् निगदेषु सर्वथोपांशुत्वा-प्राप्तेर्नतस्य तद्विधिविषयत्वम् । अतो न बाधशङ्कापि । मन्त्रत्रैविध्यप्रतिपादनाच्च यजूंष्येव निगदः ।

इति निगदाधिकरणम् ॥ १४ ॥

एकवाक्यलक्षणाधिकरणम् ॥ १५ ॥

यजुषामवान्तरपरिमाणम् अध्येतृष्वप्रसिद्धमुच्यते —

यावत्साकांक्षमेकार्थं तावदेकं यजुर्मतम् ॥ २० ॥

साकांक्षत्वे सति—एकप्रयोजनकत्वे सति—विभज्यमानमेकं यजुः । ततोऽन्यद्यजुरन्तरम् । एकप्रयोजनकत्वं, 'भगो वां विभजतु' इत्यादौ अतिप्रसक्तम् । अतस्साकांक्षत्वमिति । तन्मात्रं 'स्योनन्तेः ....' इत्यादौ । अतः एकप्रयोजनकत्वमिति । उभयं प्रकृतिप्रत्यययोरतिप्रसक्तम् । अतो विभज्यमानत्वमिति ।

इति एकवाक्यलक्षणाधिकरणम् ॥ १५ ॥

वाक्यभेदाधिकरणम् (१६)

इषेत्वोर्जेत्वा—इत्यन्तः एको मन्त्रः। दृष्टाप्रतीत्या अदृष्टे कल्प्ये लाघवात्। तदेकत्वे च तस्मिन् उद्देश्ये विभज्यमानसाकांक्षत्वात्। विनियोजकवचनद्वयन्तु आदिमध्यप्रतीकाभ्यां कृत्स्नस्य उभयत्र विनियोजकम्—इति चेत् —

इषेत्वादौ न मन्त्रैक्यं विनियुक्त्यार्थभेदतः।

इषेत्वेति शाखां छिनत्ति-ऊर्जेत्वेत्यनुमार्ष्टि—इति भेदेन विनियोगात् नैकमन्त्रत्वम्। अंशद्वयस्याप्यन्योन्याकांक्षत्वस्य स्फुटतया, अदृष्टार्थत्वेऽपि तद्द्वयकल्पनात्। विनियोजकवशात् छिनद्मीत्यादिक्रियाद्याहारेण दृष्टार्थत्वेन प्रयोजनभेदाच्चेति।

इति वाक्यभेदाधिकरणम् ॥ १६ ॥

अनुषङ्गाधिकरणम् (१७)

तनूर्वर्षिष्ठा-इत्यस्य, याते अग्ने अयाशयेत्यस्योपरि अपेक्षितस्थानपठितस्य तदन्विततया निराकांक्षत्वात्, याते अग्नेरजाशयेत्यस्य साकांक्षत्वेऽपि पृष्ठलग्नतया व्यवहितस्यापेक्षितस्थानत्वाभावात्, हराशयेत्यनेनाव्यवधानाभावाच्च न संबन्धः। किन्त्वध्याहारः इति चेत् —

आकांक्षयानुषङ्गस्स्याद्यात इत्यादिके मनौ ॥ २१ ॥

मन्त्र इत्यर्थः। त्रितयार्थस्यापि सर्वोपरिसकृत्पाठानुपपत्त्या क्वचित्पठितस्य विजातीयव्यवधानाभावमात्रेण द्वितीयशिरस्यानीतस्य, अत एव तृतीयाव्यवहितस्य तदेकवाक्यतया अनुषङ्गोपपत्तौ, न लौकिकाध्याहार इति।

अत्रैव वर्णकान्तरम्

एवमपि चित्पतिस्त्वा पुनातु-वाक्पतिस्त्वा पुनातु-इत्यनयोः निराकांक्षत्वात्, अच्छिद्रादिशेषस्य देवस्त्वा सवितोत्पुनात्विति तृतीयेनान्वितत्वे न तथात्वात् न पूर्वयोरनुषङ्ग इति चेत् —

चित्पतित्वेत्यादिके च क्रियैकत्ववशाद्भवेत्।

क्रियायाः पावनस्यैकत्ववशात् चित्पतिस्त्वेत्यादिके मन्त्रद्वये पावनार्थस्याच्छिद्रादेरनुषङ्गो भवेत्। दर्भपुञ्जीलैः पवयतीति विहितस्य पावनस्य भेदे प्रमाणाभावात्। न च तुल्यार्थत्वान्मन्त्राणां विकल्पः; लिङ्गप्राप्तानां पुनः प्रत्यक्षवचनेन विधानात् चतुर्भिरग्निमित्यादिवत् संख्याया अविधानेऽपि समुच्चयावगमात्। न च द्वादशे, 'ब्राह्मणविहितेषु च संख्यावत् सर्वेषामुपदिष्टत्वा'दित्यधिकरणे लिङ्गविनियोज्येषु मन्त्रेषु ब्राह्मणस्य गुणार्थत्वोक्तेः समुच्चयार्थत्वनिराकरणाच्च न तेन समुच्चयः स्यादिति शङ्क्यम्;

अत्र विधेयगुणाभावेन तस्य समुच्चयैकप्रयोजनत्वात् । 'चित्पतिस्त्वापुनात्वित्येतैः प्रतिमन्त्रम्' इति यज्ञसूत्राच्च ।

इत्यनुषङ्गाधिकरणम् ॥ १७ ॥

व्यवेताननुषङ्गाधिकरणम् (१८)

सन्ते वायुर्वातेन गच्छतामित्यत्र सङ्गच्छतामिति क्रियापदस्य अङ्गानीति बहुवचनान्तेनायोग्यतयाऽनन्वितस्य, आशिषेत्यनेन नानुषङ्गः । असंबन्धिपदेन गच्छन्तामित्यध्याहृतेन व्यवधानादिति तत्राप्यध्याहार एव । तदाह—

संयज्ञपतिरित्यत्र व्यवायान्नानुषज्यते ॥ २२ ॥

इति व्यवेताननुषङ्गाधिकरणम् ॥ १८ ॥

इति लघुवार्तिकटीकायां द्वितीयाध्यायस्य प्रथमपादः ।

॥ अथ द्वितीयः पादः ॥

शब्दान्तराधिकरणम् (१)

एकप्रकरणगतेषु, यजति ददाति जुहोति–इत्यादिषु धात्वर्थभेदेऽपि न भावनाभेदः । एकस्या एवं स्वं प्रत्युपादीयमानैर्धात्वर्थैरवच्छेदसंभवात् । प्रत्ययार्थभावनायास्तदेकत्वे भेदायोगाच्च तद्भेदे फलापवर्गित्वात्तासाम् अपूर्वभेदापत्तेः । तस्मादेका भावना इति चेत् —

शब्दान्तरे कर्मभेदः

भावनाभेद–इत्यर्थः । पदश्रुत्या यागोपरक्ततया प्रतीतायाः वाक्यात् धात्वन्तरानवच्छेदात् तद्धात्वर्थावच्छिन्ना अन्यैव सा तत्तत्पदश्रुत्या प्रतिपाद्यते । न चैवं गुणादेव भेदः ; तस्य धात्वर्थाङ्गगुणविषयत्वात् । प्रत्ययांशैक्येऽपि तत्तद्धातूपरक्तरूपभेदाद्भावनाभेदः । ततश्चापूर्वभेद इति ।

इति शब्दान्तराधिकरणम् ॥ १ ॥

अभ्यासाधिकरणम् (२)

समिधो यजतीत्यादौ उपपदान्युद्धृत्य यचतीति पञ्चकृत्वः श्रुतेः पूर्ववद्धातुभेदाभावात् एकयागोपरक्ता एका भावना प्रतिपाद्यते । समिन्नामकयागे प्रथमं विहिते द्वितीयादिश्रवणं तत्रैव विकल्पेन तनूनपादादिदेवतां विदधाति इति चेत् —

स्यादभ्यासे च तद्भिदा ।

तयोर्धात्वर्थभावनयोः भिदा–भेद इत्यर्थः । विधेरप्रवृत्तप्रवर्तनस्वारस्यभङ्गाय । न च गुणविधानात्तदुपपत्तिः ; तनूनपादादिशब्दानां द्वितीयान्ततया देवतात्वबोधेऽसामर्थ्येन, समिधो अग्न इत्यादिमन्त्रप्राप्तदेवतासंबन्धेन नामतया देवतानुवादकतया वा चरितार्थत्वेन धात्वर्थभावनयोरेव विधेयत्वात् । तस्माद्धात्वर्थभावनयोर्भेदः ।

इत्यभ्यासाधिकरणम् ॥ २ ॥

पौर्णमास्यधिकरणम् (३)

य एवं विद्वान्पौर्णमासीं यजते—य एवं विद्वानमावास्यां यजते—इत्यत्रापि पूर्ववत्कर्मभेदः । वार्त्रघ्नी पौर्णमास्यामनूच्येते-वृधन्वती अमावास्यायां—इत्याज्यभागक्रमाद्विच्छिद्य वाक्येन एककर्मानुवादेन मन्त्रद्वयविधानात्, तयोरेकस्याग्नेयतया एकस्य सौम्यतया वैकल्पिकदेवतासमर्पकत्वात्, ध्रौवाज्यलाभाच्च नारूपत्वम् । आग्नेयादिवाक्यैर्द्रव्यदेवतयोः समर्पणाद्वा । अन्यथा अनुवादवैय्यर्थ्यम् पौर्णमास्यां पौर्णमास्या यजेत–अमावास्यायाममावास्यया यजेत-इत्यनयोरपि । तस्मादुभयत्र कर्मान्तरविधिः इति चेत् —

संघानुवेदके विद्वद्वाक्ये

वार्तघ्नी पौर्णमास्यां वृधन्वती अमावास्यायाम् इत्यनयोः, लिङ्गक्रमाभ्यामाज्यभागाङ्गतया प्राप्तयुगलद्वयस्य पर्वणोरव्यवस्थया प्राप्तौ तद्बाधेन व्यवस्थामात्रविधिपरतया, नानयोः कर्मणोरपूर्वमन्त्रविधायित्वं, येन देवता प्राप्येत । द्रव्यदेवतयोः प्राप्तकर्मानुवादेन विधानानुपपत्त्या, नाग्नेयादिवाक्यैरपि रूपलाभः । अतस्त्रिकस्य त्रिकस्यानुवादेन समुदायद्वयसंपादके विद्वद्वाक्ये । तत्प्रयोजनं फलवाक्यस्थनामपदगतद्विवचनोपपत्तिः । 'पौर्णमास्यां पौर्णमास्या .....' इति वाक्यद्वयन्तु, त्रिकस्य त्रिकस्य एकप्रयोगविधायकम् । अतः समुदायानुवादके विद्वद्वाक्ये ।

इति पौर्णमास्यधिकरणम् ॥ ३ ॥

उपांशुयाजाधिकरणम् (४)

उपांशुयाजमन्तरा यजतीति विष्ण्वादिवाक्यविहितयागानुवादः ; न यागविधिः । देवताभावेनारूपत्वात् । हौत्रे शाखाभेदेनाम्नातानां वैष्णवप्राजापत्याग्नीषोमीय याज्यानुवाक्यायुगलानां विष्ण्वादिदेवताविशिष्टयागेषु विष्वादिवाक्यस्थतव्यप्रत्ययविहितेषु लिङ्गक्रमाभ्यां संबन्धात् । अनुवादस्य च वैष्णवप्राजापत्ययोरन्तरालकालविधायित्वेनार्थवत्त्वात् । न च यथा न गिरा गिरेति निषेधानुवादसामर्थ्यात्, ऐरं कृत्वेति विधेस्तत्स्थानत्वनियमः ; तथा अन्तरालानुवादसामर्थ्यात् यागानां तत्कालत्वसिद्धिरिति शङ्क्यम् ; प्रत्यक्षकालविध्यभावे, प्रयोगविधिसामर्थ्यसिद्धप्रधानकालवतां प्रयाजादीनामिव तयोः फलवाक्यानन्वयप्रसङ्गात् । तस्मात्समुदायानुवादः इति चेत् —

नत्वन्तरावचः ॥ २३ ॥

जामिवा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावित्युपक्रम एव अन्तराले किञ्चिद्विधित्सितमित्यवगमात्, अनन्तरावाक्य एव यागविधिः। न विष्ण्वादिवाक्ये। अन्तरालसंयोगाभावात्। एकोपक्रमावसानतया प्रतीतैकवाक्यत्वस्य भङ्गापत्तेश्च। कर्मणिकृत्यप्रत्ययानां देवतासंस्कारविधित्वप्रतीत्या, विष्णवे यष्टव्यमित्यादिविपरिणामक्लेशाच्च। तस्माद्यागान्तराभावात् याज्यानुवाक्यायुगलत्रयमन्तरा वाक्यविहितकर्मण्येव क्रमप्रमाणेन संबद्धं विकल्पेन देवताः समर्पयतीति नारूपत्वम्। अतो न समुदायानुवादः।

इत्युपांशुयाजाधिकरणम् ॥ ४ ॥

आघाराग्निहोत्राधिकरणम् (५)

अग्निहोत्रं जुहोतीति न कर्मविधिः, जुहोतिसामान्यस्य विध्यनन्वयात्। विशेषोपस्थापकद्रव्यादिसंबन्धाप्रतीतेः। नाम्नश्च सामान्यानन्वयेन विशेषाकांक्षत्वात्। द्रव्यालाभाच्च दध्यादीनां सिद्धरूपाणां पुरुषव्यापारव्याप्यविषयकविध्यनन्वयेन, अग्निहोत्रानुवादेन विध्यनुपपत्त्या दध्यादिवाक्यानां तत्तद्द्रव्यविशिष्टहोमविधिपरत्वात्। अत तत्समुदायानुवादोऽग्निहोत्रं जुहोतीति। तत्फलञ्च, दशानामपि होमानां अग्निहोत्रनामकत्वेन एकसमुदायापत्त्या च अग्निहोत्रं जुहुयात्स्वर्गकामः इति श्रुतफलसंबन्धः। एवं ऋजुमाघारयति इत्यादिभिर्विहिताघाराणां समुदायानुवादआघारमाघारयतीति। तत्प्रयोजनं इन्द्र ऊर्ध्वोध्वर इति विहितमन्त्रस्य त्रिषु संबन्ध इति चेत्—

नाप्याघाराग्निहोत्रोक्ती

न तावदग्निहोत्रवाक्ये विध्यनुपपत्तिः। अन्याविहितहोमविशेषस्य लक्षणयोपस्थितस्य तन्नामकस्य विध्यन्वयात्। नापि द्रव्यालाभः, दध्यादिवाक्यविधीनां प्रतीतितो विशिष्टहोमविषयत्वेऽपि प्राप्ताप्राप्तविवेकेन होमानुवादेन दध्यादौ तात्पर्यावसानात्। एवमाघारवाक्येऽप्यपि। अतो नाघाराग्निहोत्रशब्दौ समुदायानुवादिनौ।

इत्याघाराग्निहोत्राधिकरणम् ॥ ५ ॥

पशुसोमाधिकरणम् (६)

ऐन्द्रवायवं गृह्णाति— इत्यादिवाक्येषु द्रव्यदेवतासंबन्धकल्पिताः यागाः विधीयन्ते। न देवतविशिष्टग्रहणमात्रम्। तत्र तस्या अनुपयोगात्। न च ग्रहणमात्रात्तद्दैवत्यता भवति। तथा च तावतां यागानां, सोमेन यजेतेति यजतिः समुदायानुवादः। सोमशब्दो ग्रहणप्राप्तद्रव्यनियमार्थः। यद्वा—'अण्व्याघारया गृह्णाति' इति प्रकृत्य, ऐन्द्रवायवादिवाक्यप्रवृत्तेः, धारासमर्थप्रदेयस्य प्रकृतिनियमार्थः। व्रीहिभिर्यजेतेति यागाङ्गतया विहितव्रीहीणामाग्नेयवाक्यविहितपुरोडाश-

प्रकृतिनियमे पर्यवसानवत् । यद्वाः सोममभिषुणोति–सोममाप्लावयति–अण्व्या धारया गृह्णाति—इति प्रकृत्यैन्द्रवायवादिवाक्यप्रवृत्तेः, पूर्वपूर्वस्योत्तरेण संबन्धात् सोमप्राप्तेः, तत्प्रख्यन्यायेनानूदितानां नामधेयं सोमशब्दः ।

एवं 'हृदयस्याग्रेऽवद्यति' इति विहितावदानकर्मणो हृदयादेः' 'अग्नीषोमीयं पशुमालभत' इति श्रुतपशुपदेन हृदयादेर्लक्षणयानूदितस्य, अग्नीषोमीयपदेन प्रत्येकं देवतासंबन्धे, तावन्तो यागाः कल्प्यन्ते । आलभतिरवदानविध्यर्थप्राप्तस्पर्शनानुवादः । प्रत्ययस्तु द्रव्यदेवतयोः संबन्धविधायकः । यद्वा, आष्टमिकन्यायेन हृदयाद्यवदानानां, श्रुतावदानप्रकृतितया यागसाधनत्वप्रतीतेः, तावत्सु यागेषु आलभतिना ताननूद्य, अग्नीषोमीयपदेन पशुशब्दानूदितहृदयादिद्वारा यागेषु देवताविधानम् ।

तस्मादालभतियजती समुदायानुवादौ, इति चेत् —

नाप्युक्ती पशुसोमयोः ।

न तावत्सोमशब्देन प्रदेयनियमः । अण्व्याधारयेति वाक्यसन्निहितधारासमर्थद्रव्यस्यैव गृह्णाति कर्मत्वेन नता नियमायोगात् । नापि स नामधेयम् । सोमस्य प्राप्त्यभावेन तत्प्रख्यन्यायानवतारात् । अभिषवादिवाक्यानां विनियोगभङ्गेनारादुपकाङ्गविधायित्वापत्तेः । सोमस्य पूर्वमेव यागाङ्गत्वावगतौ व्रीहीनवहन्तीत्यादिवत् अपूर्वसाधनलक्षणया श्रुतविनियोगस्स्यात्; न त्वेतन्नामधेयत्वेऽस्ति । न च तप्ते पयसीत्यादिवत् संस्कृतस्य विनियोगः ; सा वैश्वदेवीतिवत् ऐन्द्रवायवादिवाक्ये तत्पदस्य संस्कृतग्राहिणोऽभावात् । सन्निधानस्य तु इतरेतरानालोचनेन विहितानां युगपत्प्रकरणग्रहणेन बाधात्, प्रकरणस्य चाभिषुतद्रव्याग्राहकत्वात् ? धारासमर्थद्रव्यमात्रेण सन्निहितेन यागानां निराकांक्षतया आरादुपकारकत्वेनाभिषवादेः द्रव्योपसर्जनकस्य ग्रहणात् । तस्मान्न नामधेयं सोमशब्दः । नापि प्रदेयप्रकृतिनियमार्थः । ऐन्द्रवायवादिवाक्ये ग्रहणसंस्कारमात्रस्य विधानात् । न च ग्रहणेन ऐन्द्रवायवत्वं न स्यादिति वाच्यम् : सोमेन यजेतेति वाक्येन सोमविशिष्टयागे विहिते, सः ग्रहणवाक्यगतद्रव्यदेवतासंबन्धानुपपादयन् ग्रहणेन तद्दैवत्ये कर्तव्ये सहायीभवति । दशमुष्टिपरिमितसोमरसानामेकग्रहे ग्रहीतुमशक्यतया, नानाग्रहेषु गृहीतेषु तेषां दृष्टार्थत्वाय समुच्चये वक्तव्ये, दशैतानध्वर्युरित्यादिक्रमसमुच्चयदर्शनमुपपद्यते ।

अग्नीषोमीयं पशुमालभत इत्यत्रापि द्रव्यदेवताविशिष्टे यागे विहिते, पशोर्विशसनश्रवणात् दाशमिकन्यायेन हृदयादिद्वारा तस्याङ्गत्वात् तदवदानानि संस्कारकर्माणि भवन्तीति न पशुशब्दे लाक्षणिकत्वम् ।

अतो नालभतियजती समुदायानुवादौ । इति पशुसोमाधिकरणम् ॥ ६ ॥

संख्याधिकरणम् (७)

सप्तदशप्राजापत्यान् पशूनालभत इत्यत्र पशुशब्दे एकशेषे कृते सप्तदशशब्देन संख्यावैशिष्ट्ये पशुषु बोधिते इतरेतरयुक्तेषु संख्याविशिष्टेषु तेषु प्राजापत्यपदेन देवतासंबन्धकरणेण संबन्धैक्यात्, तत्कल्पितो यागोऽपि सप्तदशपशुद्रव्यकः प्रजापतिदेवताकः एक एव भवतीति चेत् —

प्रजापत्येषु पशुषु संख्यया कर्मणां भिदा ॥ २४ ॥

यदि सप्तदशपशुद्रव्यकत्वं यागस्य स्यात्, तदा एकपशुनिष्पन्नैकादशावदानगणः एकः एकस्मिन्यागेऽङ्गमिति अग्नीषोमीयात्प्रकृतिपरम्परया प्राप्तं बाध्येत। न च तस्य प्रकृतावार्थिकत्वेनानतिदेशः अग्नीषोमीयेन पशुना यजेतेति विपरिणते उत्पत्तिवाक्ये, उपादेयगतपश्वेकत्वस्य चातुर्थिकन्यायेन विवक्षिततया-तत्प्रभवेषु हृदयाद्यङ्गेषु दाशमिकन्यायेन यागसाधनेषु तत्तदेकत्वस्य विवक्षिततया विधिसंस्पर्शेनार्थिकत्वाभावात्। न चातिदेशाबाधेनोपदेशवर्णनसंभवे स युक्तः। उपदेशस्य तद्धितानन्तरमेकशेषेण प्रति द्रव्यं संबन्धभेदेन यागभेदेऽप्युपपत्तेः। अतो द्रव्यगतसंख्यया द्रव्यदेवतासंबन्धस्य तावत्त्वापादनेन कर्मणां यागानां, भिदाभेदः।

इति पशुसोमाधिकरणम् ॥ ७ ॥

संज्ञाधिकरणम् (८)

अथैषज्योतिरित्यत्र, एतच्छब्देन प्रकृतज्योतिष्टोमपरामर्शात्, प्रकृतहानाप्रकृतप्रक्रियाविशिष्टविध्यपूर्वान्तरादिकल्पनापरिहाराच्च, तत्रैव सहस्रदक्षिणागुणविधिः इति चेत् —

अथैषज्योतिरित्यादौ तद्भेदो नामभेदतः।

अथेति प्रकृतविच्छेदात्-ज्योतिरादिनामभेदान्-अर्थान्तरावगमात्, तस्य च 'एतेन यजेत' इत्याख्यात सामानाधिकरण्येन यागत्वावगतेः, एतच्छब्दस्य प्रस्तूयमानपरत्वात्, दक्षिणाविधेः 'सहस्रदक्षिणेन यजेत' इत्येतावतैवोपपत्तेरितरवैयर्थ्यात् तत्तन्नामकं विधीयत इति।

इति संज्ञाधिकरणम् ॥ ८ ॥

गुणाधिकरणम् (९)

सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र वैश्वदेवीपदेन द्रव्यदेवतासंबन्धावगमात्, वैश्वदेव्या यजेतेति यागकल्पनात् शुद्धयज्यवगतं यागं गुणानुरक्तं साकांक्षं योग्यञ्च प्रति वाजिनमुत्पन्नशिष्टं, 'वाजोऽन्नमामिक्षा येषान्ते वाजिन' इति पूर्वकर्मसंबन्धिनो विश्वान्देवानुद्दिश्य वा विधीयत इति द्रव्ययोर्विकल्पः। अत एकं कर्म इति चेत् —

गुणाद्वाजिनयागस्यत्वामिक्षा यागतोमिदा ॥ २५ ॥

शुद्धयजिसत्त्वेऽपि द्रव्यविशिष्टस्यैव तेन प्रतीतेर्निराकांक्षत्वात्, तदैश्वदेवमित्येतावतैव तच्छब्दस्य संस्कृतपयःपरामर्शिनः तत्त्वेनैव तदुपस्थापकतया द्रव्यविशेषदेवतयोः संबन्धप्रतीत्या स्त्रीलिङ्गामिक्षापदयोः नित्यानुवादत्वात्, वाजिभ्यो वाजिनमिति पदद्वयसमभिव्याहारात् वाजिवाजिनयोस्संबन्धप्रतीत्या विलम्बितत्वात्, अश्वत्वे रूढस्य वाजिपदस्य योगाद्विश्वदेवानुपस्थापकत्वात् 'अग्निर्वायुस्सूर्यस्तवै-वाजिनः' इति च वाजिशब्दस्य वाक्यशेषेऽर्थद्वयप्रतीतेश्च, कथञ्चिदपि पूर्वकर्मणि निवेशमलभमानं वाजिनं, स्वनिवेशाय कर्मान्तरं कल्पयतीति गुणाद्यागभेदः। प्राप्तकर्मणि गुणद्वयविधानानुपपत्त्या गुणस्य भेदकत्वं पौर्णमास्याधिकरणे प्रसङ्गादुक्तम्।

इति गुणाधिकरणम् ॥ ९ ॥

पूर्वोक्तापवादाधिकरणम् (१०)

दध्ना जुहोतीति वाक्यावगतदशद्रव्याणामेकाग्निहोत्रहोमसंबन्धेऽष्टदोषदुष्टविकल्पापत्तेः, प्रथम-प्रवृत्तवाक्यविहितद्रव्यावरुद्धेऽन्यस्यानिवेशाद्वा कर्मान्तराण्येव तैर्विधीयन्त इति चेत् —

न चाग्निहोत्रतो भिन्ना दधिहोमादयो मताः।

अन्योन्यानालोचनेन कर्मोत्पत्तिमालोच्य युगपत् सर्वप्रवृत्तेः, प्रमाणवशात् व्रीहियवादिवद्विकल्पोपपत्तेश्च, नाग्निहोत्राद्दधिहोमादयो भिन्नाः।

इति पूर्वोक्तापवादाधिकरणम् ॥ १० ॥

गुणकामाधिकरणम् (११)

अग्निहोत्रं प्रकृत्य 'दध्नेन्द्रियकामस्य जुहुयात्' इति श्रुतेः प्रकृतहोमात् कर्मान्तरं दधिविशिष्टं फलाय विधीयते धातुपरार्थ्यवाक्यार्थविध्योः परिहाराय। समानपदोपात्तत्वप्रत्यासत्त्या तस्यैव भावना-करणतया फलसाधनत्वात्। न च प्रकृतस्यैव फले विधानम्; दध्नेत्यस्य पाक्षिकानुवादत्वापत्तेः। न च तदवस्थस्यैव प्रकृतस्य विधानं; वाक्यभेदापत्तेः। इति चेत् —

दध्नेन्द्रियेति कामाय गुणमात्रं विधीयते ॥ २६ ॥

प्रकृतहानाप्रकृतप्रक्रियाविशिष्टविधिमत्वर्थलक्षणोत्पत्तिविशेषणविधिकल्पनादिदोषपरिहाराय, प्रकृतहोम-निरूपितं दधिविशिष्टं करणकारकं फले विधीयते। दृष्टहोमव्यापारसंबन्धमन्तरेणासिद्धरूपस्य तस्य फलजन-कत्वस्य—करणोपदेशवैयर्थ्यपरीहारस्य चालाभात् फलभावनाकरणत्वन्तु कारकशक्तेः यागादेरिव समभि-व्याहारगम्यम्। धातुपारार्थ्यविप्रकृष्टविध्योश्चागत्य स्वीकार इति भावनामात्रस्य भेदो न धात्वर्थस्येति।

इति गुणकामाधिकरणम् ॥ ११ ॥

रेवत्यधिकरणम् (१२)

'एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत' इत्यत्र, प्रकृतहानादि-परीहाराय, पूर्ववाक्यविहिताग्निष्टुद्यागमाश्रित्य, रेवत्यृगाधारवारवन्तीयसाम पशुफले विधीयते। साम्नस्साक्षाद्यागसाधनत्वेऽपि, अग्निष्टोमस्तोत्रतस्साधनत्वम्। तदभावेऽपि, कृत्वेत्यस्य क्रियान्तरसापेक्षतया तत्पूरणाय यागसंबन्ध्यते। तदकारकस्यापि तदाश्रयत्वं, साकं प्रस्थायीय दाक्षायणयज्ञसंस्थादीनामिवोपपन्नम्। रेवतीवारवन्तीयसंबन्धस्य; कृत्वाशब्दकल्पितेन वियध्न्तरेण कल्पनान्नवाक्यभेदः। साम्नो यागसंबन्धद्वार स्तोतान्तरसत्वेऽपि क्रत्वर्थवारवन्तीयस्याग्निष्टोमस्तोत्रद्वारत्वात् फलार्थस्यापि तदेव द्वार मनुमीयते। एतच्छब्दः प्रकृताश्रयेण साम्नः फलार्थस्य संबन्धानुवादः। अतो गुणात्फलम्। इति चेत् —

कामाय रेवतीवाक्ये कर्मान्तरविधिर्भवेत्।

न तावत् स्तोत्रद्वारा साम्नः प्रकृतयागाश्रयत्वम्। प्रकृतक्रियानिरूपितकारकशक्तेरेव पूर्वाधिकरणे फलसंबन्धबोधनात्। साम्नश्च स्तोत्रद्वारापि यागकारकत्वाभावात्। द्वितीयान्तत्वाच्च वारवन्तीयमिति नीतिरूपस्य साम्नो दध्यादिवदाश्रयाकांक्षाभावाच्च क्रत्वर्थवारवन्तीयदृष्टान्तेनाग्निष्टोमस्तोत्रद्वारत्वानुमानस्य धर्मेऽप्रमाणत्वाच्च, रेवतीषु वारवन्तीयं कृत्वा पशून् भावयेदिति फलभावनापेक्षया क्त्वाप्रत्ययोपपत्तौ, तदर्थमपि यागापेक्षाभावाच्च। अतो गुणफलसंबन्धविधौ, यजेतेति। अग्निष्टोमसामेति च प्राप्तानुवादत्वायोगात्, विधाने च वाक्यभेदादनर्थकं स्यादिति, रेवतीवारवन्तीयविशिष्टो यागः फले विधीयते। अग्निष्टोमसामेति तु पूर्वयागात् प्रकृते प्राप्तस्यानुवादः। अतः कर्मान्तरं फले विधीयते इति।

इति रेवत्यधिकरणम् ॥ १२ ॥

सौभराधिकरणम् (१३)

ब्रह्मसामसंज्ञकं स्तोत्रं प्रकृत्य 'यो वृष्टिकामो योऽन्नाद्यकामो यस्स्वर्गकामः स सौभरेण स्तुवीत' इति ब्रह्मसामनिरूपितं सौभरसंज्ञकसामविशिष्टं करणकारकं वृष्ट्यादिफलत्रये विधाय पूनः श्रूयते—हीषिति वृष्टिकामाय निधनं कुर्यात्—ऊर्गित्यन्नाद्यकामाय—ऊ इति स्वर्गकामाय इति। तत्र हीषादिनिधनविशेषाः सौभरफलात्फलान्तरे वृष्टिकामादीनुद्दिश्य विधीयन्ते। तत्तत्फलविशेषसाधनसौभरेऽनियमप्राप्तहीषादिनियमविधौ, वृष्टिकामादिशब्दानां फलसाधनसौरभलक्षकत्वं स्यात्। तथा च साधनद्वयमेलने प्रभूतं वृष्ट्यादि भवति। इति चेत् —

हीषाद्या नियतास्तत्तत्फलार्थे साम्नि सौभरे ॥ २७ ॥

सिद्धरूपाणां हीषादीनां दध्यादिवदाश्रयाकांक्षाणां प्रकृतस्तोत्राश्रयत्वस्यायौग्यत्वात्, निधनस्य चाप्रकृ-

तत्वात्तदाश्रयत्वे विधीयमाने, तस्य फलसंबन्धस्य च विधौ वाक्यभेदात्, वृष्टिकामादिशब्दलक्षिते सौभरे हीषादयोऽनियतप्राप्ता विधीयन्ते। यद्वा—'वासिष्ठानां नाराशंसो द्वितीयः प्रयाजः' इतिवत् परंपरयापि तत्साधनत्वोपपत्तेः न फलपदे साधनलक्षणापि। तस्माद्धीषादयो नियम्यन्ते।

इति सौभराधिकरणम् ॥ १३ ॥

इति लघुवार्तिकटीकायां द्वितीयाध्यायस्य द्वितीयः पादः

॥ अथ तृतीयः पादः ॥

रथन्तराधिकरणम् (१)

'यदि रथन्तरसामासोमस्स्यात् ऐन्द्रवायवाग्रान् ग्रहान्गृह्णीयात्'—इत्यत्र रथन्तरविशिष्टे क्रतौ निमित्ते ऐन्द्रवायवाग्रत्वमुच्यमानं, प्रकृतज्योतिष्टोमस्य तद्विशिष्टत्वासंभवात् कर्मान्तरमाक्षिपति। रथन्तरस्य क्रतुव्यापितया — इतरव्यवच्छेदकतया च रक्तोत्पलमित्यत्रेव विशेषणत्वात् प्रकृतकर्मणि गायत्रादिनानासाम्नां समावेशात्—इति चेत्।

न रथन्तरसामेति गुणात्कर्मान्तरं भवेत्।

न विशेष्यव्याप्तिर्विशेषणे नियता। कुण्डलीत्यादौ सत्तामात्रेणापि दर्शनात्। नियतसत्ताकत्वेऽप्यव्यवच्छेदकता—यथा पांडुरः शंख इति। अत्र पृष्ठस्तोत्रे वैकल्पिकत्वात् बृहद्रथन्तरयोः पाक्षिकसत्ताव्युदासोविशेषणफलम्। व्यवच्छेदकत्वेऽपि विरोधिबृहद्व्यवच्छेदकत्वं, न गायत्रादेः। रक्तत्वस्येव दीर्घत्वाविरोधिनः। अतः प्रकृतस्यैव क्रतोः तद्विशेषणमिति रथन्तरविशिष्टः क्रतुर्निमित्तम्–क्रतुविशिष्टं रथन्तरं वा। कादाचित्कत्य निमित्तत्वसंभवात्। अतो न रथन्तरगुणात्कर्मान्तरम्।

इति रथन्तराधिकरणम् ॥ १ ॥

अवेष्ट्यधिकरणम् (२)

राजसूये राजकर्तृके, अवेष्टिर्नामेष्टिः—आग्नेयमष्टाकपालं निर्वपति ....' इत्यादिका श्रुता। तत्रयश्रूयते—'यदि ब्राह्मणो यजेन बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा तमभिघारयेत्–यदि राजन्य ऐन्द्रं–यदि वैश्यो वैश्वदेव'मिति। तत्र त्रैवर्णिकायां प्राप्तानां निमित्तार्थानि श्रवणानि। प्रजापालनादिकर्मकर्तरि राजशब्दस्यार्थैः प्रयोगात्। आन्ध्राणां क्षत्रियत्वजातौ प्रयोगस्य पीलुशब्दन्यायेन बाधात्। 'तस्य कर्मणि' इत्यधिकारे, 'वत्यन्त पुरोहितादिभ्यो यक्' इति पाणिनिसूत्रस्य साधुत्वान्वाख्यानपरतया शक्त्यग्राहकत्वात्। प्राप्तिद्योतकयदिश्रुतिविरोधाच्च। अतो राज्यकर्तृणां

त्रयाणां प्राप्तत्वादनुवादः इति चेत् —

यदि ब्राह्मणमित्याद्यमवेष्टिप्रापकं वचः ॥ २८ ॥

राजशस्दस्य क्षत्रियत्वे आन्ध्रप्रयोगात्, तन्मूलकत्वाद्व्याकरणस्य. तत्र राजशब्दस्य पुरोहितादिगणे-पाठात्, स्मृत्याचारयोर्विरोधे स्मृतेर्बलवत्त्वेनार्थप्रसिद्धिबाधात्, यदिशब्दस्य निपातत्वात्, राजानमभि-षेचयेदिति प्रयोगाच्च, राजा यजेतेत्यत्राप्राप्तौ ब्राह्मणवैश्यावित्यनुवादासंभवात्, तयोः प्रापकं वचनम् ।

इत्यवेष्ट्यधिकरणम् ॥ २ ॥

आधानाधिकरणम् (३)

'वसन्ते ब्राह्मणोऽग्नीनादधीत–ग्रीष्मेराजन्यः–शरदि वैश्यः' इति । तथा 'वसन्ते ब्राह्मण-मुपनयति' इत्यादिश्रुतम् । तत्र ब्राह्मणादिश्रवणं कालविधौ निमित्तार्थं, 'यजेत स्वर्गकामः' इत्यादि क्रतुविधिभिरग्निविद्यापेक्षिभिः तत्साधनयोराधानाध्ययनयोराक्षिप्तत्वात् । अग्निष्वाधानसाध्यत्वस्या 'नक्तं गार्हपत्य'मित्यादिगुणविधिभिरवगतेः । अध्ययनाङ्गत्वादुपनयनस्यापि । 'य एवं विद्वानग्निमाधत्ते' इति गुणानाकृष्टविधिवशाद्वा सर्वेषामाधानप्राप्तेः । अती निमित्तार्थं ब्राह्मणादिश्रवणम् इति चेत्– –

वसन्तादिवचोऽप्येवमाधानप्रापकं मतम् ।

आधानसाध्यत्वस्याग्निष्ववगमेऽपि, अन्येनाहितानां क्रयादिनापि प्राप्तिसंभवे नियतमाधानं नाक्षिपन्त्य-ग्नयः । लिखितपाठादिनापि विद्यासंभवाच्च नाध्ययननियमः । सामान्यवचनस्य वर्तमानसरूपस्य स्पष्टविधिसत्त्वेन विधित्वकल्पनम् । तस्मात् ब्राह्मणादिकर्तृकस्य वसन्तादिकालविशिष्टस्य च विधानार्थं 'वसन्ते ब्राह्मण' इत्यादिवाक्यम् । अतः प्रापकं वचनमाधानोपनयनयोः ।

इत्याधानाधिकरणम् ॥ ३ ॥

दाक्षायणयज्ञाधिकरणम् (४)

दर्शपूर्णमासप्रकरणे 'दाक्षायणयज्ञेन स्वर्गकामो यजेत–साकं प्रस्थायीयेन यजेत पशुकामः' इति श्रुतयोः, न फलाय गुणविधानम् । तन्नामकगुणयोर्लोके दध्यादिवदप्रसिद्धेः । अथोऽज्ञानार्थवदद्वयं यजिसामानाधिकरण्याद्यागनामसत्, प्रकृताद्भेदकं, विधेयान्तरभावेन यागस्यैव विधिप्रतीतेरभ्यासादपि भेदः । इति चेत् —

स्याद्दाक्षायणयज्ञादौ गुणस्यैव फले विधिः ॥ २९ ॥

लोके गुणवाचित्वेनाप्रसिद्धयोरप्यवयवप्रसिद्धि[1] वाक्यशेषाभ्याम्, आवृत्ति–सहप्रस्थान–लक्षणगुणवाचित्व-

---

[1] द्वे पौर्णमास्यौ द्वे अमावास्ये, द्वे शृतकुम्भ्यौ द्वे दधिकुम्भौ सहत्कुम्भीभिरभिक्रमति–इति वाक्यशेषः ।

प्रतीतेः, तयोः प्रकृतयागसंबन्धिनोर्दध्यादिवत्फले विधानमिति नैतत्संज्ञककर्मान्तरविधानम्। प्रकृत-हानादिप्रसङ्गादिति।

इति दाक्षायणयज्ञाधिकरणम् ॥ ४ ॥

ईषालम्भाधिकरणम् (५)

दर्शपूर्णमासयोः 'ईषामालभेत' इति विहितेषानुवादेन 'वायव्यं श्वेतमालभेतेत्यनारभ्य श्रुतेन श्वेतगुणो विधीयते। संबन्धसामान्यविहिततद्धितान्तेन वायव्यशब्देन वायुस्पृष्टत्वानुवादः। भूतिका-मपदमपि सार्वकाम्यवाक्यप्राप्तफलानुवादकम्। नैवम्। फलपदस्य पाक्षिकानुवादत्वापत्तेः। दार्श-पौर्णमासिकालम्भनैयत्याभावाच्च। अतः श्वेतद्रव्यालम्भमात्रं यावदुक्तं फले विधीयते।

तथा तत्रैव 'चतुरो मुष्टीन्निर्वपति' इति विहितनिर्वापे, 'सौर्यं चरुं निर्वपेद्' इति चरुशब्द-लक्षिता स्थाली आधारत्वेन विधीयते। द्वितीया च सप्तम्यर्थे। सूर्यशब्देन गौण्याग्न्यनुवादः। अत्रापि यावदुक्तं कर्मफलाय विधीयते। इति चेत् —

नालम्भे स्याद्गुणविधिर्वायव्यमिति दार्शिके।

दार्शिके आलम्भे वायव्यमिति वाक्ये न श्वेतगुणविधिः। तदीयनिर्वापे न स्थालीविधिरित्यपि द्रष्टव्यम्। वायव्यमिति देवतातद्धितेन द्रव्यदेवतयोस्संबन्धप्रतीत्या, तदनुपपत्तिकल्पितस्य 'वायव्येन श्वेतपशुना यजेत भूतिकामः' इति फलाय विशिष्टयागस्य विधिसम्भवे, न देवतापदवैयर्थ्यं युक्तम्।

एवं चरुशब्दस्याप्योदने रूढस्य सूर्यदेवतासंबन्धे पूर्ववत् 'सौर्येण चरुणा यजेत ब्रह्मवर्चस-काम' इति उभयत्र फले विशिष्टयागविधिरिति।

इति नालम्भाधिकरणम् ॥ ५ ॥

वत्सालम्भाधिकरणम् (६)

अग्निहोत्रे 'वत्समालभेत' इति श्रुते, प्राणिद्रव्यकर्मकालभति सामान्यात् पूर्ववद्यागविधिः। इति चेत्।

अग्निहोत्रे विधिर्वत्समालभेतेति संस्कृतेः ॥ ३० ॥

संस्कृते विधिः इति योजना। आलम्भः—स्पर्शः। स च यागमन्तरेणाप्युपपन्नः। अतो वत्स-संस्कारार्थः सः। अतो 'वत्सनिकान्ता हि पशवः' इति वाक्यशेषोपपत्तिः।

इति वत्सालम्भाधिकरणम् ॥ ६ ॥

चरूपधानाधिकरणम् (७)

अग्निचयने, "चरुमुपदधाति बृहस्पतेर्वा एतदन्नम्। यन्नीवाराः" इति बृहस्पतिदेवताचर्वोः संबन्धकल्पितयागविधिः। उपधानं स्विष्टकृदादिशेषकार्यप्रत्याम्नानानार्थम्। इति चेत् —

चरूपधानवचनं न यागस्य विधायकम्।

षष्ठ्याः देवतात्वबोधेऽसामर्थ्यात् तैत्तिरीयकस्य 'बार्हस्पत्यो भवति' इत्यस्य वर्तमानसरूपत्वात् विध्यनपेक्षितस्य वाक्यशेषादग्रहणच्च, चरूपधानं स्थण्डिलनिर्वृत्यर्थतया कृतार्थम्। 'चरुकर्मकोपधानेन स्थण्डिलं भावयेत्' इति। अतो न यागविधिरिति।

इति चरूपधानाधिकरणम् ॥ ७ ॥

पात्नीवताधिकरणम् (८)

'त्वाष्ट्रं पात्नीवतमालभेत' इति प्रकृत्य, 'पर्यग्निकृतं पात्नीवतमुत्सृजति' इति श्रुतेः, पर्यग्निकृतं पात्नीवतं कुर्यादिति पूर्वस्मात्कर्मान्तरं विधीयते। पूर्वयागे पत्नीवत्त्वगुणकस्य त्वष्टुर्देवतात्वात् न तद्द्वारा पूर्वकर्मप्रत्यभिज्ञानम्। तद्धितद्वयश्रवणेऽपि 'अग्नये पवमानाय' इत्यादिवत् परस्परनियमात्। पूर्वकर्मणि विधेयगुणाभावाच्च, न पर्यग्निकृतमुत्सृजतीति व्यवहितान्वयः। पर्यग्निकरणान्ताङ्गकलापस्य तस्मिन्प्रकृतित एव प्राप्तेः। इति चेत् —

पर्यग्निकृतवाक्यं स्यात् त्वाष्ट्रे गुणविधायकम्।

उत्सृजतिना पूर्वयागमनूद्य, पर्यग्निकरणान्ताङ्गकलापोऽतिदेशात्पूर्वं विधीयते गृहमेधीयाज्यभागवत्। पत्नीवत्पदन्तु नित्यानुवाद इति न विशिष्टानुवाददोषः। अतो न कर्मान्तरम्।

इति पात्नीवताधिकरणम् ॥ ८ ॥

अंश्वदाभ्याधिकरणम् (९)

'योऽदाभ्यं गृहीत्वा सोमेन यजते' 'योँशुं गृह्णाति' इति च अनारभ्य श्रुतयोः, अदाभ्यं यजत इत्यन्वयेन तन्नामकं कर्म विधीयते। तच्च भेदकं ज्योतिरादिवत्। अंशौ तु गृह्णाति सामान्यात् अग्निष्टोमविध्यन्ते प्राप्ते, तदीयद्रव्यदेवतासङ्गत्या यागो भविष्यति। तत्तन्नामकग्रहणविधौ विनियोजकाभावद्वैयर्थ्यं स्यात्। इति चेत् —

अंश्वदाभ्यग्रहगिरो न यागान्तरगोचराः ॥ ३१ ॥

अदाभ्यं गृहीत्वा–इत्यव्यवधानात् गुणाकृष्टशक्तिकत्वात् विशिष्टविधौ तु गौरवात्। अंशौ तु यज्यश्रवणात् यागत्वनिश्चये, यजितोऽतिदेशाप्रवृत्तेः, ग्रहणादेवातिदेशे प्रकृतिविकल्पापत्तेः, तैत्तिरीयके तन्नाम-

कग्रहणयोर्ज्योतिष्टोमे विनियोजकवचनद्वयस्य, 'यस्यैवं विदुषोऽदाभ्यो गृह्यते भवत्यात्मना' 'यस्यैवं विदुषोँशुर्गृह्यत ऋध्नोत्येव' इति तत्प्रकरणे दर्शनात् ग्रहणनामनी एते, न यागनामनी।

इत्यंश्वदाभ्याधिकरणम् ॥ ९ ॥

अग्निचयनाधिकरणम् (१०)

'य एवं विद्वानग्निञ्चिनुते' इति अनारभ्यश्रुते, 'अग्निं कुर्यात्' इति तन्नामकं कर्म विधीयते चिनोतिपरप्रत्ययेन। धातुस्तु प्रत्ययानुग्रहार्थः। तस्य च 'अथातोऽग्निमग्निष्टोमेनानुयजति' इति वाक्ये, अग्निमनु अग्निष्टोमेन यजतीति यागस्यानुकरणात्, अग्नेरपि यागत्वम्। देवदत्तमनुगच्छति—इतिवत्। तस्मादग्निसंज्ञकयागविधिः। इति चेत् —

अग्निंश्चिनुत इत्यत्राप्येवं संस्कारगो विधिः।

अग्निशब्दस्य ज्वलनेऽत्यन्तरूढस्य वाक्यभेदादिनामत्वग्राहकाभावे तदयोगात्, वह्नेरेव चयनं संस्कारो विधीयते, 'चयन निर्वृत्तस्थण्डिलस्थापनेन अग्निं संस्कुर्यात्' इति। तस्य चाग्निष्टोमादौ विनियोजकानि अग्निप्रकरणगतानि, 'अथातोऽग्निष्टोमेनानुयजति' इत्यादीनि। संस्कृतेऽग्नौ अग्निष्टोमादिना-कुर्यादित्यर्थः। तस्मात्संस्कारविधिः।

इत्यग्निचयनाधिकरणम् ॥ १० ॥

प्रकरणान्तराधिकरणम् (११)

कुण्डपायिनामयनाख्यसंवत्सरसत्रप्रकरणे, 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति–मासं दर्शपूर्णमासाभ्यां यजेत' इति श्रुते, मासमुद्दिश्योपादीयमानमपि कर्म प्राप्तत्वान्न विधीयते। उद्देश्योऽपि मासोऽप्राप्तत्वाद्विधीयते। अविधीयमानस्य कर्मणो न भेदः। अतस्तदनुवादेन मासगुणविधिः। इति चेत् —

मासाग्निहोत्रं नित्यात्स्याद्भिन्नं प्रकरणान्तरात् ॥ ३२ ॥

अनुपादेयसंबन्धसचिवोऽसन्निधिः प्रकरणान्तरम्। ततो हेतोः मासाग्निहोत्रं भिन्नं स्यात्। मासोद्देशेनोपादीयमानं कर्म, असन्निधानात् न नित्याग्निहोत्रम्। तस्यैव सन्निधापकत्वे विधायकत्वे च वाक्यभेदः। अत एव 'य इष्ट्या पशुना सोमेन वा यजेत' इति सन्निधापितस्य, सोऽमावास्यायां पौर्णमास्यां वा यजेतेति कालोद्देशेन सोमादेर्विधानेऽपि न कर्मभेदः। अग्निहोत्रनाम यद्यपि दूरस्थमुपस्थापयति धात्वर्थं, तथापि भावनायास्तेनानुपस्थापनात्, धात्वर्थस्यापि विधानयोग्यपूर्वापरीभूतस्यानुपस्थापनात्, प्राप्तगुणकम् अग्निहोत्रसधर्मकं कर्मान्तरं विधीयते।

एवं 'सरस्वत्या दक्षिणे न तीरेणाग्नेयेन यजेते' त्यत्रापि अनुपादेयं देशमुद्दिश्योपादीयमानं कर्मान्तरम्। आग्नेयशब्दस्य नामत्वाभावाच्च।

तथा 'सत्रायावगूर्य विश्वजिता यजेत' इति सत्रसङ्कल्पविच्छेदे निमित्ते श्रूयमाणो यागः एकाहकाण्डपठितविश्वजितोऽन्य एवेति।

इति प्रकरणान्तराधिकरणम् ॥ ११ ॥

फलाधिकरणम् (१२)

'आग्नेयमष्टाकपालं निर्वपेद्रुकामः' इति श्रुतेऽपि अनुपादेयं फलमुद्दिश्योपादीयमानं कर्म' असन्निधानात्पूर्ववद्भिन्नम्।

तथा त्रैधातव्या दीक्षणीयेत्यश्वमेधे दीक्षणीयाशब्दलक्षिते दीक्षितसंसारे विधीयमाना, अनुपादेयसंस्कार्यसंबन्धात् काम्यत्रैधातव्याया असन्निधानाच्च कर्मान्तरम्। प्रकरणान्तरमन्यप्रकरणपठितत्वम्। फलसंस्कार्ययोः कर्मानुवादेनाहवनीयादेरिव विधेयत्वं वेतिशङ्कापनुत्तये इदमधिकरणम्। असन्निधानमात्रस्यैवोपयुक्तत्वात् विधेयस्याङ्गत्वापाताच्चेति। तदाह —

भिद्येत रुक्कामाग्नेयो दार्शिकाग्नेययागतः।

त्रैधातव्येत्यापि द्रष्टव्यम्।

इति फलाधिकरणम् ॥ १२ ॥

देशकालफलनिमित्ताधिकरणम् (१३)

दर्शपूर्णमासप्रकरणे, 'समे दर्शपूर्णमासाभ्यां यजेत' 'पौर्णमास्यां पौर्णमास्या यजेत' इति श्रुते देशकालोद्देशेनोपादीयमानं सन्निहितमपि कर्म विधेयमेवेति विहितस्य विधानायोगत्कर्मान्तरम्। इति चेत् —

सान्निध्याद्देशकालाद्यैर्न कर्मान्तरता भवेत् ॥ ३३ ॥

सन्निहितत्वेन प्रत्यभिज्ञायमानतया, कर्म न विधीयते। उद्देश्यावपि देशकालौ अप्राप्तौ विधीयेते। निमित्तफलसंस्कारेषु, 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत', 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'शेषात् स्विष्टकृते समवद्यति' इति श्रुतानां कर्मणामेव यद्यपि विधेयत्वम्। निमित्तादीनामविधेयत्वात्,। तथापि निमित्तादिसंबन्धित्वेन पुनर्विधानात्, उत्पत्तिविधिभेदे कर्मभेदात्, प्रकृते च तदभावान्न भेदः। अग्नये स्विष्टकृते समवद्यति' इति विहितस्य शेषादिति पुनर्विधानं संस्कार्यसंबन्धार्थम्।

इति देवताकालफलनिमित्ताधिकरणम् ॥ १३ ॥

आग्नेयद्विरुक्तेः स्तुत्यर्थताधिकरणम् (१४)

दर्शपूर्णमासयोः कालद्वययुताग्नेयसन्निधौ, 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवती'ति श्रुते अभ्यासात्कर्मान्तरविधिः। न च कालद्वययुताग्नेययोरन्यतरस्यायमनुवादः; तत्रैवैतदनुवादेनापरविधान-संभवे, विनिगमनाविरहेण कर्मान्तरस्यैव विधानौचित्यात्। इति चेत् —

कालद्वययुताग्नेयाद्भिद्यते नैककालयुक्।

प्रकृतप्रत्यभिज्ञाऽबाधाय ऐन्द्राग्नविधिशेषोऽयमनुवाद इति।

इति आग्नेयद्विरुक्तेः स्तुत्यर्थताधिकरणम् ॥ १४ ॥

इति लघुवार्तिकटीकायां द्वितीयस्य तृतीयः पादः।

॥ अथ चतुर्थः पादः ॥

यावज्जीवाधिकरणम् (१)

'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति प्रकृत्य, 'यावज्जीव'मिति श्रुते प्रकरणानुग्रहाय काम्ययागाङ्गतया यावज्जीविकोऽभ्यासो विधीयते। इति चेत् —

काम्यात्प्रयोगो दर्शादेर्नित्योऽसौ प्रविभिद्यते ॥ ३४ ॥

यावज्जीवपदे काललक्षणायाः-यजिपदेऽभ्यासलक्षणायाश्च, श्रुतिसंभवे प्रकरणवशादनुपपत्तेः, जीवने निमित्ते पुरुषस्य प्रत्यवायपरिहाराय, काम्यप्रयोगाद्भिन्नो नित्यः प्रयोगो नियम्यत इति, एकस्यैव प्रयोग-भेदः। इति यावज्जीवाधिकरणम् ॥ १ ॥

शाखान्तराधिकरणम् (२)

शाखाभेदेन श्रुतान्यग्निहोत्रदर्शपूर्णमासादीनि अभ्यास-प्रकरणान्तर-गुणेभ्यो भिद्यन्ते। 'ऐन्द्राग्नमेकादशकपाल'मित्युत्पन्नस्य, 'ऐन्द्राग्नं द्वादशकपाल'मिति शाखान्तरस्मृतेनोत्पन्नशिष्टद्रव्य-विधानायोगात्। इति चेत् —

अग्निहोत्रादिकं कर्म शाखाभेदान्न भिद्यते।

अभ्यासादिहेतुभ्यः कर्मणो विधानमात्रं प्रसिद्धं न भेदः। विहितस्य विध्ययोगात् कर्मान्तरत्वं वाच्यम्। इहत्वध्येतृभेदेन विहितस्यापि तदुपपत्तेः न भेदकत्वम्। एकादशकपालद्वादशकपालयो-रुत्पत्तिशिष्टयोर्विकल्पः। इति शाखान्तराधिकरणम् ॥ २ ॥

इति लघुवार्तिकटीकायां द्वितीयाध्ययस्य चतुर्थः पादः।

॥ समाप्तो द्वितीयोऽध्ययः ॥

॥ अथ तृतीयोऽध्यायः ॥

तत्र प्रथमः पादः

शेषलक्षणप्रतिज्ञाधिकरणम् (१)

शेषस्वरूप–शेषपदप्रवृत्तिनिमित्त–विनियोगप्रकार-तत्प्रमाण–तद्बलाबलादिलक्षणार्थप्रतिज्ञानं, शेषलक्षणमारभ्यमिति । इति शेषलक्षणप्रतिज्ञाधिकरणम् ॥ १ ॥

शेषलक्षणाधिकरणम् (२)

शेषपदप्रवृत्तिनिमित्तनिरूपणात्, तद्वान् शेषः इत्ययुक्तम् । तथाहि—न व्यापकत्वं शेषत्वम् । आग्नेयादीनां परस्परव्याप्तत्वेनातिव्यापनात् । प्रयोज्यत्वस्य तुषोपवापाङ्गकपाले तदप्रयोज्येऽव्यापनात् । प्रधानत्वाभिमतविधिभिन्नविधिविधेयत्वमित्यपि पूर्ववदतिव्यापकम् । विध्यन्तविहितत्वं तत्–इत्यपि न । प्रधानात्पूर्वविहितेष्वव्यापनात् । नोपकारकत्वमपि तत् । प्रधानेष्वङ्गानामनुष्ठानोपकारकेष्वतिव्यापनात् ।

इति चेत् — **पारार्थ्यं शेषतोच्यते ॥ ३५ ॥**

परोद्देशप्रवृत्तव्यापारविषयत्वं पारार्थ्यम् । तच्च शेषत्वमुच्यते । विधेरनुद्दिष्टफले पुरुषाप्रेरणात् विध्युद्देश्यस्य शेषिणः फलतत्साधनान्यतरत्वनियमात्, तादृशि उद्देश्ये विधेयस्य श्रुत्यादिना विनियोगात्, विध्यन्यथानुपपत्तिसहकृतं श्रुत्यादिशेषत्वे प्रमाणमिति, श्रुत्यादिगम्यं शेषत्वमुच्यते ।

इति शेषलक्षणाधिकरणम् ॥ २ ॥

शेषलक्ष्याधिकरणम् (३)

यागफलयोर्न शेषित्वम्, प्रामाणाभावात् । उपकारकत्वमेव शेषत्वम् । तच्च दधिसोमादौ यागजनके प्रत्यक्षम् । आरुण्यादौ द्रव्यपरिच्छेदेन क्रयोपकारकत्वम् । अवघातादौ वैतुष्याद्युपकारजनकत्वञ्च प्रोक्षणादिषु श्रुतिप्रमाणगम्यं तत् । यजेतेत्यत्र तु एकपदश्रुत्या यागस्य भाव्यत्वावगमान्न फलशेषत्वम् । फलन्तु काम्यमानमुच्यते, नान्यार्थं–परार्थं वा इति । तथा पुरुषस्यापि न क्रतुशेषत्वम् ।

इति चेत् — **द्रव्यादिवत्कर्मफलपुरुषेष्वपि सा भवेत् ।**

सा=शेषता । पदश्रुतेः प्रत्ययश्रुतिबलीयस्त्वात्, विध्यन्वितभावनायाः पुरुषार्थभाव्यकत्वम् । पदश्रुत्या तु यागस्य तत्करणत्वम् । फलस्य काम्यमानतानुपपत्त्या विधिश्रुत्या–आत्मनेपदेन च पुरुषशेषत्वम् । पुरुषस्य तु आख्यातेन क्रियां प्रति कर्तृतया उपादानात् तच्छेषत्वमिति ।

इति शेषलक्ष्याधिकरणम् ॥ ३ ॥

तेषामर्थाधिकरणम् (४)

दर्शपूर्णमासयोः, निर्वापप्रोक्षणावघातादयः औषधस्य–उत्पवनादयः आज्यस्य–शाखाच्छेदनादयः सान्नाय्यस्य–धर्माः श्रुताः। ते तत्तत्स्वरूपमात्रार्थत्वे वैयर्थ्यात्, अपूर्वसाधनतांशे विनियुज्यन्ते। फलापूर्वमेव तेषां प्रयोजकम्। अन्येषामफलत्वात्। ततश्च तत्साधननिवेशिनो धर्माः सर्वे सर्वत्र स्युः। उत्पत्त्यपूर्वाणां प्रयोजकत्वेऽपि प्रकरणाविशेषात् सर्वाणि सर्वस्य प्रयोजकानि इति धर्म सङ्करः। इति चेत् —

अवघाताद्यौषधादौ यथायोगं व्यवस्थितम् ॥ ३६ ॥

अवान्तरापूर्वाणामपि फलापूर्वद्वारा फलवत्त्वात्, सन्निहितत्वाच्च–धर्माणां दृष्टार्थत्वाय च–अवान्तरापूर्वसाधननिवेशिनस्ते तद्भेदाद्यथायोगं व्यवतिष्ठन्त इति।

इति तेषामर्थाधिकरणम् ॥ ४ ॥

यज्ञायुधानामसाङ्कर्याधिकरणम् (५)

दर्शपूर्णमासयोः, 'स्फ्यश्च कपालानि च....' इत्युपक्रम्य 'एतानि वै दश यज्ञायुधानि' इति श्रुतम्। तथा, 'स्फ्येनोद्धन्ति–कपालेषु श्रपयति' इत्यादि। तत्र आयुधशब्दस्य साधने प्रसिद्धत्वात्, यज्ञसाधनानि गम्यमानानि, साक्षादसंभवात् अङ्गेश्ववतरन्ति सन्ति, अविशेषात्सर्वक्रियासु योग्यतया संबध्यन्ते। उद्धननादिश्रवणन्तु अवयुत्यानुवादः। इति चेत् —

स्फ्यादिनोद्धनाद्येव

बहूनामुद्धननादिवाक्यानां पाक्षिकानुवादत्वे नित्यवच्छ्रवणविरोधात्, विधायकान्येवैतानि। यज्ञायुधवाक्यन्तु यज्ञायुधानि संभरतीति विधिविषयसमर्पकतया उपयुक्तम्। तस्मात् स्फ्यादिभिरुद्धनाद्येव कर्तव्यमिति। इति यज्ञायुधानामसाङ्कर्याधिकरणम् ॥ ५ ॥

अरुणाधिकरणम् (६)

ज्योतिष्टोमे 'अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति' इति श्रुते, अरुणाशब्दः आकृत्यधिकरणन्यायात् अरुणगुणमात्रवाचकः। तस्य चामूर्तस्य क्रयेऽयोग्यत्वात्, ततो भङ्क्त्वा कृत्स्नप्रकरणनिवेशः। गुणवाचिप्रातिपदिकेन प्राकरणिकानि लक्षणया अनूद्य शक्यार्थो गुणः तत्परिच्छेदकत्वेन विधीयते—'येन येन द्रव्येण किञ्चित्क्रियते, तेनारुणगुणकेन' इति। ननु क्रय एव द्रव्यलक्षणय निवेशस्स्यादिति चेन्न; श्रुतद्रव्यावरुद्धे लक्षितद्रव्यानन्वयात्। पिङ्गाक्ष्येकहायनीशब्दयोर्यौगिकयोर्द्रव्यशक्तत्वात् पिङ्गाक्षीत्वगुणलाभायैकहायन्यामेव तद्वृत्तेः, विशेष्यस्य पदान्तरलक्षतया, दण्डी प्रैषानितिवत्

विभक्तेः प्राप्तकरणशक्त्यनुवादित्वात् ; पिङ्गाक्षीत्वस्य द्रव्यान्वितस्य कारकशक्त्यनन्वयात् । न चारुणा-पदेनैकहायन्येव लक्ष्यतामिति युक्तम् ; तस्य पूर्वमेव क्रियान्वयात् । गुणद्रव्यक्रियाणामेकवाक्यगततया मध्यवर्तिद्रव्यमादाय विरुद्धत्रिकद्वयापत्तेश्च । वाक्यान्तरविहितद्रव्यानुवादेन गुणविधानेनायं दोषः । तस्मात् कृत्स्ने प्राकरणिकेऽरुणिमा निविशते । इति चेत् —

क्रय एवारुणोगुणः ।

तृतीययोक्तकरणत्वं विदधत् आख्यातं, येन रूपेण गुणः क्रयसाधनत्वयोग्यः तथैव विदधाति । द्रव्य-परिच्छेदद्वारा स योग्य इति, अरुणगुणपरिच्छिन्ने नेत्यर्थस्संपद्यते । इत्थमेकवाक्यत्वसंभवे न वाक्या-द्भङ्गो युक्तः । अन्यथा–अरुणापदे वृत्तिद्वयविरोधः–एकपदे उद्देश्यविधेयसमर्पकत्वञ्च स्यात् । अत एव विभक्त्या प्राकरणिकद्रव्योपसर्जनकशक्तिं लक्षयित्वा उपसर्जनद्रव्ये गुणविधिरिति निरस्तम् । प्रथमभक्षः व्यङ्गैः—इत्यादावयवभेदेऽपि तन्निषेधात् । गुणस्य विशेषणानन्वयाच्च । शक्त्युपसर्जनकद्रव्यलक्षणा-यामपि प्रथमदोषानिस्तारात् । तस्मात् क्रय एवारुणगुणसंबन्धः ।

इत्यरुणाधिकरणम् ॥ ६ ॥

ग्रहैकत्वाधिकरणम् (७)

ज्योतिष्टोमे 'ग्रहं संमार्ष्टि' इति श्रुतसंमार्ग एकस्यैव, पशुनेत्युपादेयगतसंख्यावत् उद्देश्यगत-संख्यायाश्च विवक्षितत्वात् । इति चेत् —

न विवक्ष्यं ग्रहैकत्वात्

ग्रहप्रतिपदिकवाच्यजात्या संमार्गानन्वयात् व्यक्तिलक्षणायां, तत्तद्ग्रहयागाभ्यासजन्यापूर्वसाधनविशेष-मात्रमविशेषाल्लक्ष्यते । संबन्धतौल्यात् । तथा च सर्वस्य संमार्ग इति परिच्छेदे, अनपेक्षिता परि-दिका संख्या न विवक्ष्यते । विधीयमानापि सा, ग्रहान्तरपरिसंख्यार्था स्यात् । एकमिदं वाक्यं, अप्राप्तसंमार्गं प्रापयति–परिसञ्जष्टे च–इत्यप्ययुक्तम् । तथा उद्देश्ययोर्द्रव्यसंख्ययोः एकक्रियया अवशी-कारात्, प्रत्येकं वाक्यपरिसमाप्तेः, 'ग्रहं संमृज्यात्' 'एकं संमृज्यात्' इत्यावृत्तिस्स्यात् ; इत्यविव-क्षितमेकत्वम् । तथा —

ग्रहस्य संमृजेर्वैतत्प्रधानं गुण एव वा ।

सर्वथा वाक्यभेदस्स्यात्' इत्युक्तवाक्यभेदप्रकारा अपि द्रष्टव्याः । इति ग्रहैकत्वाधिकरणम् ॥ ७ ॥

चमसादीनामसंमार्गाधिकरणम् (८)

अत्रैवोदाहरणे, संमार्ष्टीत्युक्ते, सोमावसेकनिर्हरणादिप्रयोजनः संमार्गः सोमपात्राणामिति निश्चिते,

कर्माकांक्षाभावात् अविवक्षितं ग्रहत्वम् । यागैक्येनापूर्वैक्यात् , तत्साधननिवेशी सः, साधनत्वाविशेषात् ग्रहेष्विव चमसेष्वपि स्यात् । इति चेत् —

ग्रहत्वन्तु विवक्षितम् ॥ ३७ ॥

श्रुतकर्मसंबन्धस्य वाक्यभेदादिदोषरहितस्य सति संभवे नार्थिककर्मग्रहणं युक्तम् । यागाभ्यासापूर्वाणां भिन्नत्वात् वाच्यग्रहत्वसंबन्धिसाधनविशेषो लक्षणीय इति ग्रहत्वविवक्षायां, न चमसेषु संमार्गः ।

इति चमसादीनामसंमार्गाधिकरणम् ॥ ८ ॥

आनर्थक्यतदङ्गन्यायः (९)

वाजपेये, 'सप्तदशारत्निर्वाजपेयस्य यूपो भवति ' इति श्रुते, अव्यवहितसंबन्धलाभाय प्रकरणानुग्रहाय च, सप्तदशारत्निर्वाजपेयस्य ' इति संबन्धे, परिमाणस्य कर्मण्यसम्भवात्, तत्सम्बन्धिषोडशिग्रहलक्षणोर्ध्वपात्रद्वारा सम्बध्यते । यूपशब्दोऽपि तस्यैव लक्षकः । अन्यथा, वाजपेयशब्दे पशुलक्षणा स्यात् । सा च प्रधानप्रकरणभङ्गात्–मुख्यबाधाच्चायुक्ता । यूपशब्दलक्षणा च जघन्या न दोषाय । इति चेत् —

सप्तदश्यमरत्नीनां पश्वङ्गं यूपगामि सत् ।

वाजपेयस्य यूपः सप्तदशारत्निः इति संबन्धः षष्ठ्यर्थो वाजपेययूपयोः पशुयागद्वारकोपकारकत्वलक्षणः परंपरासम्बन्धः, देवदत्तस्य नप्ता—इतिवत् । तथा च न कस्यापि श्रुतित्यागः । अन्यथा सन्निधिप्रकरणयोरनुग्रहाय यूपश्रुतिबाधः स्यात् । वाजपेयपदन्तु नित्यानुवादः । प्रकरणादेव तत्सम्बन्धी यूप इत्यवगमात् अत एव तैत्तिरीयाः ' सप्तदशारत्निर्यूपो भवति ' इति पठन्ति ।

इत्यानर्थक्यतदङ्गन्यायः ॥ ९ ॥

अभिक्रमणादीनां प्रयाजाद्यङ्गत्वाधिकरणम् ॥ १० ॥

दार्शपौर्णमासिकप्रयाजसमीपे ' अभिक्रामञ्जुहोति ' इति श्रुतमभिक्रमणम् अमूर्तं सन्निहितप्रयाजहोमकारकानर्हं सत् ततो विच्छिन्नं प्रयाजादिवत् प्रकरणिनाङ्गत्वेन गृहीतं सामर्थ्यात् कर्तृसंस्कारद्वारकं सत्, कर्तुः प्रयोगाङ्गत्वात् तद्द्वारा कृत्स्नप्रयोगे निविशते । न चामूर्तस्य कर्तृद्वारा आरुण्यवत् प्रयाजनिवेश इति युक्तम् । आख्यातेन कर्तुरनभिधानात् । इति ।

नैवम् । अनभिहितोऽप्याख्यातात् प्रतीयत इति तद्द्वारा प्रयाजाङ्गमभिक्रमणमिति भाष्यकारः ।

वार्तिके तु, क्रियासमभिहारविहितणमुलन्तस्य 'अभिक्राम'मित्यस्य जुहोतेर्विच्छेदशङ्काभावात्, पूर्वपक्षानुत्थानमित्यन्यथावर्णितम् ।

होमानुवादेन विधीयमानमभिक्रमणं प्राकरणिकसर्वहोमानां बुद्धिस्थतया, प्रयाजहोमसन्निधिमनादृत्य सर्वहोमाङ्गम्। न चावान्तरप्रकरणेन प्रयाजाङ्गत्वं शङ्क्यम्। फलवद्भावनोद्भूतं कथं भावाकांक्षालक्षणप्रकरणस्य निष्फलप्रयाजादिष्वभावात्। भावे वा परस्पराङ्गत्वं सर्वेषामङ्गानां प्रसज्येत। अतो महाप्रकरणेन दर्शपूर्णमासप्रयोगसंबन्धीसर्वहोमाङ्गं तत्। इति चेत् —

अभिक्रमः प्रयाजाङ्गम्

प्रयाजान्विधाय, 'समानयत उपभृतः' इत्यादिना प्रयाजधर्मान्विधाय, अभिक्रामञ्जुहोतीत्युपक्रम्य, प्रयाजानिष्ट्वा हवीँष्यभिघारयतीत्यन्तं प्रयाजपरामर्शात्, तावदन्तं प्रयाजावान्तरप्रकरणमित्यवगमात् तन्मध्यपतितमभिक्रमणं तेषामेवाङ्गम्। अङ्गभावनानामपि प्रधानोपकारभाव्यकानां कथंभावाकांक्षत्वेऽप्यवान्तरप्रकवणशून्येषु परस्पराङ्गत्वे मानाभावात्। आयमानादिसामान्याङ्गैः–वाचनिकैस्तत्तदङ्गैश्च तत्पूरणमिति महाप्रकरणेन सर्वाणि प्रधानगान्येव।

इत्यभिक्रमणादीनां प्रयाजाद्यङ्गताधिकरणम् ॥ १० ॥

उयनीतस्य प्राकरणिकाङ्गताधिकरणम् (११)

दर्शपूर्णमासयोः, 'पञ्चदशसामिधेनीरन्वाह' इति सामिधेनीर्विधाय, तासाञ्च 'त्रिः प्रथमामन्वाह' इत्यादिना गुणं विधाय निविदो नाम मन्त्राः, देवेद्धोमन्विद्धः—इत्यादयो विहिताः। ततः काम्यसामिधेनीकल्पाः—'एकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्ये त्येवमादयः। तदनन्तरं यज्ञोपवीतमाम्नातं 'उपव्ययत' इति। तदन्तरमपि सामिधेनीनामेव वाचनिका गुणाः बिधास्यन्ते 'अन्तरानूच्य'मित्यादयः। तत्र पूर्ववदवान्तरप्रकरणेन सामिधेन्यङ्गमुपवीतम्। निविदोऽपि वाचनिकाङ्गसन्दष्टत्वात्सामिधेन्यङ्गम्। काम्यसंख्याविधावप्याश्रयतया अनुवर्तनादनुवचनानाम्। इति चेत् —

इष्टचङ्गमुपवीतकम् ॥ ३८ ॥

महाप्रकरणात्। निविदां लिङ्गादग्निसमिन्धनार्थतया प्रकरणेन सामिधेन्यङ्गत्वायोगेनासम्बन्धिपदव्यवधानेऽवान्तरप्रकरणानुत्थानात्। निविदान्तु नावान्तरप्रकरणम्। न वा सन्निधानमपि–इति न तदङ्गत्वाशङ्का। काम्यानुवचनानां नित्यानुवचनप्रकृतिकतया, अतिदेशप्राप्तैस्तमङ्गैरेव नैराकांक्ष्यात् नोपवीतग्राहित्वम्। निविद्व्यवहितनित्यानुवचनस्याश्रयत्वायोगेन संख्यामात्रस्य फले विध्यसम्भवेऽनुवचनान्तरस्यैव संख्याविशिष्टस्य विधेयत्वात्, अन्तरानूच्यमिति विधास्यमानगुणानां दूरस्थानुवादेन याज्यादिसाधारण्येनानुवचनत्वावच्छिन्ने वा विधानमिति न ततः सामिधेनी प्रकरणानुवृत्तिशङ्का। अतो दर्शपूर्णमासाङ्गमुपवीतम्।

इत्युपवीतस्य प्राकरणिकाङ्गताधिकरणम् ॥ ११ ॥

गुणानां मिथोऽसंबन्धाधिकरणम् (१२)

आधानप्रकरणे वारणवैकङ्कतादीनि यज्ञपात्राणि, 'वारणो यज्ञावचरो–वैकङ्कतो यज्ञावचर' इति विहितानि। तत्रैव प्रदेशान्तरे पवमानेष्टयोऽप्याम्नाताः 'अग्नये पवमानाय' इत्याद्याः। तत्र पात्राणि पवमानेष्ट्यङ्गानि। अग्निसंस्कारतया विहिताधानस्य सफलतया, अफलानां पवमानहविषां आधानाङ्गत्वात्, पात्राणामपि प्रकरणेनाधानसंबद्धानाम् आनर्थक्यतदङ्गन्यायेन तदङ्गभूतपवमानहोमेष्ववतारात्। इति चेत् —

पात्राणि सर्वयज्ञाङ्गम्

अनारभ्याधीतवाक्यातिरेकेणाधानप्रकरणे पवमानेष्टिसन्निधौ, 'यदाहवनीये जुहोति' इति वाक्यमस्ति। तत्र सप्तमी, 'तप्ते पयसि' इतिवत् द्वितीयार्थे। तथा च 'होमेनाहवनीयं भावयेत्' इति पवमानहोमानामप्यग्न्यर्थतया, आनर्थक्यतदङ्गन्यायाभावे, वाक्यात् सर्वयज्ञाङ्गानि—इति भाष्यम्। वार्तिके तु; पवमानहविषामाधानर्थत्वेऽप्याधानप्रकरणभङ्गेन यज्ञावचर इति वाक्येनानुवाद्यसर्वयागापूर्वार्थतया विधीयमानानि पात्राणि, न पवमान यागमात्रविषयाणि। अनुवादस्य व्रीहिभिर्यजेतेतिवत् सन्निहितगामित्वेऽपि; पवमानयागानां पात्रसन्निध्यभावेन यज्ञश्रुतेः सर्वयागविषयत्वात्। अतो नास्याधिकरणस्यापेक्षेत्युक्तम्। तदाह —**वार्तिके नास्त्ययं नयः** इति।

इति गुणानां मिथोऽसंबन्धाधिकरणम् ॥ १२ ॥

वार्त्रघ्न्यधिकरणम् (१३)

दर्शपूर्णमासयोः आग्नेयसौम्याज्यभागक्रमे, वृत्रघ्नपदवत् ऋग्द्वयमाम्नातम्। तयोरेका आग्नेयी। अपरा सौमी। तथा वृधन्वत्पदवत् ऋग्द्वयम्। तयोरप्येका आग्नेयी–अपरा सौमी। तत्रापरं वचनं, 'वार्त्रघ्नी पौर्णमास्यामनूच्येते–वृधन्वती अमावास्यायाम्' इति। तत्र पौर्णमास्यमावास्याशब्दाभ्यां प्रधानत्रिकद्वयमनूद्य, आज्यभागक्रमाद्विच्छद्य प्रधानाङ्गत्वेन ऋग्चतुष्टयं विधीयते। इति चेत् —

स्याद्वार्त्रघ्नीवृधन्वत्योः कालभेदाद्व्यवस्थितिः ॥ ३९ ॥

वार्त्रघ्नीवृधन्वतीयुगलयोर्लिपिक्रमाभ्यां पर्वणोरव्यवस्थया प्राप्तयोः पौर्णमास्यमावास्याकालभेदात् व्यवस्था स्यात्। पौर्णमास्यमावस्याशब्दौ लक्षणीयत्रिकद्वयपरित्यागेन काले वर्तेते। कालस्य मन्त्रानपेक्षत्वेऽपि, तदीयाज्यभागयोस्तद्द्वारा व्यवस्था फलिष्यति। अन्यथा प्रधानेषु सौम्ययुगलस्यात्यन्तासामर्थ्यं स्यात्। तेषु सोमदेवताभावात्। वार्त्रघ्नीभ्यां पौर्णमासीं भावयेदित्यादिक्रमेण विभक्त्यर्थलक्षणया वाक्यीयविनियोगस्य लिङ्गद्दुर्बलत्वादिति।

इति वार्त्रघ्न्यधिकरणम् ॥ १३ ॥

हस्तावनेजनादीनां कृत्स्नप्राकरणिकाङ्गताधिकरणम् (१४)

दर्शपूर्णमासयोः, 'हस्तावनेजने निक्ते-उलपराजीं स्तृणाति' इति। ज्योतिष्टोमे, 'मुष्टीकरोति वाचं यच्छति दीक्षितमावेदयति' इति।

तत्र हस्तावनेजनमुष्टीकरणवाग्यमानां हस्तादिसंस्कारद्वारा आनन्तर्यात् उलपराज्यास्तरण दीक्षितावेदनयोरङ्गत्वम्। इति चेत् —

कर्तव्यसर्वकर्माङ्गं हस्तादेरवनेजनम्।

आदिपदं अवनेजनपदेऽपि योज्यम्। हस्तादेरवनेजनादि लिङ्गप्रकरणाभ्यां सन्निधिबाधेन कर्तव्यसर्वकर्माङ्गम्।

इति हस्तावनेजनादीनादीनां प्राकरणिकाङ्गताधिकरणम् ॥ १४ ॥

चतुर्धाकरणादीनामाग्नेयमात्राङ्गताधिकरणम् (१५)

दर्शपूर्णमासयोः, 'आग्नेयं चतुर्धा करोति' इति श्रुतं चतुर्धाकरणं, आग्नेयैन्द्राग्नाग्नीषोमीयानां स्यात्। अग्निसंबन्धाविशेषात्। सर्वत्राग्निकलिभ्यां ढक् इति संबन्धसामान्ये ढक्स्मरणात् देवतात्वमपि स्यात्। द्वाभ्यां दीयमानस्यैकस्या अपि दानात्। इति चेत् —

आग्नेयस्यैव हविषश्चतुर्धाकरणं भवेत् ॥ ४० ॥

न तावदग्नीषोमीयादेराग्नेयत्वम्। सापेक्षे तद्धितवृत्त्ययोगात्। चतुर्धाकरणलक्षणार्थमाग्नेयपदं पूर्वप्रसिद्धमालोचयत्, विधिवाक्यावगतदेवतात्वसंबन्धमेव दक्ति। नानवगतं संबन्धसामान्यमिति, आग्नेयस्यैव चतुर्धाकरणम्। शातपथमपि 'पुरोडाशं चतुर्धा करोति' इति वाक्यं, जातेरयोग्यत्वात् पुरोडाशपदेन लक्षणीयां यौगिकाग्नेयपदोक्तां व्यक्तिमेव गमयतीति तस्यैव तत्र चतुर्धाकरणमिति।

इति चतुर्धाकरणादीनामाग्नेयमात्राङ्गताधिकरणम् ॥ १५ ॥

इति लघुवार्तिकटीकातां तृतीयस्य प्रथमः पादः।

॥ अथ द्वितीयः पादः ॥

मन्त्राणां मुख्येऽर्थे विनियोगाधिकरणम् (१)

मन्त्राणां प्रयोगसमवाय्यर्थस्मारणेनोपकारकत्वं मन्त्राधिकरणसिद्धम्। गौणमुख्वार्थसाधारणम् अन्योपस्थित्यद्वारा पदोपस्थाप्यो मुख्यग्रन्थोपस्थितौ तद्गतसादृश्येन प्रतीयमाना गौणाः। तदुभयस्मारणसामर्थ्यं मन्त्रेऽस्ति। तयोश्च स्मारकापेक्षेति, प्रतिप्रधानगुणावृत्तिन्यायेनोभयत्रापि मन्त्रविनियोगः।

इति चेत् —

मन्त्राणां मुख्य एवार्थे विनियोगं प्रचक्षते ।

गौणे सदपि सामर्थ्यमन्यसापेक्षतया विलम्बितप्रतीतिकं, तत्तात्पर्यकत्वमपि । अग्निशब्दात् ज्वलनप्रतीतिवत्, माणवकस्य पदान्तरसमभिव्याहाराद्विना अप्रतीतेः । तथा चानपेक्षप्रथमावगतमुख्यशेषतया कृतार्थो मन्त्रो नान्यत्र गच्छति । अर्थोऽपि गौणः, ध्यानादिनापि स्मृत्युपपत्तेः न मन्त्रमाकांक्षतीति मुख्य एव विनियोगः ।

इति मन्त्राणां मुख्यार्थे विनियोगाधिकरणम् ॥ १ ॥

ऐन्द्रीन्यायः (२)

अग्निचयने, 'निवेशनस्सङ्गमन' इत्यैन्द्र्या गार्हपत्यमुपतिष्ठते 'इत्यत्र, मन्त्रस्य इन्द्रप्रकाशनसामर्थ्यस्य स्फुटत्वात्, असमर्थस्य गार्हपत्ये विनियोगायोगात्, मन्त्रमुख्यार्थत्वानुरोधेन गार्हपत्यशब्दस्य यागसाधनत्वगुणयोगात्, गृहपतेः=यजमानस्य, अयं-इत्यवयवशक्त्या वा इन्द्र एव वर्तनम् । द्वितीयया सप्तम्यर्थं लक्षयित्वा 'गार्हपत्ये स्थित्वा' इति वा, उपान्मन्त्रकरण इति विहितात्मने पदानुमिताभिधानक्रियायां सामर्थ्यादिन्द्रं संबद्ध्य तद्विशेषणोपस्थानक्रियायां वा गार्हपत्यस्सम्बन्धनीयः । गार्हपत्यमुपेत्य ऐन्द्र्या इन्द्रमभिदध्यादिति क्रमेण ब्राह्मणं नेयम् । अतो मुख्य एव मन्त्राणां विनियोगः । इति चेत् —

विनियोगस्तु वचनादैन्द्र्या वै गार्हपत्यके ॥ ४१ ॥

गौणे सामर्थ्यं तात्पर्यञ्च, अन्यसापेक्षतया विलम्बितप्रतीतिकमित्युक्तं पूर्वाधिकरणे । तदिह विनियोजकब्राह्मणस्य, विधित्व-प्रधानत्वाप्राप्तार्थत्वैर्हेतुभिः मुख्यार्थत्वम् । तद्विहीनस्य मन्त्रस्य ब्राह्मणवशेनैव जघन्यार्थत्वम् । एवञ्च वचनात् गौणे विनियोगः इति गार्हपत्यर्थो मन्त्रः ।

इत्यैन्द्रीन्यायः ॥ २ ॥

हविष्कृन्मन्त्रस्याह्वानाङ्गताधिकरणम् (३)

दर्शपूर्णमासयोः, 'हविष्कृदेहीति त्रिरवघ्नन्नाह्वयति' इति श्रुते, पूर्ववत् ब्राह्मणस्यापि मुख्यार्थत्वानुरोधात्, 'हविष्कृदेहीति त्रिरवहन्ति' इत्यन्वयः । आह्वयतिरवघाते गौणो जघन्यत्वात् । अन्यथा मुख्यावघातपदस्य फाललक्षकता स्यात् । त्रिरिति मन्त्रपाठप्राप्तानुवादः । अतोऽवघाताङ्गं मन्त्रः । इति चेत् —

हविष्कृदेहिमन्त्रस्य नावघाताङ्गता भवेत् ।

हविष्कृदेहीत्याह्वयतीति लिङ्गविनियोगप्राप्तमन्त्राह्वानसंबन्धानुवादेन त्रिरित्यनियमप्राप्तं त्रित्वं नियम्यते ।

मन्त्रपाठे क्वचित्सकृत्-क्वचित् द्विः-क्वचित् त्रिः इत्यनियमात् । हन्तिस्तु सहायाह्वानस्य तत्कालत्वप्राप्तेः तल्लक्षणार्थो नित्यानुवादः । इति करणविनियोगो लिङ्गाद्दुर्बल इत्याह्वान एव मन्त्रः ।

इति हविष्कृन्मन्त्रस्याह्वानाङ्गताधिकरणम् ॥ ३ ॥

अग्निविहरणादिमन्त्रविनियोगाधिकरणम् (४)

ज्योतिष्टोमे, 'उत्तिष्ठन्नन्वाह, अग्नीदग्नीन्विहर' इति । तथा, 'व्रतं कृणुतेति वाचं विसृजति' इति श्रुते, अग्नीदिति मन्त्रः उत्थानेऽङ्गम् । व्रतं कृणुतेति वाग्विसर्गे । वचनवशात् । इति चेत्—

तथा विसर्जनोत्थाने व्रतमग्नीदिति द्वयोः ॥ ४२ ॥

विसर्जनोत्थाने इति द्वन्द्वैकवद्भावे नपुंसकम्-सप्तम्येकवचनम् । व्रतमग्नीदिति द्वयोर्मन्त्रयोः, तथा—नाङ्गत्वमित्यर्थः । पूर्ववदेव वाक्यविनियोगस्य लिङ्गविरोधेन बाधात्, लिङ्गप्राप्तविनियोगानुवादेन उत्थान कालो वाग्विसर्गकालश्चाप्राप्तो विधीयत इति ।

इत्यग्निविहरणादिमन्त्रविनियोगाधिकरणम् ॥ ४ ॥

प्रस्तरप्रहरणन्यायः (५)

दर्शपूर्णमासयोः 'सूक्तवाकेन प्रस्तरं प्रहरति' इत्यत्रत्यसूक्तवाकपठनकाले प्रस्तरं प्रहरतीति प्राप्तप्रहरणानुवादेन कालविधिः । इष्टदेवताप्रकाशनेन कृतार्थस्य सूक्तवाकस्य, स्रुग्धारणादिविनियुक्त-प्रस्तरस्य च प्रयोजनापेक्षत्वात्, देवताभिधायिमन्त्रस्य, तदनपेक्षप्रहरणेऽसामर्थ्याच्च । अतो दर्शपूर्ण-मासाभ्यामिष्ट्वा सोमेन यजेतेतिवत् कालार्थस्संयोगः । इति चेत् —

अङ्गता सूक्तवाकस्य प्रस्तरप्रहृतौ मता ।

सूक्तवाकेनेति तृतीयाश्रुत्या, कृतप्रयोजनस्यापि प्रहरणाङ्गत्वबोधात्, श्रुतिविनियुक्तस्य स्वार्थसमवाय-कल्पकतया, इष्टदेवतानां प्रस्तरस्य च प्राहरणद्वारा संबन्धे सति, सः त्यागपूर्वकहोमो भविष्यतीति प्रहरणाङ्गं सूक्तवाकः ।

इति प्रस्तरप्रहरणन्यायः ॥ ५ ॥

सूक्तवाकन्यायः (६)

सूक्तवाकशब्दस्य कृत्स्नानुवाकवचनत्वेनाध्येतृप्रसिद्धेः, कृत्स्नविनियोगे सति एकदेशनिष्कर्षे स्मृतिबाधापत्तेः, अनिष्टदेवतावाचिपदानामदृष्टार्थत्वेनापि प्रयोगोपपत्तेः, प्रधानावृत्तावङ्गावृत्तिन्यायेन पर्व-द्वयेऽपि संपूर्णसूक्तवाकप्रयोगः । इति चेत् —

तस्य पर्वद्वये लिङ्गाद्विभज्यविनियोजनम् ॥ ४३ ॥

भवेदेवं यदि सूक्तवाकशब्दोऽनुवाके रूढः स्यात्। सुष्ठूक्तं वक्ति—इत्यवयवप्रसिद्धौ, प्रोक्षणी-शब्द इव रूढ्यकल्पनात्। तथा च, यस्मिन्प्रयोगे यावत्यो देवता इष्टाः, तन्मात्रांशस्य निष्कृष्य प्रयोगः। अन्यथा दुरुक्तवाकता स्यादिति।

इति सूक्तवाकन्यायः ॥ ६ ॥

काम्ययाज्यानुवाक्यानां काम्यमात्राङ्गताधिकरणम् (७)

'ऐन्द्राग्नमेकादशकपाल'मिति अनारभ्य काम्येष्टयः क्रमेण समाम्नाताः आध्वर्यवे। तेनैव लिङ्गक्रमेण काम्ययाज्यानुवाक्या काण्डसमाख्यातं इन्द्राग्नीरोचना दिवः इत्यादिहौत्रे समाम्नातम्। तत्र याज्यादिमन्त्राः अध्ययनविध्यध्यापिताः प्रयोजनाकांक्षिणः स्वप्रकाश्यदेवताद्वारा तद्देवताकक्रत्वपूर्वमुप-स्थापयन्तः क्रमसमाख्ये बाधित्वा लिङ्गात् तद्दैवत्यकर्ममात्राङ्गानीति ऐन्द्राग्नादिकर्मबाहुल्यात् ऐन्द्रा-ग्नादिकर्ममात्रे विनियोगः। इति चेत् —

क्रमाद्याज्यानुवाक्यानामैन्द्राग्नादिषु सङ्गतिः।

भवेदेवं, यदि मन्त्रप्रकाश्यदेवतायाः जुह्वादिवत् क्रत्वव्यभिचारः स्यात्, नत्वेतदस्ति। इन्द्रादीनां मन्त्रार्थवादादावन्यत्रापि विनियोगप्रतीतेः। अतः क्रत्वपूर्वोपस्थापकक्रमसमाख्यानुरोधेन काम्येष्टिष्वेव विनियोगः। यत्र लिङ्गमात्रस्य क्रत्वव्यभिचारः, तत्र केवलाल्लिङ्गादपि। यथा क्रतुज्ञानस्य स्वर्गादि-फलकर्मणि, शारीरातिरिक्तात्मज्ञानस्य च, इति।

इति काम्ययाज्यानुवाक्यानां काम्यमात्राङ्गताधिकरणम् ॥ ७ ॥

आग्नेयीन्यायः (८)

ज्योतिष्टोमे आग्नेय्यऋचः, 'अग्न आयाहि वीतये' इत्याद्याः पठिताः स्तोत्रादौ विनियुक्ताः। ततः प्रदेशान्तरे, 'आग्नेय्याग्नीध्रमुपतिष्ठते' इति श्रुतम्। तत्र प्रकृताभिरप्रकृताभिर्वा आग्नीध्राग्नि-रुपस्थेयः। 'अग्निर्देवता अस्याः–सा आग्नेयी' इत्यवयवयोगस्य, उभयसाधारणत्वात्। सा वैश्वदेवी इत्यत्र, तद्धितान्तर्गतसर्वनाम्ना तप्तपयसः सन्निधानात् तद्युक्तम्। नात्र तथा कस्याश्चित् सन्निधान-मस्ति। सत्त्वेऽपि वा तस्य स्तोत्रार्थत्वेन चरितार्थतया ऋचां नैराकांक्ष्यात्। ऋगनुवादेन देवता-विधौ हि, अनुवादस्य सन्निहितगामितया, अन्यार्थसन्निधानमप्युपयुज्येत। उपादीयते त्वाग्नेयी आग्नी-ध्रोपस्थानं प्रति। तत्र च न प्रकृतग्रहणनियमः। प्रकरणात्तद्ग्रहणे, श्रुतिजनिताविशेषप्रत्ययबाधः स्यात्। तस्माद्ययाकयाचिदुपस्थानम्। इति चेत् —

आग्नेयी प्रकृतैव स्यादाग्नीध्राग्नेरुपस्थितौ ॥ ४४ ॥

आग्नीध्रोपस्थाने प्रकृतक्रत्वपूर्वव्यापाररूपत्वम्–आग्नीध्रोपस्थानात्मकत्वञ्चेत्यस्ति रूपद्वयम्। तदुभयमपि शास्त्रादेव ज्ञातव्यम्। तयोः परस्परव्याप्यभावेन, एकेन विहितेन इतरस्यानाक्षेपात्। तत्र प्रकृतग्रहणे, ऋचः प्रकरणपाठानुपपत्त्या प्रकृतक्रत्वपूर्वव्यापारसाधनत्वावगतौ, अनेन विधिना, अपेक्षितविशेषरूपमात्रं लाघवाद्विधीयते। अप्रकृतग्रहणे तु रूपद्वयमप्यनेनैव विधातव्यमिति गौरवम्। यद्यप्यवघातादि विधिवत्, प्रकरणात् अपूर्वसाधनव्यापारात्मकत्वं अप्रकृतग्रहणेऽपि स्यात्; तथापि तस्य वाक्यादिकल्पनाप्रणाल्या प्रतिकल्पनया तादृशव्यापारकत्वबोधकत्वमात्रं स्यात्। न तु विधायकत्वम्। अस्यैव तूभयविधायकत्वमिति गौरवम्। एतदप्यङ्गीक्रियेत, यद्यन्या गतिः अवघातादिष्विव न स्यात्। प्रकृतग्रहणेनैव गतिसंभवादिति स्तोत्रविनियोगमनालोच्य, आम्नातरूपमात्रस्य प्रकृतस्यैव मन्त्रस्य ग्रहणमिति।

इत्याग्नेयीन्यायः ॥ ८ ॥

भक्षमन्त्राणां यथालिङ्गं ग्रहणादौ विनियोगाधिकरणम् (९)

सोमे भक्षमन्त्रः श्रूयते, 'भक्षे हि माऽऽविश' इत्यादिरनुवाकः। तत्र कश्चिदंशो भक्षं प्रतिपादयति। केचिदंशाः ग्रहणावेक्षणसम्यग्जरणादि प्रकाशकाः। तत्र भक्षानुवाकसमाख्यया कृत्स्नस्य भक्षणे विनियोगः। ननु ग्रहणादिप्रकाशकानां लिङ्गेन समाख्यां बाधित्वा तेष्वेव विनियोगस्स्यात्, न स्यात्। अचोदितानां तेषामक्रत्वर्थतया, तत्प्रकाशकमन्त्राणामपूर्वासंबन्धेनानर्थक्यापत्त्या, लिङ्गस्याविनियोजकत्वे निर्विघ्नं समाख्या भक्षाङ्गतां गमयति। विशिष्टभक्षणप्रकाशने चास्ति सामर्थ्यम्। 'गृहीत्वा–अवेक्ष्य–सम्यग्जरणाय भक्षयामि' इति। तस्मात् वाक्यसमाख्याभ्यां कृत्स्नस्य भक्षे विनियोगः। इति चेत् —

लिङ्गैर्भक्षानुवाकस्य विभज्य विनियोजनम्।

न तावद् ग्रहणादेरचोदना। चोदित भक्षानुपपत्तिकल्पस्यापि तेनैव विधिना चोदितत्वात्। तादृशभक्षद्वारा तेषामपि क्रत्वपूर्वसंबन्धात्। तेषाञ्चास्मृतानामननुष्ठेयतया, वाक्यसमाख्ये बाधित्वा लिङ्गाद्विभज्य विनियोगः। सम्यग्जरणमपि विहितभक्षाङ्गतया आसनविशेषादिना अनुष्ठेयमिति।

इति भक्षमन्त्राणां यथालिङ्गं विनियोगाधिकरणम् ॥ ९ ॥

मन्द्राभिभूतिरित्यादेरेकमन्त्रत्वाधिकरणम् (१०)

अत्रैव, 'वाग्जुषाणा सोमस्य तृप्यतु' इत्यंशस्य तृप्तिप्रकाशकस्य पूर्ववत्तत्रैव विनियोगः।

मन्द्राभिभूतिरित्यादेर्न तृप्तौ विनियोज्यता ॥ ४५ ॥

तस्य अनुनिष्पादित्वेन पुरुषेणाननुष्ठेयतया स्मारकापेक्षाभावात्, विशिष्टभक्षप्रकाशनेन भक्षप्रकाशकांशैकवाक्यतया तत्रैव विनियोगः। इति मन्द्राभिभूतिरित्यादेरेकमन्त्रत्वाधिकरणम् ॥ १० ॥

इन्द्रपीतस्येत्यादिमन्त्राणां विनियोगाधिकरणम् (११)

भक्षमन्त्रे 'इन्द्रपीतस्य' श्रूयते। तत्र इन्द्रेण पीतस्येति तत्पुरुषः—सोमविशेषणम्। पीतपदेस्वार्थलाभात्। न च 'समासस्य' इति सूत्रेण अन्तोदात्तत्वप्राप्त्या अध्येतृसिद्धस्वरविरोधः, 'तृतीया कर्मणि कर्मवाचके क्तान्ते तृतीयान्तं प्रकृत्या' इत्यनेन न आद्युदात्तत्वसिद्धेः। न बहुव्रीहिः सवनविशेषणम्। पदद्वयेऽप्यन्यपदार्थलक्षणापत्तेः। तथा च, अनैन्द्रप्रदानेभ्योऽसमर्थो मन्त्रो व्यावर्त्यते इति तेष्वेव मन्त्रोक्तो भक्षः। यद्वा, यागैक्येऽपि तदभ्यासानां भिन्नत्वेन, इन्द्राय त्वा वसुमते–इत्यादिमन्त्राणामैन्द्रप्रदानविषयतया तद्वशात्सोमाभिषवादीनामपि तद्विषयतया, सधर्मकैन्द्रप्रदानविकारा अन्ये अधर्मकग्रहाः ततो धर्मान् गृह्णन्ति। ततश्च 'इन्द्रपीतस्य' इत्यस्य तत्तद्देवतापरऊहः। इति चेत् —

अनैन्द्रेष्विन्द्रपीतस्य नैवोहविनिवर्तने।

इन्द्रपीतस्येत्यस्य नावमिकन्यायेन 'इन्द्रायदत्तस्य' इत्यर्थः। न च स्वरविरोधः; क्तेच चतुर्थी–इत्यनुवर्तते, क्तान्ते परे चतुर्थ्यन्तं प्रकृत्या–इत्यनेनाद्युदात्तत्वसिद्धेः। न च भक्षणार्थोद्धृतस्य तस्मै दत्तत्वम्। हुताहुतसमुदायस्यैव तत्त्वात्। तथा च पदद्वयलक्षणातौल्ये अन्येषामपि मन्त्रवत्त्वाय बहुव्रीहिरेव, शक्तिरेव वा बहुव्रीहिसमासे। नापि प्रकृतिविकृतिभावः। प्रदानानां सोमेन यजेतेति लताविशिष्टतया विहितस्यैवाभ्यासेन तत्संस्काराणामपि, सर्वग्रहयागाभ्यासेषु समानविधानत्वात्। इन्द्रलिङ्गानां मानग्रहणादिमन्त्राणामेवानैन्द्रेभ्यो व्यावर्तनात्। तस्मात्, सर्वग्रहा यथाश्रुतमन्त्रवत् भक्षः। इति इन्द्रपीतस्येत्यादिमन्त्राणां विनियोगाधिकरणम् ॥ ११ ॥

अभ्युन्नीत सोमभक्षणाधिकरणम् (१२)

(भक्षपेटिका)

द्वितीयपूर्वपक्षे स्थित्वा विचार्यते —

ऐन्द्रेषु हुतेष्वभक्षितेषु सशेषेषु पुनरभ्युन्नीय मित्रावरुणादिभ्यो हुत्वा भक्ष्यते। तन्त्रेद्रो नोपलक्षणीयः। अभ्युन्नयनकाले देवताया अनिर्देशेन पूर्वशेषसहितस्यैवाभ्युन्नीतस्य तत्तद्देवताभ्यो दानेन पूर्वसंबन्धापायात्। इति चेत् —

ऊहे तु मैत्रावरुणादिष्विन्द्रोऽप्युपलक्षणम् ॥ ४६ ॥

ऊहे त्विति कृत्वा चिन्तास्फोरणाय। उन्नयनकाले तस्यानिर्देशेऽपि, तस्य करिष्यमाणयागार्थत्वस्य स्फुटत्वात् पूर्वशेषस्य तत्त्वे मानाभावात् अनिवृत्तसंबन्धः इन्द्रोऽप्युपलक्षणीयः।

इति अभ्युन्नीतसोमभक्षणाधिकरणम् ॥ १२ ॥

पात्नीवते इन्द्रादीनामनुपलक्षणाधिकरणम् (१३)

ऐन्द्रवायवादीनां शेषाः आदित्यस्थालीमागत्य तत आग्रयणस्थालीमागच्छन्ति । आग्रयणाच्च पात्नीवतग्रहः । 'पात्नीवतमाग्रयणाद् गृह्णाति' इति वचनात् तस्मिन् पात्नीवतभक्षे इन्द्रवाय्वादयोऽप्युपलक्षणीयाः । शेषसंसर्गात्पूर्वकालीनस्यैव पात्नीवतत्वेन तत्संसृष्टशेषे पूर्वदेवतासंबन्धानपायात् । इति चेत् —

पात्नीवतग्रहे नेन्द्रवाय्वाद्या उपलक्षणम् ।

पात्नीवतशेषभक्षणे इन्द्रवाय्वादयो नोपलक्षणीयाः । आग्रयणात् गृह्यमाणे पात्नीवतत्वनिर्देशेन शेषस्यापि ततो गृह्यमाणतया पात्नीवतत्वे पूर्वसंबन्धानपायात् ।

इति पात्नीवते इन्द्रादीनामनुपलक्षणाधिकरणम् ॥ १३ ॥

पात्नीवतशेषभक्षे त्वष्टुरनुपलक्षणाधिकरणम् (१४)

पात्नीवत एव आध्वर्यवो होममन्त्रः, 'अग्ना३ इ पात्नीवा३स्सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा' इति । तत्र मन्त्रात् त्वष्टुरपि पातृत्वेन देवतात्वप्रतीतेः सोऽप्युपलक्षणीयः । इति चेत् —

न त्वष्टा

त्वष्टा नोपलक्षणीयः । सहभावस्य कार्यानत्वयेऽपि 'सहैव दशभिः' इत्यादौ दृष्टेः । पानस्य सह (सं)भावा प्रमाणकत्वात् । उत्पत्तिवाक्ये पत्नीवत एव तद्धितेन निरपेक्षस्य देवतात्वाभिधानात् । मन्त्रतस्तस्य प्राबल्यात् ।

इति पात्नीवतशेषभक्षे त्वष्टुरनुपलक्षणाधिकरणम् ॥ १४ ॥

पात्नीवतशेषभक्षणे त्रयस्त्रिंशतामनुपलक्षणाधिकरणम् (१५)

तत्रैव याज्यामन्त्रः —'ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः । पत्नीवतस्त्रिंशतं त्रींश्च देवान् अनुष्वध मा वह मादयस्व' इति । तत्र पत्नीवत् त्रयस्त्रिंशस्येत्युपलक्षणम् । तेषां माद्यत्वश्रवणेन पत्नीवद्विशेषणकत्वेन च, उत्पत्तौ पत्नीवन्तो देवता अस्येति बहुवचनवृत्तिः प्रमाणवशात् । इति चेत् —

न त्रयस्त्रिंशत्

अग्नेः स्वद्रव्येण मादयितृत्वप्रतीतेः, तस्यैव देवतात्वम् । त्रयस्त्रिंशतां पत्नीवत्त्वेऽपि यजमानदत्तेन माद्यत्वाश्रवणेन, उत्पत्तौ बहुवचनान्तवृत्तौ मानाभावात्, पत्नीवतोऽग्नेरेव देवतात्वमिति तस्यैवोपलक्षणम् ।

इति पात्नीवतशेषभक्षणे त्रयस्त्रिंशतामनुपलक्षणाधिकरणम् ॥ १५ ॥

भक्षणे अनुवषट्कारदेवताया अनुपलक्षणाधिकरणम् (१६)

'सोमऽस्याग्ने व्रीहि' इति मन्त्रवर्णात् अनुवषट्कारदेवता अग्निरूपा उपलक्षणीया । इति चेत् —

न देवोऽनुवषट्कृतेः ॥ ४७ ॥

प्रकृतौ सा नोपलक्षितेति इहापि नोपलक्षणीया ।

इति भक्षणे अनुवषट्कारदेवताया अनुपलक्षणाधिकरम् ॥ १६ ॥

अनैन्द्राणाममन्त्रकभक्षाधिकरणम् (१७)

अमन्त्रकभक्षपूर्वपक्षे स्थित्वा चिन्ता—*

ऐन्द्राग्नशेषभक्षः समन्त्रः । समासोपरि तद्धितात् समुदितस्य भक्षदेवतात्वेन यजमानसङ्कल्पोद्देश्यत्वेऽपि मन्त्रावगतपाने निरपेक्षत्वसंभवात् । इति चेत् —

निवृत्तिर्यद्यनैन्द्रेभ्यस्तदेन्द्राग्नममन्त्रकम् ।

यदीति कृत्वा चिन्तेत्यर्थम् । देवताधिकरणन्यायात् पिबतेर्दानलक्षणकतया, तस्य च समुदितविषयत्वेन, इन्द्रेणव्यपदेशानर्हत्वात् अमन्त्रकमैन्द्राग्नभक्षणम् । इति ऐन्द्राग्नस्य अमन्त्रकभक्षणाधिकरणम् ॥ १७ ॥

गायत्रच्छन्दसः इत्यादिमन्त्रविनियोगाधिकरणम् (१८)

तत्रैव गायत्रछन्दस इति श्रुते, बहुव्रीहेः सोमप्रदानप्रधानत्वात् तच्छन्दस्कमन्त्रमात्रवति प्रदाने मन्त्रः । इति चेत् —

गायत्रच्छन्दस इति स्याच्छन्दोऽन्तरवत्यपि ॥ ४८ ॥

तादृक् प्रदानाप्रसिद्ध्या तच्छन्दस्कमन्त्रवत्तामात्रेण सर्वत्र प्रदाने, भक्ष्यमाणे भवति गायत्रच्छन्दस इति ।

इति गायत्रछन्दस इति मन्त्रविनियोगाधिकरणम् ॥ १८ ॥

इति लघुवार्तिकटीकायां लघुन्यायसुधायां तृतीयस्याध्यायस्य द्वितीयः पादः

॥ अथ तृतीयपादः ॥

असञ्जातविरोत्वन्यायः (१)

ज्योतिष्टोमे, 'प्रजापतिरकामयत' इत्युपक्रम्य, 'अग्नेर्ऋग्वेदः'–'वायोर्यजुर्वेदः'–'आदित्यात्सामवेदः' इत्युक्त्वोच्यते–'उच्चैर्ऋचा क्रियते, उपांशुयजुषा, उच्चैस्साम्ना' इति । तत्र उच्चैस्त्वादिकं मन्त्रस्यैव

---

* अत्र एकमधिकरणं प्रमादादुत्सृष्टम्—(सं)

धर्मो न तु वेदस्य। उपसंहारगतस्यापि ऋगादिशब्दस्य, अप्राप्तविषयप्रधानविध्युद्देशगतत्वेन प्राबल्यात्। उपक्रमगतस्यापि वेदशब्दस्य तद्विपरीततया दौर्बल्यात्। अतः ऋङ्मन्त्रो यस्मिन्कस्मिंश्चिद्वेदे स्थितः उच्चैः प्रयोक्तव्यः। एवमन्येऽपि मन्त्राः। इति चेत् —

उच्चैस्त्वाद्या वेदधर्माः स्युरुपक्रमगौरवात्।

अर्थवादगतोऽपि वेदशब्दोऽनुपसञ्जातविरोधित्वात्, उपसञ्जातविरोधिनं ऋगादिशब्दं मुख्यार्थात्प्रच्याव्य, वेदे लाक्षणिकत्वं नयति। उपक्रम एवैतदवगतं, प्रजापतिसृष्टाग्न्यादिसृष्टत्वेन वेदानां स्तवनात्, तत्संबन्धिकिञ्चिद्विधित्सितमिति। तद्विशेषमात्रं विधितः प्राप्तव्यमिति, प्राप्तार्थमृगादिपदं लक्षणां सहते। अन्यथा उपक्रमोपसंहारयोरेकवाक्यत्वायोगादिति, ऋग्वेदविहितं कर्म उच्चैः कर्तव्यम्— इत्यादिक्रमेण वेदधर्माः स्वरविशेषाः। इत्यसञ्जातविरोधिन्यायः ॥ १ ॥

आधाने सामगानस्य उपांशुत्वाधिकरणम् (२)

याजुर्वैदिकस्याधानस्य सामवेदे, वारवन्तीयं गायतीत्याद्यङ्गविधिः। तत्र वारवन्तीयादेः उच्चैस्त्वमेव धर्मः, निरपेक्षप्रतीतित्वात्। नोपांशुत्वं प्रधानधर्मः, तद्विध्येकवाक्यतापेक्षत्वात्। इति चेत्— नैवम्। साङ्गाधानप्रयोगस्य याजुर्वैदिकत्वेन सापेक्षस्याप्युपांशुत्वस्यैवानुष्ठानम्। अन्यथा प्रधानवैगुण्यादिति भाष्यम्।

तत्तु 'अङ्गगुणविरोधे तु' इति द्वादशाधिकरणेन पौनरुक्त्यात् रूपान्तराद्यङ्गविधेरपि याजुर्वैदिकत्वादयुक्तमित्यन्यथावार्तिके वर्णितम्।

सामानि सामवेदोत्पन्नानि। विनियोजकानि याजुर्वैदिकानि। तत्रोत्पत्तिवेदस्वरउच्चैस्त्वं कर्तव्यम्। प्रथमत्वात्। अनपेक्षत्वात्। इति चेत् —

प्रधानवेदधर्माणो वेदान्तरगता गुणाः ॥ ४९ ॥

प्रयोज्यत्वे नावधारितस्य मन्त्रस्य स्वराकांक्षणात्, तस्य च विनियोजकवाक्याधीनतया, तदीयमुपांशुत्वं कर्तव्यम्। तेन क्रियत इति व्यपदेशाहित्वात्।

इति आधाने सामगानस्य उपांशुत्याधिकरणम् ॥ २ ॥

ज्योतिष्टोमस्य याजुर्वैदिकताधिकरणम् (३)

यजुर्वेदे सामवेदे च ज्योतिष्टोमः आम्नातः। तस्य क्व विधिः? क्वानुवादः? इत्यनवगमात्, स्वरेऽप्यनियमः। इति चेत् —

स्यात्प्रधानविधिस्तत्र यत्र वेदेऽधिकाङ्गता।

अधिकाङ्गत्वं = कर्मस्वरूपोपकारि द्रव्यदेवताविधानम् । तद्यजुर्वेद इति तत्र विधिरन्यत्रानुवाद इति तदीयोपांशुत्वनियमः ।

इति ज्योतिष्टोमस्य याजुर्वैदिकताधिकरणम् ॥ ३ ॥

प्रकरणस्य विनियोजकताधिकरणम् (४)

दर्शपूर्णमासयोः समिदादिप्रयाजाः श्रुताः । तेन तयोरङ्गानि प्रधानभावनाः भाव्यकरणतदुत्पादकद्रव्यादिभिर्निराकांक्षत्वात्, प्रयाजानाञ्च वर्मकरणार्थवादिकफलेन विश्वजिन्न्यायेन दर्शफलानुषङ्गेण वा निराकांक्षत्वात्, परस्पराकांक्षालक्षणप्रकरणाभावात्, श्रुत्यादित्रयाभावस्य च स्पष्टत्वात् । इति चेत् —

प्रयाजानां प्रकरणात्

अङ्गतेत्युत्तरेण संबन्धः । फलवद्भावनोद्भूतकथंभावकांक्षा प्रकरणम् । 'यागेन स्वर्गं कुर्यात्' इत्युक्ते, करणस्य व्यापारविशेषाकांक्षायां, प्रयाजादिभिरुपकारसंपादनं व्यापारविशेषत्वेन संबध्यते । न च यागानुष्ठानमेव संयोगानुकूलक्रियानुष्ठानवत् प्रकार इति शङ्क्यम् । कुठारसंपादनस्यैव व्यापारत्वापत्त्या, उद्यमनादिवैयर्थ्यापातात् । तस्मात्प्रयाजादिव्यापारेणादृष्टद्वारा व्याप्रियमाणस्य प्रधानस्य फलसाधनत्वम् । एवञ्च प्रयाजादेरपि अपेक्षितप्रधानोपकारेण फलवत्त्वात्, नार्थवादादिभिः फलकल्पनाक्लेश इति प्रकरणादङ्गत्वं प्रयाजादीनाम् ।

इति प्रकरणस्य विनियोजकताधिकताधिकरणम् ॥ ४ ॥

क्रमस्य विनियोजकत्वाधिकरणम् (५)

दर्शपूर्णमासयोः हुतानुमन्त्रणमन्त्रो दब्धिनामासीत्युपांशुयाजक्रमे समाम्नातो लिङ्गप्रकरणाविशेषात् सर्वार्थः । इति चेत् —

दब्धेस्तु क्रमतोऽङ्गता ॥ ५० ॥

क्रमसमाम्नातयोर्मन्त्रकर्मणोः स्थानसामान्यादन्यतरदर्शने अन्तरोपस्थितिनियमः परस्परं संबन्धार्थ इति, आकांक्षादिकल्पनाक्रमेण श्रुतिकल्पनया उपांशुयाजशेषत्वप्रत्ययात्, लिङ्गप्रकरणयोरपि तावतैव चरितार्थत्वम् ।

देशसामान्यरूपक्रमो द्विविधः । पाठसादेश्यमनुष्ठानसादेश्यञ्चेति । पाठसादेश्यमपि–यथा संख्याम्नानं–सन्निध्याम्नानञ्चेति द्विविधम् । तत्र दब्धिमन्त्रः प्रथमस्योदाहरणम् । सान्नाय्यपात्रशुंधनसंनिधौ, 'शुन्धध्व'मिति मन्त्रो द्वितीयस्य । अनुष्ठानसादेश्यस्य तु, अग्नीषोमीयपशुधर्मा इति वक्ष्यते ।

इति क्रमस्य विनियोजकत्वाधिकरणम् ॥ ५ ॥

समाख्याया विनियोजकत्वाधिकरणम् (६)

दर्शपूर्णमासादिषु, आध्वर्यव-हौत्रौद्गात्रादिसमाख्याताः पदार्थाः, सामर्थ्यलक्षणलिङ्गात् सर्वे सर्वैः कर्तव्याः। आख्यायाः पदमात्रत्वेनाप्रमाणत्वात्। इति चेत् --

कर्तारोऽध्वर्युहोत्राद्या नियम्यन्ते समाख्यया।

अपौरुषेय्या समाख्यया कर्तृविशिष्टपदार्थाभिधानात् वैशिष्ट्यस्य च पदार्थापेक्षानुरोधेन कर्तॄणां कार्याकांक्षया च क्रियाकर्तृभावरूपे पर्यवसानात्, यौगिकानां संबन्धावाचकत्वेऽपि तस्य गम्यमानत्वात्, तस्य स्वप्रयोगविधिना विधानात्, समाख्यया परस्परनियम इति।

इति समाख्याया विनियोजकत्वाधिकरणम् ॥ ६ ॥

बलाबलाधिकरणम् (७)

'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यत्र तृतीयाश्रुत्या ऋचः शेषत्वं-द्वितीयया च गार्हपत्यस्य शेषित्वमिति, श्रोतोऽयं शेषशेषित्वबोधः। मन्त्रस्थेन्द्रपदेनेन्द्रप्रतीतिमात्रं, न मन्त्रस्य इन्द्रशेषत्वप्रत्ययः। इन्द्रप्रतीत्यनुपपत्त्या तच्छेषत्वं मन्त्रस्य कल्प्यमिति लैकिकोऽयं विनियोगः। यद्यपि केवलश्रुत्या पदार्थान्तरनिरूपितं शेषत्वं-शेषित्वं वा न बोध्यत इति अस्ति तदंशे वाक्यापेक्षा। तथापि शेषशेषिभावे वाक्यस्याव्यापारात् श्रौत एवायं विनियोगः। तत्र द्वयोरेकत्र समवाये लिङ्गं बलवत्। सामर्थ्यापेक्षत्वात् श्रुतेः। इति चेन्न—गौणसामर्थ्यस्य गार्हपत्येऽपि सत्त्वात् नापि मन्त्रस्योभयत्र विकल्पः। विरोधाभावेन प्रतिप्रधानं गुणावृत्तिन्यायेन समुच्चयोपपत्तेः। इति चेत् —

श्रुतेर्लिङ्गं

दुर्बलत्वं प्रपद्यत इत्युत्तरेण संबन्धः। न तावत् श्रुतिलिङ्गयोरविरोधः। येनोभयत्र मन्त्रस्य समुच्चयः स्यात्। निरपेक्षश्रुत्या गार्हपत्योपस्थानशेषत्वे मन्त्रस्य प्रथममवगते, मन्त्रादर्थं बुध्द्वा तत्प्रतीतिजननसामर्थ्यञ्च तस्मिन्नालोच्य, मन्त्राकांक्षावशेन इन्द्रोपस्थानबोधकश्रुतिकल्पनया विलम्बेन विनियोजकं लिङ्गं मन्त्रप्रयोजनकांक्षलक्षणमूलस्य श्रुत्या निराकृतत्वात् श्रुतिकल्पनायामसमर्थं सत् बाध्यत इति गार्हपत्योपस्थान एव श्रुत्या मन्त्रविनियोगः।

इति श्रुत्यपेक्षया लिङ्गस्य दौर्बल्याधिकरणम् ॥ ७ ॥

लिङ्गस्य वाक्यात् प्रबलत्वाधिकरणम् (८)

'स्योनन्ते सदनं करोमि। घृतस्य धारया सुशेवं कल्पयामि। तस्मिन्सीदामृते प्रतिष्ठ। व्रीहीणां मेघसुमनस्य मानः।' इत्यत्र समभिव्याहृतपदानामेकवाक्यत्वस्वारस्येन, तस्मिन्त्सीदेत्यस्य

पूर्वसापेक्षत्वेन च संपूर्णो मन्त्रः सदनकरणपुरोडाशप्रतिष्ठापनयोरावृत्त्या प्रयुज्यते। यद्वा, लिङ्गवाक्ययोः साक्षात् श्रुतिकल्पकत्वेन तुल्यबलत्वात् संपूर्णो विभक्तो वा प्रयुज्यते। इति चेत् —

ततो वाक्यम्

ततो लिङ्गात् वाक्यं दुर्बलत्वं प्रपद्यते। स्योनन्ते इति पूर्वार्धस्यान्यानपेक्षं सदनकरणप्रकाशकत्वम्। तस्मिन्त्सीद इत्युत्तरार्धस्यापि इतरनिरपेक्षं पुरोडाशप्रतिष्ठापनसामर्थ्यम्। इति ततो झडिति तत्तदर्थे विनियोक्त्री श्रुतिः कल्प्यते। द्वयोरेकवाक्यत्वे, उत्तरार्धस्य सदनकरणसामर्थ्यं पूर्वेणैकवाक्यत्ववशेन कल्पयित्वा श्रुतिकल्पनम्। एवमितरस्येतरत्र। इति विप्रकर्षात्, लिङ्गबलीयस्त्वेन विभज्यैवोभयत्र-विनियोगः। इति लिङ्गस्य वाक्यात प्रबलत्वाधिकरणम् ॥ ८ ॥

वाक्यस्य प्रकरणात् बलीयस्त्वाधिकरणम् (९)

सूक्तवाके, 'अग्नीषोमाविदँ हविरजुषेताम्। अवीवृधेतां महीज्यायोऽक्राताम्। इन्द्राग्नी इदँ हविरजुषेताम्। अवीवृधेतां महोन्यायोऽक्राताम्।' इति श्रुते 'इदँ हविरजुषेताम्' इति शेषद्वयं तत्तद्देवतापदात् भक्त्वा प्रकरणेन पर्वद्वयेऽपि प्रयोक्तव्यम्। यद्यपि सन्निपाती सूक्तवाकः, लिङ्गेनेष्ट-देवताप्रकशने विनियोगात्। तथाप्यवघातादिवत् प्रकरणग्रहणमविरुद्धम्। न च वाक्यबलीयस्त्वं; प्रधानाकांक्षात्मकप्रकरणस्य प्रधानार्थत्वापादकतया बलवत्त्वात्। इति चेत् —

ततः प्रकरणं तथा ॥ ५१ ॥

तत्र देवतापदैकवाक्यत्वं शेषयोः प्रत्यक्षम्। अन्यशेषस्य, स्वशेषपरिपूर्णेन अपरेण एकवाक्यत्वं अप्रत्यक्ष-मेव प्रकरणात्, कल्प्यमिति विप्रकर्षात् वाक्येन सामर्थ्यादिकल्पनस्य शैघ्र्यात् तेन प्रकरणबाधः।

इति वाक्यस्य प्रकरणात् बलीयस्त्वाधिकरणम् ॥ ९ ॥

प्रकरणस्य स्थानात् बलीयस्त्वाधिकरणम् (१०)

राजसूये अभिषेचनीयसन्निधौ विदेवनादयः समाम्नाताः। तेषां सन्निधिप्रकरणाभ्यामभि-षेचनीये-राजसूये चाङ्गत्वम्। नाकांक्षामात्रं संबन्धकारणम्। 'गिरिर्भुक्तमग्निमान्' इत्यत्रापि गिर्यग्निमत्पदयोस्संबन्धापत्तेः। नापि सन्निधिमात्रम्। 'अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्' इत्यत्र, राजपदस्य पुरुषेणाप्यन्वयापत्तेः। अतः उभयं परस्परापेक्षं उभयाङ्गतां गमयति। इति चेत् —

ततस्स्थानम्

आकांक्षातः एकवाक्यत्वादिकल्पनेन श्रुतिकल्पना शीघ्रा। सन्निधिपाठानुपपत्त्या आकाङ्क्षां परिकल्प्य वाक्यादिक्रमेण तत्कल्पना मन्थरा। इति सन्निधिबाधः। यद्यपि इष्टिपशुसोमानां विकृतित्वात् प्राकृताङ्गैर्नाकांक्ष्यम्। तथापि राजसूयात्मना नास्त्येवेति प्रकरणास्तिता।

इति प्रकरणस्य स्थानाद्बलीयस्त्वाधिकरणम् ॥ १० ॥

स्थानस्य समाख्यातो बलीयस्त्वाधिकरणम् (११)

पौरोडाशिककाण्डसमाम्नाते सान्नाय्यपात्रशुंधनक्रमे 'शुंधध्व'मिति मन्त्रः पठितः । समाख्यया संबन्धवाचिन्या लिङ्गाच्च पुरोडाशपात्रशुंधनाङ्गम् । इति चेत् —

ततोऽप्याख्या दुर्बलत्वं प्रपद्यते ।

ततः = स्थानात् । समाख्या हि न संबन्धवाचिनी ।

"पाकन्तु पचिरेवाह कर्तारं प्रत्ययोऽप्यकः ।
पाकयुक्तः पुनः कर्ता वाच्यो नैकस्य कस्यचित् ॥"

इत्यभियुक्तोक्तेः । वाचकत्वेऽपि पदमात्रस्याप्रमाणत्वात् । अतस्संबन्धवाचिसमाख्योपलम्भात् संबन्धं सामान्यतः परिकल्प्य, आकांक्षादिकल्पनाक्रमेण श्रुतिकल्पना विप्रकृष्यते । क्रमे तु संबन्धस्य प्रत्यक्ष-प्रमितत्वात् , आकांक्षादिकल्पनाक्रमेण सन्निकृष्यते सा । इति तेन समाख्या बाध्यः ।

इति स्थानस्य समाख्यातः प्रबलत्वाधिकरणम् ॥ ११ ॥

एवं श्रुत्यादीनां पूर्वपूर्वेणोत्तरोत्तरस्याप्राप्तबाधः ।

श्रुतिवाक्यविरोधे, 'अरुणया पिङ्गाक्ष्या क्रीणाति' इत्युदाहरणम् ।

श्रुतिप्रकरणविरोधे, 'एकविँशतिमनुब्रूयात्प्रतिष्ठाकामस्य' इति ।

श्रुतिक्रमविरोधे, दशनाधर्माणां 'त्रिवृद्भवति' इत्यादीनां, क्रमात्पशुयागाङ्गत्वप्राप्तौ, रशनया यूपं परिव्ययति' इति श्रुत्या यूपाङ्गत्वम् ।

श्रुतिसमाख्ययोर्विरोधे, पौरोडाशिककाण्डसमाख्यातस्य 'इषेत्वा' इत्यस्य, इतिकरणङ्गत्या शाखाच्छेदाङ्गत्वम् । इति करणस्य वाक्यीयत्वेऽप्यभ्युपगमेनोक्तम् ।

लिङ्गप्रकरणविरोधे पूषानुमन्त्रणादिः ।

लिङ्गक्रमविरोधे अनुज्ञानुशासनमन्त्रौ ।

लिङ्गसमाख्यविरोधे, 'परिवीरसि' 'परिवीत आगात्' इत्यनयोः, क्रमादग्नीषोमीयाङ्गत्वप्राप्तौ इतरपदैकवाक्यतया सवनीययूपपरिव्याणेऽपि प्राप्तिः ।

वाक्यसमाख्ययोर्विरोधे, भक्षानुवाके सध्यासादिपदैकवाक्यत्वात् , अश्विनोरित्यादीनामवेक्षणादौ विनियोगः ।

प्रकरणसमाख्ययोर्विरोधे, पौरोडाशिककाण्डसमाख्यातब्राह्मणविहितानां प्रयाजादीनां, प्रकरणात् सान्नाय्योपांशुयाजार्थत्वमपि ।

ननु तत्र तत्र शास्त्रप्रदेशेषु प्राकृतस्य वैकृतेन बाधः–सामान्यस्य विशेषेण, श्रुत्यालिङ्गस्य—इत्यादिः प्राप्तबाधोऽप्राप्तबाधो वा ? न चरमः । प्रापकचोदकसामान्यशास्त्रादेः सत्त्वात् । नाद्यः । लिङ्गादिना श्रुतिकल्पनातः पूर्वमेव श्रुत्या विनियोगात् । अत आह —

प्रसक्त्या युज्यते प्राप्तावप्राप्तावपि बाधनम् ॥ ५२ ॥

प्राप्तौ सत्यां बाधनं प्रसक्त्या युज्यते । अप्राप्तावपि श्रुत्यादिना लिङ्गादीनां बाधनं नैकरूप्यमित्यर्थः ॥ ११ ॥

इति बलाबलाधिकरणम् ॥ ११ ॥

द्वादशोपसत्तायाः अहीनाङ्गताधिकरणम् (१२)

ज्योतिष्टोमे, 'तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य' इति श्रुते, अन्हा समाप्यमानस्यत्र्युपसत्त्ववत् तस्यैव द्वादशोपासत्तापि प्रकरणाद्विकल्पेन विधीयते । अहीनश्रुतिश्च, न हीनोऽहीन इति सर्वाभिर्विकृतिभिः अहीनोऽपरित्यक्तः प्रकृतितया ज्योतिष्टोम इति प्रकृत एव वर्तते । इति चेत् —

उपसद्द्वादशत्वं स्यादहीनश्रुतिगोचरम् ।

प्रकृतगामित्वे साह्नस्याहीनस्येति विभागो व्यर्थः स्यात् । 'अह्नः खः क्रतु समूहे' इति विहित खप्रत्ययान्तता मध्योदात्ततया गम्यमानाहर्गणे रूढिं गमयति । सा च योगाद्बलीयसीति द्वादशाहप्रकरणविहितद्वादशोपसत्त्वानुवादेन त्र्युपसत्तास्तुतिपरं द्वादशाहीनस्येति । न द्वादशोपसत्ताविधिपरं प्रकृतौ विकृतौ वेति ।

इति द्वादशोपसत्तायाः अहीनाङ्गताधिकरणम् ॥ १२ ॥

कुलायादौ प्रतिपदोरुत्कर्षाधिकरणम् (१३)

ज्योतिष्टोमे, 'युवं हि स्थः स्वर्पती' इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात्' इत्यादि श्रुतम् । प्रतिपन्नाम बहिष्पवमानस्तोत्रस्याद्या ऋक् । इदं विधानं न प्रकरणादुत्कृष्टव्यम् । नित्यप्रयोगे यथाशक्त्युपबन्धस्य षष्ठे वक्ष्यमाणतया, एकेन करणाशक्तौ द्वाभ्यां बहुभिर्वा प्रकृतस्यैव एकत्वबाधेनानुष्ठानसंभवादिति चेत् —

युवं हिस्थः स्व इत्यस्योत्कर्षो द्वियजमानके ॥ ५३ ॥

यथाशक्तिप्रयोगः उपादेयाङ्गदक्षिणादिविषयः । कर्तुरुपादेयत्वेऽपि तदेकत्वमनुपादेयं कालवत् इति मीमांसकोद्घोषः । अतः प्रकृते निवेशायोगात् कुलायाहीनादिषु द्विबहुकर्तुकेषूत्कर्षः । पत्न्यभिप्रायत्वे विरूपैकशेषस्य, कारकद्वयप्रतीतिबाधस्य च प्रसङ्गात ।

इति कुलायादौ प्रतिपदोरुत्कर्षाधिकरणम् ॥ १३ ॥

जाघन्या अनुत्कर्षाधिकरणम् (१४)

दर्शपूर्णमासयोः 'जाघन्या पत्नीः संयाजयन्ति' इति श्रुते, सामवायिकाङ्गत्वलाभाय जाघनीशब्दस्य उत्तरार्धादिशब्दस्यैवैकदेशवचनतया विद्यमानद्रव्यैकदेशविषयत्वेन च 'हृदयाद्यर्थालब्धपश्वनुनिष्पन्न-जाघनीसंस्कारतया, विनियोगभङ्गेन पत्नीसंयाजा विधीयन्त इति प्रकरणभङ्गात् पशावुत्कृष्यते वाक्यम्। इति चेत् —

उत्कर्षो नास्ति जाघन्याः

तृतीयया द्रव्यापेक्षपत्नीसंयाजान्प्रति गुणत्वेन विधीयमाना न संस्कार्या स्यात्। अवयवविशेषस्य जाघन्याः मुण्डादिवत्सूनायामुपलम्भात् नैकदेशद्रव्यत्वम्। अतः आज्येन विकल्प्यते जाघनी पत्नी-संयाजेषु।

इति जाघन्या अनुत्कर्षाधिकरणम् ॥ १४ ॥

सन्तर्दनाधिकरणम् (१५)

ज्योतिष्टोमे, अधिषवणफलके प्रकृत्य, 'न सन्तृणत्ति असन्तृष्णे हि हनू' इत्यसन्तर्दनं विधाय पुनः श्रुतम्—'दीर्घसोमे सन्तृद्ये धृत्यै' इति। तत्र इष्ट्याद्यपेक्षया प्रकृतस्यापि दीर्घत्वात् अनु-त्कर्षः। न च 'दीर्घस्य यजमानस्य सोमः' इति युक्तम्। कर्मधारयस्य बलीयस्त्वात्। 'धृत्यै' इत्यर्थवादासामञ्जस्याच्च। अतोऽसन्तर्दनसन्तर्दनयोः ग्रहणाग्रहणवत् विकल्पः। इति चेत् —

कर्षः सन्तर्दनस्य तु।

इष्ट्याद्यपेक्षया दीर्घत्वस्याव्यावर्तकतया वैयर्थ्यात्, प्रकृतसोमापेक्षया दीर्घेषु उक्थ्याहीनादिषु उत्कर्ष। संस्थास्वपि त्रिपर्वणः सोमस्य दीर्घपर्वग्रहणेन बहुशूपग्रहणेन च प्रदानविवृद्धये प्रदेयविवृद्धेरावश्यकत्वेन 'धृत्यै' इत्यर्थवादसामञ्जस्यं स्यादिति।

इति सन्तर्दनाधिकरणम् ॥ १५ ॥

प्रवर्ग्याधिकरणम् (१६)

अनारभ्याधीतः प्रवर्ग्यः—'पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्ति' इति। प्रवर्ग्यसन्निधाम्नानेन अव्यभिचरित क्रतुसंबन्धोपसदोपस्थापितज्योतिष्टोमाङ्गम्। तत्र श्रूयते—'न प्रथमयज्ञे प्रवृञ्ज्यात्' इति। अयं प्रतिषेधः प्रथमयज्ञाङ्गम्। प्रथमयज्ञश्च, 'एष वाव प्रथमो यज्ञो यज्ञानाम्' इति वचनात् अग्निष्टोमः। स हि प्रथमं प्रयुज्यते। 'य एतेनानिष्ट्वा' इति वचनात्। तस्मात्, वाक्यात् प्रकरणाच्च अग्निष्टोमाङ्गं प्रतिषेधः इति चेत् —

भवेदाद्यप्रयोगाङ्गं प्रवृञ्जन निषेधनम् ॥ ५४ ॥

प्रथमशब्दस्य अप्रवृत्तपूर्वस्त कर्तुः आद्यप्रवर्तनवाचितया, प्रयोगद्वारा लक्षणया क्रतौ वृत्तेः, इह लाक्षणिकस्याग्रहणात्, 'एष वाव' इत्यस्यार्थवादतया शक्त्यग्राहकत्वात्, यज्ञशब्दस्य जघन्यतया प्रयोगलक्षणायामप्यदोषात्, प्रथमप्रयोगाङ्गमयं प्रतिषेधः। 'अग्निष्टोमे प्रवृणक्ति' इति तत्रैव प्रतिषिद्धप्रतिप्रसवः। तथा च अग्निष्टोमप्रथमप्रयोगे विकल्पः। स च व्यवस्थितः। 'काममनूचानस्य प्रवृञ्ज्यात्' इति वचनात्। अतिरात्रप्रथमप्रयोगे नित्यमप्रयोगः। तत्र प्रतिप्रसवाभावात्। 'अग्निष्टोमे प्रवृणक्ति' इति, 'न प्रथमयज्ञे ....' इति च एकवाक्यतया पर्युदासार्थः। 'यजतिषु ये यजामहं करोति–नानुयाजेषु' इतिवत्। अन्यथा, 'न प्रथमयज्ञे ....' इत्यस्य शास्त्रप्राप्तप्रतिषेधकत्वे विकल्पापत्त्या, अतिरात्रप्रथमप्रयोगोऽपि तत्प्रसङ्गात्। 'पुरस्तादुपसदां ....'मिति तु कालविधिः, 'पुरस्तादुपसदां सौम्येन' इतिवत् इनि केचित्।

इति प्रवर्ग्याधिकरणम् ॥ १६ ॥

पौष्णपेषणस्य विकृतौ विनियोगाधिकरणम् (१७)

दर्शपूर्णमासयोः, 'पूषा प्रविष्टभागः' इति श्रुतम्। तत्र पूषाभावात् चातुर्मास्यादिषु उत्कृष्यते। तदाह —

स्यादुत्कर्षः पेषणस्य।

इति पौष्णपेषणस्य विकृतौ विनियोगाधिकरणम् ॥ १७ ॥

पेषणस्य चरावेव निवेशाधिकरणम् (१८)

तत्पेषणं, तद्देवताकचरौ–'पौष्णं श्याममालभेतान्नकामः' इति विहितपशौ–पुरोडाशे च स्यात्, अविशेषात्। इति चेत् —

चरावेव भवेत्स तु।

सः = उत्कर्षः। तण्डुलेषु पेषणं चोदकसिद्धम्। न च वचनात् पुरोडाशेऽपि स्यादिति युक्तम्; तादृशवचनाभावात्। एतस्यात्यन्ताप्राप्तपेषणोपस्थापकत्वे गौरवात्। पशावपि हृदयादिनाशापत्त्या-तद्विध्ययोगात्। चरावर्थलोपात् प्रकृतिप्राप्तं पेषणं निवर्तमानं प्रतिप्रसूयते। अस्यापूर्वविधित्वेऽप्युपस्थितिलाघवमस्त्येव। तण्डुलानां करणभावमात्रस्य वचनेनानुष्ठानात् न चरुत्वविघातोऽपि।

इति पेषणस्य चरावेव निवेशाधिकरणम् ॥ १८ ॥

पौष्णपेषणस्य एकदेवत्ये निवेशाधिकरणम् (१९)

तदेव पेषणं, 'सोमापौष्णं ....' इत्यादावपि स्यात्। पेषणवाक्ये तद्देवताकयज्यश्रवणेन

तदपूर्वप्रयुक्तत्वानापत्त्या पूषमात्रप्रयुक्तत्वे तत्रापि तदनपायात् इति चेत् —

यत्रान्यसहितः पूषा भवेत्तत्र न पेषणम् ॥ ५५ ॥

पूषप्रयुक्तत्वे वैयर्थ्यात्, भागशब्दोक्तदैवत्ययागापूर्वप्रयुक्तं पेषणं, नान्यसहितपूषदेवताके संबध्यत इति न तत्र तदिति ।

इति पौष्णपेषणस्य एकदेवत्ये निवेशाधिकरणम् ॥ १० ॥

इति लघुवार्तिकटीकायां तृतीयस्य तृतीयः पादः ॥

॥ अथ चतुर्थः पादः ॥

निवीताधिकरणम् (१)

दर्शपूर्णमासयोः, 'निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामुपव्ययते ....' इति श्रुतम् । तत्र उपवीतविधेः शेषो निवीतादिरर्थवादः । विधित्वं कृत्वा चिन्त्यते —

१) षष्ठीश्रुत्या शुद्धपुरुषधर्मो वा ?
२) प्रकरणसहितश्रुत्या क्रतुयुक्तपुरुषधर्मो वा ?
३) प्रकरणे मनुष्यप्रयुक्तान्वाहार्यादिदानधर्मो वा ?
४) स्वतन्त्रमनुष्यप्रधानातिथिपूजाधर्मो वा ? इति चेत् —

अर्थवादो निवीतोक्तिः

केवलपुरुषार्थत्वपक्षे फलकल्पनापातात्; आख्याताभावात्, विध्यन्तरशेषत्वात् प्रकरणाविरोधाच्चेति* ।

इति निवीताधिकरणम् ॥ १ ॥

उपवीतस्य दर्शपूर्णमासाङ्गत्वाधिकरणम् (२)

दर्शपूर्णमासयोः श्रुतं 'उपव्ययते' इति । तत्प्रकरणमनादृत्य सर्वार्थम् । मृताग्निहोत्रे 'यज्ञोपवीती हि देवेभ्यो दोहयति' इति बहुवचनान्तेन सिद्धवदनुवादात् । दर्शपूर्णमासयोः इन्द्र-महेन्द्रयोर्वैकल्पिकत्वेन बहुवचनायोगात्, दूरस्थत्वाच्च । अग्निहोत्रे तु अग्निसूर्यप्रजापतीनां सत्त्वेन बहुवचनोपपत्तेः इति चेत् —

सर्वाङ्गं नोपवीतकम् ।

न तावद्बहुवचनानुपपत्तिः, प्राकृतवैकृताभिप्रायत्वाद्बहुवचमस्य । न च दूरत्वम् । यथाप्राप्तानुवादत्वे

---

* अर्थवाद एवैषः । न विधिः । इति शेषः ।—(सं)

तस्यादोषत्वात । तस्मात्प्रकरणस्य लिङ्गाविरोधाद्दर्शपूर्णमासाङ्गमुपवीतम् ।

इत्युपवीतस्य दर्शपूर्णमासाङ्गताधिकरणम् ॥ २ ॥

उपवीतवाक्यस्य विधित्वाधिकरणम् (३)

इदमेवोदाहरणं, '.... नित्ययज्ञोपवीती ' इति स्मृतिप्राप्तानुवादः इति चेत् —

उपव्ययत इत्येष क्रत्वर्थस्य विधिर्मतः ॥ ५६ ॥

स्मृतिः पुरुषार्थविधिः । अयञ्च प्रकरणात् क्रत्वर्थः इति संयोगभेदात् भिन्नविषयतया नानुवादः ।

इत्युपवीतवाक्यस्य विधित्वाधिकरणम् ॥ ३ ॥

यज्ञोपवीतीत्यस्यानुवादत्वाधिकरणम् (४)

मृताग्निहोत्रे, ' यज्ञोपवीती हि देवेभ्यो दोहयति ' इत्यत्र हिशब्दपरित्यागेन जीवदवस्थायां यज्ञोपवीतमग्निहोत्रस्य विधीयते इति चेत् —

यज्ञोपवीती हीत्येतद्भवेच्चास्यानुवादकम् ।

हिशब्दोपबन्धात्, प्राचीनावीतविधिशेषत्वात्, दर्शपूर्णमासतः प्राप्तेश्च अनुवादत्वम् ।

इति यज्ञोपवीतीत्यस्यानुवादत्वाधिकरणम् ॥ ४ ॥

उदक्त्वाधिकरणम् (५)

तत्रैव ' ये पुरोदञ्चो दर्भाः तान् दक्षिणाग्रान् स्तृणीयात् ' इत्यत्र, ये दर्भाः तान् पुरा= जीवदवस्थायां, उदञ्चः = उदगग्रान् स्तृणीयात् इति अप्राप्तत्वाद्विधिः इति चेत् —

दर्भाणामुदगग्रत्वं स्मृतिप्राप्तमनूद्यते ॥ ५७ ॥

यच्छब्दोपबन्धात् विध्यभावात् विध्यन्तरशेषत्वाच्च, ' अग्रवन्त्युदगग्राणि ' इति स्मृतिप्राप्तानुवादः । स्मृतेः सर्वकर्मविषयत्वात् अस्य चाग्निहोत्रमात्रविषयत्वात् न मूलमूलिभावः ।

*इत्युदक्त्वाधिकरणम् ॥ ५ ॥

उपरिधारणविध्यधिकरणम् (६)

तत्रैव श्रूयते, ' अधस्तात्समिदं धारयन्ननुद्रवेत्, उपरि हि देवेभ्यो धारयति ' इति । तत्र, हिशब्दश्रुताधोधारणविधिशेषत्वेन–आचारप्राप्तत्वेन च उपरिधारणानुवादः । देशाद्देशान्तरं नीयमानस्य

---

* अस्मिन् ग्रन्थे, अत्र चतुर्थपञ्चमयोरधिकरणयोरैकाधिकरण्यमन्यग्रन्थेषु—(सं)

अन्तरङ्गद्रव्यस्य, शिष्टैराच्छाद्य नयनेन उपरिप्राप्तेः, समिन्नियमार्थं वचनम् इति चेत् —

विधिरेवोपरि धृतौ

समिधः परिमाणाम्नानात् आच्छादनासमर्थत्वात्, 'स्रुग्दण्डोपरि' इत्यनुवादाच्च, आचारादप्राप्तेः अपूर्वत्वात् हिशब्दपरित्यागेन विधिः ।

इति उपरिधारणविध्यधिकरणम् ॥ ६ ॥

दिग्विभागाधिकरणम् (७)

ज्योतिष्टोमे, 'प्राचीनवंशं करोति' इति विधाय, 'प्रतीचीं मनुष्याः' इति श्रुते, अनेककर्तृकोपाख्यानरूपपुराकल्पेन पूर्वपुरुषाचरितेन स्तुतिप्रतीतेः विधिकल्पना इति चेत् —

प्रतीचीमिति तु स्तुतिः ।

निवीताधिकरणवत् सिद्धान्तः । इति दिग्विभागाधिकरणम् ॥ ७ ॥

परुषिदिताद्यधिकरणम् (८)

'यदन्तरा तन्मनुष्याणां' 'यत्पूर्णं तन्मनुष्याणां' 'निष्पक्वं मनुष्याणाम्' इति; 'यो विदग्धस्सनैर्ऋतः योऽश्रृतस्सरौद्रः' इत्येतेषु विधित्वेऽपि न फलकल्पना । लौकिकक्रियासु प्रसिद्धफलास्वेव गुणमात्रविधानात् । प्रसिद्धनैर्ऋतरौद्रपुरोडाशयोर्विदग्धत्वादिगुणमात्रविधानात्, इति चेत् —

तथा यदन्तरेत्यादि

तथा = स्तुतिरित्यर्थः । विध्यन्तरशेषत्वादिभिः पूर्ववत्सिद्धान्तः । इति परुषदिताद्यधिकरणम् ॥ ८ ॥

कर्त्रधिकरणम् (९)

दर्शपूर्णमासयोः, 'नानृतं वदेत्' इति श्रुतोऽनृतवदनप्रतिषेधः पुरुषार्थः । वदनस्य तदर्थत्वात् । तथा हि; आख्यातात्कर्ता प्रतीयते । 'लः कर्मणि च ....' इति चकारात्तस्मिन् स्मर्यते । देवदत्तः पचतीति सामानाधिकरण्याच्च तस्य कर्तुः प्रत्ययार्थतया प्राधान्येन, तद्विशेषणतया गम्यमानं वदनं तच्छेषः, तदभिलषितसाधनम् । प्रतिषेधोऽपि तद्विपरीतमर्थं बोधयन् तस्यैव बलवदनिष्टसाधनतां प्रति बोधयतीति तच्छेषः, इति चेत् —

क्रत्वर्थोऽनृतवर्जनम् ॥ ५८ ॥

आख्यातानां भावनाभिधायितया, आक्षेपादेव तदवगमोपपत्तौ, न तद्विशिष्टे शक्तिकल्पनम् । 'लः कर्मणि ....' 'द्व्येकयोः ....' इति च सूत्रयोः एकवाक्यतया, कर्तुरेकत्वे लकारैकवचनमिति, आक्षेप-

लभ्यकर्तृसंख्याभिधानपरं 'लः कर्मणि च ....' इति सूत्रम्। सामानाधिकरण्यञ्च 'गौः शुक्लः' इतिवत्, लाक्षणिककर्त्रभिप्रायमिति न कर्तुराख्यातवाच्यत्वम्। येन वदनतन्निषेधयोः श्रुत्या तच्छेषता स्यात्। ततश्च प्रकरणात् प्रतिषेधः क्रत्वर्थः। अनारभ्याधीतस्मृतिबोधिततत्प्रतिषेधः पुरुषार्थः। तदुल्लङ्घने पुरुषः प्रत्यवेयात्। न तु क्रतुवैगुण्यमिति। अयन्तु संयोगपृथक्त्वन्यायात् क्रत्वर्थ इति।

इति कर्त्रधिकरणम् ॥ ९ ॥

जञ्जभ्यमानाधिकरणम् (१०)

दर्शपूर्णमासयोः, 'तस्माज्जञ्जभ्यमानो ब्रूयान्मयि दक्षक्रतू ....' इति श्रुतः सः शानचा कर्तुरभिधानात् समभिव्याहारात्मना वाक्येन प्रकरणं भङ्क्त्वा विपरिणतवाक्यशेषावगतप्राणापानधारणादिरूपफलविशिष्टपुरुषशेषतया मन्त्रविधिः इति चेत् —

जञ्जभ्यमानमन्त्रस्स्यात् पुंसः क्रतुमुपेयुषः।

क्रतावपि तादृक्षपुरुषसत्त्वेन तत्संस्कारमुखेन प्रकरणानुरोधेन क्रतुफलेनैव तद्वत्त्वोपपत्तौ न तद्विपरिणामक्लेशो युक्तः इति।

इति जञ्जभ्यमानाधिकरणम् ॥ १० ॥

अवगोरणाधिकरणम् (११)

दर्शपूर्णमासयोः, 'यो ब्राह्मणायावगुरेत् तं शतेन यातयात् .... तस्मात् ब्राह्मणाय नावगुरेत' इति श्रुतः प्रतिषेधः, फलकल्पनाभयात्-प्रकरणाच्च क्रत्यर्थः इति चेत् —

पुरुषार्थतया बोध्यमवगोरणवर्जनम् ॥ ५९ ॥

निषेधान्यथानुपपत्त्या निषेध्यक्रियायाः बलवदनिष्टसाधनत्वे कल्पिते, तद्विशेषसमर्पकशतयातनार्थवादात् तद्रूपत्वेऽनिष्टस्यावधारिते, अवगूरणानिवृत्तिरूपप्रतिषेधस्य तदनुत्पादफलत्वावगमात् न प्रकरणानुप्रवेशः। केवलपुरुषार्थ एवायमिति।

इत्यवगोरणाधिकरणम् ॥ ११ ॥

मलवद्वासोऽधिकरणम् (१२)

दर्शपूर्णमासयोः, 'मलवद्वाससा न संवदेत....' इत्ययं प्रतिषेधः प्रकरणात् क्रत्वर्थः इति चेत्—

न संवदेत मलवद्वाससेत्यपि पूर्ववत्।

पुरुषार्थ इत्यर्थः। 'तामपरुध्य यजेत' इति वचनात् सर्वस्मात् क्रतुव्यापारान्निवृत्ता रजस्वलेति न

तया क्रतौ संवादप्रसक्तिः । अप्रसक्तस्य क्रतौ प्रतिषेधोऽनर्थकः । परुषस्य तु स्वाच्छन्द्यात् रागत स्तत्प्रसक्तौ, तं प्रत्येवायं प्रतिषेध इति । पुरुषार्थस्याप्यग्निहोत्रादेः 'दीक्षितो न जुहोति न ददाति' इति प्रतिषेधस्य प्रकरणात् क्रत्वर्थत्ववत्, क्रतुमध्ये पुरुषार्थतया प्रसक्तानृतवदनस्य प्रतिषेधवच्च एतस्यापि क्रत्वर्थता स्यादिति केचित् ।

इति मलवद्वासोऽधिकरणम् ॥ १२ ॥

हिरण्यधारणाधिकरणम् (१३)

अनारभ्य श्रुते, 'सुवर्णं हिरण्यं भार्यं, दुर्वर्णोऽस्य भ्रातृव्यो भवति' इत्यत्र विनियोगभङ्गेन सुवर्णताविशिष्टहिरण्यधारणं विधीयमानं, फलकल्पनाभयात्—वैदिकत्वसामान्यात्, क्रत्वपूर्वमुपस्थाप्य तदर्थं संपद्यते । न च कर्मणि कृत्यप्रत्ययेन क्रत्वङ्गहिरण्यानुवादेन धारणं संस्कारो विधीयत इति युक्तम्; लोकेऽपि तत्सत्त्वेन तदनुवादे प्रमाणाभावात् । अतश्च क्रत्वर्थधारणानुवादेन सुवर्णताविधिरित्यपि निरस्तम् इति चेत् —

पुरुषार्था स्वर्णभृतिः

न तावद्वैतदिकत्वेन क्रतूपस्थाननियमः। स्वर्गतदुत्पत्त्योरपि वैदिकत्वात् । अतः आर्थवादिकं फलमुद्दिश्य विधीयमाना स्वर्णधृतिः पुरुषार्था ।

इति हिरण्यधारणाधिकरणम् ॥ १३ ॥

जयादीनां वैदिककर्माङ्गताधिकरणम् (१४)

'येन कर्मणेर्थसेत् तत्र जयान् जुहुयात्' इत्यनारायभ्य श्रुताः जयहोमाः लोकिकेषु कृष्यादिष्वपि स्युः । कृष्यादिनापि ऋद्धिं प्राप्तुमिच्छेत् । तदर्थमेवाहवनीयप्रणयनोपपत्तेश्च इति चेत् —

जयाः कर्मणि वैदिके ॥ ६० ॥

अङ्गप्रधानयोः सादेश्यं प्रयोगविध्यवगतं मा बाधीति श्रौतेष्वेवाहवनीयवत्स्वङ्गं जयाः । अन्यथा क्षेत्रेषु कृषिः—आहवनीये होमः—इति तयोर्वैयधिकरण्यं स्यात् । अतश्च स्मार्ताग्निसाध्यस्थालीपाकादिष्वपि नाङ्गानि ।

इति जयादीनां वैदिककर्माङ्गताधिकरणम् ॥ १४ ॥

अश्वप्रतिग्रहेष्ट्यधिकरणम् (१६)

काम्येष्टिकाण्डे, 'यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेत्' इति श्रुतम् । तत्र लौकिके मित्रदायादिभ्यः प्रीत्या विध्यनपेक्षया क्रियमाणे अश्वदाने निमित्ते द्रव्यदेवताविशिष्ट-

यागविभिः । 'वरुणपाशान्मुञ्चति' इति श्रुतफलस्य, 'न केसरिणो ददाति' इति निषेधोल्लङ्घन-समुत्पन्नदोषवत्येव संभवेन, विहितकर्माङ्गाश्वदाने अयोगात् इति चेत् —

अश्वेष्टिर्वैदिके दाने

लौकिके वरुणपाशशब्दवाच्यजलोदररोगजनकता लोकाद्वेदाद्वा अनवगतेत्यर्थवादस्य फलपरत्वाभावे तद्वशेन लौकिकदाननिमित्तकत्वायोगात् । उभयनिमित्तकत्वे च, लौकिकांशे पुरुषार्थो विधिः-वैदिकांशे क्रत्वर्थः -इत्यादिवैरुप्यं स्यात् । तस्मात् वैदिकदानस्यैव सादृश्यात्, झटिति बुद्धिसमारोहात्, ज्योतिष्टोम-पौण्डरीकादावश्वदानवति क्रतौ वाक्यमिदं नेयमिति वैदिकस्यैव दानस्य निमित्तत्वम् । एतेन गृह-दाहादिष्वपि व्यभिचारशङ्कापास्ता ।

इत्यश्वप्रतिग्रहेष्ट्यधिकरणम् ॥ १५ ॥

दातुरेवाश्वप्रतिग्रहेष्टिः (१६)

इयमिष्टिः प्रतिग्रहीतुरेव । 'यावतोऽश्वान्प्रतिगृह्णीयात्' इति विधिवाक्ये तस्यैव श्रवणात् । उपक्रमस्थार्थवादस्य, दातुरपीष्टिः किमुत प्रतिग्रहीतुः ? इति कैमुतिकद्योतकत्वेनाप्युपपत्तेः इति चेत् —

नस्यादेषाप्रतिग्रहे ।

वेदोपक्रमाधिकरणन्यायेन अनुपजातविरोधोपक्रमबलात्, तत्रोक्तरीत्या प्राप्तार्थत्वेन च, प्रतिगृह्णातिः णिजन्तभावेन वा-'षड्भिर्हलैः कृषति' इतिवत्, स्वव्यापारद्वारकप्रयोज्यव्यापारकर्तृत्वविवक्षया वा-नेयः । इति भाष्यम् ।

वार्तिके तु, तेनैव गतत्वात् नेदमधिकरणान्तरमित्युक्तम् । तदाह —

प्रतिग्रहे निषेधार्थो वार्तिके नास्त्ययं नयः ॥ ६१ ॥

प्रतिग्रहे प्रतिषेधार्थोऽयं नयः वार्तिके नास्तीत्यर्थः ।

इति दातुरेवाश्वप्रतिग्रहेष्ट्यधिकरणम् ॥ १६ ॥

पानव्यापदधिकरणम् (१७)

अनारभ्य श्रूयते—'विवा एष इन्द्रियेण वीर्येणर्ध्यते यस्सोमं वमिति .... तस्मा एत ँसोमेन्द्रं श्यामाकं चरुं निर्वपेत्' इति ।

तत्र लौकिकसोमवमने श्रुतफलस्य प्रत्यक्षत्वात् तत्रैवेष्टिः । इति चेत् —

वैद्यसोमवमाविष्टिः

तत्र वान्तार्थमेव पानात् प्रतीकारानपेक्षणात्, वैदिकस्य तु सम्यग्जरणपर्यन्तं, 'मा मेऽवाङ्नाभिमतिगाः'

इति मन्त्रात् व्यापारावगमात् प्रतीकारापेक्षायां तत्रैव वमने इष्टिः फलवती। वचनन्तु अर्थवादमात्रम्। अतो न तद्वशेन लौकिकविषयतेति। इति पानव्यापदधिकरणम् ॥ १७ ॥

यजमानवमने इष्टिविधानाधिकरणम् (१८)

येयमिष्टि; फलकल्पनाभिया वैदिकवमन-उक्ता; सा ऋत्विग्वमनेऽपि स्यात्। वैदिकवमनत्वाविशेषात्। इति चेत् —

सा नर्त्विग्वमने भवेत्।

इष्टेः क्रत्वर्थायाः यजमानकर्तृकतया समानकर्तृकं गम्यमानं वमनं निमित्तमिति ; नर्त्विग्वमन इष्टिर्भवेत्।

इति यजमानवमने इष्टिविधानाधिकरणम् ॥ १८ ॥

सर्वप्रदानाधिकरणम् (१९)

दर्शपूर्णमासयोः, 'यदाग्ने योऽष्टाकपालो भवति' इति[1]। तथा 'उपस्तृणाति-अभिघारयति-द्विर्हविषोऽवद्यति-चतुरवत्तं जुहोति' इति[2]।

तत्र अष्टाकपालद्रव्यं देवतासंबन्धितद्धितादवगतं मा बाधि इति संपूर्णं प्रक्षेप्तव्यम्। द्रव्यवदानन्तु उत्पत्तिशिष्टपुरोडाशावरुद्धे साक्षात् साधनत्वायोगात्, पुरोडाशस्य तत्साधनत्वद्वारमिति द्विर्द्विरवदाय संपूर्णमावृत्त्या होतव्यम्। ऐन्द्रवायव्यादिग्रहहोमवत्। शेषकार्याणि तु द्रव्यान्तराक्षेपकाणि। तद्वशाद्वा शेषस्यापनम्। न द्रव्यवदानविधिसामर्थ्यात्। इति चेत् —

द्रव्यवदानस्यैव यागे द्रव्यत्वम्

एकेनैव द्रव्यवदानेन यागनिर्वृत्तेः न गुणभूतद्रव्यववशात् प्रधानावृत्तिः विना वचनं युक्ता। न च ऐन्द्रवायवादौ यागाभ्यासाद्विना क्रमसमुच्चयदर्शनाद्यनुपपत्तिवत् आग्नेयत्वमनुपपन्नम्। प्रदेयप्रकृतित्वेनापि पशोरिव तदुपपत्तेः। अतो द्रव्यवदानद्वारकं पुरोडाशस्य यागसाधनत्वमिति भाष्यम्।

वार्तिके तु; हृदयद्विद्वारकं पशोरग्नीषोमीयत्वमित्यत्र, हृदायादिषु 'एकादश वै पशोरवदानानि' इति वचनवत् न द्रव्यवदानद्वारकं पुरोडाशस्याग्नेयत्वमित्यत्र मानमस्ति। चतुरवत्तवाक्यस्य; उपस्तरणादिवाक्यप्राप्तावत्तोद्देशेन यागसमयप्राप्तहोमसंस्कारविधिपरतया तदनुवादेन चतुरवत्तस्य विधानायोगात्। यागस्य च विनापि प्रक्षेपमारण्योत्सर्गवदुपपत्तेः। आचारस्य च कृत्स्नस्य यागसाधनताबोधितद्धितश्रुतिविरोधेऽप्रमाणत्वात्। तस्माच्चतुरवत्तं जुहोतीति अप्राप्तहोमविधिः। त्यागस्तु कृत्स्नस्याष्टाकपालस्यैव। अधिकरणन्तु; होमविषयम्। हविषां प्रायो होमदर्शनात्। अग्निमुखा वै देवा इत्यर्थवादाच्च कृत्स्न-

---

[1], [2] अत्रोभयत्र 'श्रुतम्' इत्यध्याहार्यं वाक्यं पूरयितव्यम्।

होम इति चेत् —

अथ वार्तिके ॥ ६२ ॥

कृत्स्ने हविषि यागार्थे प्रक्षेपो द्व्यवदानगः ।

चतुरवत्तं जुहोतीति वचनात् तावत एव होमः । त्यागस्तु कृत्स्नस्य । तथा च 'शेषात् स्विष्टकृतः' इत्युपपन्नम् । त्यक्तस्यापि पुनस्तावन्मात्रस्य स्वीकारो वचनवशादाचारबाधेनापि भविष्यतीति न त्यक्तोत्तरार्थ इत्युक्तम् ।

इति सर्वप्रदानाधिकरणम् ॥ १९ ॥

सर्वेभ्यः स्विष्टकृदनुष्ठानाधिकरणम् (२०)

शेषकार्याणि स्विष्टकृदादीनि एकस्मादेव कार्याणि । तावतैव वचनोपपत्तेः । इति चेत् —

शेषकार्याणि सर्वेभ्यः

द्रव्यगुणकप्रधानकर्मत्वे स्यादेतदेवम् आकीर्णकरद्रव्याणां क्वचिद्दूरीकरणप्रसक्तौ प्रतिपत्तिनियमोऽयम् । स यस्यैव न क्रियते, तस्यैव वैगुण्यं स्यात् । प्रतिपत्तित्वञ्च चतुर्थसिद्धम् । तर्हि तेन गतमिति नेदमधिकरणान्तरम् । किन्तु पूर्वाधिकरणपूर्वपक्षसिद्धान्तयोः प्रयोजनकथनपरम् ।

इति सर्वेभ्यः स्विष्टकृदनुष्ठानाधिकरणम् ॥ २० ॥

प्राथमिकशेषात् स्विष्टकृदनुष्ठानाधिकरणम् (२१)

शेषकार्याणां प्रधानकर्मत्वं कृत्वा चिन्ता । शेषकार्याणि अनियमेन कुतश्चित् द्व्यात् । इति चेत् —

एकस्याद्यदि मुख्यतः ॥ ६३ ॥

यदिति कृत्वा चिन्ताद्योतनम् । मुख्यस्य प्राप्तनिमित्तत्वात् शेषे स्थापिते तत एव शेषकार्यसंपत्तौ निमित्तविधातात् नेतरेभ्यः शेषस्थापनमिति मुख्यादेतानि कार्याणि ।

इति प्राथमिकशेषात् स्विष्टकृदनुष्ठानाधिकरणम् ॥ २१ ॥

चतुर्धाकरणभक्षणाधिकरणम् (२२)

आग्नेयं चतुर्धा कृत्वा, 'इदं ब्रह्मणः' 'इदं होतुः' इति व्यपदेशपूर्वकं ऋत्विग्भ्यः कर्मकरेभ्यो दीयमानं भक्षाश्रवणात् सोमचमसवत् परिक्रयार्थम् । इति चेत् —

इदं ब्रह्मण इत्यादिनिर्देशो भक्षणार्थकः ।

कृत्स्नपुरोडाशस्य देवतायै दत्तस्य अनीशानो यजमानः ऋत्विग्भिस्तुल्यः । कथं तेन परिक्रीणीत ?

अतः प्रतिपत्तिकर्मेति प्राप्तभक्षस्य ऋत्विङ्नियममात्रं करिष्यमाणकर्मणः उत्साहजननाय विधीयत इति भक्षणं प्रतिपत्तिरिति ।

इति चतुर्धाकरणभक्षणाधिकरणम् ॥ २२ ॥

इति लघुवार्तिकटीकायां तृतीयस्य चतुर्थः पादः ।

॥ अथ पञ्चमः पादः ॥

उपांशुयाजहविषा शेषकार्यानुष्ठानाधिकरणम् (१)

शेषकार्याणि स्विष्टकृदादीनि उपांशुयाजाज्यशेषादपि कर्तव्यानि । इति चेत् —

आज्ये, नोपांशुयाजार्थे शेषकार्यं विधीयते ॥ ६४ ॥

उपांशुयाजार्थे आज्ये शेषकार्यं न विधीयते । जुह्वां चतुर्गृहीतस्य निश्शेषं हुतत्वात् । ध्रौवस्य त्वग्निमोपस्तरणादिसमिष्टयजर्होमान्तेषु विनियोक्ष्यमाणत्वात् । स्थाल्याज्यस्य च ध्रुवाप्यायनापरान्तिक-होमादिषु विनियोजत्वात् न कृतकरश्शेषोऽस्तीति न कर्तव्यानि शेषकार्याणि ।

इति उपांशुयाजहविषा शेषकार्यानुष्ठानाधिकरणम् ॥ १ ॥

साकं प्रस्थायीये शेषकार्याननुष्ठानाधिकरणम् (२)

साकं प्रस्थायीये, 'सह कुम्भीभिरभिक्रामेत्' इति श्रुते, अभिक्रम्यावदाय यथाप्रकृति जुह्वा, हवनात् शेषसत्त्वे भवन्ति स्विष्टकृदादीनि । इति चेत् —

न प्रस्थानीय कुंभ्यां स्यात्

प्राकृतहोमार्थाभिक्रमणानुवादेन जुहूस्थाने कुम्भीनां विधानात्, ताभिरेव होमः । अत एव तैत्तिरीये- 'पूर्णं होतव्यम्' 'दारुपात्रेण जुहोति' 'औदुंबरं भवति' इति श्रूयते । अतः शेषाभावात् न

इति साकं प्रस्थायीये शेषकार्याननुष्ठानाधिकरणम् ॥ २ ॥

सौत्रामण्यधिकरणम् (३)

सौत्रामण्यां पयोग्रहाः-सुराग्रहाश्च । तत्र श्रुतम्— 'यथागृहीतान् ग्रहानृत्विज उपाददते, उत्तरेऽग्नौ पयोग्रहान् जुह्वति, दक्षिणेऽग्नौ सुराग्रहान्' इति ।

तत्र सोमग्रहतुल्यश्रुतित्वात् अल्पहोमे शेषसत्त्वेन भवन्ति शेषकार्याणि । इति चेत् —

नापि सौत्रामणीग्रहे ।

उपदेशातिदेशाभ्यामल्पहोमाप्राप्तेर्न शेषकार्याणि । शेषाभावात् । इति सौत्रामण्यधिकरणम् ॥ ३ ॥

सर्वपृष्ठेष्ट्यधिकरणम् (४)

सर्वपृष्ठेष्टौ, 'इन्द्राय राथन्तराय निर्वपति–इन्द्राय बार्हताय' इत्यादिना षट्कर्माणि विधाय, तत्र यथाप्रकृतिपिष्टपिण्डस्य विभागप्रसक्तौ, श्रूयते—'रथचक्रमात्रः एकः पुराडाशो भवति–समन्तं पर्यवद्यति' इति।

तत्र अतिदेशात् प्रतियागं प्रदेशभेदेन स्विष्टकृदाद्यवदानानि कार्याणि। इति चेत् —

सर्वपृष्ठपुरोडाशे नावर्त्याः प्रतिपत्तयः ॥ ६५ ॥

प्रतिपत्तयो नावर्त्याः इत्यन्वयः। एकपुरोडाशे तत्तद्देवतोद्देशेन निरुप्तानां संकीर्णतया प्रदेशविशेषस्य यागसाधनत्वायोगेन, त्यागकाले 'यस्यै यन्निरुप्तं, तत्तस्यै न मम' इति बुद्ध्या निष्कृष्य त्यागात् साधारणः शेषः। ततः सकृदवदानेऽपि अगृह्यमाणविशेषत्वात् साधारणानि शेषकार्याणि नावर्त्यानि। वचनाच्चावदाने प्रदेशनियमः। इति सर्वपृष्ठेष्ट्यधिकरणम् ॥ ४ ॥

ऐन्द्रवायवस्य द्विर्भक्षणाधिकरणम् (५)

ऐन्द्रवायवशेषभक्षः सकृदेव, अन्यग्रहशेषभक्षवत्। इति चेत् —

ऐन्द्रवायवशेषस्य द्विवारं भक्षणं भवेत्।

'द्विरैन्द्रवायवं भक्षयति' इति वचनात्। इत्यैन्द्रवायवस्य द्विर्भक्षणाधिकरणम् ॥ ५ ॥

सोमे शेषभक्षाधिकरणम् (६)

सोमे भक्षणं नास्ति. 'ग्रहैर्जुहोति' 'चमसैर्जुहोति' इति वचनैः निःशेषहोमविधानात्। 'अल्पं जुहोति' इति वचनम् अनन्यार्थमस्ति इति चेत्; तथापि भक्षविध्यभावात् तदभाव एव। इति चेत् —

सोमे शेषस्य सद्भावाद्वचनाच्छेषभक्षणम् ॥ ६६ ॥

पुरस्तादैन्द्रवायवं भक्षयति' इति विशिष्टभक्षविधितः तत्प्रतीतेः अस्ति वाचनिको भक्षः। *समाख्या-निमित्तश्च, प्रैतु होतुश्चमसः' 'प्रब्रह्मणः' 'प्रोद्गातॄणां' 'प्रयजमानस्य' इति वैदिकी समाख्या। 'सोमचमसः' इति लौकिकी च। चमेः अदनार्थस्य औणादिकः अधिकरणसाधनः प्रत्ययः। अतो 'होत्रादिभिः चम्यते = अद्यते अस्मिन्' इति सिद्धः समाख्यानिमित्तो भक्षः। तदाह —

होत्रादीनां भवेद्भक्षः चमसेषु समाख्यया।

इति सोमे शेषभक्षाधिकरणम् ॥ ६ ॥

---

* इदमधिकरणान्तरं ग्रन्थान्तरेषु। अत्र तु ऐकाधिकरण्यमनयोः।

ससुब्रह्मण्योद्गातृभक्षाधिकरणम् (७)

'प्रोद्गातृणां' इत्यत्र अपसुब्रह्मण्यानां त्रयाणां भक्षः। न च उत्पूर्वस्य गायतेः सामद्वितीयभक्तिवाचितया तद्गानकर्तुरेकस्यैवोद्गातुः, पाशन्यायेन बहुवचनमनादृत्य प्रातिपदिकानुरोधाद्भक्षः इति युक्तम्; प्रातिपदिकलक्षणयापि बहुवचनस्यार्थवत्त्वे, अनन्यगतिकपाशन्यायस्यात्रानवतारात्। न च तथा सति प्रकृतकर्मसंबन्धिपुरुषमात्रलक्षणास्त्विति वाच्यम्; अनतिप्रसक्तावान्तरसामान्यस्य गानकर्तृत्वस्यैव लक्ष्यतावच्छेदकत्वात्। इति चेत् —

उद्गातृचमसं तस्य गणः सर्वोऽपि भक्षयेत् ॥ ६७ ॥

छन्दोगत्वेनैव लक्ष्यत्वात् ससुब्रह्मण्यानां चतुर्णां भक्षः इति भाष्यम्।

वार्तिककारस्तु; गानकर्तृणामेकस्तोत्रसंबन्धिनाँ होत्रादिवत् सदसि स्थितानामेव सदः प्रति नीयमानचमसभक्षकत्वमिति, अपसुब्रह्मण्यानामेवेत्यूचे। तदाह —

मतं वार्तिककारस्य सुब्रह्मण्यं विनेति तु।

इति ससुब्रह्मण्योद्गातृभक्षाधिकरणम् ॥ ७ ॥

ग्रावस्तुतः सोमभक्षाधिकरणम् (८)

'यथा चमसमन्यांश्चमसांश्चमसिनो भक्षयन्ति, अथैतस्य हारियोजनस्य सर्व एव लिप्सन्ते' इत्यत्र लिप्साः मात्रवचने फलाभावात् भक्षलक्षणार्थो लिप्साशब्दः। तत्र सर्वशब्दस्य 'सर्वे ब्राह्मणा भोज्यन्ता'मितिवत् सन्निहितविषयत्वात् चमसिनाञ्चातिसन्निधानात् त एव गृह्यन्त इति न ग्रावस्तुतो भक्षः। इति चेत् —

हार्योजनस्य लभते ग्रावस्तोतापि भक्षणम् ॥ ६८ ॥

चमसिनामपि प्रयोगान्तरकर्मान्तरगतानां वारणाय प्रकृतप्रयोगसंबन्धित्वे वक्तव्ये, तावतैव, असङ्कुचितवृत्तिसर्वनामस्वारस्ये च, नान्यार्थोपात्तचमसिभिर्विशेषणमिति ग्रावस्तुतोऽपि भक्षः।

इति ग्रावस्तुतः सोमभक्षाधिकरणम् ॥ ८ ॥

वषट्कर्तुः प्रथमभक्षाधिकरणम् (९)

वषट्कारनिमित्तोऽपि भक्षः सोमेऽस्तिकश्चन।

वषट्कर्तृविशेषितभक्षानुवादे विशिष्टानुवाददोषात्, एकस्मिन् समासपदे, अंशे प्राप्तवदुद्देश्यसमर्पणं–अंशे अप्राप्तवद्विधेयसमर्पणम्–इत्यसंभवात्, प्राथम्यविशिष्टभक्षान्तरं वषट्कारनिमित्तं विधीयते।

इति वषट्कर्तुः प्रथमभक्षाधिकरणम् ॥ ९ ॥

होमाभिषवयोः भक्षनिमित्तताधिकरणम् (१०)

'हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ति' इत्यत्र श्रुतानां भक्षातिरिक्तानां सर्वेषां, वचनान्तरात् अर्थाच्च प्राप्तत्वात्, होमाभिषवसमानकर्तृकं भक्षान्तरं विधीयते इति, अर्थात् विशिष्टनिमित्तकं पर्यवस्यतीति नैकैककर्तुर्भक्षः। तदाह —

तथैवास्त्यपरो भक्षो होमाभिषवहेतुकः ॥ ६९ ॥

इति होमाभिषवयोः भक्षनिमित्तताधिकरणम् ॥ १० ॥

भक्षणनिमित्तसमुच्चयाधिकरणम् (११)

चमसादिसमाख्याया निरवकाशत्वात्, होमाभिषवनिमित्तस्य वषट्कारनिमित्तस्य च भक्षणस्य चमसातिरिक्तग्रहेष्वपि सावकाशत्वात् समाख्यानिमित्त एव भक्षः। इति चेत् —

उक्तानां भक्षहेतूनां समवाये समुच्चयः।

तयोरपि वाचनिकयोः समाख्यया बाधायोगात्, तस्याश्च निरवकाशतया दुर्बलाया अपि ताभ्यां बाधायोगात्, हेतुत्रयसमुच्चये तन्निमित्तभक्षणानामपि समुच्चयः।

इति भक्षणनिमित्तसमुच्चयाधिकरणम् ॥ ११ ॥

एकपात्रे होतुः प्रथमभक्षाधिकरणम् (१२)

त्रयाणामेकत्र भक्षे; अध्वर्युहस्ते शेषस्य स्थितत्वात् सः प्रथमं भक्षयेत्। 'वषट्कर्तुः प्रथमभक्षः' इति तु, चमसिभ्यः प्रथममिति भविष्यति। इति चेत् —

समवाये वषट्कर्तुः प्रथमं भक्षणं मतम् ॥ ७० ॥

वचनस्य न्यायमात्रेण सङ्कोचायोगात्, 'होते वनः प्रथमः पाहि' इति मन्त्रवर्णात्, होमापेक्षया वषट्कारप्राथम्याच्च वषट्कर्तुरेव प्रथमं भक्षः।

इति एकपात्रे होतुः प्रथमभक्षाधिकरणम् ॥ १२ ॥

भक्षस्यानुज्ञापूर्वकत्वाधिकरणम् (१३)

'नानुपहूतेन सोमः पातव्यः' इत्यत्र उपहूतशब्देन अनुज्ञानमुच्यत इति अनुज्ञापूर्वकमेव भक्षणमित्याह —

अनुज्ञातैः सोमभक्षः कर्तव्यो वचनाद्भवेत्।

इति भक्षस्यानुज्ञापूर्वकत्वाधिकरणम् ॥ १३ ॥

वैदिकवचनेनानुज्ञापनाधिकरणम् (१४)

तच्चानुज्ञानं लौकिकाच्छब्दात् मन्त्राद्वा इति चेत् —

अनुज्ञानश्च मन्त्रेण कर्तव्यं लिङ्गदर्शनात् ॥ ७१ ॥

लिङ्गवन्मन्त्राम्नाने लौकिकाप्रसक्तेस्तेनैवानुज्ञानम् ।

इति वैदिकवचनेनानुज्ञापनाधिकरणम् ॥ १४ ॥

वैदिकवाक्येन प्रतिवचनाधिकरणम् (१५)

'उपहूतउपह्वयस्व' इति मन्त्रयोः, प्रथमचरमभाव्यनुज्ञापनानुज्ञयोरसामर्थ्यात् वाक्यवशेन संपूर्णो मन्त्रः उभयत्रावृत्त्या प्रयोक्तव्यः । इति चेत् —

अनुज्ञानुज्ञापनयोर्मन्त्रौ व्युत्क्रमतो मतौ ।

वाक्क्रमयोर्लिङ्गबाध्यत्वात्, अर्थक्रमानुरोधेन प्रथमभाव्यनुज्ञापने 'उपह्वयस्व' इति, चरमभाव्यनुज्ञायां 'उपहूतः' इति च प्रयोक्तव्यः ।

इति वैदिकवाक्येन प्रतिवचनाधिकरणम् ॥ १५ ॥

एकपात्राणामनुज्ञापनाधिकरणम् (१६)

तदुपह्वानमेकपात्रिणामन्येषाञ्च । 'नानुपहूतेन' इति वचनाविशेषात् । इति चेत् —

एकपात्रप्रसक्तानामेवानुष्ठानमिष्यते ।

दृष्टार्थमनुज्ञापनं व्यलीकं भागाधिक्यञ्च मर्शयितुमिति, एकपात्राणामेव ।

इत्येकपात्राणामनुज्ञापनाधिकरणम् ॥ १६ ॥

स्वयं यष्टुर्भक्षाधिकरणम् (१७)

होतृसमाख्याता याज्याः । तत्र काचित् होतुरपनीय यजमानस्य विहिता । तत्र सैवापनेया । न वषट्कारः । 'याज्या या-अधिवषट्करोति' इति तयोर्भेदावगमात् । 'स्वयं वा निषद्य यजति' इत्यस्यापि याज्यापनयेनैव चारितार्थ्यात् । ततश्च होतैव वषट्कर्ता भक्षयिता च । इति चेत् —

याज्यायां यष्टुरस्यैव स्याद्वषट्कृतिभक्षणम् ॥ ७२ ॥

संपूर्णयष्टृत्वस्य वषट्कारेण विना अयोगात्, 'अनवानं वषट्कुर्यात्' इति याज्यावषट्कारयोरन्तराऽनवाननप्रतिषेधाच्च वषट्कारपूर्वकं भक्षणं होतुरपनीतं यजमानस्यैव स्यात् ।

इति स्वयं यष्टुर्भक्षाधिकरणम् ॥ १७ ॥

फलचससाधिकरणम् (१८)

'यदि राजन्यं वैश्यं वा याजयेत्, स यदि सोमं बिभक्षयिषेत्, न्यग्रोधस्तिभिनीराहृत्य तास्संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेत्, न सोमम्' इत्यत्र यजमानचमसे भक्षमात्रं विक्रियते। तस्यैवाद्यन्तयोः कीर्तनात्। इति चेत् —

स्तिभिन्यस्साधनं यागे

यागीयद्रव्वप्रतिपत्तित्वाद्भक्षस्य तस्यैव प्राकृतस्येह प्रत्यभिज्ञानात् अनेन क्रमेण यजमानचमसयागाभ्यास एव द्रव्यं विधीयते। तद्विधौ च भक्षणं प्राप्तमेवानूद्यत इति याग एव स्तिभिन्यः साधनम्। एतेनाभिषवयुक्तपूतीकानामपि यागसाधनत्वं व्याख्यातम्। इति फलचमसाधिकरणम् ॥ १८ ॥

अनुप्रसर्प्यधिकरणम् (१९)

राजसूये दशपेयो नाम सोमयागः। तत्र प्रकृतितो दश चमसाः प्राप्ताः। तत्र वचनद्वयं श्रूयते —'दश दशैकैकं चमसमनुप्रसर्पेयुः' इत्येकं 'शतं ब्राह्मणाः सोमं भक्षयन्ति' इत्यपरम्। तत्र यजमानचमसं दश राजन्या भक्षयेयुः। 'अनुप्रसर्पेयुः' इति विधिश्रवणेन दशत्वसंख्याविधानात् प्राकृतीसंख्या बाधिता। जातिस्तु स्थितैव। तत्र जातिसंख्ययोर्नियमेन यजमानचमसे दशराजन्याः, शिष्टेषु दश दश ब्राह्मणा इति फलिष्यति। (सुस्थितौ च तत्र जातिसंख्ययोर्नियमे)[1] ब्राह्मण इति तु वर्तमानसरूपत्वात्, प्रचयशिष्टसंख्यानुवादः। ब्राह्मणपदन्तु भूम्ना ब्राह्मणाब्राह्मणसमुदायानुवादकमिति चेत् —

पिबेयुर्ब्राह्मणाश्शतम्।

समस्तानुवादस्य लक्षणायाश्चासति बाधकेऽनुपपत्तेः, शतानुवादेन ब्राह्मणत्वं पञ्चमलकारेण विधीयते। तेन न्यायप्राप्ता राजजातिर्निवर्तत इति ब्राह्मणा एव शतं भक्षयेयुः॥

इत्यनुप्रसर्प्यधिकरणम् ॥ १९ ॥

इति लघुवार्तिकाटीकायां तृतीयाध्यायस्य पञ्चमः पादः।

॥ अथ षष्ठः पादः ॥

पर्णमय्यधिकरणम् (१)

'यस्य खादिरस्स्रुवा भवति' 'यस्य पर्णमयी जुहूर्भवति' इत्यनारभ्य श्रुतं पर्णत्वादि अव्यभि-

---

[1] इदं वाक्यं अनन्वितं, मातृकायां वर्तते।

चरित क्रतुसंबन्धिजुहूद्वारा, जुह्वादिलक्षितक्रत्वङ्गत्वं प्रतिपद्यत इत्यविगीतम् । तत्रोपदेशातिदेशाभ्यां प्राप्तजुहूद्वारा प्रकृतिविकृतिसाधारण्येन प्रत्यक्षविधिना विधीयते पर्णत्वादि । इति चेत् —

अनारभ्य विधानं यत्प्रकृतिं तत्प्रपद्यते ॥ ७३ ॥

अतिदेशे कृते जुहूप्राप्त्युपजीवनेन विकृतौ पर्णत्वप्राप्तिः स्यात् । जुह्वा सहैव तत्प्राप्तौ पुनर्विधानं व्यर्थम् । पर्णत्वं विहाय नातिदेशः । उपकारविशेषणानां पदार्थानां समुच्चित्यैव तद्विशेषणत्वस्य प्रकृतौ क्लृप्ततया, विकृतावपि तथैवातिदेशः । उपदेशापौष्कल्येऽतिदेशाप्रवृत्तेस्त्वग्रतः प्रकृतावेवा-नारभ्याधीतानां निवेशः ।

इति पर्णमय्यधिकरणम् ॥ १ ॥

सामिधेन्यधिकरणम् (२)

अनारभ्य, 'सप्तदश सामिधेनीरनुब्रूयात्' इति श्रुतम् साप्तदश्यं, प्राकरणिकञ्च पाञ्चदश्यं, वाक्याद्विकल्पितं सामिधेन्यङ्गं, प्रकरणमनादृत्येति चेत् —

विरुद्धं साप्तदश्यादिविकृतिं प्रतिपद्यते ।

सामिधेनीस्वरूपे संख्ययोर्वैयर्थ्यात्, अपूर्वसाधनत्वांशे तन्निवेशे वाच्ये, प्रकरणेन तत्साधनत्वं पाञ्चदश्ये झटिति प्रतीयते । साप्तदश्ये त्वव्यभिचरितक्रतुसंबन्धिसामिधेनीद्वारा क्रत्वपूर्वमुपस्थाप्य तत्साधननिवेशो विलम्बत इति नैराकांक्ष्यात् प्रकृतेः, श्रुतसाप्तदश्यासु मित्रविन्दादिषु निविशते साप्तदश्यम् ।

इति सामिधेन्यधिकरणम् ॥ २ ॥

नैमित्तिकसाप्तदश्यस्य प्रकृतिगामिताधिकरणम् (३)

प्रकृतावेव, 'सप्तदशानुब्रूयाद्वैश्यस्य' इति श्रुतं साप्तदश्यं, वाक्यप्रकरणयोरविशेषात् पाञ्चदश्ये न विकल्पताम्–इति शङ्कित्वा, सर्वप्रयोगसाधारणं पाञ्चदश्यं वैश्यप्रयोगं लक्षणया यावद्गच्छति, तत्पूर्व-मेव तदुद्देशविहितं साप्तदश्यं तेन संबध्यते । प्रथमञ्चानुपजातविरोधिपाञ्चदश्यं, नाप्राप्तमुत्तरं बाधते । उत्तरन्तु न पूर्वाबाधेनात्मानं लभते । ब्राह्मणराजन्यप्रयोगयोः सावकाशं नित्यम् । नैमित्तिकन्तु निरवकाशमिति न विकल्प इत्युक्त्वा, पूर्वपक्षमान्द्यमत्रालोच्य, असूत्रितमपि काम्यमुदाहरद्भाष्यकारः ।

'गोदोहनेन पशुकामस्य प्रणयेत्' इत्यत्र, न काम्यदोहनेन नित्यचमसबाधः । पुरुषार्थत्व-क्रत्वर्थत्वाभ्यां भिन्नविषयत्वात् । चमसबाधे क्रतृवैगुण्यात्, विगुणक्रत्वाश्रितगुणस्यापि वैगुण्यापत्त्या क्रतुगुणफलयोरभावापाताच्च । अतो विकृतिगामितागोदोहनादेः । क्रतवे चमसेन प्रणीय, कामाय गोदोहनेन प्रणयनान्तरं वा कर्तव्यम् । इति चेत् —

काम्यं नित्यस्य बाधेन प्रकृतावतिष्ठते ॥ ७४ ॥

सामान्यतः प्रवृत्तत्वपूर्वभावित्वसावकाशत्वैः, नित्यस्य बाध्यत्वम्। काम्यस्य तद्वैपरीत्यात् बाधकत्वम्। पुरुषार्थप्रत्यासत्तेरपि नित्यनैमित्तिकयोर्बाधकं काम्यम्। अत एव, 'एकविँशतिमनुब्रूयात् प्रतिष्ठाकामस्य' इति विहितकाम्यानुवचनान्तरेण, नित्यं पाञ्चदश्यं-नैमित्तिकं साप्तदश्यञ्च बाध्यते। एकप्रणयनसंबन्धात् द्वित्रविषययोरपि विरोधोऽस्त्येव। तथा च पशुकामप्रयोगे बाधितश्चमसः, ततोऽन्यत्राङ्गमिति न क्रतुवैगुण्यम्। नापि विगुणक्रत्वाश्रितत्वम्। न वा प्रणयनाभ्यासः। तस्मिन्प्रयोगे चमसरहितप्रणयनस्यैवाङ्गत्वात्। काम्यगोदोहनेन प्रणयनस्य प्रसङ्गसिद्धत्वादिति।

इति नैमित्तिकसाप्तदशस्य प्रकृतिगामिताधिकरणम् ॥ ३ ॥

पवमानेष्ट्यधिकरणम् (४)

आधानं पवमानेष्ट्यश्च सन्निहितास्समाम्नाताः। तत्रेष्टीनां विश्वजिन्न्यायेन स्वर्गफलकतया, तत्सन्निध्याम्नातमाधानं, अतिदेशिग्निसंस्कारकत्वेनेष्ट्यङ्गम्। इति चेत् —

नाधानं पवमानेष्टेरङ्गम्

फलवत्कर्माङ्गत्वेनाग्नीनां, तदुत्पादकाधानमपि फलवत्। पवमानेष्ट्योऽपि आधान-आधानप्रकरणाधीत पदाहवनीयवाक्यादग्न्यर्थाः। तद्वाक्याभावे फलवदाधानप्रकरणात् तदङ्गानि च। इति न स्वर्गफलाः। अत आधानं नेष्ट्यङ्गम्।

इति पवमानेष्ट्यधिकरणम् ॥ ४॥

आधानस्य प्रकृतिविकृत्यर्थताधिकरणम् (५)

अनारभ्याधीतमाधानं, पर्णत्वादिवदग्निद्वारोपस्थितक्रत्वङ्गम्। इति चेत् —

अग्न्यर्थमेव तत्।

पर्णत्वस्याकृतिविशेषरूपजुह्वर्थत्वे, तेन विनापि काष्ठान्तरेण तदाकारसंभवात्, वैय्यर्थापत्तेः, युक्तं यत्तल्लक्षितक्रत्वपूर्वार्थत्वं वाक्यात्। आधानस्य तु श्रुत्यवगताद्दष्टरूपाहवनीयाद्यर्थत्वेऽपि तद्रूपस्यान्यतः सिद्ध्यनवगमेन वैयर्थ्यायोगात् न क्लेशेन क्रत्वपूर्वार्थत्वम्।

इत्याधानस्य प्रकृतिविकृत्यर्थताधिकरणम् ॥ ५ ॥

पवमानेष्ट्यनतिदेशाधिकरणम् (६)

पवमानेष्टिष्वग्नयोऽतिदेशप्राप्ताः, तदुत्पादनायार्न्याः कायाः, तत्राप्यग्न्यर्थमन्याः, इति यावत्य

एकेनान्हा भवन्ति, तावत्यः कार्याः । इति चेत् —

पवमानेष्टिषु न ताः,

प्रथममप्याहवनीये कर्तव्याः । ताभिरग्निसिद्धावन्यवैयर्थ्यम् । असिद्धावपि सुतराम् । अतिदेशात्-प्राप्तानामप्यसंभवेन बाधात् । इष्टीनामग्न्यर्थत्वे–आधानाङ्गत्वे वा–इष्टिसाध्यानां तत्साधनत्वायोगात् । पवमानेष्टीनां दर्शाद्यङ्गत्वमनाशङ्क्यमिति नातिदेशात्पवमानेष्टिषु इष्ट्यन्तरप्राप्तिः । अग्न्यङ्गत्वेऽप्येतद्विधिवेलायां प्रकृत्यङ्गत्वासिद्ध्या तदतिरिक्तस्यैवातिदेशाच्च ।

इति पवमानेष्ट्यनतिदेशाधिकरणम् ॥ ६ ॥

पशुधर्माणामग्नीषोमीयार्थत्वाधिकरणम् (७)

ज्योतिष्टोमे त्रयः पशवः । तेष्वग्नीषोमीयः क्रय सन्निधावुत्पन्नोऽपि, 'स एष उपवसथीयेऽहन् द्विदैवत्यः पशुरालभ्यते' इति वचनात् औपवसथ्येऽहनि अनुष्ठीयते । सवनीयस्त्वौपसथ्ये सौत्ये च श्रुतः—'आग्नेयः पशुरग्निष्टोम' इत्यौपवसथ्ये, 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपकारोति' इनि सुत्यायाम् । गौरानुबन्ध्यस्त्ववभृथान्ते श्रुतः । पशुधर्माश्च यूपच्छेदादयः औपवसथ्ये समग्राः श्रुताः । तत्राग्नीषोमीयस्य पशुधर्माणाञ्चानुष्ठानसादेश्यलक्षणस्थानप्रमाणं बाधित्वा, ज्यौतिष्टोमिकमहाप्रकरणात् तेषां तदङ्गत्वे प्राप्ते —

सोमयागेऽनुपयुक्ता धर्मा आनर्थक्यतदङ्गन्यायेनाङ्गभूतपशुयागेष्ववतरन्तोऽविशेषात् त्रिष्वप्यवतीर्णाः त्रयाणामप्यङ्गं भवन्ति । न च सवनीयस्य सोमयागद्वारकं प्रकरणम्, औपवसथ्य एव गुणानाकृष्टशक्तिकविधिना तद्विधानात् । सुत्यायान्तु, आश्विनग्रहग्रहणोत्तरकालविधौ संक्रान्ततया यागाविधायित्वात् । अतोऽवान्तरप्रकरणात् तदर्था एव धर्मा इति वाच्यम् । सुत्याकालोत्पन्नदूरस्थयागानुवादेन, 'वपया प्रातस्सवने प्रचरति–माध्यन्दिनसवने पुरोडाशेन–अङ्गैस्तृतीयसवने' इत्युपादेयगुणविधिसंभवादौपवसथ्योत्पन्नदूरस्थकर्मानुवादेन कालस्यानुपादेयस्य विधातुमशक्यतया, कालविशिष्टकर्मण एव सुत्यायामुत्पत्तेरवान्तरप्रकरणस्योत्पत्तिविधिविधुरौपवसथ्येऽहन्यनुन्मेषात । न च प्रातस्सवने वपाप्रचारद्वारा औपवसथ्योत्पन्नस्यापि सन्निधानात्कालविधिर्युक्त इति शङ्क्यम्; तथाप्यपाकरसादीनां वपाप्रचारात्प्राक्कालिकानां प्रातस्सवने विपरिवृत्त्यभावेन तत्र कालविध्ययोगतादवस्थ्यात् । तस्मात्सवनीयस्यावान्तरप्रकरणाभावात्, अग्नीषोमीयस्थानस्य दुर्बलत्वात्, ज्यौतिष्टोमिकमहाप्रकरणद्वारकसंबन्धस्त्रिष्वपि तुल्य इति तुल्यवद्धर्मसंबन्ध उपदेशात् । इति चेत् —

पशुधर्मास्तु दैक्षगाः ॥ ७५ ॥

भवेदानर्थक्यतदङ्गन्यायः, यदि साक्षात्तद्धर्मग्राहिपशुयागो निकटे न स्यात् । शक्नोतित्वग्नीषोमीय-

स्तत्रानुष्ठीयमानः तद्धर्मान् ग्रहीतुमिति तदर्था एवोपदेशात्ते धर्माः । महाप्रकरणस्यापि तावतैवोपपन्नत्वेनाविरोधात् । अन्यौ द्वावप्यतिदेशेन धर्मान् गृह्णीत इति 'यो दीक्षितो यदग्नीषोमीय'मिति वाक्योत्पन्नो दैक्षः, तद्वाः पशुधर्माः ।

इति पशुधर्माणामग्नीषोमीयार्थत्वाधिकरणम् ॥ ७ ॥

शाखाहरणादीनामुभयदोहार्थताधिकरणम् (८)

दर्शपूर्णमासयोः, सायं दोहः पूर्वेद्युः । प्रातर्दोहः परेद्युः कपालोपधानानन्तरं क्रियते । शाखाच्छेदादयस्तु केचन धर्माः पूर्वेद्युः क्रियमाणाः सन्निधानात्सायं दोहार्थाः । इति चेत् —

उभयार्था दोहधर्माः

प्रकरणात्, दधियागस्य परेद्युरनुष्ठीयमानस्य स्थानस्याप्यभावात् दध्युत्पादार्थदोहनान्तश्च शाखाच्छेदादेश्च 'गुणानाञ्च परार्थत्वा'दिति न्यायेन परस्पराङ्गाङ्गिभावायोगात् । अथ उभयार्थाः ।

इति शाखाहरणादीनामुभयदोहार्थताधिकरणम् ॥ ८ ॥

ग्रहधर्माणां सवनत्रयार्थताधिकरणम् (९)

प्रातस्सवनसन्निधौ, 'उपोषेऽन्ये ग्रहास्साद्यन्तेऽनुपोषे ध्रुवः' इत्याम्नातानां सन्निधानासंदेहात् प्रातस्सवनार्थता । इति चेत् —

ग्रहधर्मास्समस्तगाः ।

सवनत्रवगाः । प्रकरणबलीयस्त्वात् । इति ग्रहधर्माणां सवनत्रयार्थताधिकरणम् ॥ ९ ॥

रशनाधर्मसाधारण्याधिकरणम् (१०)

अग्नीषोमीये यूपपरिव्याणं श्रुतम्, 'परिव्ययत्यूर्ध्वे रशना' इति । सवनीये चाश्विनं ग्रहं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययति' इति । तत्र रशनाधर्माः, 'त्रिवृद्भवति'— 'दर्भमयी भवति'— 'प्रपिष्टानां कर्तव्या' इत्येवमादयः क्रमात् अग्नीषोमीयार्थाः । इति चेत् —

परिव्याणद्वयस्यापि सधर्मरशनार्थता ॥ ७६ ॥

यूपमिति द्वितीयाश्रुत्या रशनातद्धर्माणां एकयूपार्थत्वावगमात् स्थानबाधः ।

इति रशनाधर्मसाधारण्याधिकरणम् ॥ १० ॥

अंश्वदाभ्याधिकरणम् (११)

पूर्वोक्ता ग्रहधर्माः प्रकरणात् तत्राम्नातानामेव स्युः । नानारभ्य श्रुतांश्वदाभ्ययोः । इति चेत्—

ग्रहधर्मास्समाम्नाता भवन्त्यप्यंश्वदाभ्ययोः ।

प्रकरणाद्यागार्थानां तद्यागसाधनग्रहमात्रनिवेशात् अंश्वदाभ्ययोरपि तत्साधनत्वात् तद्धर्मत्वम् ।

इत्यंश्वदाभ्याधिकरणम् ॥ ११ ॥

चित्रिण्यधिकरणम् (१२)

अग्निचयने समाम्नाता इष्टकाधर्माः, 'अखण्डामकृष्णा 'मित्यादयः, अप्रकरणाधीतानां न भवन्ति । विनियोजकवाक्यस्याप्यप्राकरणिकत्वेन, तद्द्वारकप्रकरणसंबन्धस्याप्यभावात् । इति चेत्—

एवमेवेष्टकाधर्माश्चित्रिण्यादिषु सङ्गताः ॥ ७७ ॥

अप्राकरणिकवाक्येनापि दूरस्थानुवादेन तदपूर्वसाधनसंबन्धबोधनात् तत्साधननिवेशिनो धर्मास्तास्वपि स्युः ।

इति चित्रिण्यधिकरणम् ॥ १२ ॥

अभिषवादीनां सोमार्थत्वाधिकरणम् (१३)

ज्योतिष्टोमे राजन्यादिनिमित्तः फलचमसः इज्याविकारः इति स्थिते, सोमेन समानविधानत्वादुपदेशेनैवापूर्वसाधनांशे [1]विहितानभिषवादींश्च गृह्णाति । व्रीहिषु [2]श्रुतानवघातादीनि वयवाः । इति चेत्–

स्तिभिनीनां न सोमेन स्यात्समानविधानता ।

व्रीहियवयोरनुष्ठानतोऽनित्यत्वेऽपि इतरेतरानालोचनेन विहितयोराम्नानतो नित्यत्वात्, अनुष्ठानतो नित्यद्वाराभावात् तुल्यवद्धर्मग्राहित्वमुक्तम् । निमित्ते श्रूयमाणेऽनुष्ठीयमानस्तु फलचमसो न नित्यवदाम्नातानां, नित्यवदपूर्वं साधयतां धर्माणां द्वारीभवितुमर्हति । 'अभिषवादिधर्मैः नित्यवत्क्रतोरुपकुर्यात्–अनित्यफलचमसद्वारा' इत्यनुपपत्तेः । सोमस्तु, आम्नानतोऽनुष्ठानतश्च नित्यो युक्तं यद्द्वारतां प्रतिपद्यते । धर्मविधानमपि नित्ये विधाय चरितार्थानां, निमित्तालोचनेन पश्चाद्विधीयमानफलचमसे स्वार्थविधानं नावृत्त्या विना स्यात् । तस्मादतिदेशत एव धर्माः । ननु स्तिभिनीत्वेन द्वारत्वे उक्तदूषणानि, नापूर्वसाधनत्वेन । तद्रूपस्य सर्वदा सर्वान्प्रत्यव्यभिचारात् । यथा नीवारपूतक्रयोः तादृरूप्यणानित्यत्वेऽप्यपूर्वार्थत्वेन नित्यतया सामानविध्यं व्रीहिसोमाभ्याम् । न च विधिवाक्ये तद्रूपेण तयोरविधानात् व्रीहिसोमावयवानुस्यूत्या तद्रूपेणैव विधानात्, विजातीयाकारस्यावर्जनीयत्वेन ग्रहणान्न दोषः । स्तिभिनीनान्तु न सोमावयवविवक्षया विधानम् । किन्तु, निमित्ते तेन रूपेणेति वैषम्यमिति वाच्यम् ; तर्हि व्रीहित्वेनैव विधिवाक्ये तेषां विधानात्, तत्र श्रुतावघातादीनां यवेष्वप्राप्त्यापत्तेः । यदि च तत्रा-

---

[1] विहिताभिषवादींश्च–इति मातृकायामस्ति । [2] श्रुतावघातादीनिव–इति मातृकायामस्ति ।

पूर्वार्थत्वेनैव तेषां शेषित्वात् यवेष्वपि तद्रूपसत्त्वात् तत्प्राप्तिः ; तर्हि स्तिभिनीनामपि स्वरूपे धर्माणां वैय्यर्थ्यात् सोमेष्विवापूर्वीयत्वेनैव शेषित्वमिति तुल्यम् । तस्मादत्र कथं सिद्धान्त इति केचित् ।

इत्यभिषवादीनां सोमार्थत्वाधिकरणम् ॥ १३ ॥

मुख्यप्रतिनिध्योः सामानविध्याधिकरणम् (१४)

मुख्यव्रीह्यभावे नीवारादिः प्रतिनिधिर्वक्ष्यते[1] । तत्रापि पूर्वाधिकरणसिद्धान्तवदनित्यद्वारत्वादसमानविधानत्वमिति चेत् —

मुख्येन स्यात्प्रतिनिधेः

प्रतिनिधेः मुख्येन सामानविध्यं स्यात् । मुख्याभावनिमित्ते तेन रूपेण विधानात् । व्रीह्यवयवविवक्षयैव सकलासंभवे विधानात् नानित्यद्वारत्वमिति समानविधानता ।

इति मुख्यप्रतिनिध्योः सामानविध्याधिकरणम् ॥ १४ ॥

प्रतिनिधिषु मुख्यधर्मानुष्ठानाधिकरणम् (१५)

'यदि सोमं न विन्देत् पूतीकानभिषुणुयात्' इत्यत्र, मुख्याभावे निमित्ते पूतीकत्वेन विधानात् फलचमसवत् असमानविधानता । इति चेत् —

पूतीकानां तथैव सा ॥ ७८ ॥

नाभावे विधिः । प्रतिनिधिनियमोऽयमिति षष्ठे वक्ष्यते[2] । तथा च पूर्ववत्समानविधानता ।

इति प्रतिनिधिषु मुख्यधर्मानुष्ठानाधिकरणम् ॥ १५ ॥

संस्थाधिकरणम् (१६)

ज्योतिष्टोमस्य चतस्रस्संस्थाः—अग्निष्टोमः – उक्थ्यः—षोडशी—अतिरात्रश्चेति । तत्राग्निष्टोमसंस्थाक्रत्वर्था, फलाश्रवणात् । अन्यास्तिस्रः क्रत्वाश्रिताः फले विधीयन्ते । 'पशुकाम उक्थ्यं गृह्णीयात्' – 'षोडशिना वीर्यकामस्स्तुवीत'– 'अतिरात्रेण प्रजाकामं याजयेत्' इति । पशुकामवाक्ये उक्थ्यशब्देन संस्थोच्यते, न ग्रहणम् । तत्र तस्य वाच्यस्तोत्रसंबन्धेन लाक्षणिकत्वात् । संस्थायामपि स्तोत्रसंबन्धेन लक्षणेति चेत् : तत्संस्थक्रताविव तत्स्तोत्रसंबद्धषोडश्यादावप्रयोगात् । तत्र चाकृत्यधिकरणन्यायेन संस्थाया एव वाच्यत्वात् । न च स्तोत्रस्यैव फले विधानम ; तस्य नपुंसकशब्दवाच्यत्वात् । संस्थायाश्चाश्रयतो लिङ्गलाभात् । अत्र चोकथ्यषोडशिशब्दयोर्वाक्यशेषात्पुल्लिङ्गत्वावगमात्

---

[1] ६-३-४ [2] ६-३-१३

संस्थयोरेव फले विधानम् । ग्रहणस्तोत्रयोश्चानुवादमात्रम् । अतिरात्रशब्दस्तु रात्रिमतीत्य समाप्यमानक्रतौ वर्तमानोऽपि, क्रतोः 'सोमेन यजेत' इति विहितत्वात् समाप्तिरेवात्र विधेयेति, तस्या एव फलम् । एवं तिसृणां संस्थानां फलसाधनत्वे, दीक्षणीयादीन्यङ्गान्याश्रयीभूतयागस्य–संस्थानाञ्च समानविधानानि । सर्वस्यापि फलवत्त्वेन प्रकरणाविशेषात् । इति चेत् —

स्वाश्रयक्रियया संस्थाः न समानविधानकाः ।

दध्यादिवदाश्रयाकांक्षाणां संस्थानामाश्रयक्रियानिरपेक्षतयाङ्गसंबन्धायोगात् क्रियायाश्च स्वयं फलवत्याः संस्थाभिर्विनाप्यङ्गसंबन्धोपपत्तेर्विषेशग्रहणान्न तुल्ववदङ्गग्राहित्वम् । तथात्वे चाङ्गविधीनां प्रधानविध्येकवाक्यतया प्रयोजनपर्यवसायित्वान्नित्यानित्यप्रयोगरूपानुसारेण नित्यवदनित्यवच्च स्वार्थं विदधतामावृत्तिः स्यात् । तथा फलाय विधेयगुणस्य परप्रयुक्तत्र्यंशभावनाश्रयतया तत्राङ्गानि विधाय पश्चाद्विधीयमानगुणकरणिकायामपि क्रियायां स्वार्थविधानादावृत्तिः स्यात् । सोमतत्संस्काराणामाश्रयक्रियामात्रार्थतया तद्विधिमिश्रविधिविधेयानामारादुपकारकाङ्गानां तदवान्तरप्रकरणेनाश्रयक्रियां प्रत्येवाश्रयतया, असंबन्धिसंस्कारविधिभिः विच्छिन्नप्रकरणाः संस्थाः न दीक्षणीयाद्यङ्गग्रहणसमर्था इत्यतिदेशादेव तास्वङ्गप्राप्तिः । आश्रयक्रियार्थानुष्ठितैरङ्गैरेव प्रसङ्गसिद्धेर्न पृथक् क्रियन्ते । अतो न समानविधानाः ।

इति संस्थाधिकरणम् ॥ १६ ॥

इति लघुवार्तिकटीकायां तृतीयाध्यायस्य षष्ठः पादः ॥

॥ अथ सप्तमः पादः ॥

वेदिबर्हिरधिकरणम् (१)

दर्शपूर्णमासयोः, 'वेद्यां बर्हिषि च हवींष्यासादयति' 'बर्हिर्लुनाति' 'वेदिं खनति' इत्यादिना विहितवेदिबर्हिस्तद्धर्माः प्रकरणात्प्रधानमात्रार्थाः । वाक्यश्रुतिभ्यां हविर्वेद्यादिमात्रार्थत्वे वैय्यर्थ्यात् । प्रयोगान्तरवेदिहविराद्यतिप्रसङ्गाच्च । इति चेत् —

अङ्गप्रधानहविषां वेदिधर्मादयस्समाः ॥ ७९ ॥

वाक्यसंकोचपरिहाराय प्रकृतदर्शपूर्णमासोपकारिहविर्मात्रग्रहणेऽप्यङ्गहविषां स्वस्वापूर्वनिवृत्तिद्वारा प्रधानोपकारित्वेन वैय्यर्थ्याप्रसक्तेः, सत्यपि चात्र प्रधानमात्रार्थत्वे प्रकृतप्रयोगसंबन्धिहविर्मात्रस्य द्वारत्वोपपत्तेः अङ्गप्रधानार्था वेद्यादयः ।

इति वेदिबर्हिरधिकरणम् ॥ १ ॥

यजमानधर्माणां प्रधानार्थत्वाधिकरणम् (२)

ज्योतिष्टोमे यजमानसंस्काराः केशश्मश्रुवापादयः कर्तृसंस्कारकास्सन्तः, तद्द्वाराऽङ्गप्रधानार्थाः। भोक्तृसंस्कारकत्वेन फलार्थत्वे, करणतुल्यकक्षत्वापत्तेः। इति चेत् —

प्रधानार्थाः पुनः केशश्मश्रुवापादयस्समाः।

भोक्तृत्वांशस्य प्रधानत्वाददृष्टत्वेन शास्त्रैकगम्यत्वात्, कर्त्रंशस्य तु तद्वैपरीत्यात्, फलप्रतिग्रहयोग्यताधानेऽपि फलसाधनत्वाबोधनेन करणतुल्यतानापत्तेः प्रधानार्था एव वपनादयो नाङ्गार्थाः।

इति यजमानधर्माणां प्रधानार्थत्वाधिकरणम् ॥ २ ॥

सौमिकवेदेरङ्गप्रधानार्थताधिकरणम् (३)

सौमिकी वेदिः प्रधानमात्रार्था। 'इयति शक्ष्यामहेऽस्यां कर्तु'मिति फलवच्चिकीर्षितप्रधानार्थत्वावगतेरिति चेत् —

वेदिरङ्गप्रधानार्था प्रचारे सौमिकी समा ॥ ८० ॥

साङ्गस्य फलवत्त्वेन चिकीर्षितत्वात् अङ्गप्रधानार्था वेदिरिति, अङ्गविकारपश्वादौ प्रवर्तते। नन्वङ्गेषु प्राकृतवेदिरस्तीति चेत्; उपदेशाच्छ्राधात्।

इति सौमिकवेदेरङ्गप्रधानार्थताधिकरणम् ॥ ३ ॥

अभिमर्शनस्याङ्गप्रधानहविरर्थताधिकरणम् (४)

दर्शपूर्णमासयोः, 'चतुर्होत्रापौर्णमासीमभिमृशेत्। पञ्चहोत्रामावस्याम्।' इति हविरभिमर्शनमन्त्रौ प्रधानमात्रार्थौ। पौर्णमास्यमावास्याशब्दयोस्तद्वाचित्वात्। इति चेत् —

अङ्गप्रधानहविषां मन्त्रौ तदभिमर्शनौ।

पौर्णमास्यमावास्याशब्दयोः कर्मवाचितयानयोरभिमर्शायोगात्, द्वितीयां सप्तम्यर्थां कृत्वा, तस्मिंस्तस्मिन्प्रयोगे तेन तेन मन्त्रेण–इति पर्यवसाने, अङ्गप्रधानहविरर्थता स्यात्। 'आसन्नानि हवींषि' इति वाक्यान्तरानुग्रहश्च भवति।

इत्यभिमर्शनस्याङ्गप्रधानहविरर्थताधिकरणम् ॥ ४ ॥

दीक्षादक्षिणयोः प्रधानार्थत्वाधिकरणम् (५)

ज्योतिष्टोमे, 'दण्डेन दीक्षयति' इति, 'द्वादशशतं दक्षिणा' इति दीक्षादक्षिणमङ्गप्रधानार्थम्। दीक्षाणां कर्तृसंस्कारकत्वात्, दक्षिणायाः कर्त्रानतिद्वारा प्रयोगाङ्गत्वात्। इति चेत् —

सोमे प्रधानमात्रार्था दीक्षादक्षिणया सह ॥ ८१ ॥

'दीक्षाः सोमस्य' 'दक्षिणाः सोमस्य' इति तादर्थ्यषष्ठ्या प्रधानमात्रार्थत्वावगमात्, परंपराश्रयणानर्थक्ययोरयोगात्, तन्मात्रार्थत्वम् ।

इति दीक्षादक्षिणयोः प्रधानार्थत्वाधिकरणम् ॥ ५ ॥

यूपावटदेशलक्षणाधिकरणम् (६)

यूपे श्रूयते, 'अर्धमन्तर्वेदि मिनोति, अर्धं बहिर्वेदि' इति । तत्र 'अर्धमन्तर्वेदि' इति विधिः । 'बहिर्वेदि' इत्यर्थप्राप्तानुवादः । इति चेत् —

अन्तर्वेदिबहिर्वेदीत्यन्तरालस्य लक्षणा ।

बहिरर्धस्य नित्यवत्प्राप्त्यभावात्, विधाने च वाक्यभेदात्, अर्धमेवान्तर्वेदीति परिसंख्यापत्तेः, उभाभ्यां संधिदेशो लौकिको लक्षितो वेदियूपावटमानाङ्गत्वेन विधीयते ।

इति यूपावटदेशलक्षणाधिकरणम् ॥ ६ ॥

हविर्धानस्य सामिधेन्यनङ्गताधिकरणम् (७)

'उत यत्सुन्वन्ति, सामिधेनीस्तदन्वाहुः' इति, सोमे दक्षिणहविर्धाने सामिधेनीः ब्रूयात् इत्यर्थके सामिधेन्यङ्गं विधीयते । इति चेत् —

देशस्स्यात्सामिधेन्यङ्गं हविर्धानेन लक्षितः ॥ ८२ ॥

कृतकरस्य हविर्धानस्य विधावपूर्वविधित्वानपेक्षितविधित्वयोः प्रसङ्गात् आहवनीयपश्चिमदेशस्य प्रकृतिप्राप्तस्य दक्षिणोत्तरहविर्धानाधारस्यानियतप्राप्तस्य लक्षणया देशविशेषस्य नियममात्रं विधीयते ।

इति हविर्धानस्य सामिधेन्यनङ्गताधिकरणम् ॥ ७ ॥

यजमानाभिन्नकर्त्रन्तरप्रतिपादनाधिकरणम् (८)

दक्षिणायुक्तानि सर्वकर्माणि यजमानेनैव साङ्गानि कार्याणि । सामानाधिकरण्यात्मने पदाभ्यां फलस्य कर्तृगामित्वावगमात्, तस्य च साङ्गप्रङ्गानसाध्यत्वात् । दक्षिणादानन्त्वदृष्टार्थं, सर्वकरणाशक्तयजमानविषयं वा । शक्तः स्वयमेव कुर्यात्, अशक्तस्तु स्वदानातिरिक्तमन्येन कारयेत् । इति चेत् —

हविस्त्यागादितोऽन्यत्र कारणीया क्रियेतरैः ।

दृष्टसंभवेऽदृष्टकल्पनस्य–दानपाक्षिकत्वस्य च परिहाराय परिक्रयार्थत्वं दानस्य । साङ्गकर्तृत्वञ्चाङ्गेषु

प्रयोजककर्तृत्वेन । अतो दक्षिणादानत्यागाभ्यामन्यत् ऋत्विक्कार्यम् ।

इति यजमानभिन्नकर्त्रन्तरप्रतिपादनाधिकरणम् ॥ ८ ॥

ऋत्विक्संख्यानियमाधिकरणम् (९)

स चर्त्विगेक एव । अध्वर्य्यादिसमाख्यानां तत्तत्कर्मनिमित्तत्वेन, एकस्मिन्नपि पाचकलावकादि-समाख्यावदुपपत्तेः । इति चेत् —

होत्राद्यास्ते च भिध्यन्ते संज्ञावरणभेदतः ॥ ८३ ॥

अप्रवृत्तपूर्वस्य कर्तुरभ्यर्थनात्मकवरणकाले तत्साध्यत्वेन 'ब्रह्माणं वृणीते' इत्यादिभ्यो गम्यमान समाख्या न क्रियायोगनिमित्ता भवितुमर्हति । बहूनि च वरणानि अभ्यासन्यायेन विधीयन्त इति, वृतस्य वरणायोगात् यावद्वरणमृत्विग्भेदः । तच्च महर्त्विजां होतृकाणाञ्च मन्त्रेण । अन्येषां लौकिक-वचनेन । वरणोत्तरकालञ्च, य एवं वृतः–स्ययञ्चैवमसानीति संकल्पयति, तस्मिन् लोकवेदयोः तत्त-त्समाख्यादर्शनात्, यजमानप्रार्थनर्त्विक्संकल्पाभ्यां अध्वर्युत्वादिकं साध्यम् । सत्रेषु सर्वेषां स्वयं प्रवृत्तेः संकल्पमात्रमेव निमित्तम् । तच्चालौकिकम् । अध्वर्युत्वादिकन्तु साध्यम् । दृष्टानत्यर्थत्वे-नैवोपपत्तावदृष्टकल्पनायोगात् । तथा च वरणभेदात् संज्ञाभेदाच्च तावता भेदः ।

इति ऋत्विक्संख्यानियमाधिकरणम् ॥ ९ ॥

चमसाध्वर्य्वधिकरणम् (१०)

चमसाध्वर्यवस्तु यौगिक्या समाख्यया अध्वर्युपुरुषा एव । इति चेत् —

चमसाध्वर्यवस्तेभ्यो भिन्नास्स्युः ।

वरणभेदात्तेभ्यो भिन्नास्स्युः । सदस्योऽपि वरणभेदादन्यः ।

इति चमसाध्वर्य्वधिकरणम् ॥ १० ॥

चमसाध्वर्यूणां बहुत्वाधिकरणम् (११)

'चमसाध्वर्यून् वृणीते' इत्यत्र बहुत्वस्य संस्कार्यगतत्वेनाविवक्षितत्वत् एकश्चमसाध्वर्युः । इति चेत् —

बहवस्तु ते ।

क्रत्वङ्गतया तेषामुपादेयत्वात् बहुत्वविवक्षा । 'वृतैश्चमसाध्वर्युभिः क्रतुं भावयेत्' इति । अत एव 'स्वाध्यायोऽध्येतव्यः' 'पुरोहितं वृणीते' 'अध्वर्युं वृणीते' इत्यादावुक्तरीत्योपादेयगतत्वात् विव-

क्षिता संख्या । तथा च, आध्वर्यवं सर्वमेकेनाध्वर्युणा कर्तव्यम् । एवं होत्रादिसमाख्यातमपि होत्रादिभिः । इति चमसाध्वर्यूणां बहुत्वाधिकरणम् ॥ ११ ॥

चमसाध्वर्यूणामियत्ताधिकरणम् (१२)

चमसाध्वर्युगतं बहुत्वं कपिञ्जलन्यायात् त्रित्वरूपम् । इति चेत् —

दश ते,

चमसदशत्वात् तेऽपि दश । इति चमसाद्वर्यूणामियत्ताधिकरणम् ॥ १२ ॥

शमितुरपृथक्त्वाधिकरणम् (१३)

संज्ञाभेदात् शमिता तेभ्योऽन्यः । इति चेत् —

शमिताध्वर्युपुरुषाणान्तु कश्चन ॥ ८४ ॥

समाख्याया यौगिकत्वात्–पृथग्वरणाभावाच्च–'पराङावर्ततेऽध्वर्युः पशोस्संज्ञप्यमानात्' इति वचनात्, अध्वर्य्वतिरिक्तः तत्पुरुषः शमिता । इति शमितुरपृथक्त्वाधिकरणम् ॥ १३ ॥

उपगातृणामपृथक्त्वाधिकरणम् (१४)

उपगास्तेभ्योऽन्ये । ऋत्विजां परस्परगुणभावायोगात् । तेषाञ्च गुणत्वात् । इति चेत् —

ऋत्विक्ष्वेवोपगातारः

प्रैषप्रैषार्थकारित्ववत् गुणभावसंभवात्–वरणाभावात्–यौगिकत्वाच्च समाख्यायाः, ऋत्विज एव ते ।

इत्युपगातृणामपृथक्त्वाधिकरणम् ॥ १४ ॥

सोमविक्रेतुः पृथक्त्वाधिकरणम् (१५)

सोमविक्रयी, वरणाभावात् ऋत्विङ्मध्य एव । इति चेत् —

तद्भिन्नस्सोमविक्रियी ।

अक्रत्वर्थत्वाद्विक्रयस्य नर्त्विजः कुर्युः, इत्यन्य एव सः । इति सोमविक्रेतुः पृथक्त्वाधिकरणम् ॥१५॥

सर्वेषामृत्विक्छब्दावाच्यत्वाधिकरणम् (१६)

ये वृताः पुरुषाः, ते सर्वे ऋत्विक्पदवाच्याः । [1]ऋतौ यजतीति ऋत्विक्छब्दः कृदन्तः, सर्वेषु तद्योगात् यष्टृशब्दवदविशिष्टः । इति चेत् —

---

[1] क्रतौ—इति मातृकापाठः ।

वृतेषु ऋत्विजः केचिद् बाह्याद्याः

वरणविशेषनिमित्तमृत्विक्त्वेन सर्वेषां यद्यपि चमसाध्वर्युवरणव्यावृत्तं अन्येष्वनुगतं वरणान्तरसामान्यं नास्ति, तथापि तत्तद्वरणविशेषा एव तावद्रूपेण निमित्तमिति भाष्यम् ।

तथात्वे, 'ऋत्विग्दधृ .... 'गित्यादिना क्विन्नन्तत्वेन निपातनस्य, 'ऋत्विग्यज्ञकृत्' इत्यस्य च बाधापत्तेः यौगिकत्वप्रसिद्धिविरोधाच्च, वरणविशेषनिमित्तत्ववद्यजनविशेषनिमित्तत्वेनापि चमसाध्वर्युव्यावृत्तिसिद्धेः, 'ऋत्विजो वृणीते' इत्यस्य, 'अध्वर्युं वृणीते' 'यूपं छिनत्ति' इत्यादिवत् अप्रसिद्धार्थत्वप्रसङ्गाच्च । तस्माद्यष्टृत्वविशेषनिमित्तमृत्विक्त्वं ब्रह्मादीनामेव ।

इति सर्वेषामृत्विक्शब्दावाच्यत्वाधिकरणम् ॥१६॥

ब्रह्मादीनामृत्विक्त्वनियमाधिकरणम् ॥ १७ ॥

ऋत्विक्संख्याया अनियमः । इति चेत् —

ते तु षोडश ॥ ८५ ॥

'ऋत्विग्भ्यो दक्षिणां ददाति' इत्युक्त्वा, 'अग्नीधे ददाति' 'ब्रह्मणे ददाति' इत्यादिना [1]षोडशानां संकीर्तनात् तावन्त एव । इति ब्रह्मादीनामृत्विक्त्वनियमाधिकरणम् ॥ १७ ॥

यजमानसाप्तदश्याधिकरणम् (१८)

पृथग्वरणविधानात् सदस्यः सप्तदश । न च ब्रह्मैव सदस्यः; तयोर्वरणभेदात् । इति चेत्—

स्वामिसप्तदशास्ते स्युः

सदस्यवरणस्यादृष्टार्थत्वात् स्वाम्येव सप्तदश । इति यजमानसाप्तदश्याधिकरणम् ॥ १८ ॥

ऋत्विजां नियतकार्यकर्तृत्वाधिकरणम् (१९)

षोडशर्विजां लिङ्गप्रकरणाभ्यां समाख्यां बाधित्वा, यद्येन कर्तुं शक्यं स तत् कुर्यादित्यव्यवस्था । इति चेत् —

तेषां कार्यं व्यवस्थया

लिङ्गप्रकरणयोरनियतकर्त्रापादकयोर्व्यवस्थाकांक्षत्वात् समाख्या कृतनियममनुमन्येते । तस्माद्यथासमाख्यं नियमः । नेष्टीयपोत्रीययाजमानादिविशेषसमाख्याभिः-विशेषवचनैश्च सामान्यसमाख्या बाध्यते ।

---

[1] शोडशानां—मातृकापाठः ।

यथा 'मैत्रावरुणः प्रेष्यति चान्वाह च' इति प्रैषेऽध्वर्योर्बाधः–अनुवचने होतुः। पूर्वोक्तसमाख्या-विनियोगस्यैवायं प्रपञ्चः। इति ऋत्विजां नियतकार्यकर्तृत्वाधिकरणम् ॥ १९॥

अग्नीनां सर्वार्थत्वाधिकरणम् (२०)

'यदाहवनीये जुहोति' इत्याद्यनारभ्याधीताहवनीयादेः प्रकृतिमात्रार्थत्वं, पर्णत्वादिवत्। इति चेत् —

अग्नयस्तुल्यवद्यान्ति होमान्प्राकृतवैकृतान् ॥ ८६ ॥

प्रत्यक्षद्वारत्वात् प्राकृताप्राकृतौपदेशिकेषु, अग्निहोत्रचतुरवत्तग्रहचमसामनोपहोमादिषु द्विरुक्तता दोषाभावात्, अतिदेशिकहोमवर्जं उपदेशादाहवनीयप्राप्तिः।

इत्यग्नीनां सर्वार्थत्वाधिकरणम् ॥ २० ॥

प्रैषानुवचनस्य मैत्रावरुणकर्तृकत्वाधिकरणम् (२१)

'मैत्रावरुणः प्रेष्यति चान्वाह च' इत्यत्र सहिताद्देशेन वक्तृविधौ वाक्यभेदापातात् व्यस्तेऽपि तत्कर्तृत्वम् इति चेत् —

प्रैषानुवचने युक्ते मैत्रावरुणकर्तृके।

एकैकात्मकस्य प्रैषस्यानुवचनस्य च निर्ज्ञातकर्तुत्वेनानपेक्षितविध्यायातात्, प्रैषानुवचनात्मकहोतायक्षदित्या-देरुभयकर्तृत्वानुपपत्त्या ताभ्यां विधिभ्यामपेक्षितः कर्ता, उभयात्मकमन्त्रोद्देशेन विधीयत इति न विशि-ष्टानुवाददोषः।

इति प्रैषानुवचनस्य मैत्रावरुणकर्तृकत्वाधिकरणम् ॥ २१ ॥

चमसहोमेष्वध्वर्युकर्तृत्वाधिकरणम् (२२)

विशेषसमाख्यया बाधात् चमसाध्वर्यव एव जुहुयुः। इति चेत् —

चमसानां न होतारश्चमसाध्वर्युसंज्ञिताः ॥ ८७ ॥

चमसेष्वध्वर्युवदिति चमसाध्वर्यवः इति सामान्यसमाख्यापेक्षत्वात् न बाधकत्वम्। अतोऽध्वर्युर्जुहुयात्। तस्य ग्रहहोमादिव्यापृतत्वे, तेऽपि जुहुयुः।

इति चमसहोमेष्वध्वर्युकर्तृत्वाधिकरणम् ॥ २२ ॥

श्येनादेरनेककर्तृत्वाधिकरणम् (२३)

सामवेदे विहितश्श्येनः। यजुर्वेदे वाजपेयः। तयोस्तत्रैव साङ्गप्रयोगविधेः, अतिदेशप्राप्त-नानाकर्तॄन् बाधित्वा, उपदेशरूपप्रयोगवचनेन तेन तेनैव स कर्तव्यः। इति चेत् —

श्येनादिषु स्युर्नानैव कर्तारः प्रकृताविव ।

पदार्थप्राप्त्यपेक्षः प्रयोगविधिः, सकर्तृकाणां पदार्थानामतिदेशेन प्राप्तिं प्रतीक्षत इति उपजीव्यविरोधेन, उपदेशात्मकोऽपि तदनुसारेणैव नानाकर्तृकान् पदार्थान्विधत्ते । समाख्या पाठनिमित्ता । न विधिनिमित्ता । पाठस्तु पदार्थानां नानावेदेष्विति, यथा प्रकृतिसोमयाग इव नाना कर्तारः ।

इति श्येनादेरनेककर्तृत्वाधिकरणम् ॥ २३ ॥

इति लघुवार्तिकटीकायां तृतीयस्य सप्तमः पादः ।

॥ अथ अष्टमः पादः ॥

दक्षिणादानस्य स्वामिकर्तृकत्वाधिकरणम् (१)

सोमे परिक्रयः आध्वर्यवे, औद्गात्रे च द्वादशशतं दक्षिणेत्याम्नातः, समाख्यावशादृत्विग्भ्यां कर्तव्यः । यजमानः तादृशमुपायं सामादिना कुर्यात् । इति चेत् —

परिक्रयो याजमानः

पणक्रयात्पूर्वमृत्विजाभावात्, परिक्रीतानाञ्चान्यत्रैव समाख्यया नियमात् यजमानेनापि कस्यचित् कर्तव्यत्वप्राप्तौ, तन्नियमार्थत्वात्परिक्रयवचनस्य यजमान एव तं कुर्यात् । 'य एतामिष्टकामुपदधाति, स त्रीन्वरान्दद्यात्' इत्यादौ, वचनादन्येनापि दातव्यम् ।

इति दक्षिणादानस्य स्वामिकर्तृत्वाधिकरणम् ॥ १ ॥

*वरदानस्याध्वर्युकर्तृकत्वाधिकरणम् (२)

वपनादिसंस्काराणां याजमानताधिकरणम् (२)

'केशश्मश्रु वपते' इति श्रुताः श्मश्रुवापादयः समाख्ययाध्वर्योः । इति चेत् —

श्मश्रुवापादयस्तथा ॥ ८८ ॥

याजमानाः । फलिसंस्कारा एते न कर्तृगुणकाः । यजमाने फलग्रहणयोग्यतार्थं क्रियन्ते । अध्वर्युस्तु गुणकर्तृत्वेनैव परिक्रीतो न तान्कुर्यात् । 'हिरण्यमालिन ऋत्विजः' इत्यादौ वचनादृत्विजामपि ।

इति वपनादिसंस्काराणां याजमानताधिकरणम् ॥ २ ॥

---

* इदमधिकरणं पार्थक्येनात्र न लिखितम् । पूर्वाधिकरणान्त एव संक्षेपतोऽयमर्थस्सूचितः ।

तपसो याजमानताधिकरणम् (३)

'द्व्यहं नाश्नाति' इत्यादिकायशोषणं तपः, क्लेशात्मकत्वादार्त्विजम्। इति चेत् —

तद्वत्तपः

वपनादिवत् तपोऽपि याजमानं, फलोत्पत्तिप्रतिबन्धकपापक्षयार्थत्वात्। 'ऋत्विज उपवसन्ति' इति वचनात् क्वचिदृत्विजामपि।

इति तपसो याजमानताधिकरणम् ॥ ३ ॥

हिरण्यमालित्वाद्यधिकरणम् (४)

हिरण्यमालित्वं समाख्यया अध्वर्युपुरुषाणामेव। इति चेत् —

हिरण्मय्यो मालास्सर्वस्य चर्विजः।

प्रतिसंस्कार्यं संस्कारावृत्तेः। सर्वेषां गुणकर्तृत्वे च समाख्या नियामिका।

इति हिरण्यमालित्वाद्यधिकरणम् ॥ ४ ॥

गुणकामानां याजमानताधिकरणम् (५)

'यदि कामयेत वर्षुकः पर्जन्यस्स्यादिति नीचैस्सदो मिनुयात्' इत्यत्र मिनोतिसामानाधिकरण्यात् काम आध्वर्यवः। 'यदि कामयेताध्वर्युः' इति वाक्यात्। इति चेत् —

सदोमानादिषु गुणैर्यष्टुरेव फलं भवेत् ॥ ८९ ॥

'मिनुयात्' इति परस्मैपदश्रुत्या वाक्यरूपसामानाधिकरण्यबाधात्, 'नाभिदघ्नः पर्यन्तः' इति विहित-क्रत्वर्थस्यान्यदीयकाम्यगुणेन बाधायोगाच्च याजमान एव कामः। 'यदि कामयेत यजमानः' इति, 'आत्मने यजमानाय वा यं कामं कामयते तमागायति' इति वचनादुद्गातुरपि फलम्।

इति गुणकामानां याजमानताधिकरणम् ॥ ५ ॥

प्रोत्साहनमन्त्राणां याजमानत्वाधिकरणम् (६)

अकरणमन्त्राः 'आयुर्दा अग्नेऽस्यायुर्मे देहि' इत्यादयः समाख्यानादाध्वर्यवाः। इति चेत् –

यजमानेन कर्तव्या मन्त्रास्स्युः प्रत्यगाशिषः।

प्रति = आत्मनि, आशीः फलं प्रतिपादयन्ति इति प्रत्यगाशिषः। ते यजमानेनैव पठनीयाः। कर्म-फलस्य यजमानगामित्वेन आशिं प्रति तत्प्रार्थनस्य तत्कर्तृत्वौचित्यात्। ऋत्विग्भिर्दक्षिणा यजमाना-दर्थनीया। अतो लिङ्गात्समाख्यां बाधित्वा यजमानेन वक्तव्याः।

इति प्रोत्साहनमन्त्राणां याजमानत्वाधिकरणम् ॥ ६ ॥

द्व्याम्नातानामुभयार्थत्वाधिकरणम् (७)

'वाजस्य मा प्रसवेन' इत्यादयः, आध्वर्यवे याजमाने च पठिताः केनचिद्वक्तव्याः—समाख्यया यजमानेनैव वा। स्रुग्व्यूहनस्याध्वर्यवत्वात् तत्प्रकाशकास्तेनैव वक्तव्याः। इति चेत् —

द्व्याम्नातमन्त्रा वाजस्येत्यादस्स्युर्द्वयोरपि ॥ ९० ॥

एकस्यापि मन्त्रस्य प्रकरणे द्विः पाठात्, तयोश्च प्रयोगवचनोपसंग्रहात्, सिद्धरूपस्य मन्त्रस्य स्वयं प्रकरणप्राप्तत्वात् तद्वशेनैव क्रतुमध्ये मन्त्रपाठसिद्धेः, पाठद्वयस्यापि कर्तृद्वयाकांक्षायां समाख्याभ्यां द्वावपि भिन्नविषयत्वान्नियम्येते।

इति द्व्याम्नातानामुभयार्थत्वाधिकरणम् ॥ ७ ॥

अभिज्ञवाचनाधिकरणम् (८)

वाजपेये, 'क्लृप्तीर्यजमानं वाचयति' इत्यत्र, ज्ञश्चाज्ञश्च—अज्ञ एव वा वाचनीयः। इति चेत् —

क्लृप्तीर्वाचयतीत्यत्र भवेद्ज्ञस्यैव वाचनम्।

अज्ञस्य क्रत्वप्रसक्तेः, ज्ञस्यापि ब्रूहीति स्मारणोपपत्तेः ज्ञस्यैव वाचनम्।

इत्यभिज्ञवाचनाधिकरणम् ॥ ८ ॥

द्वादशद्वन्द्वानामाध्वर्यवत्वाधिकरणम् (९)

दर्शपूर्णमासयोः, आध्वर्यवे 'वत्समुपावसृजत्युरवामधिश्रयति' इत्यादिना प्रत्येकं ते ते पदार्था विहिताः। पुनर्याजमाने, 'वत्सञ्चोपावसृजति—उरवाञ्चाधिश्रयति' इत्याद्यनुकीर्त्य, 'द्वादश द्वन्द्वानि पसंपाद्य यजेत' इति श्रुते, विशेषसमाख्यानात्—द्वन्द्वसंपादनसमानकर्तृकत्वात्मनेपदाभ्यां यजमानकर्तृकत्वप्रतीतेः, यजमान एव कुर्यात्। इति चेत् —

वत्सञ्चोपावसृजतीत्यादिरध्वर्युकर्तृकः ॥ ९१ ॥

दार्थानामध्वर्यवे विधानात् तत्रैव कर्त्रपेक्षायां आध्वर्यवत्वप्रतीतेः याजामानेऽनुवादमात्रत्वात्, अध्वर्युणा अनुष्ठीयमानानां द्वन्द्वशः स्मारणेन प्रयोजककर्तृत्वेनापि समानकर्तृकत्वात्मनेपदयोरुपपत्तेरध्वर्युरेव कुर्यात्।

इति द्वादशद्वन्द्वानामाध्वर्यवत्वाधिकरणम् ॥ ९ ॥

होतुः करणमन्त्रानुष्ठातृत्वाधिकरणम् (१०)

अग्नीषोमीयपशावाध्वर्यवो यूपपरिव्याणमन्त्रः 'परिवीरसि' इति। क्रियमाणानुवादी हौत्रो मन्त्रो 'युवा सुवासाः' इति। तौ चोदकपरंपरया कुण्डपायिनामयनाख्यसंवत्सरसत्रे प्राप्तौ। तत्रेदं

वचनं 'यो होता सोऽध्वर्यु 'रिति । तत्रापरित्यक्तस्वधर्मा होता, अध्वर्युशब्दलक्षिते तत्कार्ये विधीयत इति कारणमन्त्रबाधः । इति चेत् —

होतुराध्वर्यवं कार्यं विरोधेऽध्वर्युताजुषः

अध्वर्युताजुषो होतुरेककालिकमन्त्रद्वयपठनविरोधे आध्वर्यवं कार्यम् । न हौत्रम् । प्रत्येकवचनेन तस्य तत्कार्ये विधानात् । होतुः स्वपदार्थकरणस्य, आनुमानिकचोदकप्राप्त्या तेन तस्य बाधात् ।

इति होतुः करणमन्त्रानुष्ठातृत्वाधिकरणम् ॥ १० ॥

प्रैषप्रैषार्थयोर्भिन्नकर्तृकत्वाधिकरणम् (११)

'प्रोक्षणीरासादय' इत्यादिः प्रैषः । प्रोक्षण्यासाधनादिः प्रैषार्थः । तदुभयमाध्वर्यवम् । समाख्यानात् । लोट् च प्राप्तकालतायाम् । इति चेत् —

प्रैषप्रैषार्थकर्तारौ विभिद्येते परस्परम् ॥ ९२ ॥

प्राप्तकालताया अप्यन्यं प्रत्येव बोध्यतया संबोधनमध्यमपुरुषादिभिरन्यकर्तृत्वप्रतीतिलक्षणाल्लिङ्गात्, प्रेषितुरन्यः प्रैषार्थकर्ता ।

इति प्रैषप्रैषार्थयोर्भिन्नकर्तृकत्वाधिकरणम् ॥ ११ ॥

प्रैषस्याध्वर्यवत्वाधिकरणम् (१२)

तत्राध्वर्युः प्रैषार्थकर्ता । आग्नीध्रः प्रैषे । पदार्थानां प्रधानत्वबहुत्वाभ्यां तत्राध्वर्यवसमाख्याबाधायोगात् । प्रैषस्य च तद्वैपरीत्यात् । इति चेत् —

तत्राध्वर्युः प्रैषकर्ता समाख्यानाविरोधः ।

प्रषस्याध्वर्यवत्वे तस्य तत्र साक्षात् कर्तृता । पदार्थेषु प्रयोजककर्तृता इति न क्वापि समाख्याबाधः । नापि 'अग्नीत् !' इति संबोधनविरोधः इति स एव प्रैषकर्ता ।

इति प्रैषस्याध्वर्यवत्वाधिकरणम् ॥ १२ ॥

करणमन्त्रप्रकाश्यफलस्य याजमानताधिकरणम् (१३)

'ममाग्ने वर्चः' इत्यग्निसमिन्धनार्थो मन्त्रः आध्वर्यवः । 'इन्धानास्तनुवं पुषेम' इति कर्मकर्तुरेव प्रतीतेः वर्चःप्रभृति सूक्तवाकगतायुरादिवत् फलमध्वर्योरेव । 'मम' इति लिङ्गात् । इति चेत्—

यजमानस्यैव भवेत् फलमध्वर्युमन्त्रगम् ॥ ९३ ॥

प्रधानवाक्यावगतात्मनेपदश्रुत्या, अङ्गप्रधानभावनाफलस्य सर्वस्य यजमानगामित्वप्रतीतेः, मम यजमानस्य

–इति चोपचारात् यजमान एवाध्वर्युणा 'मम' इत्युच्यत इति लिङ्गस्य बाधः ।

इति करणमन्त्रप्रकाश्यफलस्य याजमानताधिकरणम् ॥ १३ ॥

करणमन्त्रफलस्य ऋत्विग्गामिताधिकरणम् (१४)

यत्तु 'मामा सन्तासं' इत्यसन्तापनं फलं, तत् क्रत्वविघातार्थमध्वर्युगतमेव यजमानस्येष्टमिति श्रुतिविरोधाभावात्, लिङ्गादध्वर्योरेवेत्याह —

मा मा सन्तासमित्यादेर्ऋत्विग्गामित्वमिष्यते ।

इति करणमन्त्रफलस्य ऋत्विग्गामिताधिकरणम् ॥ १४ ॥

भद्रादेरुभयगामित्वाधिकरणम् (१५)

'भद्रं तन्नौ सह' इति द्विवचनस्यात्यन्तागतिकत्वात्, अध्वर्युयजमानयोरेतत् इत्याह —

तन्नौ सहेत्यादिमन्त्रे ऋत्विजोऽपि फलं भवेत् ॥ ९४ ॥

इति भद्रादेरुभयगामित्वाधिकरणम् ॥ १५ ॥

धर्माणां प्राकृतकार्यार्थत्वाधिकरणम् (१६)

बर्हिस्तद्धर्माणां पूर्वोक्तमङ्गप्रधानार्थत्वं उत्तरविवक्षया प्राप्यते —

सामान्यद्रव्यसंस्कारं सर्वप्राकृतकर्मणाम् ।

इति धर्माणां प्राकृतकार्यार्थत्वाधिकरणम् ॥ १६ ॥

लवनस्यासर्वार्थताधिकरणम् (१७)

'बर्हिषा यूपावटमवस्तृणाति' इति श्रुते बर्हिषि तद्धर्माः कार्याः । तेषामङ्गप्रधानार्थत्वोक्तेः । इति चेत् —

यूपावटास्तरे बर्हिर्बर्हिर्धर्मान्न गच्छति ॥ ९५ ॥

प्राकृतकार्येष्वेवातिदेशाद्धर्मप्राप्तेः, यूपावटास्तरणबर्हिषस्त्वप्राकृतकार्यत्वात् न तत्रातिदेशः ।

इति लवनस्यासर्वार्थताधिकरणम् ॥ १७ ॥

पवित्रविधृत्यर्थतद्धर्माणामप्येवमेव (१८)

*प्रकृतौ पवित्रार्थं विधृत्यर्थं बर्हिश्चतुष्टयं न तद्धर्मवदित्याह —

---

* पूर्वाधिकरणेनैव गतार्थमिदम् । अत एव ग्रन्थान्तरेषु अस्य पृथगधिकरणत्वं न समाश्रितम् ।

पवित्रार्थे विधृत्यर्थे बर्हिषीप्रकृतावपि ।

न तद्धर्मान् गच्छतः । यथा लूनासन्नासादितस्य वेद्यास्तरणे विनियोगात् असंस्कृतादेव पवित्रादि ॥१८॥

शेषनिधानाधिकरणम् (१९)

'पुरोडाशशकलमैन्द्रवायवस्य पात्रे निदधाति' इत्यादौ सवनीयहविषां यागार्थानां अन्यत्र विनियोगायोगात् पयस्याद्यन्तरमुत्पाद्यम् । इति चेत् —

सवनीयपुरोडाशाच्छकस्य ग्रहो भवेत् ।

पयस्यादेरित्यपि द्रष्टव्यम् । यागीयद्रव्यसंस्कारार्थत्वस्यावगमात् नान्यत्र विनियोगः ।

इति शेषनिधानाधिकरणम् ॥ १९ ॥

उपांशुत्वस्य प्रधानार्थत्वाधिकरणम् (२०)

'यज्ञाथर्वणं वै काम्या इष्टयः, ता उपांशुकर्तव्याः' इति श्रुतमुपांशुत्वमङ्गप्रधानार्थसर्वमन्त्रेषु स्यात् । उच्चैः प्रवर्ग्येण प्रचरन्ति' इति श्रुतोच्चैस्त्ववत् । इति चेत् —

उपांशुत्वं प्रधानार्थं काम्यास्विष्टिषु चोदितम् ।

'ता उपांशु' इति फलार्थप्रधानकर्मिकायां क्रियायां श्रूयमाणमुपांशुत्वं तन्मात्र एव स्यात् । प्रवर्ग्ये तु तत्करणिकायां भावनायामुच्चैस्त्वं श्रुतं इति विशेषः ।

इत्युपांशुत्वस्य प्रधानार्थत्वाधिकरणम् ॥ २० ॥

दृतिनवनीताज्याधिकरणम् (२१)

श्येने 'दृतिनवनीतमाज्यं भवति' इति श्रुते, पूर्वमाज्यस्याप्रकृतत्वात्, दृतिनवनीतप्रकृतिकत्व-विशिष्टं विधीयमानमाज्यं प्रकरणात् प्रधानार्थं सत् सोमं बाधते । इति चेत् —

श्येनाङ्गार्थं दृतिनवनीतस्य ग्रहणं मतम् ॥ ९७ ॥

अतिदेशप्राप्ताज्यानुवादेन तत्प्रकृतिकत्वमात्रविधौ लाघवात् तथाप्रकृति अङ्गेष्वेवेति न सोमबाधः ।

इति दृतिनवनीताज्याधिकरणम् ॥ २१ ॥

श्येनाङ्गनां दृतिनवनीताज्यत्वाधिकरणम् (२२)

तत्रैव 'सह पशूनालभते' इति विहितं साहित्यं सुत्याकालीनं अग्नीषोमीयानुबन्ध्ययोः, पुरोडाशामिक्षाभ्यामनुग्रहवचनात् । तद्वत् श्येनवैशेषिकाङ्गत्वात्, आज्यमपि सुत्याकालीनाङ्गार्थम् । इति चेत् —

अङ्गेषु तदिदं सुत्याकालेष्वेतिनेष्यते ।

न तत्र वैशेषिकाङ्गत्वकृतं सुत्याकालत्वम् । किन्तु प्रधानप्रस्यास[1]त्तिकृतम् । इह तु वाक्यादविशेषेण सर्वार्थं गम्यमानं, नानुमानात् सङ्कोचमर्हति इति सर्वार्थम् ।

इति श्येनाङ्गानां दृतिनवनीताज्यत्वाधिकरणम् ॥ २२ ॥

सवनीयपुरोडाशस्य मांसमयत्वाधिकरणम् (२३)

शाक्यानामयनं नाम षट्त्रिंशदाब्दिकं, तत्र श्रूयते ; 'संस्थितेऽहनिगृहपतिर्मृगयां याति स यान् हन्ति तेषां तरसमयाः सवनीयाः पुरोडाशाः' इति । तत्र पुरोडाशोद्देशेन तरसमयत्वविधानात्, तस्य च सवनीयत्वेन विशेषणे वाक्यभेदापत्तेः, सर्वपुरोडाशविषयं तरसमयत्वम् । सवनीयपदन्तु लिङ्गसमवायात् सवनीयविषयमनुवादः । इति चेत् —

सवनीयपुरोडाशा एव स्युस्तरसात्मकाः ॥ ९८ ॥

सवनीयोद्देशेन तरसमयत्वमव्यवायाद्विधीयते । पुरोडाशपदन्तु लिङ्गसमवायात् हविर्मात्रानुवादः । अतस्सवनीयपदं मुख्यं सत् मुख्यार्थं भविष्यति । नातो विशिष्टानुवादकृतो वाक्यभेद इति ।

इति सवनीयपुरोडाशस्य मांसमयत्वाधिकरणम् ॥ २३ ॥

इति लघुवार्तिकटीकायां तृतीयाध्यायस्याष्टमः पादः ।

॥ समाप्तश्चाध्यायः ॥

---

* प्रत्यसत्तित्वकृतं इति मातृकापाठः ।

॥ अथ चतुर्थोऽध्यायः ॥

तत्र प्रथमः पादः

प्रतिज्ञाधिकरणम् (१)

शेषशेषिविचारानन्तरं तद्धेतुकः तद्धेतुकः प्रयुक्तिविचार आरब्धव्यः । स च केषुचिदधिकरणेषु क्रत्वर्थपुरुषार्थद्वारा क्रियत इत्याह —

अथ प्रयुक्तौ क्रत्वर्थपुरुषार्थविचारणा ।

अथ—शेषविचारानन्तरम्, प्रयुक्तौ–प्रयुक्तिविचाराय, क्रत्वर्थपुरुषार्थविचारणा क्रियत इति शेषः । 'यश्शेषी स सर्वः प्रयोजकः' इति न नियमः । किन्तु 'यः प्रयोजकः स शेष्येव' इति । प्रयोजकत्वं नामानुष्ठापकत्वम् । तच्च यद्यपि विधेरेव, तथापि यदुद्देशेन यद्वा क्रियामनुष्ठापयन्विधिः अनन्यप्रयुक्तं तद्विशेषेणमपि यत्रानुष्ठापयति स प्रयोजकः । यत्तु विध्यन्तरप्रयुक्तं विशेषणं, तदन्येनैवानुष्ठापितत्वान्नासावनुष्ठापयति इत्यप्रयोजक उच्यते । यथा पुरोडाशश्रपणविधिप्रयुक्तस्य कपालस्य, नोपधानविधिः इति ।

इति प्रतिज्ञाधिकरणम् ॥ १ ॥

क्रत्वर्थपुरुषार्थलक्षणाधिकरणम् (२)

वक्ष्यमाणयोः क्रत्वर्थपुरुषार्थयोर्लक्षणमाह —

क्रत्वर्थपुरुषार्थौ तु क्रतुपुंप्रीतिसाधनौ ॥ ९९ ॥

क्रतुसाधनं क्रत्वर्थः । पुंप्रीतिसाधनं पुरुषार्थः । पुंप्रीतिसाधनमित्यत्र द्वन्द्वैकवद्भावः । प्रीतिशब्दः पश्वादिफलोपलक्षणार्थः ।

तदयमर्थः—भावनाकथं भावपूरकं क्रत्वर्थम् । करणं फलञ्च पुरुषार्थमिति ।

इति क्रत्वर्थपुरुषार्थलक्षणाधिकरणम् ॥ २ ॥

फलस्याविधेयत्वाधिकरणम् (३)

विधेयभावनाविशेषणत्वात् फलस्यापि विधेयत्वमिति चेत् —

फलञ्च न विधेयं स्याद्रागादेव प्रवृत्तितः ।

इति फलस्याविधेयत्वाधिकरणम् ॥ ३ ॥

फलार्थगुणानां अक्रत्वर्थताधिकरणम् (४)

गोदोहनादेः क्रतूपकारकत्वात् क्रत्वर्थतापि । इति चेत् —

गोदोहनं क्रत्वर्थम् ,

तादर्थ्यषष्ठ्या फलकामोद्देशेन विहितस्याप्यन्योपकारकत्वाविरोधात् फलप्रयुक्तमेव । न क्रतुप्रयुक्तमिति ।

इति फलार्थगुणानां अक्रत्वर्थताधिकरणम् ॥ ४ ॥

द्रव्यार्जनस्य पुरुषार्थत्वाधिकरणम् (५)

वर्णभेदेन द्रव्योद्देशेनोपायनियमः स्मर्यते—ब्राह्मणस्य याजनादिः, क्षत्रियस्य जयादिः, वैश्यस्य कृष्यादिः, शूद्रस्य सेवादिः, सर्वेषां दायादिः इति । स क्रत्वर्थ एव । अन्यथा तद्वैयर्थ्यात् । धनस्वरूपस्योपायान्तरेणापि प्राप्तेः । तत्कार्यस्य क्षुण्णिवृत्त्यादेरपि येनकेनचिदार्जिताद्भावात् । कृत्वदृष्टं नियमं विना भवतीत्यत्र मानाभावात् नियमेनार्ज्यमानं क्रत्वर्थम् । इति चेत् —

न च द्रव्यस्य चार्जनम् ॥ १०० ॥

क्रत्वर्थमित्यनुषङ्गः । अर्ज्यमानद्रव्यात् पुरुषप्रीतेः प्रत्यक्षत्वात्, नाप्रत्यक्षक्रतुशेषत्वं, प्रकरणाद्यभावात् । अर्जनस्य च रागप्राप्ततया अविधेयत्वात् । द्रव्यस्य क्रत्वैकान्तिकत्वे जीवनलोपात् सर्वक्रतुलोपापत्तेः । अतः पुरुषार्थो द्रव्यपरिग्रहः । क्रतोरपि पुरुषार्थत्वेन भुज्यादिवच्छेषिता । नियमस्य तु दृष्टाभावात् –पुरुषार्थार्जनाश्रितत्वाच्च पुरुषार्थत्वम् । तथा च, अन्यथार्जयन् प्रत्यवेयादिति कल्प्यते ।

इति द्रव्यार्जनस्य पुरुषार्थत्वाधिकरणम् ॥ ५ ॥

प्रजापतिव्रतानां पुरुषार्थताधिकरणम् (६)

'नेक्षेतोद्यन्तमादित्यं' इत्यादि स्मृतम् । तत्र नञः आख्यातसंबन्धे न प्रतिषेधोऽयम् । श्रुत्यर्थलाभात् । नञीक्षतिभ्यां नानीक्षणलक्षणा । प्रतिषेधस्य प्रतियोग्याकांक्षायां, क्रत्वङ्गमादित्यदर्शनं शीघ्रमुपस्थितम् भवतीति तत्तत्कालीननिषेधोऽपि तदर्थः । एवं फलं न कल्प्यम् । इति चेत्—

नापि चोद्यन्तमिति

तस्य ब्रह्मचारिणो व्रतमित्यनुष्ठेयवाचिव्रतशब्देनोपक्रमात्पर्युदास एवायम् । तस्य च क्रत्वङ्गत्वग्राहकाभावात्, 'एतावता हैनसाऽयुक्तो भवति' इति वाक्यशेषावगतपापक्षयः फलमिति पुरुषार्थः ।

इति प्रजापतिव्रतानां पुरुषार्थत्वाधिकरणम् ॥ ६ ॥

यज्ञायुधानामनुवाद्यताधिकरणम् (७)

'स्फ्यश्च कपालानि च' इत्युपक्रम्य, 'एतानि वै दश यज्ञायुधानि' इति श्रुते, यज्ञशब्देन प्रकृताग्नेयादियागानुवादेन आयुधशब्दलक्षितस्फ्यादिद्रव्यं प्रदेयत्वेन विधीयते वाक्यार्थवैयर्थ्याय । इति चेत् —

अन्यानूक्तिर्यज्ञायुधश्रुतिः ।

उत्पत्त्यवगतपुरोडाशाद्यवरुद्धत्वाद्यागानां, तेषूत्पन्नशिष्टद्रव्यनिवेशायोगात्, 'यज्ञायुधानि संभरति*' इति वाक्यापेक्षितसमर्पणाय, 'स्फ्येनोद्धन्ति' इत्यादिवाक्यप्राप्तानुवादः ।

इति यज्ञायुधानामनुवाद्यताधिकरणम् ॥ ७ ॥

पश्वेकत्वादेर्विवक्षितत्वाधिकरणम् (८)

'पशुना यजेत' इत्यत्र पदश्रुत्युपात्तमेकत्वं पश्वङ्गम् । वाक्याद्यागाङ्गमिति तदननुष्ठानेऽपि क्रत्ववैगुण्यादविवक्षितम् । इति चेत् —

पश्वेकत्वं श्रुतं यज्ञे कारकत्वं प्रपद्यते ॥ १०१ ॥

विभक्तिश्रुत्या प्रधानकारकाङ्गतया, तद्द्वारा वाक्याद्यागाङ्गस्य न पदश्रुत्या द्रव्याङ्गत्वम् । पश्चात्तु अरुणान्यायेन पार्ष्ठिकोद्रव्यसंबन्ध इति विवक्षितमेकत्वम् ।

इति पश्वेकत्वादेर्विवक्षितत्वाधिकरणम् ॥ ८ ॥

लिङ्गस्य विवक्षितत्वाधिकरणम् (९)

लिङ्गन्तु, अलिङ्गे वृक्षादौ–विपरीतलिङ्गे पिपीलिकादौ च दर्शनादविवक्षितम् । इति चेत् —

लिङ्गमप्यस्य च पशोः शब्दार्थत्वाद्विवक्षितम् ।

सिंहः–सिंही–इत्यादौ प्रतीयमानत्वात्, तत्तच्छब्दवाच्यं कारकसात्कृतं विवक्षितम् ।

इति लिङ्गस्य विवक्षितत्वाधिकरणम् ॥ ९ ॥

आश्रयिकर्मणामदृष्टार्थत्वाधिकरणम् (१०)

उत्तमप्रयाजादयो नादृष्टार्थाः । यागान्तरदेवताद्रव्यसंस्काररूपदृष्टप्रयोजनलाभात् । इति चेत् –

त्यागांशेनादृष्टमपि कुर्युस्त्विष्टकृदादयः ॥ १०२ ॥

देवतास्मरणप्रक्षेपांशयोस्तथात्वेऽपि त्यागांशस्यानन्यप्रयोजनत्वात् न तदंशे दृष्टार्थाः ।

इत्याश्रयिकर्मणामदृष्टार्थताधिकरणम् ॥ १० ॥

प्रयुक्तिविचारप्रतिज्ञाधिकरणम् (११)

ननु प्रयुक्तिविचारस्य लक्षणार्थत्वे, शेषशेषित्वविचारस्तत्र तत्राग्रे किमर्थः ? अत आह —

---

* संभरन्ति—इति मातृकापाठः ।

प्रयुक्त्यर्थोपरि ग्रन्थे शेषत्वस्याविचारणा ।

तद्धेतुत्वेन तद्विचार इत्यर्थः । इति प्रयुक्तिविचारप्रतिज्ञाधिकरणम् ॥ ११ ॥

दध्यानयनस्यामिक्षाप्रयुक्तताधिकरणम् (१२)

'तप्ते पयसि' इत्यारभ्य 'वाजिभ्यो वाजिनं' इत्यन्तवाक्यश्रुतदध्यानयनं आमिक्षावाजिनोभयप्रयुक्तम् । उभयजनकत्वलिङ्गात् । आमिक्षाया अप्यम्लत्वकठिनत्वाभ्यां पयसोऽर्थान्तरत्वात् । इति चेत् —

वाजिनं न प्रयोक्तृ स्यात् दध्यानयनकर्मणः ॥ १०३ ॥

आनयतेर्द्विकर्मकत्वेन नयत्यर्थकर्मदध्ना व्याप्यमानतया, पयसः प्रधानकर्मणः तत्पदेन परामर्शात् स्त्रीलिङ्गामिक्षापदयोर्नित्यानुवादत्वात्, 'जुषन्तां युज्यं पयः' इति विवरणाच्च पय एवामिक्षा । मधुरत्वविशेषस्यैव पयस्त्वव्यञ्जकत्वम् । अम्लरसस्तु संस्कारकस्य दध्नः । अत आमिक्षाप्रयुक्तमेव दध्यानयनं – न कटुरसवाजिनप्रयुक्तम् ।

इति दध्यानयनस्यामिक्षाप्रयुक्ताधिकरणम् ॥ १२ ॥

गवानयनस्य पदकर्माप्रयुक्तताधिकरणम् (१३)

'एकहायन्या क्रीणाति' इति प्रकृत्य, 'षट्पदान्यनु निष्क्रामति–सप्तमं पदं गृह्णाति' 'यर्हि हविर्धाने प्राचीप्रवर्तयेयुस्तर्हि तेनाक्षमुपाञ्जयात्' इत्यत्र च श्रुतमेकहायनीनयनमन्यतरेणाथसंयुक्तं सन्निधानाविशेषादक्षाभ्यञ्जनक्रयाभ्यां प्रयुज्यते । इति चेत् —

नयनस्यैकहायन्या नाक्षस्याभ्यञ्जनक्रिया ।

एकहायन्याः नयनस्य अक्षाभ्यञ्जनक्रिया न प्रयोजिका । नयनस्य क्रयसाधनद्रव्यसंस्कारकतया क्रयार्थस्य तत्प्रयुक्तत्वात् ।

इति गवानयनस्य पदकर्माप्रयुक्ताधिकरणम् ॥ १३ ॥

कपालनां तुषोपवापाप्रयुक्तताधिकरणम् (१४)

'पुरोडाशकपालेन तुषानुपवपति' इत्यत्र श्रुत्या कपालस्योपवापाङ्गत्वात् तेनापि प्रयुज्यते कपालम् । इति चेत् —

नोपवापः कपालस्य

पुरोडाशार्थेन कपालेन' इति तदर्थोपात्तस्य विनियोगप्रतीतेरप्रयोजकस्तुषोपवापः कपालस्य ।

इति कपालानां तुषोपवापाप्रयुक्ताधिकरणम् ॥ १४ ॥

शकृल्लोहितयोः पशावप्रयोजकताधिकरणम् (१५)

अग्नीषोमीये पशौ, 'हृदयस्याग्रेऽवद्यति' 'शकृत्प्रविध्यति' 'लोहितं निरस्यति' इति श्रुतम्। तत्र हृदयादिशकृल्लोहितञ्च पश्वालंभप्रयोजकम्। संनिधानाविशेषात्। इति चेत् —

न शकृल्लोहिते पशोः ॥ १०४ ॥

दाशमिकन्यायेन हृदयादीनामेव हविष्ट्वात् तत्प्रकृतिः पशुस्तैरेव प्रयुज्यते। शकृल्लोहितानि रसनन्तु, [1]हविषः प्रतिपत्तिः।

इति शकृल्लोहितयोः पशावप्रयोजकताधिकरणम् ॥ १५ ॥

पुरोडाशस्य स्विष्टकृदप्रयुक्तताधिकरणम् (१६)

'उत्तरार्धात्स्विष्टकृते समवद्यति' इत्यत्र श्रुतः स्विष्टकृद्यागः, उत्तरार्धहविरन्तरयोः प्रयोजकः। सन्निहितानां प्रधानयागदेवताभ्यस्त्यक्तत्वात्। इति चेत् —

स्विष्टकृत्करणीयः स्यादाग्नेयाद्युत्तरार्धतः।

उत्तरार्धशब्दस्यैकदेशवाचिनः संबन्धिद्रव्यालाभे ग्रन्थापर्यवसानात् सन्निहितानामेव संबन्धः। प्रतिप्रत्तित्वाद्वचनाच्च विनियुक्तविनियोगः, इत्यप्रयोजकस्स्विष्टकृत्।

इति पुरोडाशस्य स्विष्टकृदप्रयुक्तताधिकरणम् ॥ १६ ॥

प्रयाजशेषाधिकरणम् (१७)

'प्रयाजशेषेण हवींष्यभिघारयति' इति श्रुतमभिघारणं हविस्संस्कारः। द्वितीयातृतीयाभ्यां हविषां शेषस्य चाभिघारणं प्रति कर्मकरणत्वप्रतीतेः। उपयुक्तशेषसंस्करादुपयोक्ष्यमाणहविस्संस्कारस्य ज्यायस्त्वाच्च। ततश्च वाजपेये प्रातस्सवनानुष्ठितप्रयाजशेषो, 'ब्रह्मसाम्न्या लभते' इति वाक्यात् माध्यंदिनसवने प्राजापत्यालम्भोत्कर्षपक्षे तद्रूपानां सर्वपशुहृदयादीनाञ्च संस्कारालोपाय पात्रान्तरे धर्तव्यः, जुह्वाः व्यापृतत्वात्। इति चेत् —

प्रतिपत्तिः प्रयाजाज्यावशेषस्याभिघारणम् ॥ १०५ ॥

शेषप्रतिपत्तेरपेक्षितत्वात्, जुहूरिक्तत्वापादनेन दृष्टार्थत्वाच्च नानापेक्षितादृष्टार्थहविस्संस्कारोऽभिघारणम्। अतश्शेषप्रतिपत्तिः। हविराघारनियमादार्थिकस्तत्संस्कार इति। 'हविष्षु क्षारणेन प्रयाजशेषं संस्कुर्यात्' इत्यर्थः। एवञ्च सन्निहितक्रतुपशुवपास्वेव क्षारणमिति।

---

* इदं पदं त्यक्तुं शक्यम्।

एवं हि विभक्त्योर्लाक्षणिकत्वं दृष्टार्थत्वायाश्रितं स्यात्। तच्च स्तुतशस्त्राधिकरणविरुद्धम्। औपभृतप्रथमचतुर्गृहीतस्योपरितनप्रयाजद्वयार्थस्य, उपांशुयाजार्थचतुर्गृहीताज्यादिवत् होमेन निश्शेषमाहवनीये क्षारितस्य विना वचनं शेषाप्रसङ्गात्। अतः कथमत्र विषयलाभः? कथं वा सिद्धान्तसिद्धिः? इति केचित्।

इति प्रयाजशेषाधिकरणम् ॥ १७ ॥

समानयनस्याज्यधर्मप्रयोजकताधिकरणम् (१८)

दर्शपूर्णमासयोराज्यग्रहणं प्रकृत्य श्रुतम्—'यज्जुह्वां गृह्णाति। प्रयाजेभ्यस्तत्। यदुपभृति। प्रयाजानूयाजेभ्यस्तत्' इति। तथा 'अतिहायेडो बर्हिः प्रति समानयते जुह्वामौपभृतम्' इति। यदि दमौपभृतस्य चतुर्थप्रयाजोपक्रमे जुह्वां समानयनं, तत् औपभृताज्यग्रहणस्य न प्रयोजकम्। अनुयाजार्थाज्यसंस्कारकत्वात्। 'प्रयाजानूयाजेभ्यः' इति बहुवचनस्य, प्रयाजेष्वप्यनूयाज जौहवौपभृतयोः सर्वप्रयाजविषययोर्वैकल्पिकत्वेन, यदा औपभृतेन प्रयाजाः क्रियन्ते, तदा उपक्रम एव पञ्चानामप्यर्थे औपभृतग्रहणपञ्चकस्यानीतत्वेन, अस्यां वेलायां तत्र प्रयाजार्थाज्याभावात्। इति चेत् –

प्रयोक्तौपभृताज्यस्य बर्हिः प्रतिसमानयः।

'अतिहाय' इति वाक्ये, अर्थप्राप्ते समानयने कालमात्रविधौ, अल्पार्थविधिदृष्टार्थत्वयोर्लाभात्, तदनुरोधेन च प्रयाजाभ्यामनूयाजेभ्यश्चेति विग्रहेण, उपरितनप्रयाजद्वयकरणाय क्रियमाणमानयनं, प्रयोजकमौपभृताज्यग्रहणस्य। अन्यथा–अनेकार्थविधिरदृष्टकल्पना च। तत्कालाप्राप्तानयनकालयोरदृष्टार्थसंस्कारस्य च विधानात्। तथाचाज्ययोर्भिन्नविषयत्वात्समुच्चयः।

इति समानयनस्याज्यधर्मप्रयोजकताधिकरणम् ॥ १८ ॥

औपभृतजौहवयोः क्रमेणोभयानुभयार्थताधिकरणम् (१९)

'चतुर्जुह्वां गृह्णाति। अष्टावुपभृति। चतुर्ध्रुवायाम्' इत्युत्पन्नाज्यानि सामर्थ्यात् सर्वार्थानि। विनियोजकवचनान्यवयुत्यानुवादाः।

यद्वा—'यत् जुह्वां' इति वाक्यात् जौहवस्य प्रयाजार्थत्ववत्, 'यदुपभृति। अनूयाजेभ्यस्तत्' इति वाक्यात् तस्यापि केवलानुयाजार्थत्वम्। इति चेत् —

व्यवस्थया प्रयाजादीन्याज्यैस्स्युर्जौहवादिभिः ॥ १०६ ॥

'प्रयाजानूयाजेभ्यः' इत्यनेन, औपभृतस्योभयार्थत्वात्, इतरोऽगत्यानुवादः। ध्रौवन्तु तदतिरिक्तविषयम्।

इति औपभृतजौहवयोः क्रमेणोभयानुभयार्थताधिकरणम् ॥ १९ ॥

उपभृति द्विचतुर्गृहीताधिकरणम् (२०)

'अष्टावुपभृति' इति वाक्येन, न चतुष्ट्वविशिष्टग्रहणद्वयविधिः। लक्षणाप्रसङ्गात्। किन्तु, अष्टत्वविशिष्टस्यैकस्य। 'चतुर्गृहीतं जुहोति' इति सामान्यवचनं, विशेषवचनेन प्रयाजानूयाजव्यतिरिक्तपरम्। न च ग्रहणहोमरूपविषयभेदादविरोधः; अष्टत्वस्य केवलग्रहणार्थत्वे वैयर्थ्येन तद्द्वारा होमार्थतया एकविषयत्वप्राप्तिः : इति चेत् —

अष्टावुपभृतीत्येष चतुस्संख्याद्वये विधिः।

प्रधानार्थचतुस्संख्यां, नाङ्गग्रहणसंख्याबाधितुमलम्। ग्रहणमात्रार्थत्वे चोक्त एव दोषः। अतश्चतुष्ट्वद्वयलक्षणया उभयसामञ्जस्यमिति।

इति उपभृतिद्विचतुर्गृहीताधिकरणम् ॥ २० ॥

इति लघुवार्तिकटीकायां चतुर्थस्य प्रथमः पादः।

॥ अथ द्वितीयः पादः ॥

स्वरोश्छेदनाद्यप्रयोजकताधिकरणम् (१)

अग्नीषोमीयपशौ, 'यूपस्य स्वरुं करोति' 'स्वरुणा पशुमनक्ति' इति श्रुते, अञ्जनसाधनत्वेनावगतस्वरोरर्थप्राप्तादानानुवादेन यूपादिति विधौ करोतेरुपादानलक्षणा—वाक्यार्थविधिश्च स्यात्। अतः स्वरुकर्मकभावनैव विधेया। तस्याश्च करणेतिकर्तव्यताकांक्षायां, यूपशब्दो लक्षणया खदिरादिकं करणत्वेन —छेदनादिकञ्चेतिकर्तव्यतात्वेन समर्पयति। तथोत्पन्नश्च 'स्वरुणा पशुमनक्ति' इति विनियुज्यत इति, प्रयोजकश्छेदनादीनां स्वरुः। इति चेत् —

स्वरुर्यूपानुनिष्पादी

विशिष्टभावनाविधौ विधिगौरवात्, वाक्यार्थविधेश्चावर्जनीयतया तुल्यत्वात्, मुख्ययूपशब्दमुख्यार्थत्वाय करोतेरर्थप्राप्तादानलक्षणया तदनुवादेन यूपादिविधानात्, तदनुनिष्पन्नः शकलः स्वरुरप्रयोजकः।

इति स्वरोश्छेदनाद्यप्रयोजकताधिकरणम् ॥ १ ॥

शाखाया आहार्यताधिकरणम् (२)

शाखामधिकृत्य, 'प्राची[1]माहरति' इति श्रुते प्राचीशब्दः श्रुत्या दिग्वचनः। तां प्रत्याहरेत्। इतीति चेत् —

---

[1] प्राचीं शाखामाहरति—इति मातृकापाठः।

प्राचीमिति न दिग्वजः ॥ १०७ ॥

प्रतीत्यध्याहारापातात् सामानाधिकरण्याच्च शाखावादः, 'या प्राची शाखता 'मिति ।

इति शाखाया आहार्यत्वाधिकरणम् ॥ २ ॥

छेदनस्य शाखाप्रयुक्तताधिकरणम् (३)

'शाखामाच्छिनत्ति' 'शाखामाहरति' 'मूलतः शाखां परिवास्योपवेषं करोति' 'उपवेषेण कपालानुपदधाति' 'शाखया वत्सानपाकरोति' इति श्रुते, छेदनादीनां वत्सापाकरणं कपालोपधानञ्च प्रयोजकम्। छेदनादिवाक्ये समूलाग्रे शाखाशब्दश्रवणात्, तस्य च परिवासनेन द्विधाकृतस्यापाकरणोपधानयोर्विनियोगात्। इति चेत् —

मूलं शाखानुनिष्पादि

परिवासनवाक्ये 'मूलापादानकपरिवासनेन शाखां भावयेत्' इति परिवासनमूलयोरग्रार्थत्वावगमात्, तदर्थमूलेन क्रियमाणमुपधानमप्रयोजकं छेदनादेः। छेदनादिकमपि मूलापादानकपरिवासनार्थमित्यग्रार्थमेव। करोतिश्चोपधानार्थप्राप्तोपादानलक्षक इति।

इति छेदनस्य शाखाप्रयुक्तताधिकरणम् ॥ ३ ॥

शाखाप्रहरणस्य प्रतिपत्तिकर्मताधिकरणम् (४)

'सह शाखया प्रस्तरं प्रहरति' इत्यत्र हरते[1]स्तार्तीयन्यायेन यागत्वपर्यवसानात्, तत्र च प्रस्तरस्य गुवत्वात् तत्सहभूता शाखापि तत्रैव गुणभूतेति प्रहरणं प्रहोजकं शाखायाः। इति चेत् —

शाखायास्सहता हृतौ।

'सूक्तवाकेन प्रस्तरं प्रहरति' इत्यत्र मान्त्रवर्णिकदेवतासंबन्धबलात् यागत्वपर्यवसानेऽपि, 'सह शाखया .... ' इत्यत्र प्रहरणस्य प्रतिपत्तित्वात् तत्र च प्रस्तरस्य प्रतिपाद्यतया तत्सहभूतशाखापि प्रतिपाद्यैवेत्यप्रयोजकं प्रहरणं शाखायाः।

इति शाखाप्रहरणस्य प्रतिपत्तिकर्मताधिकरणम् ॥ ४ ॥

निनयनस्य प्रतिपत्तिकर्मताधिकरणम् (५)

'अपः प्रणयति' इत्युक्त्वा, 'प्रणीताभिर्हवींषि संयौति' 'अन्तर्वेदि प्रणीता निनयति' इति श्रुताभ्यां संयवननिनयनाभ्यां प्रणीताः प्रयुज्यन्ते। तयोस्तत्साध्यत्वाविशेषात्। इति चेत् —

---

[1] ३-२-५

प्रतिपत्तिनिनयनं प्रणीतानामपां भवेत् ॥ १०८ ॥

तृतीयया संयवनशेषत्वं, द्वितीयया निनयनं प्रति प्राधान्यञ्च प्रणीतानां प्रतीयत इति निनयनं प्रतिपत्तिस्तासामप्रयोजकम् ।

इति निनयनस्य प्रतिपत्तिकर्मताधिकरणम् ॥ ५ ॥

दण्डदानस्यार्थकर्मताधिकरणम् (६)

'क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति' इति श्रुतं दण्डदानं, न दण्डप्रयोजकम् । 'दण्डेन दीक्षयति' इति दीक्षार्थतया कृतकरं मैत्रावरुणहस्तप्रक्षेपे द्वितीयान्तशब्दनिर्दिष्टदण्डं प्रति प्रतिपत्तित्वात् । इति चेत् —

दण्डदानं प्रशास्त्रे यत् तद्दण्डस्य प्रयोजकम् ।

'दण्डकर्मकदानेन मैत्रावरुणं भावयेत्' इति मैत्रावरुणार्थतया श्रूयमाणं दानं न प्रतिपत्तिः । प्रशास्तुश्च 'स्थित्वाऽनवानं प्रैषानुवचने पठतोऽवष्टंभायोपयोक्ष्यमाणदण्डस्य दानं तस्य प्रयोजकमिति अग्नीषोमीयविकारपश्वन्तरे दीक्षाभावेऽपि दण्ड उत्पाद्यः ।

इति दण्डदानस्यार्थकर्मताधिकरणम् ॥ ६ ॥

प्रासनस्य प्रतिपत्तिकर्मताधिकरणम् (७)

'चात्वाले कृष्णविषाणां प्रास्यति' इत्यादिवाक्यश्रुतकृतकरद्रव्यप्रतिपत्तित्वाभिमतं प्रासनाद्यर्थकर्म । तादृग्द्रव्यस्य संस्कारे प्रयोजनाभावेन विनियोगभङ्गात । इति चेत् —

प्रासनं प्रतिपत्तित्वं विषाणायाः प्रपद्यते ॥ १०९ ॥
न भजन्त्यर्थकर्मत्वं सर्वाश्च प्रतिपत्तयः ।

कृतकरमपि द्रव्यं स्थलाच्छादकं क्वचित् त्यक्तव्यमिति तन्नियमोऽयं विधीयते तद्वशादेव तल्लोपे निवृत्तमप्यपूर्वं नश्यतीति कल्प्यते ।

इति प्रासनस्य प्रतिपत्तिकर्मताधिकरणम् ॥ ७ ॥

अपभृथगमनस्य प्रतिपत्तिकर्मताधिकरणम् (८)

'यत्किञ्चित्सोमलिप्तं स्यात् तेनावभृतं यन्ति' इति श्रुते, अवभृथोद्देशेन तृतीयया साधनं सोमलिप्तं विधीयते । अन्यथा अवभृथशब्दे देशलक्षणा, तृतीया द्वितीयार्थलक्षिका च स्यात् । इति चेत्—

नयनं सोमलिप्तानां प्रतिपत्तिरितीष्यते ॥ १०९ ॥

वारुणैककपालेनेति उत्पत्तिवाक्यविहितद्रव्यावरुद्धे द्रव्यविध्ययोगात्, यन्तीति प्रत्ययेन सोमलिप्तावभृत-

संबन्धविधौ वाक्यार्थविध्यापत्तेश्च सोमलिप्तोद्देशेन यानं धात्वर्थो विधीयते । 'अवभृथदेशनयनेन सोमलिप्तं भावयेत्' इति ।

इत्यवभृथगमनस्य प्रतिपत्तिकर्मताधिकरणम् ॥ ८ ॥

कर्तृदेशकालविधीनां नियमार्थताधिकरणम् (९)

'समे यजेत' इत्यादिकारकश्रुतयो नापूर्वविधयः, क्रियाविध्नुपपत्तिप्राप्तत्वात् । न विषमादिनिवृत्त्यर्थाः । परिसंख्यायास्त्रिदोषत्वात् । अतोऽनुवादाः । इति चेत् —

द्रव्यदेशादिषु विधिर्नियमात्मक इष्यते ।

क्रियाविधिना पक्षप्राप्तानां द्रव्यदेशकालानामप्राप्तांशपूरणफलकनियमविधिसंभवान्नानुवादाः ।

इति कर्तृदेशकालविधीनां नियमार्थत्वाधिकरणम् ॥ ९ ॥

द्रव्यगुणविधानस्य नियमार्थत्वाधिकरणम् (१०)

'श्वेतमालभेत, मुक्तानाञ्चरुम्' इत्यादौ मुक्तादेरपूर्वत्वेन क्वचित्क्रियासंबन्धाभावेन च न नियमः । इति चेत् —

तद्वद्गुणेऽपि मुक्तादौ

गुणविशिष्टचरोः कारकत्वात् तद्द्वारेण गुणस्यापि परिच्छेदकतया तत्त्वोपपत्तेर्नियम एवायम् । अरुणाधिकरणस्य प्रपञ्चः ।

इति द्रव्यगुणविधानस्य नियमार्थत्वाधिकरणम् ॥ १० ॥

अवघातादिसंस्कारविधानस्य नियमार्थत्वाधिकरणम (११)

'अवहन्ति' इत्यत्र अवहननस्य यागसंबन्धित्वाश्रवणात् शुक्रचराविव द्रव्यद्वारापि तदप्रतीतेः तण्डुलाक्षिप्तक्रियानुवादः । इति चेत् —

तथावहननादिषु ॥ ११० ॥

साक्षात्तत्संबन्धाश्रवणेऽपि प्रकरणात्तदपूर्वसाधने लक्षिते विधानान्नियमोपपत्तिः ।

इत्यवघातादिसंस्कारविधानस्य नियमार्थत्वाधिकरणम् ॥ ११ ॥

यागहोमस्वरूपनिरूपणाधिकरणम् (१२)

प्रसङ्गाद्यागहोमदानानां लक्षणान्याह —

त्यागो द्रव्यस्य यागस्स्याद्देवतोद्देशपूर्वकः ।

उद्देशपूर्वकस्त्यागो यागः । तत्त्वं यजिपदप्रवृत्तिनिमित्तम् । उद्देशत्यागयोः सकर्मकत्वात् द्रव्यदेवतयो कीर्तनं, न तु यजिवाच्यतया । अप्रतिग्रहीतृत्वे सति त्यज्यमानद्रव्योद्देश्यत्वे सति— विधिगम्यत्वं देवतात्वम् । विशिष्टन्तु यजिवाच्यमकर्मकमेव ।

स एव होम इत्युक्तः प्रक्षेपांशोऽधिको यदि ॥ १११ ॥

सः = उद्देशपूर्वकस्त्यागः । आहमनीयादौ यः प्रक्षेपः, तदंशाधिकश्चेत् होम–इत्युच्यते ।

स्वीयस्य परकीयत्वापादनं दानमुच्यते ।

लक्षणानीमानि भाष्ये । लोकप्रसिद्धपदार्थकत्वाद्यज्यादीनां न लक्षणस्य कृत्यमित्यत आह —

लक्षणानीमानि भाष्ये प्रयोगप्रक्रियास्वपि ।

प्रयोगोऽनुष्ठानं, तस्य प्रकारः प्रक्रिया । तासु सूत्रयोः पदानि वर्तन्त इति शेषः । एवं होमादिष्वपि ।

नन्ववहननादेर्यागे विधानमित्ययुक्तम् । उत्पत्तौ तदश्रवणादित्याशङ्क्य, 'यजति चोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्' 'तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकस्स्यात्' इति सूत्रयोः वार्तिकोक्तं योजनानन्तरमाह —

वार्तिके त्वश्रुते यागे सौर्यादौ यागकल्पना ॥ ११२ ॥

द्रव्यदेवतासंबन्धानुपपत्तिकल्पितो यागो विहित इत्यर्थः ।

यागे जुहोतिश्रवणं युक्तश्चेति नयद्वयम् ।

यागे विहिते, 'चतुरवत्तं जुहोति' इति यज्जुहोतिश्रवणं, तदुत्पत्त्यप्राप्तप्रक्षेपांशविधानाद्युक्तमिति न्याय-द्वयं सूत्रद्वयेनोक्तमित्यर्थः ।

इति यागहोमस्वरूपनिरूपणाधिकरणम् ॥ १२ ॥

बर्हिषः आतिथ्यादिसाधारण्याधिकरणम् (१३)

'यदातिथ्यायां बर्हिस्तदुपसदां' 'तदग्नीषोमीयस्य' इत्यत्राच्छिद्य विधावातिथ्याभ्यां विधिवैयर्थ्यात्, निरिष्टकोपदेशे शिष्टाचारविरोधात्' धर्मलक्षणार्थो विधिः आश्वत्थालप्रस्तरादिप्राप्त्यर्थः । इति चेत् —

आतिथ्येष्ट्युपसद्दैक्षाः स्युस्साधारणबर्हिषः ॥ ११३ ॥

दैक्षो अग्नीषोमीयः । लक्षणापत्तेर्नायं पक्ष इति धर्मविशिष्टबर्हिस्साधारणविधिः ।

इति बर्हिषः आतिथ्यादिसाधारण्याधिकरणम् ॥१३॥

इति चतुर्थस्य द्वितीयः पादः ।

॥ अथ तृतीयः पादः ॥

द्रव्यसंस्कारकर्मणां क्रत्वर्थताधिकरणम् (१)

अनारभ्य श्रुतं–'यस्य पर्णमयी जुहुर्भवति न स पापं श्लोकं शृणोति' इत्यादि । तत्र पर्णत्वदि-रात्रिसत्रवद्विपरिणतावपापश्लोकश्रवणादिफलोद्देशेन क्रत्वर्थमपि दध्यादिवत् । इति चेत् —

अङ्गानां पर्णतादीनां फलं नास्त्यार्थवादिकम् ।

क्रत्वव्यभिचरितजुहूद्वारा जुहूपदलक्ष्यक्रत्वर्थत्वेन विधानेन न फलापेक्षा पर्णतादीनाम् । दध्यादाविव वाक्यद्वयाभावाच्च नोभयार्थत्वम् । फलं प्रति विधीयमानस्य आश्रयालाभाच्च । अतः क्रत्वर्थमेव पर्णत्वादि ।

इति द्रव्यसंस्कारकर्मणां क्रत्वर्थत्वाधिकरणम् ॥ १ ॥

नैमित्तिकानामनित्यार्थत्वाधिकरणम् (२)

'अपः प्रणयति' इति प्रकृत्य, 'मृन्मयेन प्रतिष्ठाकामस्य' इत्यादि श्रुतम् । तथा 'बर्हिद्विरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्' इति ।

तत्र वारणाभीवर्तादि नित्यविधिमहष्ट्वा, स नेति कृत्वा वा पूर्वपक्षः ।

यद्वा वारणादीनां सामान्यविधित्वात् मृन्मयस्य कामे–बार्हद्विरस्य द्वादशाहे च विशेषविधित्वात् बलीयसा तेनैव नित्यस्यापि सिद्धिः । इति चेत् —

गोदोहनादेरन्यत्स्यान्नित्ये प्रणयनादिके ॥ ११४ ॥

अन्योद्देशेन विहितस्य सन्निहितस्यापि अन्याङ्गत्वे मानाभावात्, नित्यस्याक्षेपात् सामान्वचनाद्वा साधन-प्राप्तेः निमित्तप्रतिविरोधाच्च न काम्यनैमित्तिकयोर्नित्येन संबन्धः ।

अत्र द्वादशाहे अहीनब्राह्मणे बार्हद्विरस्य राजन्ये–पार्थुरश्मस्य वैश्ये–रोपोवाजीयस्य विधानात् नित्याभीवर्तस्य मूर्धावसिक्तविषयत्वमिति केचित् ।

इति नैमित्तिकानामनित्यार्थताधिकरणम् ॥ २ ॥

दध्यादेरुभयार्थताधिकरणम् (३)

(संयोगपृथक्त्वन्यायः)

अग्निहोत्रे, 'दध्नेन्द्रियकामस्य....' इति श्रुते, दधि केवलफलवाक्यापेक्षिताश्रयसंबन्धबोधकत्वेन तदेकवाक्यत्वात् । इति चेत् —

दधि क्रतुफलार्थं स्यात्

इन्द्रियकामाधिकरणोक्तन्यायेन सन्निधानादेवाश्रयलाभात् तस्य क्रत्वर्थत्वबोधकत्वम् । तादृग्दध्नः क्रतुफलेनैव फलवत्त्वञ्चेति उभयार्थं दधि ।

इति संयोगपृथक्त्वन्यायः

पयोव्रतादीनां क्रतुधर्मताधिकरणम् (४)

ज्योतिष्टोमे 'पयोव्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्य' इति श्रुतं पयोव्रतादि पुरुषार्थम् । व्रत्यमानद्रव्येण तत्प्रीतेर्दृष्टेः । तदाश्रितनियमस्यापि तदेव फलम् । इति चेत् —

क्रत्वर्थन्तु पयोव्रतम् ।

नियमं विनापि प्रीतिदृष्टेः, सन्निहितक्रतुफलेनैव तस्य फलवत्त्वमिति जंजभ्यमानमन्त्रवत् क्रत्वर्थपुरुषसंस्कारकत्वेन क्रत्वर्थम् । इति पयोव्रतादीनां क्रतुधर्मताधिकरणम् ॥ ४ ॥

विश्वजिदादीनां सफलत्वाधिकरणम् (५)

एकाहकाण्डे, 'विश्वजिता यजेत' इत्यश्रुतफलं कर्म श्रुतम् । तन्निष्फलम् । तदश्रवणात् । 'यागं कुर्यात्' इति निराकांक्षे वाक्ये अध्हारायोगात् । पुरुषाप्रवृत्तिविध्यप्रामाण्ययोः । प्रवर्तनायुक्तभावनाश्रवणानुपपत्त्या फलपदाद्याहारे नष्टस्य तज्जनकत्वानुपपत्तिः । न चापूर्वद्वारकत्वादुपपत्तिः, 'अध्याहृते फलेऽपूर्वसिद्धिः । तत्सिद्धौ तद्द्वारा फलसिद्धिः' इत्यन्योऽन्याश्रयात् । नियोज्यस्य निषेधेष्विव सामर्थ्यादेव तत्कालजीविशक्तस्य प्राप्तेरतो निष्फलमेवं जातीयकम् । इति चेत् —

फलं विश्वजितः कल्प्यम्

विधियुक्ता भावना, नापुरुषार्थं भाव्यत्वेन स्वीकरोति इति, सर्वानुपपत्तिपरीहारेणाकांक्षापूरणाय फलपदाद्याहार इति सर्वाणि सफलानि कर्माणि ।

इति विश्वजिदादीनां सफलत्वाधिकरणम् ॥ ५ ॥

विश्वजिदादीनामेकफलत्वाधिकरणम् (६)

तान्यविशेषात्सर्वार्थानि । इति चेत् —

तदेकम्

एकेनैवाकांक्षापूर्तेः ।

इति विश्वजिदादीनामेकफलत्वाधिकरणम् ॥ ६ ॥

विश्वजिदादीनां स्वर्गफलत्वाधिकरणम् (७)

एकस्य विशिष्याज्ञाने सर्वार्थत्वाप्रामाण्ययोरन्यतरप्रसङ्गः । इति चेत् —

स्वर्ग एव सः ॥ ११५ ॥

'यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदम् ॥'

इति शक्तिग्राहकार्थवादात् निरतिशयप्रीतिरूपः—प्रत्यवायपरिहारात्, दुःखाभावाच्च शीघ्रोपस्थितिकः स्वर्ग एव फलम् । दुःखासंभिन्नत्वं—साधनसंपादनायासरहितत्वम् । अनन्तरं दुःखाग्रस्तत्वं—'न परदारान् गच्छेत्' इत्यादिनिषेधोल्लङ्घनकृतदुःखशून्यत्वम् । आयासशून्यत्वस्य सुखनित्यत्वेऽप्युपपत्तिवारणाय 'अभिलाषोपनीतं' इति । अभिलाषमात्रेण स्रगादिसमवधानात्, न यागादेर्व्यञ्जकत्वमिति ।

'यज्ञेन विविदिषन्ति' इति वाक्येन, एवंजातीयकानां ज्ञानादौ विनियोगात्, न स्वर्गकल्पनम् । इति चेत्, न । तस्यासन्निहितत्वात् । अन्यथा दर्विहोमवत् दर्शादेरप्याकांक्षोपशमसंभवे, प्रयाजादेरपि ज्ञानादौ विनियोगापत्तेः । अश्रुतफलानामन्यतराकांक्षया दूरस्थकर्माङ्गत्वापत्तेश्च । रात्रिसत्राणामपि विपरिणामपरिहाराय, अर्थवादानां स्वार्थातात्पर्येण च ज्ञाने विनियोगप्रसङ्गाच्च । सर्वथापि त एवोभयलिङ्गात्' इत्युत्तरतन्त्रसूत्रे, सन्निहितफलनिराकांक्षस्याग्निहोत्रादेरेव, वचनात् ज्ञानविनियोगोक्तेश्च । तस्मात्सांनिध्यार्थं स्वर्गपदाध्याहार एव इति ।

इति विश्वजिदादीनां स्वर्गफलताधिकरणम् ॥ ७ ॥

रात्रिसत्रस्यार्थवादिकफलकत्वाधिकरणम् (८)

'प्रतितिष्ठन्ति ह वा (एते) य एता रात्रीरुपयन्ति' इत्यनारभ्य श्रुतम् । ज्योतिर्गौरायुरित्यादिविधिविहिताः सुत्यारात्रयः । तत्र स्वर्गः फलमध्याहार्यः । वर्तमानापदेशिनः कामपदशून्यस्य चापापश्रवणवत् प्रतिष्ठाश्रवणस्यार्थवादतया तत्रातात्पर्यात् । इति चेत् —

रात्रिसत्रं प्रतिष्ठार्थम्

अध्याहारतो विपरिणामव्यवहितसंबन्धयोर्लघुत्वात्, 'ये प्रतितिष्ठा सन्ति-ते एता रात्रीरुपेयुः' इति कल्पनात् फलमेव प्रतिष्ठा । अन्यथा अर्थवादस्यासमवेतार्थतापातात् । पर्णत्वस्य क्रत्वर्थत्वाद्वैषम्यम् ।

इति रात्रिसत्रस्यार्थवादिकफलकत्वाधिकरणम् ॥ ८ ॥

काम्यानामैहिकामुष्मिकफलवत्त्वाधिकरणम् (९)

'सौर्यं चरुं ....' इत्यादौ, अविशेषविधेः सर्वान्प्रति प्रवृत्तत्वप्रतीत्युपपादनाय स्वर्गोऽध्याहार्यः । ब्रह्मवर्चसादिश्रवणन्तु अन्वाचयार्थम् । काष्ठाहरण इव शाकाहरणम् । इति चेत् —

न सौर्ये स्वर्गकल्पना ।

ब्रह्मवर्चसकामपदसमभिव्याहारलक्षणवाक्यात् तत्कामं प्रत्येव विभिप्रवृत्तेः, अविशेषप्रवृत्त्यसिद्धेः, अन्वाचयत्वे च अन्योऽन्याश्रयापत्तेः श्रुतमात्रफलानि सौर्यादीनि ।

इति काम्यानामैहिकामुष्मिकफलवत्त्वाधिकरणम् ॥ ९ ॥

दर्शपूर्णमासादीनां सर्वकामार्थताधिकरणम् (१०)

'एकस्मै वा अन्ये यज्ञक्रतवः कामायाह्रियन्ते–सर्वेभ्यः कामेभ्यो ज्योतिष्टोमः' 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' इत्यनारभ्य श्रुतम् ।

तत्राख्याताद्यभावेन विधिभावनयोरश्रवणात्, तदध्याहारे च अनुपादेयफलसंबद्धासन्निधिना कर्मान्तरत्वापत्तेः, सदोमानादि गोदोहनादिगुणफलसंबन्धानुवादः । सर्वकामशब्दः स्तुत्यर्थः । इति चेत् —

सर्वेभ्यः स्यात्फलविधिः

'सर्वेभ्यः ....' इति वाक्यं फले कर्मविधिः स्यात् । तादर्थ्यचतुर्थ्या फलपरत्वावगमात् । कर्मणश्च स्वाङ्गाश्रितगुणफलार्थत्वस्याप्रमाणकतया तदनुवादायोगात् । फलानि प्रति कर्मणः, अध्याहृतेन–अनुषक्तोत्पत्तिविधिना वा विधिसंभवात् । प्रत्यक्षाख्यातस्यैव प्रकरणान्तरन्यायविषयतया अत्र तदप्रसङ्गात् । उद्देश्यसाहित्यबहुत्वयोर्वाक्यभेदभिया अविवक्षणात् तत्तत्फलोद्देशेन कर्मविधिः ।

इति दर्शपूर्णमासादीनां सर्वफलार्थत्वाधिकरणम् ॥ १० ॥

दर्शपूर्णमासादीनां प्रतिफलं पृथगनुष्ठानाधिकरणम् (११)

तत्रैकस्मिन् प्रयोगे सर्वाणि फलानि । साधनस्याविशिष्टत्वात्–एकोत्पत्तौ विनिगमनाभावाच्च । न च कामनातो व्यवस्था । तस्याः–तद्वतः पुरुषस्य वा कर्मानङ्गत्वात्, कामिनमुद्दिश्य कर्मणो विधेयत्वात् । अत एव पुंस्त्वाविवक्षा स्वर्गकामादिवाक्ये । बहुफलकामनायां, तावतामेकप्रयोगोत्पाद्यत्वस्यैवमप्यवारणाच्च । तस्मात्सर्वेषां युगपदेव जन्म । इति चेत् —

तेषां पर्यायतो जनिः ॥ ११६ ॥

विधेःसमीहितफलसाधनत्वाक्षेपकतया, काम्यमानस्यैकस्यैवोत्पादात् , बहुकामनायामपि सामग्रीस्वाभाव्यात् घटसामग्र्यादाविव एकफलसाधनत्वेन श्रुतकर्मणः एकस्मिन् प्रयोगे तज्जातीयस्यैकस्यैवोत्पादवच्च, अत्राप्येकस्मिन् प्रयोगे एकमेव फलं स्यात् ।

इति दर्शपूर्णमासादीनां प्रतिफलं पृथगनुष्ठानाधिकरणम् ॥ ११ ॥

योगसिद्धिन्यायाधिकरणम् (१२)

चित्रादिफलं पश्वाद्यामुष्मिकमेव । स्वरूपस्य प्रतिग्रहाद्युपायान्तरसाध्यत्वेन अदृष्टानपेक्षतया,

शरीरस्यैव तदपेक्षणात् तत्तद्यागसाध्यादृष्टारब्धशरीरोपभोग्यं पश्वादि भूभोग्यमपि जन्मान्तरे भविष्यति। इति चेत् —

नामुष्मिकत्वनियमश्चित्रादीनां फलेषु च।

यागात् पशुः फलं श्रूयते। नैहिकं जन्मान्तरीयं वेति। तथा च, अदृष्टसहितप्रतिग्रहादिना, असति प्रबलप्रतिबन्धे इहापि भवितुमर्हतीत्यनियमश्चित्रादिषु फलानामैहिकामुष्मिकत्वयोः।

इति योगसिद्धिन्यायः ॥ १२ ॥

*सौत्रामण्यादीनां चयनाद्यङ्गताधिकरणम् (१३)

'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इत्यत्र दर्शपूर्णमाससोमयोरिव स्वाराज्यपुरोधादिफलवत्त्वेन कृतकरयोः क्त्वाप्रत्ययोक्तकालार्थस्संयोगः। इति चेत् —

अङ्गं बृहस्पतिसवो वाजपेयक्रतौ भवेत् ॥ ११७ ॥

वाजपेयश्रुतेः कालोपलक्षणार्थतया अत्यन्तपारार्थ्यं, वाजपेयप्रकरणबाधश्च कालविधौ स्यात्। अनुपादेयकालसंबन्धसचिवा संनिधिना कर्मान्तरत्वे, तस्यानिर्ज्ञातफलस्य, अग्निहोत्रशब्दवत् धर्मलक्षणया बृहस्पतिसवधर्मकस्य वाजपेयाङ्गत्वेन विधौ प्रकरणानुग्रहादि भवतीत्यङ्गप्रयोजन एवार्थसंबन्ध इति वाजपेयप्रयोगं समाप्येदमपरं कर्तव्यम्।

इति सौत्रामण्यादीनां चयनाद्यङ्गताधिकरणम् ॥ १३ ॥

वैमृधादीनां पौर्णमास्यङ्गताधिकरणम् (१४)

'संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपति' इत्यत्र समाप्तिसंयोगान्नाङ्गाङ्गित्वसंबन्धः। किन्तु कालार्थः। प्रकरणाच्च षण्णामङ्गं वैमृधः। इति चेत् —

दर्शे न वैमृधः

वाक्यात्पौर्णमास्यङ्गमेव। नामावास्याङ्गं प्रकरणात्। तस्य दुर्बलत्वात्। साधारणप्रयोगसमाप्तावपि षड्यागार्थत्वपक्ष इवाङ्गान्तरस्य वैशेषिकस्य संभवात्। अत एव वाक्यशेषः 'वैमृधः पूर्णमासेऽनुनिर्वाप्यो भवति तेन पूर्णमासस्सेन्द्रः' इति। 'संस्थाप्य पौर्णमासी'मित्यत्र द्वितीयासंयोगात्, प्रधानत्रयं परिसमाप्य स्विष्टकृतः पूर्वं वैमृधः कार्यः।

ननु साङ्गप्रयोगसमाप्तौ द्वितीयासंयोगे प्रधानमात्रार्थत्वस्य 'ता उपांशुकर्तव्याः' इत्यत्र स्थित-

---

* अग्निचित्वासौत्रामण्या यजेत-इत्यस्यापि विषयवाक्यत्वात् अधिकरणशीर्षकमेवं प्रदर्शितम्।—(सं)

त्वात्, यदि प्रयोगसमाप्तौ कार्यः, तदा 'य इष्ट्या' इति वाक्यात् सर्वप्रतीक्षया कार्यः इति केचित् —

इति वैमृधादीनां पौर्णमास्यङ्गताधिकरणम् ॥ १४ ॥

अनुयाजादीनामाग्निमारुतोर्ध्वकालताधिकरणम् (१५)

'आग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति' इत्यत्रापि अत्यन्तपारार्थ्यवारणायाङ्गाङ्गिसंबन्धः । इति चेत् —

नानुयाजास्सोमाग्निमारुते ।

आग्निमारुतस्य सोमाङ्गतयोपदिष्टस्यानुयाजानाञ्च सवनीयाङ्गतयातिदिष्टानां कृतकरत्वात् कालार्थस्संयोगः ।

इत्यनुयाजादीनामाग्निमाग्निमारुतोर्ध्वकालताधिकरणम् ॥ १५ ॥

सोमादीनां दर्शपूर्णोत्तरकालताधिकरणम् (१६)

ज्योतिष्टोमे श्रूयते 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इति । तत्राप्युक्तहेतोरङ्गाङ्गिसंबन्धः इति चेत् —

इष्ट्योर्न सोमः

अनुपादेयमिष्ट्युत्तरकालमुद्दिश्योपादीयमानमपि कर्म, 'सन्निधौत्वविभागा'दिति न्यायेन न कर्मान्तरम् । प्रकृतस्य च सफलत्वात्' दर्शपूर्णमासयोश्चाविधीयमानयोः सोमाङ्गत्वायोगात् कालार्थ एवायं संयोगः । यद्यपि तैत्तिरीये, 'एष वै देवरथः' इत्युपक्रम्य, 'दर्शपूर्णमासाविष्ट्वा सोमेन यजते' इति दर्शादिप्रयरणे श्रुतम्; यद्यपि चाचार्यवाचस्पतिमिश्रैरनारभ्याधीतमित्युक्तम्; तथाप्येतत्सिद्धान्तसिद्ध्यर्थं तदुभयं सोमप्रकरण उत्क्रष्टव्यम् ।

इति सोमादीनां दर्शपूर्णमासोत्तरकालताधिकरणम् ॥ १६ ॥

वैश्वानरेष्टेः पुत्रगतफलकत्वाधिकरणम् (१७)

'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते' इत्युपक्रम्य, 'यस्मिन् जाते ....' इत्यादिश्रुतम् । तद्रात्रिसत्रन्यायेन समुदितमेकं फलमित्युक्तं नामधेये । यद्यपि निमित्तफलयोर्निरपेक्षयोरुद्देश्यत्वे वाक्यभेदशङ्का; तथापि निमित्ते विधीयमानस्यापि फलाकांक्षत्वात् नात्र तत्प्रसङ्गः । तच्च फलं पितृगामि । विधेः—आधानवाक्यगतात्मनेपदाच्च । इति चेत् —

पुत्रस्य भवेद्वैश्वानरीफलम् ॥ ११८ ॥

फलप्रतिपादकवाक्यशेषेणैव पुत्रगामित्वप्रतीतेः, पितुः पुत्रगतफलाभिलाषितया विद्यात्मनेपदयोरुपपत्तेः पुत्रगाम्येव फलम् ।

इति वैश्वानरेष्टेः पुत्रगतफलकत्वाधिकरणम् ॥ १७ ॥

वैश्वानरेष्टेर्जातकर्मोत्तरकालताधिकरणम् (१८)

इयमिष्टिर्जननोत्तरकाल उपक्रान्तव्या, निमित्तोपजनने सति विलम्भहेत्वभावात् । इति चेत् —

प्राग्जातकर्मणो नैषा

जातकर्मोत्कर्षे तन्मध्यपतितस्तनप्राशनोत्कर्षापत्त्या पुत्रविपत्त्यापत्तेः जातकर्मानन्तरमेव कर्तव्या ।

इति वैश्वानरेष्टेर्जातकर्मोत्तरकालताधिकरणम् ॥ १८ ॥

वर्णकान्तरम्

जातकर्मानन्तरमेवान्तर्दशाहे शुचित्वमनपेक्ष्य कर्तव्या । नैमित्तिके यथाशक्त्युपबन्धात् । इति चेत् —

कर्तव्या न च सूतके ।

प्रयोजनविरोधात् निमित्तस्वारस्यमुल्लंघ्योत्कृष्टत्वात् शौचाद्यङ्गोपसंहाराय सूतकान्ते पर्वणि कर्तव्या ।

इति वर्णकान्तरम् ।

सौत्रामण्याद्यङ्गानां स्वकालकर्तव्यताधिकरणम् (१९)

'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इत्यत्र श्रुतो बृहस्पतिसवः शरद्येव । वाजपेयप्रयोगस्य साङ्गस्य तत्र विधानात्, बृहस्पतिसवस्यापि तदङ्गत्वेन तत्कालत्वस्योपदेशात्प्राप्तेः, आतिदेशिकवसन्तकालबाधात् । इति चेत् —

न वाजपेयकाले स्यात् बृहस्पतिसवक्रिया ॥ ११० ॥

वाजपेयकरणकफलार्थन्यापारे श्रुता शरत्, तद्बहिःश्रुतबृहस्पतिसवे न भवितुमर्हति । अङ्गस्य सतोऽनन्तरकरणप्रसक्तावपि कालोपसंग्रहाय न क्रियते । क्त्वाप्रत्ययश्च पूर्वकालातायामेव । नाव्यवहिततायाम् । तेनोप्पन्नमप्यपूर्वं बृहस्पतिसवप्रयोगसाध्यापूर्वेण दृढीक्रियते ।

इति सौत्रामण्याद्यङ्गानां स्वकालकर्तव्यताधिकरणम् ॥१९॥

इति चतुर्थस्य तृतीयः पादः ।

॥ अथ चतुर्थः पादः ॥

राजसूयेज्यानां विदेवनाद्यङ्गकत्वाधिकरणम् (१)

अनुमत्यादीष्टीः – मल्हादिपशून् – पवित्रादिसोमयागान् – विदेवनादीन्ययागरूपाणि च प्रकृत्य

श्रूयते—'राजसूयेन स्वाराज्यकामो यजेत' इति। 'राजकर्तृकराजसूयेन स्वाराज्यफलं भावयेत्' इत्यर्थः। तत्र यागानामयागानाञ्च प्रकृतानामप्रसिद्धार्थेनापि प्रातिपदिकेन परामर्शात्, तद्वर्तितृतीयया च तेषां करणत्वप्रतीतेः, स्वाराज्यरूपफलस्यावगमात्, भावनायाश्च प्रत्ययेनावगतेः, यजतिर्यागायाग-समुदायानुवाद इति, सर्वे फलप्रयुक्ताः। इति चेत् —

कर्मणां यागरूपाणां राजसूये प्रधानता।

भावनाकरणं धात्वर्थः। नाम च तद्विशेषणमिति द्वितीयाद्ये स्थितत्वात् तन्नामकयागानां तदङ्गत्वम्।

इति राजसूयेज्यानां विदेवनाद्यङ्गकत्वाधिकरणम् ॥ १ ॥

विदेवनस्य कृत्सराजसूयाङ्गताधिकरणम् (२)

अभिषेचनीयानन्तराम्नाता अपि विदेवनाद्यभिषेकान्ताः तदीयमाहेन्द्रस्तोत्रकाले, 'महेन्द्रस्तोत्रं प्रत्यभिषिच्यते' इति वचनेनापकृष्टाः, तदीयप्राकृताङ्गसंदष्टतया, अवान्तरप्रकरणेनाभिषेचनीयार्थाः। इति चेत् —

सर्वस्मिन्राजसूयेऽङ्गमभिषेकावधिः क्रिया ॥ १२० ॥

बहिर्विधानकाले प्रकरणानुद्भूत्यां संनिधिमात्रबाधेन कृत्स्नराजसूयाङ्गत्वमुक्तमेव ग्राह्यम् ॥

इति विदेवनस्य कृत्स्नराजसूयाङ्गताधिकरणम् ॥ २ ॥

सौम्यादीनामुपसत्कालकत्वाधिकरणम् (३)

तत्रैव, 'सौम्यं चरुं बभ्रुर्दक्षिणा' इति विधाय पुनः श्रुतं, 'पुरस्तादुपसदां सौम्येन प्रचरन्ति' इति। सामान्यवचनेन प्रकरणसापेक्षेण फलविनियोगात् वरमुपसदङ्गत्वं सौम्यस्य तादर्थ्यषष्ठ्या। इति चेत् —

तस्मिन्भवेन्न सौम्यस्य चरोरुपसदङ्गता।

पुरस्ताच्छब्दोपात्तकालस्यावश्यविधेयतया अनुत्पत्तिविधौ अनेकविध्यशक्तेनाङ्गत्वविधानमिति कालार्थ एव संयोगः। इति सौम्यादीनामुपसत्कालकत्वाधिकरणम् ॥ ३ ॥

आमनहोमादीनां साङ्ग्रहण्यङ्गताधिकरणम् (४)

आमनहोमाः 'साङ्ग्रहण्या यजेत ग्रामकामः' इति प्रकृत्य श्रुताः। साङ्ग्रहणीफलपदानुषङ्गेण, 'आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोत्येतावन्तो वै सजाता ये महान्तो ये क्षुल्लका यास्त्रिय-स्तानेवावरुंधे' इति तदर्थवादेन वा फलार्थाः। इष्टेः प्राकृताङ्गनिराकांक्षत्वात् इति चेत् —

अङ्गमामनहोमास्स्युः

सकृदाम्नातस्यात्यन्तागतिकतया क्वचिदनुषङ्गेऽपि, इह परिधिमन्त्रव्यवेतत्वेन तदयोगात्, संनिधिप्रमाणेनाङ्गत्वसंभवाच्च–प्राकृताङ्गसंदंशविहितस्य प्रकरणोद्भूतेश्चार्थवादस्य स्वार्थातात्पर्याच्चाङ्गमेवामनहोमाः।

इत्यामनहोमादीनां सांग्रहण्यङ्गताधिकरणम् ॥ ४ ॥

दधिग्रहस्य नित्यताधिकरणम् (५)

ज्योतिष्टोमे, 'यां वा अध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आवृश्चयेते प्राजापत्यं दधिग्रहं-गृह्णीयात्' इत्युक्त्वा, पुनश्श्रूयते–'ज्येष्ठो वा एष ग्रहाणां यस्यैष गृह्यते' इति।

तत्र देवतान्तरे निमित्ते ज्येष्ठत्वे च श्रुतत्वात् दधिग्रहो नित्यो नैमित्तिकश्च। ज्येष्ठत्वं, प्रशस्तत्वं–सर्वेभ्यः प्रथमग्राह्यत्वं वा नानित्ये भवेत्। इति चेत् —

नित्य एव दधिग्रहः ॥ १२१ ॥

एवकारो निमित्तिकत्वव्युदासाय। यदि शब्दाद्यभावेन अन्तरायस्य निमित्तत्वाप्रतीत्या अर्थवादत्वात् उक्तयुक्त्या नित्यत्वम्। 'दधिग्रहं गृह्णीयात्पशुकामस्य' इति वचनात्काम्यत्वमपि।

इति दधिग्रहस्य नित्यताधिकररणम् ॥ ५ ॥

वैश्वानरस्य नैमित्तिकताधिकरणम् (६)

अग्नौ श्रुतम्, 'यो वै संवत्सरमुख्यमभृत्वाग्निश्चिनुते यथा सामिगर्भोऽवपद्यते तादृगेव तदार्तिमार्छेत् वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेत्' इति। अत्रापि संवत्सराभरणस्य स्तुतिमात्रत्वात् इष्टिर्नित्या। इति चेत् —

यो वै संवत्सरमिति क्रियानैमित्तिकी भवेत्।

कर्तृसमभिव्याहृतयच्छब्दस्य निमित्तबोधकत्वात् नैमित्तिकी इष्टिः।

इति वैश्वानरस्य नैमित्तिकताधिकरणम् ॥ ६ ॥

षष्ठ्याश्चितेर्नैमित्तिकताधिकरणम् (७)

'योऽग्निं चित्वा न प्रतितिष्ठति पञ्चपूर्वाश्चितयो भवत्यथ षष्ठीचितिं चिनुते प्रतिष्ठित्यै' इत्यत्र षष्ठीचितिर्नित्या। अन्यथा पूरणार्थं थुप्रत्ययस्य एकस्यामसंभवात्। इति चेत् —

तथा षष्ठीचितः

नैमित्तिकी षष्ठी। कर्तृवाचि यच्छब्दोपात्ताप्रतिष्ठित्यां निमित्ते विधानात्। प्रत्ययस्तु, पूर्वविहित चित्यभिधानक्रियापेक्षयाप्युपपन्नः। नित्याः पञ्च चितयः पूर्वाः, इयमेकैव भिन्ना निमित्ते विधीयते।

इति षष्ठ्याश्चितेर्नैमित्तिकताधिकरणम् ॥ ७ ॥

पिण्डपितृयज्ञस्यानङ्गताधिकरणम् (८)

'अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति' इत्यनारभ्याधीतः पिण्डपितृयज्ञः, अमावास्याशब्दाभिधेयदर्शाङ्गं, वाक्यात्। कालसाधारण्येऽपि तस्य, फलकल्पनापरिहारार्था इह कर्मवाचितैव। मनुरपि—'न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः' इत्यङ्गत्वमाह। अनाहिताग्नेस्तु पुरुषार्थः। इति चेत् —

दर्शे पितृयज्ञस्य नाङ्गता ॥ १२२ ॥

कालशक्तः, तद्योगात् कर्मणि लाक्षणिकोऽमावास्याशब्दः। न चेह लाक्षणिकग्रहणं युक्तम्। अपराह्णशब्दसामानाधिकरण्यादपि कालपरत्वमित्यनङ्गं पितृयज्ञः। वचनन्तु, मासिश्राद्धं दर्श एवाहिताग्निना कर्तव्यमित्येवं परम्।

इति पिण्डपितृयज्ञस्यानङ्गताधिकरणम् ॥ ८ ॥

रशनायाः यूपाङ्गताधिकरणम् (९)

'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं पशवीयाग्नेयं सवनीयं पशुमुपाकरोति' इति प्रकृतिप्राप्त रशनातो द्वितीया समाम्नाता। सा पश्वनपक्रमणार्था पश्वङ्गम्। दृष्टार्थत्वात्। न यूपार्था। तत्रादृष्टार्थतापातात्। तथा च 'त्रिवृद्युक्तमाग्नेयमुपाकरोति' इत्यन्वयः। त्रिवृत्पदे तृतीया–यूपपदे-द्वितीया च, स्थाणौ पशोरनपक्रमणाय वेष्टनमर्थसिद्धमनुवदति इति सर्वमेव दृष्टार्थम्। इति चेत् —

रशना सवनीयस्य यूपसंस्काररूपिणी।

द्वितीयातृतीयाभ्यां स्पष्टं यूपार्थत्वावगमात्, तदर्थत्वेऽपि मध्ये बन्धनस्य दार्ढ्यार्थतया दृष्टार्थत्वात् यूपार्थैव रशना।

इति रशनायाः यूपङ्गताधिकरणम् ॥ ९ ॥

स्वरोः पश्वङ्गताधिकरणम् (१०)

'यूपस्य स्वरुं' इति तादर्थ्यषष्ठ्या यूपार्थः स्वरुः। इति चेत् —

स्वरोः पश्वञ्जनार्थत्वान्नैव यूपार्थता मता ॥ १२३ ॥

'स्वरुणा पशुमनक्ति' इति पश्वञ्जनार्थत्वस्य स्फुटत्वात्, यूपस्येति यूपादुपादत्त इति पूर्वोक्त एवार्थः।

इति स्वरोः पश्वङ्गताधिकरणम् ॥ १० ॥

आघारादीनामङ्गताधिकरणम् (११)

'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र, आघारादिसमिष्टयजुरन्ताः यावन्तो यागाः, ते

सर्वे यजिनोपादायाख्यातेन फले विधीयन्ते । नामपदञ्च, विद्वद्वाक्याभ्यां समुदायकरणेऽपि नाख्यातमवच्छेत्तुमलम् । तत्परतन्त्रत्वाद्राजसूयनामवत् । तथा च सुबन्तप्रतिरूपकमव्ययं नाम, सर्वयागेषु सामानाधिकरण्याद्वर्तते । इति चेत् —

प्राधान्यमिष्टयोर्यागानां षण्णां स्यात्कालयोगिनाम् ।

प्रातिपदिकस्य कालयुक्तेषु षट्सु प्रसिद्धेः द्विवचनस्यापि विद्वद्वाक्यगतद्वित्वार्थतया प्रसिद्धार्थत्वात्, राजसूयवैलक्षण्यात् नामदमाख्यातमवच्छिद्य स्वसात्करोतीति तन्नामकयागानामेव फलसंबन्ध ; अन्येषां प्रकरणात् तदङ्गत्वम् ।

इत्याघारादीनामङ्गताधिकरणम् ॥ ११ ॥

ज्योतिष्टोमे दीक्षणीयादीनामङ्गताधिकरणम् (१२)

दीक्षणीयादीष्टिपशुसोमयागान्प्रकृत्य 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति श्रुतम् । तत्र सन्निधानाविशेषात् सर्वयागानां फलेन संबन्धः । नामपदमपि न क्वचिद्यागे प्रसिद्धम् । 'त्रिवृत्पञ्चदशस्सप्तदशएकविंशः, एतानि वाव तानि ज्योतींषि य एतस्य स्तोमाः' इत्यस्यार्थवादतया, न स्तोमेषु ज्योतिश्शब्दाभिधेयत्वपरम् । तथात्वे वा सर्वयागानां फलसंबन्धेन प्राधान्यात्, स्तोमपरिच्छिन्नप्रगीतमन्त्रसाध्यस्तोत्राणि सर्वयागाङ्गानीति, तद्द्वारा स्तोमानामपि सर्वयागसंबन्धात् सर्वेषां ज्योतिष्टोमनामतापत्तेः, 'ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोति' इत्यत्रापि स्तोत्रग्रहयोः कृतार्थयोः कालार्थस्संयोग इति न तद्वशेनापि कस्यचिद्यागस्य विशिष्य स्तोत्रसंबन्ध इति नामाख्यातयोः सर्वयागविषयत्वात् सर्वेफलार्थाः । इति चेत् —

सोमयागस्यैव भवेत् ज्योतिष्टोमे प्रधानता ॥ १२४ ॥

यद्यपि नामप्रवृत्तिवेलायां सर्वयागानां फलासंबन्धात् न कस्यापि प्रकरणमुद्भूतमिति, न कस्यापि स्तोत्रद्वारा स्तोमसंबन्धः; तथापि सोमयागाङ्गग्रहणस्य स्तोत्रोपाकरणस्य च कालार्थेऽपि संयोगे स्तोत्रोपाकरणसमानकर्तृकग्रहणाङ्गवस्त्वरूपपरंपरासंबन्धात् तन्नामकत्वं सोमयागानामेवेति तेषामेव फलम् । अन्ये त्वफलास्तदङ्गानीति ।

इति ज्योतिष्टोमे दीक्षणीयादीनामङ्गताधिकरणम् ॥ १२ ॥

इति लघुवार्तिकटीकायां चतुर्थाध्यायस्य चतुर्थः पादः

॥ समाप्तश्चाध्यायः ॥

॥ अथ पञ्चमोऽध्यायः ॥

तत्र प्रथमः पादः

श्रुतिबलीयस्त्वाधिकरणम् (१)

एवं प्रयोज्यप्रयोजकविचारे कृते, प्रयोज्यपदार्थानां श्रुत्यर्थपाठप्रवृत्तिस्थानमुख्यक्रमैः क्रमो निरूप्यते ।

ननु प्रयोगप्राशुभावाय ऐच्छिक एव क्रमः पदार्थेषु । न वैदिकः । तस्य विलंबितप्रतीतिकत्वात् । इति चेत् —

श्रुतिलक्षण एव स्यादर्थानां नियतः क्रमः ।

वेदप्रमाणक एव क्रमः स्यात् । तत्प्रामाण्यस्य स्थितत्वात् ॥ १ ॥

वर्णकान्तरम् (२)

अव्यापारात्मकः क्रमो दध्यादिवत् स्वतोऽविधेयः । नापि व्यापारविशेषतया । एकस्य क्रमानाश्रयत्वात् । तत्समुदायस्याविधेयत्वात् । इति चेत् —

विशेषणतयार्थानां क्रमश्च विधिमर्हति ॥ १२५ ॥

न संघातस्य–नाप्येकैकस्य क्रमः, अनेकानि परस्परं मिलितानि, संयोगद्वित्वादिवत् श्रुत्याप्युपस्थापितक्रमवन्ति प्रयोगविधिना विधीयन्ते ॥ २ ॥

वर्णकान्तरम् (३)

सत्रात्मकद्वादशाहे, 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति–तत उद्गातारं–ततो होतारम्; तं प्रति प्रस्थाता दीक्षयति' इत्याद्यारभ्य, 'ब्रह्मचार्याचार्यप्रेषितः' इत्यन्तः श्रुतः । तत्र धात्वर्थविधिलिप्सया दीक्षैव विधेया । क्रमस्तु पाठप्राप्तानुवादः । इति चेत् —

क्त्वाश्रुत्या दीक्षयित्वेति क्रमश्चैव विधीयते ।

'ऋद्धिकामास्सत्रमासीरन्'–'ये यजमानास्त ऋत्विजः' इति वचनाच्च सर्वेषां यजमानत्वावगमात्, चोदकत एव तेषां दीक्षाप्राप्तेः । अध्वर्य्वादिनियमस्यापि तत एव 'इतरमन्यस्तेषां यतो विशेषस्स्यात्' इति न्यायाच्च प्राप्तेः, अध्वर्य्वादिषु चाध्वर्योः 'चित्पतिस्त्वा' इति मन्त्रलिङ्गविरोधात्, 'न पूतः पावयेत्' इति प्रतिषेधाच्चा प्राप्तेः, क्त्वातः श्रुत्यभिहितः क्रम एव तेन वाक्येन विधीयते ।

इति श्रुतिबलीयस्त्वाधिकरणम् ॥ ३ ॥

क्रमस्य क्वचिदार्थिकत्वाधिकरणम् (४)

'अग्निहोत्रं जुहोति' 'यवगूं पचति' इत्यत्र क्रमप्रमाणाभावात् पाकहोमयोरनियतः क्रमः। इति चेत् —

अग्निहोत्रयवाग्वादावर्थात्सिध्यन् क्रमो मतः।

पाकस्य श्रुतिलिङ्गाभ्यां यवाग्वर्थत्वावगमात् तस्या अपि होम्यद्रव्यत्वात् पक्त्रैवतया होमः।

इति क्रमस्य क्वचिदार्थिकत्वाधिकरणम् ॥ ४ ॥

क्रमस्य क्वचिदनियमाधिकरणम् (५)

प्रयाजानुमन्त्रणमन्त्राः शाखाभेदेन श्रुतो 'वसन्तमृतूनां प्रीणामि' इत्यादिः; क्वचित् क्वचित् 'एको मम–एका तस्य' इत्यादि। तयोरदृष्टार्थत्वात् समुच्चये सति, प्रथमप्रयाजानुमन्त्रणप्रवृत्तिक्रमात् क्रमः। इति चेत् —

सर्वेषां क्रममानानामभावेऽनियतः क्रमः ॥ ११६ ॥

भिन्नशाखागतयोः परस्परप्रत्यासत्तेरविधानात् अनियम एव।

इति क्रमस्य क्वचिदनियमाधिकरणम् ॥ ५ ॥

पाठक्रमन्यायः (६)

'समिधो यजति' इत्यादिक्रमेणाम्नाताः, न तत्क्रमेण कर्तव्याः। उक्तप्रमाणयोरभावात्। पाठस्य चाप्रमाणत्वात्। इति चेत् —

पाठक्रमाद्विधीनां स्यात् समिद्यागादिषु क्रमः।

क्रमपठितगंधपुष्पादिषु तथैवानुष्ठानदर्शनात् अनुष्ठानकालापेक्षितस्मृतीः अध्ययनविधिविहितनियतक्रम-पठिता विधयः क्रमेण कुर्वन्तीति तत्पाठक्रमात् स्मृतिक्रमे, तत्क्रमादनुष्ठानक्रमः।

यद्यप्यनुष्ठानापेक्षस्मृत्येकप्रयोजनयाज्यापाठक्रमादेव तदुपपत्तौ, विधानैकप्रयोजनविधिपाठक्रमोऽ-नादरणीयः; न च देवतामात्रस्मारकमन्त्रस्य यागस्मृत्यसामर्थ्यं शङ्कनीयम्, 'मन्त्रतस्तु विरोधे ....' इत्यत्रापि तदापत्तेः। यदि च देवतास्मृतिद्वारा तत्संबन्धियागस्मारकत्वं तत्र-तदत्रापि तुल्यम्। तथापि यत्र क्रमविहितयागेषु विशकलितपठितमन्त्राणां लिङ्गवाक्यादिना विनियोगः, तादृग्विधिपाठक्रम उदाहार्यः।

इति पाठक्रमन्यायः ॥ ६ ॥

प्रवृत्तिक्रन्यायः (७)

'सप्तदश प्राजापत्यान् ....' इति विहितप्राजापत्येषु, उपाकरणादयः सन्निपातिनः प्रतिपशुभेदेन पदार्थानुसमयरूपेण कर्तव्याः। तत्रोपाकरणं कुतश्चिदारभ्य कुतश्चित्समाप्यम्। एवं नियोजनादावप्यनियमः। नियामकश्रुत्याद्यभावात्। प्राथमिकपदार्थप्रवृत्तेः पौरुषेयत्वात्। इति चेत् —

प्राजापत्यपदार्थेषु सप्रवृत्तिक्रमाद्भवेत् ॥ १२७ ॥

'वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति' इति वचनावगतपश्वन्तरसाहित्यबलात् सर्वे पदार्थाः मिथः प्रत्यासन्नाः कार्याः। षोडशभिः व्यवधानेन विना करणाशक्तेः अधिकव्यवधानवारणाय प्रवृत्त्या नियमः।

इति प्रवृत्तिक्रमन्यायः ॥ ७ ॥

स्थानक्रमन्यायः (८)

साद्यस्क्रे 'सहपशूनालभते' इति श्रुते, सवनीयस्थाने साहित्यं–प्रधानप्रत्यासत्तेः। इति स्थिते, उपाकरणादिष्वनियमः–अग्नीषोमीयप्राथम्यं वा। प्रकृतौ दृष्टेः। इति चेत्।

साद्यस्क्रे सवनीयस्य स्थानेन प्रथमं क्रिया।

आश्विनग्रहग्रहणेन सवनीयः उपस्थापितः। इतरयोस्त्वग्नीषोमीयप्रणयनावभृथावुपस्थापको नात्र स्थः। साहित्यवचनात् सवनीयानन्तरमुपाकर्तव्यौ। तयोरनियमः क्रमस्य। प्रकृतिदृष्टाग्नीषोमीय प्राथम्यं वा।

इति स्थानक्रमन्यायः ॥ ८ ॥

मुख्यक्रमन्यायः (९)

'सारस्वतौ भवतः। एतद्वै दैव्यं मिथुनं यत् सरस्वती सरस्वांश्च' इत्यत्र, याज्यापाठक्रमात् स्त्रीदैवत्ययागः प्रथमः। पुंदैवत्यः पश्चात्। तत्र चोदकप्राप्तनिर्वापादावनियमः। इति चेत् —

सारस्वते पदार्थानां भवेन्मुख्यक्रमात्क्रमः ॥ १२८ ॥

अङ्गप्रधानयोरवर्जनीयव्यवध्यधिकव्यवधिवारणाय मुख्यक्रमादङ्गक्रमः। अत्र यद्यपि याज्यानुवाक्याप्रवृत्तिक्रमात् प्रत्यासत्त्यनुग्रहाविशेषे पूर्वेषामपि निर्वापादीनां क्रमः सिध्यतीति नेदमसङ्कीर्णोदाहरणम्; तथापि, दर्शे दध्नः पूर्वं धर्माः शाखाहरणादयः प्रवृत्ताः। तत आग्नेयस्य निर्वापादयः। याज्यानुवाक्ययोस्तु विपरीता प्रवृत्तिः पाठवशात्। तत्र प्रवृत्तेरैकरूप्याभावात् प्रयाजशेषहविरभिघारणेऽनियमप्राप्तौ मुख्यक्रमात्प्रथममाग्नेयस्येति सिद्ध्यति।

इति मुख्यक्रमन्यायः ॥ ९ ॥

अङ्गेषु पाठक्रमस्य मुख्यक्रमात्प्राबल्याधिकरणम् (१०)

दर्शपूर्णमासयोः आग्नेयानन्तरमाज्यहविरुपांशुयाजः । ततोऽग्नीषोमीयः पुरोडाशहविः । तत्र मुख्यक्रमाच्चरमपठिता अप्याज्यनिर्वापादयोऽग्नीषोमीयनिर्वापादिभ्यः पूर्वं कार्याः । इति चेत् —

क्रमो मुख्यक्रमात्पाठगोचरश्चेत्तदान्यतः ।

मुख्यक्रमाधिगमपूर्वकत्वादङ्गेषु, तदधीनक्रमस्य विलंबितप्रतीतिकत्वम् । पाठतस्तु अन्यानपेक्षक्रम इति स एव कार्यः ।

इति अङ्गेषु मुख्यक्रमापेक्षया पाठक्रमस्य प्रबलत्वाधिकरणम् ॥१०॥

ब्रह्मणपाठान्मन्त्रपाठस्य बलीयस्त्वाधिकरणम् (११)

दर्शादावग्नीषोमीय ब्राह्मणं पूर्वम् । पश्चादाग्नेयस्य । मन्त्रयोस्तु हौत्रे विपरीतक्रमः । तत्र विधिक्रमः उत्पत्तिवेलायामवगतो बलवान् । उत्पत्त्यनन्तरं मन्त्रविनियोगमपेक्ष्य पश्चान्मन्त्राधीनः क्रमः प्रधानेषु बुध्यमानो दुर्बलः । इति चेत् —

विधिपाठक्रमादेवं मन्त्रपाठक्रमो बली ॥ १२९ ॥

स्मृत्यनन्यप्रयोजनमन्त्रक्रमादेव प्रधानक्रमः । तदभावे विधिक्रमोऽपि नियामक इत्युक्तम् ।

इति मन्त्रपाठस्य ब्राह्मणपाठात् बलीयस्त्वाधिकरणम् ॥ ११ ॥

प्रयोगवचनात् चोदकस्य बलीयस्त्वाधिकरणम् (१२)

'आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन्त्सरस्वत्याज्यभागास्याद्बार्हस्पत्यश्चरुः' इत्यत्र, प्रयोगवचनावगताङ्गप्रधानप्रत्यासत्त्यनुग्रहाय, मुख्यक्रमेणाज्यधर्माः पुरः कार्याः । बार्हस्पत्यौषधधर्माः पश्चात् । उपदेशात्मकप्रयोगवचनेन चोदकबाधात् । इति चेत् —

वैकृतद्रव्यधर्माणां चोदकाधिगतः क्रमः ।

चोदकप्राप्त्युत्तरकालं प्रयोगविधिः कल्प्यः । पदार्थास्तु प्राप्यमानः क्रमविशिष्टा एव प्राप्यन्त इति नैराकांक्ष्यात् न तदुपजीविकल्प्यप्रयोगवचनाश्रयः क्रमो ग्राह्यः ।

इति प्रयोगवचनात् चोदकस्य बलीयस्त्वाधिकरणम् ॥ १२ ॥

विकृतौ क्वचित् प्रकृतिधर्मानतिदेशाधिकरणम् (१३)

चातुर्मास्येषु साकमेधाख्यपर्वणि श्रूयते—'अग्नयेऽनीकवते पुरोडाशमष्टाकपालं प्रातर्निर्वपेत् मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुं मरुद्भ्यो गृहमेधिभ्यस्सर्वासां दुग्धे सायं चरुं' इति[1] । तत्र

---

[1] श्रुतम्—इति शेषः ।

प्रकृतिप्राप्तद्व्यहकालत्वबाधायाद्यतनेषु प्रातरादिषूपक्रम्य, श्वस्तनेषु प्रातरादिषु समापनीयाः । 'य इष्ट्या .... ' इत्यत्र तु, साङ्गस्य पर्वकालत्वं प्रत्यक्षश्रुतं, आतिदेशिकद्व्यहकालविरुद्धमित्यतिदिष्टबाधः । नेह तथा । विरोधाभावात् । इति चेत् —

प्रातर्मध्यन्दिने सायमेकस्येवाह्न इष्टयः ॥ १३० ॥

एकस्यैवाह्नः प्रातरादाविष्टयः । चिकीर्षितप्रयोगार्थोपात्तप्रातरादेरविशेषात्सर्वार्थत्वे, नैकदेशार्थत्वमित्येकस्मिन् प्रातरादावुपदिष्टस्य नातिदिष्टद्व्यहकालता ।

इति विकृतौ क्वचित् प्रकृतिधर्मानतिदेशाधिकरणम् ॥ १३ ॥

तदादितदन्तन्यायः (१४)

अग्नीषोमीयपशौ प्रकृतितो हविरासादनकालप्राप्तप्रयाजानामपकर्षः श्रुतः, 'तिष्ठन्तं पशुं प्रयजति' इति । तथा सवनीयेऽनूयाजानामुत्कर्षः, ' आग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति ' इति । तत्र श्रुतमात्रस्यैवोत्कर्षोऽपकर्षश्च । नाधिकस्य । अप्रमाणकत्वात् । इति चेत् —

स्यातामुत्कर्षापकर्षौ तदादिकतदन्तयोः ।

क्रमविशिष्टत्वेन चोदकप्राप्तानां क्रमबाधे वैगुण्यापत्तेः, तदाद्युत्कर्षः—तदन्तापकर्षश्च ।

इति तदादितदन्तन्यायः ॥ १४ ॥

प्रवृत्त्या प्रोक्षणादीनां सौमिकपूर्वभाविताधिकरणम् (१५)

प्रातरनुवाकप्रैषं होत्रे दत्त्वा, ततः ' प्रतिप्रस्थातः सवनीयान्निर्वपस्वेति प्रेष्यति ' इति विधाय, अनन्तरं प्रचरणीहोमाद्याः सौमिका विहिताः । तत्र प्रैषवशान्निर्वापस्तदैव कार्यः । तदनन्तरमेव सौमिकाः प्रचरणीहोमादयोऽग्नीदग्नीन् विहर बर्हिस्तृणीहि पुरोडाशानलंकुर्वि'ति प्रैषात् अधस्तनाः कार्याः, व्रीहिप्रोक्षणादयोऽलङ्करणान्ता वा । निर्वापप्रैषव्यवहितसौमिकोपस्थापकाभावात् । निर्वापस्यान्यकर्तृकस्य प्रोक्षणाद्यनुपस्थापकत्वात् । इति चेत् —

सवनीयास्सौमिकेभ्यः प्राक् स्युर्निर्वापबोधिताः ॥ १३१ ॥

निर्वापेऽध्वर्योरपि प्रयोजककर्तृत्वात्, तदुपस्थापितप्रोक्षणाद्यनन्तरं प्रचरणीहोमादयः ।

इति प्रवृत्त्या प्रोक्षणादीनां सौमिकपूर्वभाविताधिकरणम् ॥ १५॥

वैकृतयूपकर्ममात्रापकर्षाधिकरणम् (१६)

ज्योतिष्टोमे, अग्नीषोमीय प्रणयनात्परतः, पशुधर्मा यूपच्छेदादया आम्नाताः 'दीक्षासु यूपं छिनत्ति ' इत्यनेनापकृष्यमाणाः, प्राचोऽप्यपकर्षेयुः । इति चेत् —

यूपकर्मापकर्षे स्यात् न प्राचामपकर्षणम् ।

एकप्रयोगवचनपरिगृहीतानां परस्परक्रमोङ्गमिति तदन्तोपायापकर्षः स्यात् । नेह तदस्ति । प्रणयनान्तस्य सौमिकत्वात् । अतः श्रुतमात्रापकर्षः ।

इति वैकृतयूपकर्ममात्रापकर्षाधिकरणम् ॥ १६ ॥

दक्षिणाग्निकहोमानपकर्षाधिकरणम् (१७)

सवनीयपशुतन्त्रं सवनीयपुरोडाशेषु प्रसज्यत इति वक्ष्यते । तत्र 'आग्निमारुतादूर्ध्वं अनूयाजेषूत्कृष्यमाणेषु, तत्परभाविनोः पिष्टलेपफलीकरणहोमयोरप्युत्कर्षः । इति चेत् —

अनूयाजोत्कर्षणेऽपि नोत्कृष्यौ दक्षिणाग्निकौ ॥ १३२ ॥

अत्रापि भिन्नप्रयोगवचनपरिगृहीतयोः क्रमस्यानङ्गत्वात् न पिष्टलेपहोमाद्युत्कर्षः ।

इति दक्षिणाग्निकहोमानपकर्षाधिकरणम् ॥ १७ ॥

पुरोडाशाभिवासनान्तस्य दर्शेऽनपकर्षाधिकरणम् (१८)

दर्शादौ हविरभिवासनोत्तरमाम्नाता वेदिः पूर्वेद्युरमावास्यायां, 'वेदं कृत्वा वेदिं करोति' इति वचनेनापकृष्यमाणा, पाठतः क्लृप्तक्रमाबाधाय प्राचोऽप्यपकर्षेत् । इति चेत् —

दर्शे वेद्यपकर्षेऽपि न प्राचामपकर्षणम् ।

पाठोपस्थापितस्य प्रकरणादुभयार्थत्वात्, पूर्वं त्त्वाश्रुत्युपस्थापितस्यामावास्यायां, 'वेदं कृत्वा वेदिं करोति' इति वाक्येन विशिष्य विनियोगात्, क्रमक्लृप्तेः पूर्वमपकृष्यमाणा वेदिः न प्राचामपकर्षणायालम् । पाठोपस्थाप्यक्रमस्य पौर्णमास्यां निवेशः ।

इति पुरोडाशाभिवासनान्तस्य दर्शेऽनपकर्षाधिकरणम् ॥ १८ ॥

सान्तपनीयया अग्निहोत्रानुत्कर्षाधिकरणम् (१९)

मरुद्भ्यस्सान्तपनेभ्यो मध्यं दिने .....' इति श्रुता सान्तपनीया, दैवान्मानुषाद्वा प्रतिबन्धादुत्कृष्यमाणा, अग्निहोत्रमुत्कृष्येत् । क्रमस्यानङ्गत्वेऽपि, एककालपतितयोर्युगपदनुष्ठानायोगात्, वैपरीत्येत्वग्निहोत्रस्य मन्त्रवत्प्रणयनबाधात् । इति चेत् —

उत्कर्षो नाग्निहोत्रस्य भवेत्सान्तपनीयया ॥ १३३ ॥

अनुपादेयस्य निमित्तविशेषणकालस्य बाधायोगात्, उपादेयाङ्गस्य मन्त्रवैकल्येऽप्यग्निहोत्रं कृत्वैव सांन्तपनीया स्यात् । इति सान्तपनीयया अग्निहोत्रानुत्कर्षाधिकरणम् ॥ १९ ॥

उक्थ्यानुरोधेन षोडश्युत्कर्षाधिकरणम् (२०)

'तं पराञ्चमुक्थ्येभ्यो निर्गृह्णाति षोडशिनम्' इति षोडशिनं प्रकृत्य श्रुतम्। तत्र उक्थ्यादीनां दैवादुत्कर्षे षोघशी नोत्क्रष्टव्यः। अन्यथा, 'ग्रहं वा गृहीत्वा ....' इति वचनात् तत्स्तोत्रमप्युत्कृष्येत। तथा च, 'समयाध्युषिते सूर्ये षोडशिनस्स्तोत्रमुपाकरोति' इति श्रुतः स्तोत्रकालोऽनुपादेयो बाध्येत। उक्थ्यपरभावस्तु क्रममात्रं बाध्यताम्। इति चेत् —

उक्थ्येन स्यात्षोडशिन उत्कर्षस्तत्पराक्तया।

क्रमोऽपि तत्परभावः प्रधानयागाङ्गम्। कालस्तु तदङ्गस्तोत्राङ्गम्। तथा चाङ्गगुणविरोधन्यायात् कालस्य बाधो न क्रमस्येत्युत्कर्षः।

इत्युक्थ्यानुरोधेन षोडश्युत्कर्षाधिकरणम् ॥ २० ॥

इति लघुवार्तिकटीकायां पञ्चमस्याध्यायस्य प्रथमः पादः।

॥ अथ द्वितीयः पादः ॥

पदार्थानुसमयन्यायः (१)

वाजपेये सप्तदश प्राजापत्याः सह कार्याः। 'वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति' इत्युपादेयपशुसाहित्यस्य विवक्षितत्वात्। तत्रारादुपकारकं तन्त्रम्, उपाकरणादीनि द्रव्यसंस्कारकाणि प्रतिकर्मावसायिचोदकैरव्यवेततया प्रापितत्वात्, साहित्यविधायिप्रयोगवचनाच्च, एकैकस्मिन् काण्डतः समाप्यानि। आरादुपकारकाङ्गविषयं साहित्यवचनम्। इति चेत् —

स्यात्पदार्थानुसमयः प्राजापत्यपशुव्रजे ॥ १३४ ॥

चोदकस्यानुमानिकत्वात्—प्रयोगवचनस्य च कल्प्यत्वात्, न प्रत्यक्षवचनसङ्कोचकत्वमिति, एकैकेनानुसमय उपाकरणादीनाम्।

इति पदार्थानुसमयन्यायः ॥ १ ॥

*अश्वप्रतिग्रहेष्ट्यादौ अधिश्रयणादीनां काण्डानुसमयः (२)

नन्वेवमश्वप्रतिग्रहेष्टावपि पुरोडाशाधिश्रयणादीनामाग्नेयादिष्विव पदार्थानुसमयस्स्यात्। इति चेत्—

सहस्राद्यश्वदाने च काण्डानुसमयो भवेत्।

---

* 'कारणादभ्यावृत्तिः' (पू.मी.द. ५-२-३) इति सूत्रमधिकरणान्तरपरतया भाष्ये व्याख्यातम्। तदनुसारेणेदम्। (सं)

सहस्राद्यश्वदाने निमित्ते पौण्डरीकादौ–वारुणचतुष्कपालेष्टौ तावत्सु पुरोडाशेष्वधिश्रयणीयेषु आद्यानां भस्मीभावः स्यादिति असंभवात् काण्डानुसमयः ।

इति अश्वप्रतिग्रहेष्ट्यादौ अधिश्रयणादीनां काण्डानुसमयन्यायः ॥ २ ॥

मुष्टिकपालादीनां काण्डानुसमयाधिकरणम् (३)

दर्शपूर्णमासयोराग्नेयाग्नीषोमीयनिर्वापयोः पदार्थानुसमये स्थिते, एकैकेन मुष्टिना अनुसमयः । प्रतिमुष्टि इयत्तादर्शनात् । इति चेत् —

ऐकैकेनानुसमयो मुष्ट्यादिषु न युज्यते ॥ १३५ ॥

पदार्थो नाम–एकविधिविहितमङ्गम् । 'चतुरो मुष्टीन्निर्वपति' इति चतुर्मुष्टिनिर्वापविधानात् तेनवानुसमयः । एवमाग्नेयकपालान्युपधायान्येषामुपधानम् ।

एवमवदानाञ्जनयोरपि ।

इति मुष्टिकपालादीनां काण्डानुसमयाधिकरणम् ॥ ३ ॥

अवदानस्य प्रदानान्तानुसमयाधिकरणम् (४)

'द्विर्हविषोऽवद्यति' इत्येकविधिविहितद्व्यवदानमेकस्मात् कृत्वाऽहुत्वैवापरस्य कर्तव्यम् । इति चेत् —

अवदानं प्रदानान्तम्

'चतुरवत्तं जुहोति' इति विध्यर्थप्राप्तावदानमुद्दिश्य हविषो द्विः इति नियममात्रं विधीयते । द्वित्वविशिष्टावदानविधावपि दृष्टार्थत्वाय होमावयवत्वेन विधानमिति प्रदानान्तेनानुसमयः ।

इत्यवदानस्य प्रदानान्तानुसमयाधिकरणम् ॥ ४ ॥

अञ्जनादेः परिव्याणान्तानुसमयाधिकरणम् (५)

अग्नीषोमीये यूपधर्माः अञ्जनोच्छ्रयणादयो यूपैकादशिन्यादौ चोदकेन प्राप्ताः प्रतियूपमेकैकशः कार्याः । अञ्जनादिपरिव्याणान्तानवसर्गवचनस्य प्रकृतावार्थिकत्वेनानतिदेशात् । इति चेत् —

आपरिव्याणमञ्जनम् ।

नित्यवदप्राप्तेः वचनार्थवत्त्वाय यजमानानवसर्गविध्यनुरोधेन परिव्याणान्तेनानुसमयः ।

इत्यञ्जनादेः परिव्याणान्तानुसमयाधिकरणम् ॥ ५ ॥

दैवताद्यवदानेषु पदार्थानुसमयाधिकरणम् (६)

अग्नीषोमीयपशौ अवदानानन्तरं प्रदानप्राप्तौ वचनम् –'दैवतान्यवदाय न तावत्येव होतव्यम्। सौविष्टकृतान्यवद्यति। सौविष्टकृतान्यवदाय न तावत्येव होतव्यम्। ऐडान्यवद्यति' इति। तत् एकदेवतेषु पशुगणेषु एकस्य पशोः, दैवत–सौविष्टकृतैडान्यवदाय, अपरस्यापि तथा कार्यम्। अन्यथा तेषां नैरन्तर्यप्रापकचोदकबाधापत्तेः। इति चेत् —

प्राजापत्यावदानानां न काण्डोऽनुसमीयते ॥ १३६ ॥

पदार्थाः मिथस्संश्लिष्टाः। कर्तव्याः इति प्रकृतावर्थः। पश्चेकत्वात्तेषामानन्तर्यमार्थिकम्। अत्र तु वाचनिकसाहित्यसंपत्तये दैवतैर्दैवतानां–सौविष्टकृतैः सौविष्टकृतानां–ऐडैरैडानां–इत्यनुसमयः।

इति दैवताद्यवदानेषु पदार्थानुसमयाधिकरणम् ॥ ६ ॥

नानाबीजेष्टावुलूखलादीनां तन्त्रताधिकरणम् (७)

राजसूये नानाबीजा इष्टयः, 'अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणां –सोमाय वनस्पतये श्यामाकं चरुं ....' इत्यादयः आम्नाताः। तत्र कृष्णाजिनास्तरणोलूखलाधिवर्तनबीजावापावघातपरावपनविवेचन फलीकरणानि, पृथक्पदार्थत्वात् पृथगनुसमेयानि। उलूखलमुसलभेदेन विना तदनुपपत्तेः तद्भेदः। इति चेत् —

नानाबीजेषु मुसलोलूखलं नैव भिद्यते।

तण्डुलभावनावयवत्वेन विधानात्, न पृथक्पदार्थत्वं तेषामिति कृष्णाजिनास्तरणादिफलीकरणान्तेनानुसमयः। अतो नोलूखलादिभेदः।

इति नानाबीजेष्टावुलूखलादीनां तन्त्रताधिकरणम् ॥ ७ ॥

अग्नीषोमीयपशौ प्रयाजानूयाजयोः पात्रभेदाधिकरणम् (८)

दर्शादौ, 'अष्टावुपभृति गृह्णाति' इति प्रयाजानूयाजार्थमेकस्यामुपभृतिचतुर्गृहीतद्वयं युगपद्गृहीतम्। तथैव पशौ प्राप्तम्। तत्रानूयाजेषु, 'पृषदाज्येनानूयाजान् यजति' इति द्रव्यविकारः श्रुतः। प्रयाजाज्यमविकृतमेव। तत्रानूयाजोद्देशेन पृषत्त्वं = चित्रत्वं विधीयमानं तत्रासंभवात् तदङ्गभूताज्येष्ववतरति। तत्रोभयोरसङ्कराय पाठकल्प्यक्रमं बाधित्वा पदार्थभूतोपभृदेकत्वाबाधाय, प्रयाजेषु कृतेषु, तत्रैव पृषदाज्यं ग्राह्यम्। इति चेत —

पृषदाज्ये पात्रभेदः

पात्रैकत्वक्रमयोर्ग्रहणाङ्गत्वात्, प्रापकप्रमाणस्य चोदकस्यैक्यात्–बाध्यबाधकभावे विनिगमनाविरहात्–

प्रयाजाज्यग्रहोपस्थापितस्यात्यागयोपभृदन्तरमुत्पाद्यम् ।

इत्यग्नीषोमीयपशौ प्रयाजानूयाजयोः पात्रभेदाधिकरणम् ॥ ८ ॥

नारिष्ठहोमस्योपहोमपूर्वताधिकरणम् (९)

'अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत्' इति नक्षत्रेष्टिं विधायानन्तरं, सोऽत्र प्रधानानन्तरदेशे जुहोति । अग्नये स्वाहा कृत्तिकाभ्यस्स्वाहा' इत्याद्युपहोमा विहिताः । नारिष्ठहोमाश्चातिदेशतस्तद्देशाः प्राप्ताः । तत्र प्रत्यक्षपठितोपहोमानन्तरं आतिदेशिकनारिष्ठाः कार्याः । इति चेत्–

स्यादन्ते वैकृताहुतिः ॥ १३७ ॥

क्लृप्तोपकारप्राकृतातिदेशवाक्यस्य प्रधानविधिवाक्यशेषतया तदेकवाक्यतापन्नोत्पत्तिविधिविहिताः प्राकृताः, वाक्यान्तरविहितोपहोमात्पूर्वविहिताः प्रथममनुष्ठेयाः । अन्यतराकांक्षया सन्निधिना विनियुक्ताः कल्प्यौपकारा होमाः पश्चात् ।

इति नारिष्ठहोमस्योपहोमपूर्वताधिकरणम् ॥ ९ ॥

विदेवनादीनामभिषेकपूर्वताधिकरणम् (१०)

राजसूयेऽभिषेचनीयाख्यसोमयागविध्यनन्तरं, 'अक्षैर्दीव्यति । राजन्यं जिनाति । शौनश्शेपमाख्यापयति । राजानमभिषिञ्चति ।' इति विदेवनादयो विहिताः । तत्राभिषेको 'माहेन्द्रं प्रत्यभिषिच्यते' इत्यभिषेचनीयप्राकृताङ्गमध्येऽपकृष्टः, न प्राचोऽपकर्षति, पूर्वेद्युरपकृष्यमाणा वेदिरिवाभिवासनादीन् । अस्यामवस्थायां अक्लृप्तक्रमत्वात् । इति चेत् —

देवनाद्यपकर्षस्स्यादभिषेकापकर्षणे ।

अक्लृप्तक्रमत्वेऽपि प्रत्यक्षपाठादत्रैव चतुर्णां क्रमोऽवगतः । प्राकृताङ्गपश्चाद्भावस्तु त्रिदेवनादीनामानुमानिक इति प्रत्यक्षावगतक्रमाबाधाय तदन्तापकर्षः ।

इति विदेवनादीनामभिषेकपूर्वताधिकाधिकरणम् ॥ १० ॥

सावित्रहोमादीनां दीक्षणीयादेः पूर्वप्रयोगाधिकरणम् (११)

अग्नौ सावित्रहोमोखासंभरणाद्यप्राकृतपदार्थान्विधाय पश्चात् दीक्षणीयादयः प्रकृता अप्राकृतगुणविशिष्टाः श्रुताः । तत्र क्लृप्तोपकारन्दीक्षणीयादीन् कृत्वा, अक्लृप्तोपकाराः सावित्रहोमादयः उपहोमवत्पश्चात्कार्याः । दीक्षणीयायाः पश्चात्पाठो गुणविध्यर्थोऽनुवाद इति न पश्चादनुष्ठानं प्रापयति । इति चेत् —

पूर्वं सावित्रहोमादि दीक्षणीयेष्टितो भवेत् ॥ १३८ ॥

गुणार्थमपि पश्चात्प्रत्यक्षपाठो गुणगुणिनोः पश्चादेवानुष्ठानं गमयति । प्राक्पाठस्तु चोदकात् । अतः सावित्रहोमाद्यनन्तरं दीक्षणीयादयः कार्याः ।

इति सावित्रहोमादीनां दीक्षणीयादेः पूर्वप्रयोगाधिकरणम् ॥ ११ ॥

यजमानसंस्काराणां रुक्मप्रतिमोकात्पूर्वभाविताधिकरणम् (१२)

तत्रैव दीक्षणीयाद्यनन्तरं रुक्मप्रतिमोचनाद्याम्नातम् । प्रत्यक्षपाठात् दीक्षितसंस्कारादिभ्यः पूर्वं कार्यम् । इति चेत् —

स्याद्रुक्मप्रतिमोकादि पश्चाद्दीक्षितसंस्कृतेः ।

दीक्षणीयादिभिस्सह प्रकृतितः क्लृप्तक्रमकाः दीक्षितसंस्कारादयोऽतिदिष्टाः । तदबाधाय दीक्षणीयानन्तरं त एव कार्याः । रुक्मप्रतिमोचनादिकन्त्ववश्यविधेयमिति क्वचिद्विहितं न क्रमं गमयति । सावित्र-होमादेस्तु प्राकृताङ्गपूर्वपाठात् पूर्वक्रिया ।

इति यजमानसंस्काराणां रुक्मप्रतिमोकात्पूर्वभाविताधिकरणम् ॥ १२ ॥

इति पञ्चमस्य द्वितीयः पादः ।

॥ अथ तृतीयः पादः ॥

प्रयाजादीनामेकादशत्वादिसंख्यायाः सर्वसंपाद्यत्वाधिकरणम् (१)

अग्नीषोमीये, 'एकादश प्रयाजान्यजति' इति, अग्नौ 'षड्डुपसदः' इति प्राकृतानां प्रयाजादीन संख्याविवृद्धिः श्रुता । तत्र प्रयाजाद्युद्देशेन विधीयमाना संख्या, उद्देश्यसाहित्याविवक्षणात् प्रत्येकं भवति । इति चेत् —

प्रयाजैकादशत्वादि सर्वसंपाद्यमिष्यते ॥ १३९ ॥

एकस्य वा पञ्चानां वा एकादशत्वान्वयायोग्यत्वात् तन्त्राभिहितास्ते तथैव स्वप्रयोगं लक्षयित्वा तद्भूतैका-दशत्वेन स्वप्रयोगद्वारा उपकृता भवन्तीति सर्वसंपाद्या स्यात् ।

इति प्रयाजादीनामेकादशत्वसंख्यायाः सर्वसंपाद्यत्वाधिकरणम् ॥ १ ॥

प्रथमादीनां तिसृणामुपसदां स्वस्थानावृत्त्यधिकरणम् (२)

'षड्डुपसदः' इत्यत्र एकैकं द्विरभ्यनीयं, दण्डकलितवत् । 'त्रिरनुवाकः पठ्यताम्' इत्यादौ तथा दृष्टेः । इति चेत् —

स्वस्वस्थानविवृद्ध्यै वषट्त्वाद्युपसदां भवेत् ।

प्रयाजाज्यग्रहोपस्थापितस्यात्यागयोपभृदन्तरमुत्पाद्यम् ।

इत्यग्नीषोमीयपशौ प्रयाजानूयाजयोः पात्रभेदाधिकरणम् ॥ ८ ॥

नारिष्ठहोमस्योपहोमपूर्वताधिकरणम् (९)

'अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत्' इति नक्षत्रेष्टिं विधायानन्तरं, सोऽत्र प्रधानानन्तरदेशे जुहोति । अग्नये स्वाहा कृत्तिकाभ्यस्स्वाहा' इत्याद्युपहोमा विहिताः । नारिष्ठहोमाश्चातिदेशतस्तद्देशाः प्राप्ताः । तत्र प्रत्यक्षपठितोपहोमानन्तरं आतिदेशिकनारिष्ठाः कार्याः । इति चेत्–

स्यादन्ते वैकृताहुतिः ॥ १३७ ॥

क्लृप्तोपकारप्राकृतातिदेशवाक्यस्य प्रधानविधिवाक्यशेषतया तदेकवाक्यतापन्नोत्पत्तिविधिविहिताः प्राकृताः, वाक्यान्तरविहितोपहोमात्पूर्वविहिताः प्रथममनुष्ठेयाः । अन्यतराकांक्षया सन्निधिना विनियुक्ताः कल्प्यौपकारा होमाः पश्चात् ।

इति नारिष्ठहोमस्योपहोमपूर्वताधिकरणम् ॥ ९ ॥

विदेवनादीनामभिषेकपूर्वताधिकरणम् (१०)

राजसूयेऽभिषेचनीयाख्यसोमयागविध्यनन्तरं, 'अक्षैर्दीव्यति । राजन्यं जिनाति । शौनश्शेपमाख्यापयति । राजानमभिषिञ्चति ।' इति विदेवनादयो विहिताः । तत्राभिषेको 'माहेन्द्रं प्रत्यभिषिच्यते' इत्यभिषेचनीयप्राकृताङ्गमध्येऽपकृष्टः, न प्राचोऽपकर्षति, पूर्वेद्युरपकृष्यमाणा वेदिरिवाभिवासनादीन् । अस्यामवस्थायां अक्लृप्तक्रमत्वात् । इति चेत् —

देवनाद्यपकर्षस्स्यादभिषेकापकर्षणे ।

अक्लृप्तक्रमत्वेऽपि प्रत्यक्षपाठादत्रैव चतुर्णां क्रमोऽवगतः । प्राकृताङ्गपश्चाद्भावस्तु त्रिदेवनादीनामानुमानिक इति प्रत्यक्षावगतक्रमाबाधाय तदन्तापकर्षः ।

इति विदेवनादीनामभिषेकपूर्वताधिकाधिकरणम् ॥ १० ॥

सावित्रहोमादीनां दीक्षणीयादेः पूर्वप्रयोगाधिकरणम् (११)

अग्नौ सावित्रहोमोखासंभरणाद्यप्राकृतपदार्थान्विधाय पश्चात् दीक्षणीयादयः प्रकृता अप्राकृतगुणविशिष्टाः श्रुताः । तत्र क्लृप्तोपकारन्दीक्षणीयादीन् कृत्वा, अक्लृप्तोपकाराः सावित्रहोमादयः उपहोमवत्पश्चात्कार्याः । दीक्षणीयायाः पश्चात्पाठो गुणविध्यर्थोऽनुवाद इति न पश्चादनुष्ठानं प्रापयति । इति चेत् —

पूर्वं सावित्रहोमादि दीक्षणीयेष्टितो भवेत् ॥ १३८ ॥

गुणार्थमपि पश्चात्प्रत्यक्षपाठो गुणगुणिनोः पश्चादेवानुष्ठानं गमयति । प्राक्पाठस्तु चोदकात् । अतः सावित्रहोमाद्यनन्तरं दीक्षणीयादयः कार्याः ।

इति सावित्रहोमादीनां दीक्षणीयादेः पूर्वप्रयोगाधिकरणम् ॥ ११ ॥

यजमानसंस्काराणां रुक्मप्रतिमोकात्पूर्वभाविताधिकरणम् (१२)

तत्रैव दीक्षणीयाद्यनन्तरं रुक्मप्रतिमोचनाद्याम्नातम् । प्रत्यक्षपाठात् दीक्षितसंस्कारादिभ्यः पूर्वं कार्यम् । इति चेत् —

स्याद्रुक्मप्रतिमोकादि पश्चाद्दीक्षितसंस्कृतेः ।

दीक्षणीयादिभिस्सह प्रकृतितः क्लृप्तक्रमकाः दीक्षितसंस्कारादयोऽतिदिष्टाः । तदबाधाय दीक्षणीयानन्तरं त एव कार्याः । रुक्मप्रतिमोचनादिकन्त्ववश्यविधेयमिति क्वचिद्विहितं न क्रमं गमयति । सावित्र-होमादेस्तु प्राकृताङ्गपूर्वपाठात् पूर्वक्रिया ।

इति यजमानसंस्काराणां रुक्मप्रतिमोकात्पूर्वभाविताधिकरणम् ॥ १२ ॥

इति पञ्चमस्य द्वितीयः पादः ।

॥ अथ तृतीयः पादः ॥

प्रयाजादीनामेकादशत्वादिसंख्यायाः सर्वसंपाद्यत्वाधिकरणम् (१)

अग्नीषोमीये, 'एकादश प्रयाजान्यजति' इति, अग्नौ 'षड्डुपसदः' इति प्राकृतानां प्रयाजादीन संख्याविवृद्धिः श्रुता । तत्र प्रयाजाद्युद्देशेन विधीयमाना संख्या, उद्देश्यसाहित्याविवक्षणात् प्रत्येकं भवति । इति चेत् —

प्रयाजैकादशत्वादि सर्वसंपाद्यमिष्यते ॥ १३९ ॥

एकस्य वा पञ्चानां वा एकादशत्वान्वयायोग्यत्वात् तन्त्राभिहितास्ते तथैव स्वप्रयोगं लक्षयित्वा तद्भूतैका-दशत्वेन स्वप्रयोगद्वारा उपकृता भवन्तीति सर्वसंपाद्या स्यात् ।

इति प्रयाजादीनामेकादशत्वसंख्यायाः सर्वसंपाद्यत्वाधिकरणम् ॥ १ ॥

प्रथमादीनां तिसृणामुपसदां स्वस्थानावृत्त्यधिकरणम् (२)

'षड्डुपसदः' इत्यत्र एकैकं द्विरभ्यनीयं, दण्डकलितवत् । 'त्रिरनुवाकः पठ्यताम्' इत्यादौ तथा दृष्टेः । इति चेत् —

स्वस्वस्थानविवृद्ध्यै वषट्त्वाद्युपसदां भवेत् ।

तृतीयां कृत्वा पुनः प्रथमायां क्रियमाणायां प्राकृतक्रमबाधस्स्यात् । अतः स्वस्वस्थाने द्विर्द्विरभ्यसनीयाः ।

इति प्रथमादीनां तिसृणामुपसदां स्वस्थानावृत्त्यधिकरणम् ॥ २ ॥

सामिधेनीष्वागन्तूनामन्ते निवेशाधिकरणम् (३)

'एकविंशतिमनुब्रूयात्' इति सामिधेनी विवृद्धिश्रुतावागमे कर्तव्ये, आगम्यमानर्चामन्ते वा—समिध्यमानवतीं समिद्धवतीञ्चान्तरा वा निवेशः । इयं वै समिध्यमानवती–असौ समिद्धवती–तदन्तरा तद्धाय्या' इति धाय्यानां, द्यावापृथिवीत्वेन स्तुतयोर्मध्ये आकाशत्वेन संस्तवस्तन्मध्यविधिमासां गमयति । इति चेत् —

सामिधेनीष्वधाय्यानामन्त एव निवेशनम् ॥ १४० ॥

न धीयमानत्वं धाय्यात्वम् । स्तोत्राद्यर्थमागम्यमानेऽतिप्रसक्तेः । 'पृथुपाजवत्यौ धाय्ये' इत्यादि-वैदिकरूढ्या ता एव तच्छब्दवाच्याः । ता एव तयोर्मध्ये । अन्यास्त्वागन्तवोऽन्ते निविशन्ते ।

इति सामिधेनीष्वागन्तूनामन्ते निवेशाधिकरणम् ॥ ३ ॥

बहिष्पवमाने आगन्तूनां पर्यासोत्तरकालताधिकरणम् (४)

ज्योतिष्टोमे बहिष्पवमाने त्रयस्तृचाः । स्तोत्रीयोऽनुरूपः पर्यासश्च । ते विवृद्धस्तोमकक्रतुषु प्राप्ताः । तत्रागमेन संख्यापूरणं वक्ष्यते । तत्रागम्यमानानां प्राक्पर्यासान्निवेशः द्वादशाहे षाडहिके द्वितीयेऽहनि विवृद्धस्तोमके प्राकृतौ तृचौ पठित्वा, तत्र आगन्तवो वृषण्वत्यः पठिताः । ततः पर्यासः । तत्सामान्यादत्राप्येवम् । अन्तवाचि पर्याससमाख्यानात् । इति चेत् —

स्तोमवृद्धौ तथाऽगन्तोरन्त एव निवेशनम् ।

नैतादृगनुमानं शास्त्रार्थनिर्णयायालम् । समाख्यापि प्रकृतावेव । अतोऽन्ते तु बादरायणः' इति न्यायात् आगन्तूनामन्त एव निवेशः । द्वादशाहविकारेष्वपि वृषण्वतामेव तत्र निवेशः अन्येत्वागन्तवोऽन्ते ।

इति बहिष्पवमाने आगन्तूनां पर्यासोत्तरकालताधिकरणम् ॥ ४ ॥

तत्रैवागन्तूनां साम्नां मध्ये निवेशाधिकरणम् (५)

विवृद्धस्तोमकक्रतौ माध्यंदिनार्भवपवमानयोः समागमे कर्तव्ये, आगम्यमानानमन्त्यतृचे आगन्तृत्वान्निवेशः । इति चेत् —

साम्नामागम्यमानानां गायत्रादिषु वेशनम् ॥ १४१ ॥

'त्रीणि ह वै यज्ञस्योदराणि—गायत्रीबृहत्यनुष्टुप्च । अत्र ह्येवावन्ति अत एवोद्वपन्ति' इत्यनारभ्याधीतेन सर्वयागार्थेन पवमानगतगायत्राद्यतिरिक्ते आवापोद्वापयोः परिसंख्यातत्वात्तास्वेव निवेशः ।

इति तत्रैवागन्तूनां मध्ये निवेशाधिकरणम् ॥ ५ ॥

ग्रहेष्टकादीनां क्रत्वग्निशेषताधिकरणम् (६)

'अंशुं गृह्णाति' 'अदाभ्यां गृह्णाति' 'चित्रिणीरुपदधाति' इत्याद्यनारभ्य श्रुतं ग्रहेष्टकं सवनचितिशेषः, तयोस्तेन तेन यथायोगं निर्वर्तनस्य दृष्टेः। अतः प्रतिसवनं प्रतिचयनञ्च कार्यम्। इति चेत् —

औपानुवाक्यं क्रत्वग्निशेषोंश्वादिग्रहेष्टकम्।

तैत्तिरीयतृतीयकाण्डस्य, 'औपानुवाक्यं' इति याज्ञिकप्रसिद्धिः। तत्र विहितमौपानुवाक्यमंश्वदाभ्यादिग्रहेष्टकं क्रत्वग्न्यर्थं, क्रतोः फलवत्त्वात्—आग्नेश्च फलवदुपकारकत्वात्। 'इष्टकाभिरग्नि ....' इति वाक्यादपि तदर्थत्वम्।

इति ग्रहेष्टकादीनां क्रत्वाग्निशेषताधिकरणम् ॥ ६ ॥

चित्रिण्यादीनां मध्यमचितावुपधानाधिकरणम् (७)

चित्रिण्यादीनां पञ्चमचित्यन्ते उपधानम्। प्राकरणिकीनां क्लृप्तक्रमाबाधाय। 'यां काचिद्ब्राह्मणवतीमिष्टकामभिजानीयात् – तां मध्यमायां चितावुपदध्यात्' इति मध्यमायां प्राप्तस्यानुवादः। सर्वासां ब्राह्मणवत्त्वेन तत्रैव सर्वोपधानायोगात्। इति चेत् —

इष्टकामध्यमचितौ प्रत्यक्षब्राह्मणोदिताः ॥ १४२ ॥

अभिपूर्वजानातेः प्रत्यक्षवाचित्वात् प्रत्यक्षब्राह्मणविहिता मध्यमायाम्। लिङ्गादिकल्पितवचनविहितास्त्वन्त्यासूपधेयाः।

इति चित्रिण्यादीनां मध्यमचितावुपधानाधिकरणम् ॥ ७ ॥

लोकं पृणातः पूर्वं चित्रिण्याद्युपधानाधिकरणम् (८)

मध्यमायामपि चितौ प्राकरणिकीनामनन्तरं चित्रिण्यादीनां निवेशः अव्यवायाय। 'यदेवास्योनं यच्छिद्रं, तदनेन पूरयति लोकं पृणछिद्रं पृणेति मन्त्रविधिः नेष्टकाविधिः। अतश्चित्यन्तरे सावकाशं लोकं पृणायाः पूरकत्वम्। इति चेत् —

पूर्वं लोकं पृणायास्स्युर्मध्यमायामपि त्विमाः।

अविशेषश्रुतवचनस्य न्यायमात्रेण संकोचायोगात् प्राग्लोकं पृणायाश्चित्रिण्यादयः।

इतिलोकं पृणातः पूर्वं चित्रिण्याद्युपधानाधिफरणम् ॥ ८ ॥

इष्टिसंस्कृताग्नावग्निहोत्राद्यनुष्ठानाधिकरणम् (९)

आधानानन्तरं पवमानहवींषि, द्वादशसु रात्रीष्वनुनिर्वपेत् इत्युत्कृष्टानि। तन्मध्येऽग्निहोत्रादीनि

आहवनीयस्य सिद्धत्वात्कर्तव्यानि पवमानेष्टयस्तु सिद्धस्य संस्कारकाः । इति चेत् —

अग्निहोत्रादिकर्माणि पवमानेष्टयनन्तरम् ॥ १४३ ॥

पवमानहविषां भाष्यमतेऽग्न्यर्थत्वात्–वार्तिकमते आधानाङ्गत्वात्–तत्पूर्वमप्यनिष्पत्तेः, इष्टयनन्तरमग्निहोत्रादीनि । उभयजन्यसंस्कारसमुदायस्याहवनीयशब्दार्थत्वात् ।

इतीष्टिसंस्कृतावग्नावग्निहोत्राद्यनुष्ठानाधिकरणम् ॥ ९ ॥

अग्निचिद्वर्षणाधावनादिव्रतानां क्रत्वन्तेऽनुष्ठानाधिकरणम् (१०)

'तस्मादग्निचिद्वर्षति न धावेत्' इत्याद्यग्निचिद्व्रतानि, चयननिर्वृत्तौ निमित्तसंपत्तेराहिताग्निव्रतवत् क्रतोः पूर्वं भवन्ति । इति चेत् —

अग्निव्रतानि क्रत्वन्ते

अग्निकर्मिका चयनकरणिका भावनानिमित्तम् । क्रतूपकारविशिष्टत्वेन चाग्नेर्भावना । उपकारश्च क्रत्वर्थाहवनीयाधारत्वम् । स च क्रतुर्न निर्वृत्तः । तदनिर्वृत्तौ तदपवर्गिणी भावनापि न निर्वृत्तेति क्रत्वन्त एव व्रतानि । दृष्टान्ते तु, अग्निसंस्कारस्य निमित्तत्वात् युक्तं तदनन्तरं प्रवर्तनं व्रतस्य ।

इत्यग्निचिद्वर्षणाधावनादिव्रतानां क्रत्वन्तेऽनुष्ठानाधिकरणम् ॥ १० ॥

दीक्षाया इष्टिसिद्धताधिकरणम् (११)

'आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः' इति, तथा 'दण्डेन दीक्षयति' इत्यादि श्रुतम् । सर्वश्चादृष्टार्थं समुच्चितं सत् दीक्षितत्वोत्पादकमिति सर्वान्ते 'दीक्षितो न जुहोति' इत्यादीनि व्रतानि । इति चेत् —

इष्टयन्ते दीक्षितव्रतम् ।

क्रियार्थक्रियोपपदे लृड्विधानात्, यमनियमादिव्रतार्थक्रिया इष्टिरेव । अव्यापारात्मकदण्डादयस्तु तत्तत्संस्कारव्यञ्जकाः । तद्व्यञ्जनप्रयोजनं भृतिवनने दातुः प्रवृत्तिः । अत इष्टयन्ते 'द्व्यहं नाश्नाति' इत्यादिव्रतानि ।

इति दीक्षाया इष्टिसिद्धताधिकरणम् ॥ ११ ॥

काम्येष्टीनामनियमेनानुष्ठानाधिकरणम् (१२)

काम्यनैमित्तिकेष्टयः सौर्याद्याः क्रमपठिताः प्रयाजादिवत् क्रमेण कर्तव्याः । इति चेत् —

काम्यनैमित्तिकेष्टीनां न पाठक्रमतः क्रमः ॥ १४४ ॥

एकप्रयोगवचनपरिगृहीतानां क्रमापेक्षीणां पाठः क्रमनियमाय भवेत् । न चेह भिन्नफलानां भिन्ननिमित्तकानाञ्च तथात्वमित्यनियमः ।

इति काम्येष्टीनामनियमेनानुष्ठानाधिकरणम् ॥ १२ ॥

यज्ञानामग्निष्टोमपूर्वकताधिकरणम् (१३)

क्वचित्प्रयोगवचनभेदेऽपि वाचनिकः क्रमो भवति । 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः । तस्मादेतेनेष्ट्वाऽन्येन यजेत' इति । तत्र चतुःसंस्थो ज्योतिष्टोमः एतच्छब्दार्थः । 'यज्ज्योतिष्टोमः' इत्यस्याविशेषात् । इति चेत् —

अग्निष्टोमस्य निर्देशो य एतेनेत्यसौ मतः ।

अग्निष्टोमस्य नित्यत्वात्, अन्यासां काम्यत्वेन विकृतितया प्रकरणशून्यत्वात्, एतेनेति यागस्य करणत्वप्रतीत्या, तत्र संस्थानामेव करणत्वेन यागस्याश्रयतया करणत्वायोगाच्च, अग्निष्टोमसंस्थस्यैव एतच्छब्दपरामर्शः ।

इति यज्ञानामग्निष्टोमपूर्वकताधिकरणम् ॥ १३ ॥

ज्योतिष्टोमविकाराणामग्निष्टोमपूर्वकताधिकरणम् (१४)

'अथान्येन' इति संस्थानामेव ग्रहणम् । तत्रैवाश्रयत्वेन यागानुवृत्तेः सन्निधानात् । इति चेत् —

संस्थान्तरगवादीनामथान्येनेत्ययं समः ॥ १४५ ॥

अग्निष्टोमसंस्थाकान्यसोमयागमात्रपरान्यशब्दस्वारास्यात् तदन्यमात्राणां संस्थान्तरैकाहाहीनसत्राणामग्निष्टोमोत्तरकालता बोध्यते ।

इति ज्योतिष्टोमविकाराणामग्निष्टोमपूर्वकताधिकरणम् ॥ १४ ॥

एकानेनस्तोमकानामग्निष्टोमपूर्वकताधिकरणम् (१५)

अन्यशब्दो न सर्वस्य ग्राहकः । सर्वग्रहप्रसक्तौ, वाक्यशेण, 'यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयति' इत्यादिना, एकस्तोमानां, त्रिवृदग्निष्टोमः-पञ्चदश उक्थ्यः-सप्तदश उक्थ्यः एकविंशः षोडशी-इत्यादीनां निर्देशात् । इति चेत् —

न चायमेकस्तोमानां निर्देशस्सर्वगो मतः ॥ १४५ ॥

त्रिवृदादिसंबन्धमात्रेण वाक्यशेषोपपत्तेः, नाविशेषप्रवृत्तान्यश्रुतिसंकोच इति ।

इत्येकानेकस्तोमकानामग्निष्टोमपूर्वकताधिकरणम् ॥ १५ ॥

॥ इति पञ्चमस्य तृतीयः पादः ॥

॥ अथ चतुर्थः पादः ॥

पाठक्रमापेक्षया श्रुत्यर्थयोर्बलवत्त्वाधिकरणम् (१)

'ऐन्द्रवायवं–मैत्रावरुणं–आश्विनम्' इति पठित्वा, 'आश्विनो दशमो गृह्यते' इति श्रुतम्। 'अग्निहोत्रं जुहोति–यवागूं पचति' इति च। तत्र श्रुत्यर्थपाठानामविशिष्टत्वात् पूर्वं वा पश्चाद्वा विकल्पेनानुष्ठेयम्। इति चेत् —

पाठः श्रुतेरर्थतश्च दुर्बलः क्रमसाधने।

श्रुतिविहिते क्रमे पाठात्तत्कल्पनायोगात्, द्रव्यप्रयोजनविरोधे च पाठानादरणात् दशमस्थान एवाश्विनग्रहः –पक्तवैव च तया होमः।

इति पाठक्रमापेक्षया श्रुत्यर्थयोर्बलवत्त्वाधिकरणम् ॥ १ ॥

मुख्यक्रमेणाग्नेयस्य पूर्वमवदानाद्यनुष्ठानाधिकरणम् (२)

दर्शादौ शाखाच्छेदनादयस्सान्नाय्यधर्माः प्रथमं प्रवर्तन्ते। प्रदानन्त्वाग्नेयस्य पूर्वं पश्चात्सान्नाय्यस्य। तत्र स्विष्टकृतवदानादिकं प्रवृत्तिमुख्यक्रमयोरनुराधादनियतमेव कार्यम्। इति चेत् —

प्रवृत्तिक्रमतो मुख्यक्रमस्तु बलवान्भवेत् ॥ १४६ ॥

मुख्यक्रमादरे, वचनात्पूर्वेद्युः क्रियमाणानां केषाञ्चिदेव स्वप्रधानाद्विप्रकर्षो नान्येषाम्। प्रवृत्तिक्रमे तु सर्वस्य विप्रकर्ष इति स दुर्बलः।

इति मुख्यक्रमेणाग्नेयस्य पूर्वमवदानाद्यनुष्ठानाधिकरणम् ॥ २ ॥

इष्टिसोमयोः पौर्वापर्यानियमाधिकरणम् (३)

'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इतीष्टिपूर्वकत्वं सोमे श्रुतम्। सोमपूर्वकत्वमिष्टौ तु न श्रुतमिति न तथानुष्ठानम्। इति चेत् —

आधानस्येष्टिपूर्वत्वं सौमपूर्वत्वमप्युभौ।

आधानाव्यवहितोत्तरत्वं, 'सोमेन यक्ष्यमाणोऽग्नीनादधीत' इति वचनात् सोमे श्रुतम्। आनन्तर्यमात्रं सोमस्य नित्यतया, विनाप्यस्मद्वचनात्सिध्यतीति, वचनार्थवत्त्वायाव्यवहितत्वमर्थः। तदिष्टिपूर्वकत्वे सोमस्य न घटते, इत्यर्थात्सोमानन्तर्यमिष्टेः। न तु वाचनिकमित्याधानस्य सोमादिष्टेश्चाव्यवहितपूर्वमनुष्ठानम्। अत्र क्रियार्थक्रियोपपदविहितलृट्श्रवणात् सोमाङ्गत्वमाधास्येति न शङ्क्यम्; अग्निद्वारा तस्य तदुपकारकत्वमात्रेण लक्षणया लृडुपपत्तेः। 'दर्शपूर्णमासाभ्यामिष्ट्वा' इत्यत्र प्रयोगभेदे, तन्निरूपितकर्त्रैक्याभावात् आश्रयैक्यलक्षकत्त्वा प्रत्ययवत्।

इतीष्टिसोमयोः पौर्वापर्यानियमाधिकरणम् ॥ ३ ॥

ब्राह्मणस्यापीष्टिसोमयोः पौर्वापर्यानियमाधिकरणम् (४)

'आग्नियो वै ब्राह्मणो देवतया, स सोमेनेष्ट्वाग्नीषोमीयो भवति, यदेवादः पौर्णमासं हविः तत्तर्ह्यनुनिर्वपेत्, तर्हि स उभयदेवतो भवति' इति वचनेन पौर्णमासीमात्रोत्कर्षप्रतीतावपि, केवलामावास्याप्रयोगात् असोमयाजिनः फलानुदयात् पौर्णमास्युपक्रमत्वाच्चेष्ट्योः कृत्स्नोत्कर्षपर्यवसानात्, विप्रस्य सोमपूर्वत्वमेवाधानस्य। अन्ययोस्तु कल्पद्वयम्।

न च तन्नामाकं–तद्धर्मकं वा कर्मान्तरं विधीयते, इति युक्तम्। नाम्नो नानार्थत्वधर्मलक्षणार्थत्वयोः–विशिष्टविधिगौरवस्य चायुक्तत्वात्।

यद्वा 'पौर्णमासं हविः' इत्येकदेशश्रुत्या तावन्मात्रोत्कर्षः। न चान्यस्य निष्फलत्वम्; असोमयाजिनो वचनबलात् तदुपक्रमस्य, तावन्मात्रात्फलस्य च कल्पनात्। इति चेत् —

ब्राह्मणस्याप्यसौकल्पो हविरेकं हि कृष्यते ॥ १४७ ॥

न कृत्स्नपौर्णमास्युत्कर्षः। 'अदोहवि'रित्यग्नीषोमीयमात्रोत्कर्षश्रुतेः। तन्मात्रविधुरदर्शपूर्णमासयोर्विप्रस्याप्यधिकार इत्यन्ययोरिव द्वावेव कल्पौ।

इति ब्राह्मणस्यापीष्टिसोमयोः पौर्वापर्यानियमाधिकरणम् ॥ ४ ॥

नर्तून् प्रतीक्षेदित्यादिना सोमकालबाधाधिकरणम् (५)

'सोमेन यक्ष्यमाणोऽग्निमादधीत, नर्तून् सूर्क्षेत् न नक्षत्रं' इत्यत्र श्रुतक्रतुनक्षत्रातिक्रम आधानस्य, तत्प्रकरणात्। इति चेत् —

क्रत्वाद्यनादरवचस्सोमार्थं परिगृह्यते।

तस्यामेव शाखायां, 'यदहरेवैनं* यज्ञ उपनमेत्, अथादधी' इत्यादिना आधानकालानादरस्योक्तत्वात्, सोमकालबाध एवायम्।

इति नर्तून् प्रतीक्षेदित्यादिना सोमकालबाधाधिकरणम् ॥ ५ ॥

आज्यस्य सोमादनुत्कर्षाधिकरणम् (६)

अग्नीषोमीयपुरोडाशवत् उपांशुयाजस्यापि तद्दैवत्यत्वादुत्कर्षः। इति चेत् —

---

* (तै–ब्रा १–१–२) 'यदहरेवैनं श्रद्धोपनमेत् .....' इति ग्रन्थान्तरे दृश्यते—(सं)

इदं पञ्चमं सोमकालबाधाधिकरणं, पूर्वस्मिन् चतुर्थाधिकरणे, तृतीयपूर्वपक्षात्परं अन्तरागर्भिणीत्वेन सूत्रकारः अरीरचत्। अनन्तरं चतुर्थं पूर्वपक्षमुपन्यस्य, सिद्धान्तमप्यसूत्रयत्। भाष्यादिग्रन्थेष्वपि तथैव व्याख्यातम्। अयन्तु ग्रन्थकारः अनादरं तत्र प्रदर्शयति? (सं)

ब्राह्मणस्य पुरोडाशमात्रमुत्कर्षमृच्छति ॥ १४८ ॥

अग्नीषोमीयानर्होऽप्ययं विष्णुं प्रजापतिं वोपादायोपांशुयाजं करिष्यतीत्यनुत्कर्षः ।

इत्याज्यस्य सोमादनुत्कर्षाधिकरणम् ॥ ६ ॥

विकृतीनामैन्द्राग्नादीनां सद्यस्कालताधिकरणम् (७)

सौर्यादिविकृतयः, चतुर्दश्यामुपक्रम्य पर्वणि समाप्यन्त इति प्रकृतिवत् द्व्यहकालाः । य इष्ट्या ..... ' इति वचनं, ' पौर्णमास्यां पौर्णमास्या .... ' इत्यादिवत् एकदेशपरम् । न च तत्र, ' पूर्वेद्युरन्वाहितो भवति–उत्तरेद्युर्यजति ' इति वचनमस्ति इति वाच्यम्; तस्येहाप्यतिदेशात् । इति चेत् –

सद्यो विकृतयः

तृतीयाश्रुत्या तत्करणकभावानायां श्रुतकालस्य नातिदेशात् संकोच इति, पौर्णमासीविकारा अमावास्या विकाराश्च प्राकृतकालव्यवस्थानादरेण पौर्णमास्याममावास्यां वा कृत्स्नाः प्रयोक्तव्याः ।

इति विकृतीनामैन्द्राग्नादीनां सद्यस्कालताधिकरणम् (७)

सोमात्सान्नाय्यविकारादीनामुत्कर्षाधिकरणम् (८)

'नासोमयाजी सन्नयेत' 'आग्नेयो वै ब्राह्मणः' इत्याभ्यां, सान्नायाग्नीषोमीययोः सोमोत्तरकालत्व श्रुतेः, तद्विकृतीनामपि आतिदेशिककालानुरोधात् सोमोत्तरत्वमित्याह —

सोमादूर्ध्वं सान्नाय्यविक्रिया ।

उपलक्षणञ्चैतत् । अग्नीषोमीयविक्रियेत्यपि द्रष्टव्यम् । वचनतौल्यात् ।

इति सोमात्सान्नाय्यविकारादीनामुत्कर्षाधिकरणम् ॥ ८ ॥

सोमविकाराणां दर्शपूर्णमासात्पूर्वमकर्तव्यताधिकरणम् (९)

प्रकृतिवत् सोमविकाराणामपि प्रागिष्टेरूर्ध्वञ्च संभवः । इति चेत् —

तथा सोमविकारणामूर्ध्वमिष्टयोरनुष्ठितिः ॥ १४९ ॥

सोमस्येष्टेः प्रागनुष्ठानं न वाचनिकम् । किन्त्वाधानाव्यवहितोत्तरत्ववचनादार्थिकम् । न चाथिकं चोदकः प्रतिदिशेत् ।

किञ्च, 'एष वाव प्रथमः ....' इति वचनादग्निष्टोमोत्तरकालत्वं सोमविकृतीनाम् । न चैतादृशमाधानानन्तर्यं, आधानोत्तरकालश्चैकः प्रत्यक्षवचनात्प्रकृत्यवरुद्धो न विकृतेस्संभवतीति इष्ट्यानन्तर्यमेव प्राकृतं विकृतिष्वतिदिश्यत इति सोमविकारास्सर्वे, इष्ट्यनन्तरं सोमं कृत्वा पश्चात्कार्या इति ।

अत्र केचित्—आश्वलायनेन 'प्रागपि सोमेनैके' इति सूत्रणात्, इष्टः पूर्वकालस्सोमाङ्गम्। इष्टेः प्रागपि सोमेनेत्येके आचार्याः' इति सूत्रार्थः। तथा च सोमविकारेष्वपि इष्टिपूर्वकालस्यातिदेशात्, आधानाव्यवधानेनाग्निष्टोमं कृत्वा, अकृत्वैवेष्ट्यारम्भं सोमविकारा भवन्तीत्याचक्षते। विरोधाधिकरणवार्तिकोक्तरीत्या अननुष्ठानलक्षणमप्रामाण्यं भवेदेवेति।

इति सोमविकाराणां दर्शपूर्णमासात्पूर्वमकर्तव्यताधिकरणम् ॥ ९ ॥

इति लघुवार्तिकटीकायां पञ्चमस्य चतुर्थः पादः।

॥ समाप्तश्चाध्यायः ॥

॥ अथ षष्ठोऽध्यायः ॥

तत्र प्रथमः पादः

यागादिकर्मणां स्वर्गादिफलसाधनाधिकरणम् (१)

'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'चित्रया यजेत पशुकामः' इत्यादौ धात्वर्थ एव पदश्रुत्या प्रत्ययोपात्तभावनाभाव्यः, न स्वर्गः। भिन्नपदोपात्तत्वात्। स च चन्दनाद्यात्मकः सिद्धः साध्ययागभावनायां करणम्। स्वर्गकामता वा समुद्रमनोध्यानवत् यागाङ्गम्। इति चेत् —

संबध्यन्ते फलत्वेन स्वर्गाद्याः कामनान्विताः।

पदश्रुत्यपेक्षया समानप्रत्ययश्रुतिज्यायस्त्वात्तया विधियुक्ता भावनागम्यमाना, नापुरुषार्थं भाव्यं स्वीकरोतीति भिन्नपदोपात्तोऽपि प्रीतिरूपस्स्वर्गो भाव्यत्वेन संबध्यते, काम्यमानत्वादपि। फल एव कामनास्वारस्यात्। तथा च फलवत्वात्कर्मणां, तत्स्वामित्वरूपाधिकारिलाभात्, अधिकारलक्षणमारधव्यम्।

इति यागादिकर्मणां स्वर्गादिफलसाधनाधिकरणम् ॥ १ ॥

यागादिषु मनुष्यस्यैवाधिकाराधिकरणम् (२)

स्वर्गकामवाक्येन तत्कामनावतां सर्वेषामधिकारप्रतीतेः, तस्य प्रधानवाक्यतया बलवतोऽङ्गवाक्यैः सङ्कोचायोगात्, तदनुरोधेन अंधादेराज्यावेक्षणादिरहितमेव फलाय भवति। तिरश्चामपि चतुर्दश्युपवासादेस्सारमेयादिषु प्रसिद्धेरधिकारः। इति चेत् —

मूकदेवतिरश्चान्तु नास्ति कर्मस्वधिक्रिया ॥ १५० ॥

अङ्गानि न पुंस प्रति विधायन्ते। अङ्गत्वविरोधात्। किन्तु क्रतुं प्रति। प्रधानवाक्यैकवाक्यत्वादङ्गवाक्यानाम्। ततः तावदङ्गोपसंहारसमर्थं प्रत्येव विधेः नांधादेः क्रतुविधिरिति न तेषामधिकारः। तिरश्चां द्रव्याद्यभावान्नप्रधानेऽपि सामर्थ्यम्। देवानान्तु यजनीयदेवतान्तु यजनीयदेवतान्तराभावाद्विग्रहाभावाच्च नाधिकारः।

इति यागादिषु मनुष्यस्यैवाधिकाराधिकरणम् ॥ २ ॥

यागादिषु स्त्रीपुंसयोरुभयोरधिकाराधिकरणम् (३)

'स्वर्गकामः' इत्यत्र लिङ्गस्य प्रातिपदिकार्थतया ग्रहवद्विवक्षितत्वात्, विवक्षितलिङ्गस्य पुंस एवाधिकारः। 'भार्यापुत्रश्च दासश्च त्रयएवा धनास्स्मृताः' इति वचनात्, अद्रव्यत्वादप्यनिकारस्स्त्रियाः। इति चेत् —

स्त्रीपुंसयोरधिकृतिः

प्रकृत्यर्थोऽपि लिङ्गं उद्देश्यविशेषणत्वात् ग्रहैकत्ववदविवक्षितम्। न च प्रकृत्यर्थत्वम्; विभक्तिविकाराणां टाबादीनाञ्चान्वयव्यतिरेकाभ्यां तद्बोधकत्वात्। अतस्स्त्रिया अप्यधिकारः। कर्तनादिना अर्जनसंभवात्। 'पुत्राभावे दुहिता' इत्यादि वचनात्, 'धर्मेचार्थे च नातिचरितव्या' 'पाणिग्रहणात्तु सहत्वं कर्मसु द्रव्यपरिग्रहेषु च' इत्यादिभ्यश्च नाद्रव्यत्वम्। 'ये यज्ञपत्नीं' इति लिङ्गाच्च। 'भार्या पुत्रश्च' इत्यादि तु अस्वातन्त्र्यपरम्।

इति यागादिषु स्त्रीपुंसयोरुभयोरप्यधिकाराधिकरणम् ॥ ३ ॥

यागे दम्पत्योस्सहाधिकाराधिकरणम् (४)

आख्यातोपात्तसंख्याया उपादेयकर्तृविशेषणतया विवक्षितत्वात् स्त्रीपुंसयोः पृथक् प्रयोगः। इति चेत् —

सहैव स्यात्तयोस्तु सा।

विभागनिषेधेन संसृष्टद्रव्यत्वात्, इतरेतरकर्तृकाज्यावेक्षान्वारंभणादिलोपापत्तेः, पत्नी यजमानशब्दयोः स्वामिवाचितया ऋत्विग्वदन्यतरस्यापि परिक्रयासंपाद्यत्वात्, कर्तृत्वे च दम्पत्योः व्यासक्तत्वेन, 'अग्नीषोमौ देवता' इतिवत् सहप्रयोगोपपत्तेश्च सहैवाधिकृतिस्तयोः।

इति यागे दम्पत्योस्सहाधिकाराधिकरणम् ॥ ४ ॥

एकस्यैव पुंस आधानाधिकरणम् (५)

आधानं प्रकृत्य 'क्षौमे वसानावग्निमादधीयाताम्' इति श्रुतम्। तत्र आदधीयातामिति कर्तृ-

कारकद्वयश्रवणेन पूर्वाधिकरणवत् दम्पत्योः कर्तृकारकशक्तेर्व्यासक्तत्वात्, द्वौ पुमांसौ सस्त्रीकौ गम्येते। उत्पत्तिवाक्यञ्चाधानमात्रविधिपरं, नोपादेयकर्तृविशेषणतया कर्त्रेकत्वमपि विदधाति। विधिगौरवप्रसङ्गात्। तथाचोत्पत्तावप्राप्तं कारकद्वयं समानप्रत्ययश्रुत्युपात्तं धात्वर्थे विधीयते। क्षौमवसनसंबन्धविधावत्यन्तं बाधकं स्यात्। न च क्षौमस्यापि विधानाद्वाक्यभेदः—'टुक्षु शब्दे' इत्यवयवयोगान्मालिन्यवत्तया गौण्या वा तस्यानुवादत्वात्। तस्मात्कारकद्वयविधिः। इति चेत् —

क्षौमेवसानौ स्त्रीपुंसौ

उत्पत्तिवाक्ये एकत्वाविवक्षाकारणाभावात्, उत्पत्तिशिष्टतद्विरोधे, न द्वित्वविधिः। क्षौमशब्दश्च रूढ्या जातिविशेषवाची सन्निधिवशात्परित्यक्तार्थस्स्यात्। क्षौमवसनशब्दानर्थक्यञ्च। द्विवचनन्तु, 'अग्नीषोमौ देवते'तिवत् अधिष्ठानद्वित्वपरम्। तस्मादर्थप्राप्तवसने क्षौमसंबन्धो विधीयत इत्येक एव पुमान् सस्त्रीक आधानं कुर्यात्।

इत्येकस्यैव पुंस आधानाधिकरणम् ॥ ५ ॥

पत्न्याः यावदुक्ताशीर्ब्रह्मचर्यादावेवाधिकाराधिकरणम् (६)

दम्पत्योस्सहप्रयोगे स्थिते, 'पत्न्यवेक्षते' इत्यादिविहितं तयैव कार्यम्। 'यजमानोऽन्वारभते' इत्यादि तु, उपादेययजमानस्य विवक्षितलिङ्गत्वात् तेनैव। फलिसंस्कारास्तु द्वयोः फलित्वादावर्तन्ते। यानि तु परार्थान्युपस्थानानुमन्त्रणादीनि याजमानसमाख्यातानि तत्कर्तृकाणि, तान्यन्यतरेण कार्याणि। आबन्ताद्वा पुल्लिङ्गाद्वा तद्धितोत्पत्तेस्तुल्यत्वात्। इति चेत् —

यावदुक्तादिकं स्त्रियाः ॥ १५१ ॥

आदिपदात्फलिसंस्कारग्रहः। स्त्रीणामाहत्याध्ययननिषेधात्, अविदुषी संपन्नविद्यपुरुषसत्त्वे न विदुषी कार्या। तस्मात्पुमानेव कुर्यात्।

इति पत्न्याः यावदुक्ताशीर्ब्रह्मचर्यादावेवाधिकाराधिकरणम् ॥ ६ ॥

यागे शूद्रस्यानधिकाराधिकरणम् (७)

स्वर्गकामो यजेत' इत्यादिः अविशेषेण चातुर्वर्ण्यमधिकरोति। स्वाध्यायाध्ययनं क्रत्वङ्गार्थज्ञानजनकं सत् क्रत्वङ्गं, प्रयाजादिवत् क्रतुविधिनैव प्रयुज्यते। चतुर्थस्योपनयनविध्यभावात्, तेन विनैवाधीत्य, विद्यां लब्ध्वा, कर्मण्यधिक्रियते। अन्ये त्रयस्तु, उपनयनपूर्वकमधीत्याधिक्रियन्ते। यद्यपि च श्रुत्याद्यभावात् नाध्ययनं क्रत्वङ्गम्। किन्तु, आधानमिवाग्न्यर्थं, विद्यार्थम्। तथापि भृतकादिनाधोत्य विद्वांश्चतुर्थोऽधिक्रियते। अध्ययनस्य क्रत्वङ्गतया अवैगुण्यात्। इति चेत् —

त्रयाणामेव वर्णानां भवेद्यागेष्वधिक्रिया।

अध्ययनस्यानङ्गत्वेऽपि तज्जार्थज्ञानस्य क्रत्वर्थत्वात्, अन्यतो लब्धविद्यां स्त्रैवर्णिकानेव प्राप्य चरितार्थः क्रतुविधिः, न शूद्रस्य तामाक्षिपति । अनग्नित्वाच्चानधिकारः । विद्यधीनग्रहणमन्त्राभावाच्च । तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः ' इत्यादिप्रतिषेधाच्चानधिकारी चतुर्थः ।

इति यागे शूद्रस्यानधिकाराधिकरणम् ॥ ७ ॥

यागे निर्धनस्याप्यधिकाराधिकरणम् (८)

सिद्धविद्यत्रैवर्णिकाधिकारवत्, सिद्धद्रव्याधिकारकं शास्त्रं नाद्रव्यस्य तदाक्षिपेत् । इति चेत् –

अधिकारी भवेद्द्रव्यहीनस्तत्समुपार्जनात् ॥ १५२ ॥

प्रत्यक्षविधिलब्धविद्या इवात्र तादृशामभावात् पुरुषार्थभोजनादिवत् क्रतुरपि तदाक्षिपेदिति, अधनं तदर्जनं कारयदधिकुर्यात् ।

इति यागे निर्धनस्याप्यधिकाराधिकरणम् ॥ ८ ॥

यागे अङ्गहीनस्याप्यधिकाराधिकरणम् (९)

अङ्गहीनस्य नाधिकार इत्याशङ्क्य, प्रतिसमाधेयत्वे तदाक्षिप्याधिकुर्यात् । इत्याह —

अङ्गहीनोऽपि तस्यैव समाधानेऽधिकारवान् ।

इति यागे अङ्गहीनस्याप्यधिकाराधिकरणम् ॥ ९ ॥

अचिकित्स्याङ्गवैकल्यस्य यागानधिकाराधिकरणम् (१०)

एतस्यापवादमाह —

यस्याप्रतिसमाधेयं तन्न तस्यास्त्यधिक्रिया ॥ १५३ ॥

तदङ्गहीनमप्रतिसमाधेयं चेत्, न काम्येष्वधिक्रियते । कृताधानो नित्येष्वधिक्रियते ।

इत्यचिकित्स्याङ्गवैकल्यस्य यागानधिकाराधिकरणम् ॥ १० ॥

दर्शपूर्णमासयोस्त्रयार्षेयस्यैवाधिकाराधिकरणम् (११)

दर्शपूर्णमासयोः, ' आर्षेयं वृणीते ' इत्युक्तवोच्यते—' एकं वृणीते– द्वौ वृणीते–त्रीन्वृणीते–न चतुरो वृणीते–नपञ्चातिवृणीते ' इति तत्राद्येन वरणविधिः । न चतुरो न पञ्चाति इति निषेधः । तथा च एकद्वित्रिपञ्चार्षेयाणां प्राप्तानामनुवादः, सामान्यविधेः । त्रीनित्यनेनैवैकद्वित्रिपञ्चभिरुपसंहाराद्वा चतुर्णामप्यधिकारः । इति चेत् —

स्याद्वानमत्र्यार्षेयस्य

आद्ये, प्रतिषेधद्वयाश्रयणं, त्रित्वस्यपाक्षिकत्वञ्च स्यात्। द्वितीये, विधित्रयं निषेधसरूपार्थवादात्कल्प्यम्। न पञ्चातीत्यनुवादसामर्थ्यात् पञ्चानामपि वरणविधिः कल्प्यः। त्रित्वस्य पाक्षिकत्वञ्च। त्रित्वविशिष्ट-वरणविधौ, सर्वस्यैवानुवादत्वमिति तादृग्वरणोपसंहारसमर्थानामेवाधिकार इति नैकद्व्यार्षेयोरधिकारः।

इति दर्शपूर्णमासयोस्त्यार्षेयस्यैवाधिकाराधिकरणम् ॥ ११ ॥

चतुर्वर्णातिरिक्तस्य रथकारस्याधानेऽधिकाराधिकरणम् (१२)

'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्यादिविधाय, 'वर्षासु रथकार आदधीत' इति श्रुतम्। तत्र लब्धविद्यानां त्रयाणामेव रथकरणनिमित्तेवर्षाविधिः। न सङ्करस्य विशिष्टाधानविधिः, गौरवात्-अविद्वत्त्वाच्च। इति चेत् —

रथकारो न यौगिकः।

रूढिप्राबल्यादविदुषोऽपि विशिष्टाधानविधिप्रतीतेः, 'ऋभूणां त्वा देवानां ....' इत्यादिमन्त्रवर्णाच्च ऋभुसौधन्वनपर्यायरथकारस्यैवाधिकारः।

इति चतुर्वर्णातिरिक्तस्य रथकारस्याधानेऽधिकाराधिकरणम् ॥ १२ ॥

निषादस्थपत्यधिकरणम् (१३)

'रौद्रं वास्तुमयं चरुं निर्वपेत्। एतया निषादस्थपतिं याजयेत्' इति श्रुतम्। तत्र षष्ठीसमा साश्रयणेन सिद्धाग्निविद्यत्रैवर्णिकाधिकारा इष्टिः। इति चेत् —

निषाद एव स्थपतिश्चरौ रौद्रेऽधिकारवान् ॥ १५४ ॥

षष्ठीतत्पुरुषे, निषादपदे निषादनिरूपितसंबन्धवति लक्षणापत्त्या कर्मधारय एव। श्रुत्यर्थलाभात्। तद्बलाच्च, अनग्नेरविद्यस्य च जातिविशेषस्याधिकारः।

इति निषादस्थपत्यधिकरणम् ॥ १३ ॥

इति लघुवार्तिकटीकायां षष्ठस्य प्रथमः पादः।

॥ अथ द्वितीयः पादः ॥

सत्रे प्रत्येकं सत्रिणः फलसंबन्धाधिकरणम् (१)

अनेककर्तृकेषु, 'ऋद्धिकामास्सत्रमासीरन्' इत्यादिषु, आख्यातोपात्तकर्तृबहुत्वस्य विवक्षितत्वात् संहतानां कर्तृत्वप्रतीतेः, एकेन च कृतेऽपरस्य तदयोगात्, बहूनां प्रत्येकं कर्तृत्वानुपपत्तेः, परिषदः कर्तृत्वं—तस्या एव च भोक्तृत्वमिति फलावयवकामिनामधिकारः। इति चेत् —

सत्राधिकारिणां कृत्स्नमेककस्य फलं भवेत् ।

उद्देश्यानां फलकामिनां सहित्यस्याविवक्षणात् संहत्य प्रयोक्तॄणां प्रत्येकं फलमिति शास्त्रादभ्युपगमेऽपि अत्यन्ताकर्तृगामित्वाभावादाख्याते बहुवचनश्रुत्या कारकरूपबहुत्वप्रतीतेश्च शिबिकोद्वहनादिष्विव सर्वकर्तॄणां युगपदेव पदार्थेष्वन्वयादेकेन कृत इत्यस्याभावात् ; अन्यथा अधिष्ठानबहुत्वलक्षणापत्तेः, प्रत्येकं कर्तॄणां प्रत्येकं कृत्स्नं फलमिति कृत्स्नफलकामिनामेवाधिकारः ।

इति सत्रे प्रत्येकं सत्रिणः फलसंबन्धाधिकरणम् ॥ १ ॥

दर्शादौ कर्त्रैक्यनियमाधिकरणम् (२)

'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादौ उद्देश्यगतैकत्वस्यापि लिङ्गवदविवक्षितत्वादेको द्वौ बहवो वा यजेरन् । न चाख्यातार्थभावनाक्षिप्तोपादेयकर्तृविशेषणं संख्या विवक्षितेति युक्तम् ; 'यागेन स्वर्गमाप्नुयात्' इति यजेतेत्यस्यार्थः—न स्वर्गं कुर्यात्' इति। अन्यकृतस्यान्येनापि प्राप्त्यापातात् । तथापि वा फलक्रियाया रागप्राप्तेः करणोपरागमात्रस्यैव तत्र विधाने, भावनां यागञ्च प्रति प्रथमार्थसंख्याया वैरुप्यापत्त्या विध्यनुपपत्तेः, यागानुरक्तत्वेनाप्राप्तत्वेऽपि तस्या दध्यनुरक्तत्वेन होमस्येव प्राप्ताप्राप्तविवेकेन करणमात्रे विधिपर्यवसानात् । इति चेत् —

एकोऽधिकारी दर्शादौ

न तावत्स्वर्गप्राप्तिः प्रथमार्थः, किन्तु 'स्वर्गं कुर्या'दिति क्रियैव । आत्मनेपदविधिभ्यां परप्राप्तिवारणात् । सा च यच्छब्दाद्यनुपहतविधिशक्तिकेन प्रत्ययेनानेकविशेषणविशिष्टा विधीयत इति तद्विशेषणं संख्या, विधेयविशेषणत्वाद्विवक्षिता । फलं हि कामयमानस्तदुपायापरिज्ञानात् प्रवृत्त्यप्रवृत्त्योरुदासीनः, विशिष्टक्रियां फलाय विधीयमानां शास्त्रप्रामाण्यादवगत्य, प्रवर्तते । फलक्रियाप्राप्तौ विशिष्टविधिवाक्येषु विशेषेण परत्वाद्विधेः प्रतिविधेयं विद्यावृत्तिः स्यादिति, अप्राप्तक्रियैव विशिष्टाविधेया प्राप्तायामपि तस्यां, सैव विशिष्टा विधीयत इत्युक्तमाधाराग्निहोत्राधिकरणे । किमुताप्राप्तायाम् । तस्मादुपादेयकर्त्रैकत्वस्य विवक्षितत्वात् एक एवाधिकारी ।

इति दर्शादौ कर्त्रैक्यनियमाधिकरणम् ॥ २ ॥

आरब्धकाम्यकर्मणोऽपि समाप्तिनियमाधिकरणम् (३)

सौर्यादिकाम्यकर्मफलप्राप्तौ–तदिच्छानिवृत्तौ वा, आरब्धमपि न समापयेत्, वैय्यर्थ्यात् । न च शिष्टविगर्हणावारणाय समापनम् ; तस्य भ्रान्तिमूलत्वात् । इति चेत् —

समाप्यारम्भयुक् क्रिया ॥ १५५ ॥

शिष्टाचारप्रामाण्यस्य स्थितत्वात्, तैत्तिरीये, 'देवताभ्यो वा एष आवृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते .... न देवताभ्य आवृश्च्यते' इति प्रायश्चित्तश्रवणात्। अतस्समापनीयमारब्दम्।

इत्यारब्धकाम्यकर्मणोऽपि समाप्तिनियमाधिकरणम् ॥ ३ ॥

आरब्धलौकिककर्मणस्समाप्त्यनियमाधिकरणम् (४)

गृहरथादिदृष्टार्थमपि कांम्यं, देवताश्रयव्यापारत्वात् अवश्यसमापनीयम्। इति चेत् —

गेहादि न समाप्यं स्यात् फलेच्छापगमे सति।

गृहसिद्ध्युत्तरकालं, गृहादौ देवतास्थापनस्य पुरुषार्थत्वात् न तत्कर्मदेवतासंबधीति न समाप्यम्।

इत्यारब्धलौकिककर्मणस्समाप्त्यनियमाधिकरणम् ॥ ४ ॥

प्रतिषिद्धकर्मणामनुष्ठानेऽनिष्टापाताधिकरणम् (५)

'न कलञ्जं भक्षयेत्' इत्यादौ, नञाख्यातयोः संबन्धेन न प्रतिषेधः, व्यवहितान्वयापत्तेः। किन्तु, नञर्थधात्वर्थयोः संबन्धेन विधियोग्यविरोधिसङ्कल्पलक्षणा। स च स्वर्गाय विधीयते। तथा चाव्यवहितान्वर्थविधानञ्च। एवञ्च फलार्थिना वर्जनाय अभ्यस्यमानतया काम्यम्। इति चेत् —

भक्षणं लशुनादीनां फलाय न निषिध्यते ॥ १५६ ॥

विना कारणं सन्निधिलोभेन पदद्वयश्रुतित्यागायोगात्, परिपूर्णस्याख्यातस्य नञन्वये व्यवधानशङ्कायोगाच्च नञ्समभिव्याहृतक्तिङा प्रेरणाविरोधिनिवर्तना निवृत्तिफला प्रतिपाद्यमाना, निवृत्तिविषयस्य बलवदनिष्ट-जनकत्वेन विना अनुपपन्ना, धात्वर्थस्य तत्साधनतां कल्पयतीति सर्वेषां नित्यमेव वर्ज्यमेवञ्जातीयकम्।

इति प्रतिषिद्धकर्मणामनुष्ठानेऽनिष्टापाताधिकरणम् ॥ ५ ॥

गुर्वनुगमनादीनामुपनयनोत्तरकालकर्तव्यताधिकरणम् (६)

स्मार्तनियमाः 'गुरुर्वन्द्यः' 'प्रङ्मुखो भुञ्जीयात्' 'उदङ्मुखो मूत्रं कुर्यात्' इत्यादयोऽनग्नि-विद्यासाध्यत्वाज्जातो यदा शक्नुयात् तदारभ्य स्युः। इति चेत् —

आरभ्यैवोपनयनादभिवादादयस्स्मृताः।

'उपनयनादिनियमः' इति स्मृतेः, तदारभ्य स्युः।

इति गुर्वनुगमनादीनामुपनयनोत्तरकालकर्तव्यताधिकरणम् ॥ ६ ॥

अग्निहोत्रन्यायः (७)

'यावज्जीवमग्निहोत्रञ्जुहोति' 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' इत्यादौ निमित्ते नैमित्तिकस्य

प्रत्यवायपरिहारायावश्यकर्तव्यत्वादङ्गभूतसायंकालादि परित्यागेन सातत्येन कुर्यात् । इति चेत् —

अग्निहोत्रादिकं कार्यं प्रदोषादिषु जीवता ॥ १५७ ॥

उपादेये प्रयोगविध्यनुष्ठाप्ये कालविद्याग्न्याद्यतिरिक्ते यथाशक्त्युपबन्धः । अत्र तु प्राप्ते काले विद्वानग्निमांश्च यावज्जीवं कुर्यात् इति विधानात्, अङ्गस्यापि कालस्यार्थान्निमित्तविशेषणत्वमिति तत्कालजीवी कुर्यात् ।

इत्यग्निहोत्रन्यायः ॥ ७ ॥

अग्निहोत्रादिकर्मणां स्वस्वकालवृत्त्या आवृत्त्यधिकरणम् (८)

कालशास्त्रान्निमित्तसङ्कोचे, एकस्मिन् सायं प्रातश्च—एकस्मिन्दर्शे पौर्णमास्याञ्चानुष्ठानात तच्छास्त्रचारितार्थ्यात् नावर्त्यानि । इति चेत् —

तच्च प्रतिप्रदोषादिकालमावर्तते सदा ।

कालशास्त्रात्, अन्यकालीनजीवनस्य निमित्तत्वाभावेऽपि तत्कालीनजीवनावृत्तौ तदावृत्तेरवर्जनीयत्वात् पुनः पुनः कार्याणि ।

इत्यग्निहोत्रादिकर्मणां स्वस्वकालावृत्त्या आवृत्त्यधिकरणम् ॥ ८ ॥

दर्शादौ भेदाद्यावृत्त्या होमवृत्त्यधिकरणम् (९)

प्रत्यावृत्तिभिन्नफलजनकानां निमित्तवृत्त्या आवृत्तावपि, कर्माङ्गभेदनादिनिमित्तहोमादौ सकृत्कृतेनापि क्रतूपकारसिद्धेर्नभेदनावृत्तावावृत्तिः । इति चेत् —

आवर्तते निमित्तेषु स्कन्नहोमादिकं तथा ॥ १५८ ॥

क्रत्वर्थेष्वपि शास्त्रान्निमित्तावृत्तावावृत्तिगुणकहोमयुक्त एव क्रतुस्सगुण इत्यवगतेस्तदावृत्तावावृत्तिस्स्कन्नहोमादीनाम् ।

इति दर्शादौ भेदाद्यावृत्त्या होमावृत्त्यधिकरणम् ॥ ९ ॥

गुर्वनुगमनादीनां प्रतिनिमित्तमावृत्त्यधिकरणम् (१०)

गुर्वनुगमनादीनामाचारप्रमाणकानां न गमनावृत्तावावृत्तिनियमः । दृष्टार्थत्वेन गुरुप्रीत्यनुसारित्वात् । इति चेत् —

अभिवादाद्यपि तथैवावर्तेत निमित्ततः ।

दृष्टार्थत्वेऽपि शास्त्रान्नियमादृष्टाभ्युपगमात्तद्वशेन निमित्तावृत्तावावृत्तिः ।

इति गुर्वनुगमनादीनां प्रतिनिमित्तमावृत्त्यधिकरणम् ॥ १० ॥

ऋणत्रयापाकरणस्य त्रैवर्णिकानां नित्यताधिकरणम् (११)

'सोमेन यजेत' 'स्वाध्यायमधीयीत' 'प्रजामुत्पादयेत्' इति श्रुतं सोमविद्याप्रजं न नित्यम्। ज्योतिष्टोमवाक्येन सोमयागस्य फले विधानात्, वसन्तवाक्यस्य कालविधिपरत्वात् विद्याप्रजयोर्विश्वजिद्वत् स्वर्गफलत्वात्, सप्तमे ब्रह्मवर्चसकामः' इत्यध्ययनाङ्गोपनयनफलानामध्ययनोपसंहाराच्च। इति चेत् —

सोमविद्याप्रजं नित्यम्

'वसन्ते वसन्त' इति वीप्सया वसन्तस्य निमित्तत्वावगमात्, निमित्तत्वावगमात्, निमित्तावृत्तावावृत्तिर्ज्योतिष्टोमस्य। अङ्गत्वबोधकन्त्वनभ्यस्तम्। 'वसन्ते ज्योतिषा यजेत' इति कस्यांचिच्छाखायां श्रूयते। अध्ययनमप्यक्षरग्रहणद्वारा अनुष्ठानोपयोग्यर्थज्ञानार्थमावश्यकम्। 'सप्तमः .....' इति त्वध्ययनाङ्गोपनयनाश्रितसप्तमर्षगुणफलम्। 'अनुत्पाद्य तथा प्रजाम्' इति निन्दाश्रवणात् प्रजोत्पादनमपि नित्यम्। 'जायमानो वा' इति ऋणवाक्यादपि त्रितयमपि नित्यम्। ननु तद्वाक्ये ब्राह्मणग्रहणात् तं प्रत्येवावश्यकत्वं गम्यते, नान्यौप्रति। इत्यत आह —

तत् त्रयाणामपि च ॥ १५९ ॥

तत् = सोमविद्याप्रजम्। विधौविशेषाश्रवणादर्थवादगतत्वात् ब्राह्मणग्रहणमुपलक्षणम्।

इति ऋणत्रयापाकरणस्य त्रैवर्णिकानां नित्यताधिकरणम् ॥ ११ ॥

इति लघुवार्तिकटीकायां षष्ठस्य द्वितीयश्चरणः।

॥ अथ तृतीयः पादः ॥

नित्येषु यथाशक्त्यनुष्ठानाधिकरणम् (१)

यावज्जीवादिनैमित्तिकविधिविहितेषु सर्वाङ्गोपसंहारसमर्थ एवाधिक्रियते। अङ्गानां समुच्चित्य कथं भावेन संग्रहस्यैकादशे वक्ष्यमाणत्वात्। अन्यथा अफलत्वापातात्। अतो हीनाङ्गो नाधिक्रियते। इति चेत् –

नित्यं कार्यं यथाशक्ति

यावच्छब्दसंबद्धं जीवनं धातुसंबन्धविहितणमुल्प्रत्ययेन संबन्धान्तराभावात् यागानुरक्तभावनां प्रति निमित्तत्वेन गम्यते। दर्शपूर्णमासशब्दविशेषितश्च यजिः, कालयोगिनामाग्नेयादीनामेव बोधको नाङ्गानामिति चतुर्थोपान्त्ये स्थितम्। निमित्तञ्चावश्यं नैमित्तिकं प्रयोजयेदित्यवश्यकर्तव्या भावना, यथाशक्त्यङ्गानि गृह्णातीति तावतैव फलम्। अतो यथाशक्ति प्रयोगेणैवाधिकारः।

इति नित्येषु यथाशक्त्यनुष्ठानाधिकरणम् ॥ १ ॥

अङ्गवैकल्ये काम्यस्य निष्फलत्वाधिकरणम् (२)

काम्यप्रयोगेष्वपि कामनावत्पुरुषमात्राधिकारत्वप्रतीत्यबाधाय यथाशक्ति प्रयोगः । इति चेत् — काम्यप्रयोगेष्वपि कामनावत्पुरुषमात्राधिकारत्वप्रतीतित्यबाधाय यथाशक्तिप्रयोगः । इति चेत् —

काम्यं सगुणमेव तु ।

नैमित्तिकस्यावश्यकर्तव्यत्ववदत्र तादृक्त्वानवगमात्, कामनायाश्च निमित्तत्वात् सर्वप्रयोगशक्तकामिपरत्वेनापि तच्छ्रुत्युपपत्तेः, सर्वाङ्गोपसंहारशक्तस्यैवाधिकारः, तिर्यगधिकरणसिद्ध एव पूर्वाधिकरणप्रत्युदाहरणत्वेन प्रपञ्चितः ।

इत्यङ्गवैकल्ये काम्यस्य निष्फलत्वाधिकरणम् ॥ २ ॥

द्रव्यभेदेऽपि कर्माभेदाधिकरणम् (३)

क्रियाद्रव्ययोरभेदात्, नीवारादिद्रव्यभेदे, तदात्मिका यागादिक्रियापि भिन्नैव, इति प्रतिनिधिनापि विहितयागाननुष्ठानात् व्यर्थः सः । इति चेत् —

द्रव्यभेदेऽपि यागादिक्रिया नैव विभिद्यते ॥ १६० ॥

क्रियागुणादिभिर्द्रव्यस्य भेदाभेदस्वीकारात् द्रव्यभेदेऽपि 'यजति यजति' इत्येकाकारप्रतीतेर्न द्रव्यभेदेऽपि यागभेद इति सिद्धः प्रतिनिधिः ।

इति द्रव्यभेदेऽपि कर्माभेदाधिकरणम् ॥ ३ ॥

नित्यकर्मणोऽनित्यप्रारब्धकर्मणश्च द्रव्यापचारे प्रतिनिधिना समापनाधिकरणम् (४)

दर्शादौ नित्यप्रयोगे अशक्याङ्गत्यागेऽपि, अनङ्गस्यागमे क्रतुविधेरुदासीनत्वात् व्रीहिचोदनायाश्च तज्जातीयविधायकत्वात् अन्यस्यापि प्रमाणस्यादृष्टेः अनागमः । इति चेत् —

मुख्याभावे प्रतिनिधिः

व्रीह्यादिविधीनां क्रतुविध्याक्षिप्तद्रव्यनियमार्थत्वस्य चतुर्थे स्थितत्वात्, तदलाभे तद्विधेरप्रवृत्तेः अवश्यकर्तव्यं कर्म अन्यद्रव्यमाक्षिपेदित्यस्ति प्रतिनिधिः ।

इति नित्यकर्मणोऽनित्यप्रारब्धकर्मणश्च द्रव्यापचारे प्रतिनिधिना समापनाधिकरणम् ॥ ४ ॥

देवताग्निमन्त्रक्रियाणामपचारे प्रतिनिध्यभावाधिकरणम् (५)

अग्नीन्द्रादिदेवताः—आहवनीयादयोऽग्नयः—मन्त्राश्च—अदृष्टार्थप्रयाजादिक्रियाश्च—पूर्वन्यायात्प्रतिनिधेयाः । इति चेत् —

देवतादिषु नास्त्यसौ ।

मुख्यकार्यकरस्य प्रतिनिधेयतया विधिगम्यदेवताकार्यमन्येन स्यादित्यनवगमात्, होमस्याधारेण विनाप्यनुष्ठानार्हतया आहवनीयादेरदृष्टार्थत्वेन तददृष्टमन्येन स्यादिति प्रमाणाभावत्, प्रयाजादिजन्यादृष्टस्याप्यन्याजन्यत्वात्, न तेषु प्रतिनिधिशङ्का । मन्त्रस्य दृष्टार्थत्वेऽपि तदर्थस्मृत्या तदभिधायिशब्दान्तरकल्पनातः पूर्वं स्मृतस्यानुष्ठानोपपत्तेः नियमादृष्टलोपस्य सर्वत्र तुल्यत्वात् न प्रतिनिधिः ।

इति देवताग्निमन्त्रक्रियाणामपचारे प्रतिनिध्यभावाधिकरणम् ॥ ५ ॥

प्रतिसिद्धद्रव्यस्य प्रतिनिधित्वाभावाधिकरणम् (६)

'अयज्ञिया वै माषाः–वरकाः–कोद्रवाः'— इति प्रतिषिद्धयज्ञसाधनत्वानामपि प्रतिनिधित्वे, व्रीह्याद्यंशानामेव तद्गतानां साधनत्वात्, तत्तदाकारस्यानङ्गत्वात् न निषेधविरोधः । इति चेत् —

माषाद्या न प्रतिनिधिस्थानमर्हन्त्ययज्ञिया ॥ १६१ ॥

विजातीयांशस्याप्यशक्यं साधनत्ववारणमिति यज्ञानर्हा न प्रतिनिधेयाः ।

इति प्रतिषिद्धद्रव्यस्य प्रतिनिधित्वाभावाधिकरणम् ॥ ६ ॥

स्वामिनः प्रतिनिध्यभावाधिकरणम् (७)

प्रोषिते–अन्यव्यापृते–मृते वा स्वामिनि, याजमानपदार्थकरणाय स्वामी प्रतिनिधेयः । इति चेत् —

न स्वामिनः प्रतिनिधिः

मृतस्य सर्वाधिकारनिवृत्तेः, न प्रतिनिधिना कृत्यम् । स एव चेदधिकारिफलभाक्; प्रतिनिधित्व व्याकोपः । प्रतिनिधायकाभावाच्च । पत्न्याः अनग्न्याः अस्वतन्त्रायाः न प्रतिनिधायकता । प्रोषितव्यापृतयो राज्यावेक्षणादिपरार्थक्रियाः अध्वर्य्वादिभिः कार्याः । फलिसंस्कारास्त्वन्येन कृता अपि व्यर्थाः । इति न स्वामिनः प्रतिनिधिः ।

इति स्वामिनः प्रतिनिध्यभावाधिकरणम् ॥ ७ ॥

सत्रे कस्यचित् स्वामिनोऽपचारे प्रतिनिध्यादानाधिकरणम् (८)

'सप्तदशावरास्सत्रमासीरन्' इत्यत्र बहूनां प्रवृत्तानामेकमरणे न प्रतिनिधिः स्वामिनः । इति चेत् —

सत्रे तस्याप्यसौ भवेत् ।

आरब्धस्य काम्यस्यापि यथाशक्त्यवश्यसमापनीयत्वात्, आनीयमानस्य यजमानशब्दवाच्यस्वामित्व-विशिष्टकर्तृत्वाभावेऽपि कर्तृत्वांशेनाङ्गभूतसंख्यां पूरयितुमन्यः प्रतिनिधेयः ।

इति सत्रे कस्यचित् स्वामिनोऽपचारे प्रतिनिध्यादानाधिकरणम् ॥ ८ ॥

सत्रे प्रतिनिहितस्यास्वामित्वाधिकरणम् (९)

स्वामिस्थानोपनिपातात् सोऽपि स्वामी । इति चेत् —

न स स्वामी कर्मकृत्त्वात्

कर्म करोतीति कर्मकृत् । विधित आसङ्कल्पात्कुर्वाणः स्वामी । अयन्त्वन्यैः संख्यापूरणाय सामाद्युपायेन मध्ये आनीत इति न स्वामी ।

इति सत्रे प्रतिनिहितस्यास्वामित्वाधिकरणम् ॥ ९ ॥

सत्रे प्रतिनिहितस्य यजमानधर्मग्राहित्वाधिकरणम् (१०)

तस्य न फलिसंस्कारा वपनादयः, अफलित्वात् । इति चेत् —

स्वामिधर्मा तथाप्यसौ ॥ १६२ ॥

अन्येषां कर्त्रंशे सप्तदशत्वाबाधाय, अफलित्वेऽप्यन्यानुरोधेन तानि कुर्यात् ।

इति सत्रे प्रतिनिहितस्य यजमानधर्मग्राहित्वाधिकरणम् ॥ १० ॥

श्रुतद्रव्यापचारे तत्सदृशस्यैव प्रतिनिधित्वाधिकरणम् (११)

व्रीह्यपचारे सदृगन्यद्वा प्रतिनिधेयम् । व्रीहिशास्त्रस्य सदृगविषयत्वात् । आग्नेयादेश्च द्रव्य-सामान्याक्षेपकत्वात् । इति चेत् —

सदृक् प्रतिनिधातव्यम्

व्रीहिशब्दस्य जात्यर्थतया, तत्परिच्छिन्नावयव्यारंभयोग्यावयवपर्यन्तलक्षकत्वात्, सदृशग्रहणे तादृगवयव-लाभात्, व्रीहिशास्त्रस्याप्यनुग्रहः कश्चित्स्यात् । विसदृशग्रहणे सर्वथा तच्छास्त्रबाधापत्तेः सदृग्ग्राह्यम् । सुसदृग्लाभे मन्दसदृगपि न ग्राह्यम् ।

इति श्रुतद्रव्यापचारे तत्सदृशस्यैव प्रतिनिधित्वाधिकरणम् ॥ ११ ॥

द्रव्यापचारे वैकल्पिकद्रव्यान्तरानुपादानाधिकरणम् (१२)

व्रीहिभिः सङ्कल्प्य प्रवृत्तस्य, तदलाभे यवैः कार्या । मुख्यसत्त्वे प्रतिनिधिग्रहणयोगात् । इति चेत् —

सति कल्पान्तरेऽपि तत् ।

अन्यतरासंकल्पवेलायां उभयोर्यथाशास्त्रमङ्गत्वे, एकेन संकल्पिते तस्मिन्नितरस्यानङ्गत्वात्, 'नानृतं वदेत्' इति निषेधपालनाय व्रीहिसदृगेव ग्राह्यम् ।

इति द्रव्यापचारे वैकल्पिकद्रव्यान्तरानुपादानाधिकरणम् ॥ १२ ॥

पूतीकस्य सोमप्रतिनिधित्वाधिकरणम् (१३)

'यदि सोमं न विन्देत्, पूतिकानभिषुणुयात्' इति सोमस्यालाभे निमित्ते नैमित्तिकाः पूतीकाः यागाङ्गत्वेन विधीयन्ते । इति चेत् —

पूतिकेषु विधिस्सोमसदृक्षु नियमात्मकः ॥ १६३ ॥

अत्यन्ताप्राप्तपूतीकविधाने अपूर्वविधित्वापत्तेः, सोमाभावे, न्यायात् सदृशं ग्रहीतुमुपक्रमते, तावत् सदृक्त्वेन पक्षप्राप्ताः मन्दसदृशा अपि पूतीकाः वचनान्नियम्यन्त इति प्रतिनिधिनियमः ।

ननु सुसदृशस्याप्यभावे मन्दसदृशप्राप्तिः । सुसदृशसत्त्वेऽप्ययं विधिः प्रवर्तमानो न नियमार्थः । तदा अत्यन्ताप्राप्तत्वात् पूतीकानाम् । इत्यभावे विधिरेव युक्त इति केचित् ।

इति पूतीकस्य सोमप्रतिनिधित्वाधिकरणम् ॥ १३ ॥

प्रतिनिध्यपचारे उपात्तद्रव्यसदृशस्य पुनःप्रतिनिधित्वाधिकरणम् (१४)

प्रतिनिध्यपचारे वैकल्पिकन्यायेन तत्प्रयोगे प्रतिनिधेरेवाङ्गत्वात् तत्सदृक् ग्राह्यः । न मुख्यसदृक् । इति चेत् —

प्रतिनिध्यपचारश्चेन्मुख्यस्यैव सदृक् श्रुतम् ।

नीवाराणां वैकल्पिकवदङ्गत्वे मानाभावात् मुख्यावयवलिप्सया तदुपादानात्, नाशे मुख्यसदृगेव ग्राह्यः ।

इति प्रतिनिध्यपचारे उपात्तद्रव्यसदृशस्य पुनःप्रतिनिधित्वाधिकरणम् ॥ १४ ॥

श्रुतस्यापि प्रतिनिधेरपचारे उपात्तसदृशस्य पुनःप्रतिनिधित्वाधिकरणम् (१५)

नीवाराणां तेनात्मना अनङ्गत्वेऽपि, पूतीकानां तथात्वात् तदपचारे तत्सदृगेव ग्राह्यम् । इति चेत् —

पूतीकनाशे द्विसदृक् न चेत्सोमसदृग्भवेत् ॥ १६४ ॥

प्रतिनिधिनियमार्थत्वात्तद्विधेः पूतीकावयवसंपत्तये उभयसदृक् ग्राह्यः । तदलाभे सोमसदृगेव ।

इति श्रुतस्यापि प्रतिनिधेरपचारे उपात्तसदृशस्य पुनःप्रतिनिधित्वाधिकरणम् (१५)

मुख्यापचारे तत्प्राप्तौ तस्यैवोपादानाधिकरणम् (१६)

मुख्यमलभ्यं मत्वा प्रतिनिधिमुपादित्सन्, अन्तरा मुख्यलाभे तन्न गृह्णीयात्। प्रतिनिधेः सङ्कल्पितत्वेन तत्त्यागे मिथ्यासङ्कल्पापातात्। इति चेत् —

प्रतिनिध्यर्थिना मुख्ये लब्धे तस्यैव संग्रहः।

'यथा शक्ये' इति संकल्पात्, मुख्यलाभे तस्यैव ग्रहः। प्रतिनिधेस्तत्त्वेनानङ्गतया असङ्कल्पितत्वात्।

इति मुख्यापचारे तत्प्राप्तौ तस्यैवोपादानाधिकरणम् ॥ १६ ॥

प्रतिनिधिना प्रारब्धे कर्मणि श्रुतद्रव्यलाभे श्रुतद्रव्येणैव समापनाधिकरणम् (१७)

यदा मुख्यालाभे प्रतिनिधिमुपादाय संस्काराद्यनुष्ठानानन्तरं पशुनियोजनयागादेः पूर्वं खदिर-व्रीह्यादि लभते, तदा प्रतिनिधौ कृतकरं शास्त्रं न मुख्यमुपादापयति। इति चेत् —

अमुख्ये संस्कृते मुख्ये लब्धेऽपि स्यादयं नयः ॥ १६५ ॥

प्रधाननिवृत्तिपूर्वलब्धेऽपि मुख्ये प्रतिनिधिना प्रधानानुष्ठाने वैगुण्यात् शास्त्राप्रामाण्यापत्तेः मुख्यस्यैवग्रहः।

इति प्रतिनिधिना प्रारब्धे कर्मणि श्रुतद्रव्यलाभे श्रुतद्रव्येणैव समापनाधिकरणम् ॥ १७ ॥

प्रतिनिधौ पशौ नियोजिते श्रुतद्रव्यलाभेऽपि प्रतिनिधिनैव समापनाधिकरणम् (१८)

प्रतिनिधिं संस्कृत्य तेन नियोजनपुरोडाशयागादौ कृतेऽपि, मुख्यलाभे प्रधानावृत्तिः, साद्गुण्याय। इति चेत् —

नियुक्ते तु पशौ तस्मिन्न पुनर्मुख्यसंग्रहः।

कृतस्य प्रधानस्याङ्गानुरोधेनानावर्तनात् नादर्तव्यो मुख्यः।

इति प्रतिनिधौ पशौ नियोजिते श्रुतद्रव्यलाभेऽपि प्रतिनिधिनैव समापनाधिकरणम् ॥ १२ ॥

संस्कारायोग्यस्यापि मुख्यस्यैवोपादानाधिकरणम् (१९)

सूक्ष्मे तक्षणाद्ययोग्ये नियोजनमात्रयोग्ये खदिरे लब्धेऽपि तक्षणादिबहुबाधवारणाय कदरः स्थूलो ग्राह्यः, खदिरशास्त्रस्यापीषदनुग्रहात्। इति चेत् —

द्रव्यसंस्कारयोर्द्रव्यम्

'बलीयः' इत्यनुषज्यते। 'त्यजेदेकं कुलस्यार्थे' इति न्यायात् बहूनामपि गुणानां प्रधानखदिरानु-रोधेन त्याग एव युक्तः। 'आत्मार्थे पृथिवीं त्यजेत्' इति न्यायात्।

इति संस्कारायोग्यस्यापि मुख्यस्यैवोपादानाधिकरणम् ॥ १९ ॥

मुख्यस्य कार्यासाधकत्वे प्रतिनिधेरेवोपादानाधिकरणम् (२०)

लताप्रायखदिरेऽपि साहाय्यसंपत्त्यानि नियोजनसंभवात् स एव ग्राह्यः । इति चेत् —

अर्थोऽर्थद्रव्ययोर्बली ॥ १६६ ॥

प्रयोजनाक्षमस्य शेषविरोधे अग्रहणमिति कदर एव ग्राह्यः ।

इति मुख्यस्य कार्यासाधकत्वे प्रतिनिधेरेवोपादानाधिकरणम् ॥ २० ॥

प्रधाननिर्वाहकत्वे अङ्गनिर्वाहापर्याप्तस्यापि मुख्यस्योपादानाधिकरणम् (२१)

द्व्यवदानमात्रपर्याप्तव्रीहिलाभेऽपि पुरोडाशङ्गशेषकार्याणां बहुत्वात् व्रीहिमात्रस्य तदङ्गस्य बाध एव युक्तः । 'त्यजेदेकं कुलस्यार्थे' इति न्यायात् । इति चेत् —

व्रीहीणां न प्रतिनिधिः पर्याप्तौ द्व्यवदानयोः ।

'व्रीहिभिर्यजेत' इति यागाङ्गतया विहितानामुत्पत्तिशिष्टपुरोडाशावरुद्धे प्रदेयत्वेन संबन्धायोगात्, पुरोडाशद्वारकतया श्रुतनिर्वाहेऽप्यङ्गत्वं याग एव । शेषकार्याणां प्रतिपत्तित्वात् यागाङ्गद्रव्याङ्गतया, अङ्गगुणविरोधन्यायेन प्रधानाङ्गानुग्रहाय तावन्तोऽपि व्रीहय एव ग्राह्याः ।

इति प्रधाननिर्वाहकत्वे अङ्गनिर्वाहापर्याप्तस्यापि मुख्यस्योपादानाधिकरणम् ॥ २१ ॥

इति लघुवार्तिकटीकायां षष्ठस्य तृतीयश्चरणः समाप्तः ।

॥ अथ चतुर्थः पादः ॥

अवत्तनाशे पुनरवदानार्थं प्रतिनिध्युपादानाधिकरणम् (१)

'मध्यात्पूर्वार्धाद्वावद्यति' 'चतुरवत्तं जुहोति' इत्यत्र अवत्तस्य नाशदोषापहारादौ निमित्ते न पुरोडाशान्तरोत्पादने नाधिक्रियते । निश्शेषनाशविषयत्वात्तस्य । इहत्वशिष्टादवदाय होमसंभवात् । इति चेत् —

अवत्तनाशे होमार्थं पुरोडाशान्तरं भवेत् ॥ १६७ ॥

द्व्यवदानस्य हविष्ट्वात् । अवयविनो हविष्ट्वपक्षे तु स्पष्ट एवावयविनाशः, इति पक्षद्वयेऽपि हविरन्तरोत्पाद एव ।

न्यायलभ्यमुक्त्वा वाचनिकमाह —

न्यायेनैवं, वचनतस्त्वाज्येनैव समापनम् ।

'यस्य सर्वाणि हवींषि नश्येयुः, दुष्येयुरपयुर्वा, आज्येन ता देवताः परिसंख्याय यजेत' इति हवि-

र्विनाशादिनिमित्ते चोदितेनाज्येनैवाधिकारः । न च सर्वविनाशविषयं वचनम्: उद्देश्ये हविर्विनाशे सर्वत्वस्याविशेषणात् ।

इति अवत्तनाशे पुनरवदानार्थं प्रतिनिध्युपादानाधिकरणम् ॥ १ ॥

स्विष्टकृदाद्यर्थस्यावत्तस्य नाशे अपुनरवदानाधिकरणम् (२)

स्विष्टकृदिडाद्यर्थावत्तनाशे अवशिष्टात्पुनरवदाय तत्तत्प्रतिपत्तयः कार्याः । इति चेत् —

इडाद्यर्थावत्तनाशे तत्तद्भक्षस्य लोपनम् ॥ १६८ ॥

स्विष्टकृतस्त्यागांशेनादृष्टार्थत्वेऽपि, 'यस्य सर्वाणि .....' इति वचनात् आज्येन करणम् । इडादेरदृष्टशून्यत्वाल्लोप एव । प्रतिपत्तित्वान्न द्रव्यान्तरप्रयोजकत्वाशङ्का । नियमादृष्टलोपस्त्ववशिष्टादवदानेऽपि स्यात् । तस्यान्यावरुद्धत्वात् ।

इति स्विष्टकृदाद्यर्थस्यावत्तस्य नाशे अपुनरवदानाधिकरणम् ॥ २ ॥

ऋत्विजामेव शेषभक्षणाधिकरणम् (३)

कर्मकरत्वेनर्त्विजां सर्वभक्षेषु प्राप्तानामपि, 'यजमानषञ्चमा इडां भक्षयन्ति' इति पुनश्श्रवणं भक्षान्तरपरिसंख्यार्थमिति, ततोऽन्यत्रान्ये भक्षयितारः । इति चेत् —

कर्मप्रविष्टैः कर्तव्यमिडाशेषादिभक्षणम् ।

यजमानस्याकर्मकरत्वेन तत्प्राप्त्यर्थं वचनमिति नान्यपरिसंख्या ।

इति ऋत्विजामेव शेषभक्षणाधिकरणम् ॥ ३ ॥

कृत्स्नैकदेशभेदे प्रायश्चित्तानुष्ठानाधिकरणम् (४)

दर्शादौ कपालसन्निधौ, 'भिन्ने जुहोति' इति श्रुतो होमः, कृत्स्नभेदन एव । एकदेशभेदनस्य भिदुरद्रव्ये अवर्जनीयत्वात् । न च भिन्नस्य संस्कारो होमः, भेदनदोषनिर्घातार्थः । सन्निपातित्ववाक्याय विनियोगयोर्लाभात् । तन्निमित्तकत्वेत्वारादुपक्रियाप्राकारणिकविनियोगयोः प्रसङ्गात् । एवञ्च कार्यक्षमस्यैव संस्कार्यत्वात्, न कृत्स्नभेदने होम इति वाच्यम् । तथा सति निमित्ताभावात् होमो नित्यवदङ्गं—अनित्यभिन्नकपालसंस्कारद्वारकञ्चेति नित्यानित्यसंयोगविरोधापत्तेः । इति चेत् —

भिन्ने जुहोतीत्यादिः स्यात् कृत्स्नावयवभेदयोः ॥ १६९ ॥

यत्र भिन्नमिति बुद्धिरुत्पाद्यते तादृशः अनित्यत्वात् तादृक्कृत्स्नावयवभेदनयोर्निमित्तयोर्होमः ।

इति कृत्स्नैकदेशभेदे प्रायश्चित्तानुष्ठानाधिकरणम् ॥ ४ ॥

क्षामे सर्वदाहे प्रायश्चित्तानुष्ठानाधिकरणम् (५)

'यस्य पुरोडाशः क्षायति, तं यज्ञं निर्ऋतिर्गृह्णाति। यदा तद्धविस्सन्तिष्ठते, अथ देवहविर्निर्वपेत्। यज्ञो यज्ञस्य प्रायश्चित्तिः' इति क्षाणनिमित्तः पुनः प्रयोगः, कृत्स्नैकदेशक्षाणयोः पूर्ववत्स्यात्। इति चेत् —

[1]क्षाणे निमित्ते यत्कृत्स्न[2]व्यापत्तावेव तद्भवेत्।

एकदेशक्षाणस्यानित्यत्वात्, इयदवर्जनीयं–इयन्न–इति विशेषापरिज्ञानात्, कृत्स्नक्षाण एव स्यात्।

पूर्ववत् यत्र द्रव्यवदानयोग्यावयवः क्षाण इति बुद्धिः, तत्रैकदेशेऽपि क्षाणे पुनःप्रयोगस्स्यात्। इति केचित्।

इति क्षामे सर्वदाहे प्रायश्चित्तानुष्ठानाधिकरणम् ॥ ५ ॥

हविरार्तिन्यायः (६)

दर्शे दोहौ प्रकृत्य श्रूयते— 'यस्योभयँहविरार्तिमार्छेत् ऐन्द्रपञ्चशरावमोदनं निर्वपेत्' इति। तत्रोभयार्तावेव पञ्चशरावः। हवि रार्त्युभयत्वानां श्रुतत्वेन परस्परमिलितानामेव निमित्तत्वावगत्या एकस्याप्युद्देश्यनिमित्तविशेषणत्वाभावेन ग्रहैकत्ववैषम्यात्। इति चेत् —

हविरार्तिनिमित्तं यदेकार्तावपि तन्मतम् ॥ १७० ॥

न श्रुतत्वमात्रमुद्देश्यत्वप्रयोजकम्। एकत्वेऽपि [3]गतत्वात्। किन्तु, येन विना उद्देश्यनिमित्तप्रतीत्यपर्यवसानं, तत्त्वम्। इतरेतराविशेषितयोरार्तिहविषोर्नित्यतया अनिमित्तत्वेऽप्यन्यतरविशेषितान्यतरस्यानित्यतया तत्प्रतीतिपर्यवसाने सति भवत्युभयत्वं तद्विशेषणमिति ग्रहैकत्ववदविवक्षितम्। न चोभयत्वविशिष्टहविषस्तादृगार्ते वा तत्त्वम्; नित्यत्वात्। न चोभयत्वविशिष्टहविर्विशेषितार्तेः; नामार्थानां परस्परासंयुक्तानामाख्यातेनैव संबन्धात्। न चोभयत्वविशिष्टार्तिविशिष्टहविषः; उभयत्वस्यार्तिसंबन्धसमसमयमेव हविषोऽपि तत्संबन्धात्। अत एव हविर्विशिष्टार्तिविशिष्टोभयत्वस्येत्यपि निरस्तम्। अतोऽनियमेनान्यतरार्तावपि पञ्चशरानवः। तैत्तिरीयश्रुत्यनादरेणेदमधिकरणम्।

इति हविरार्तिन्यायः ॥ ६ ॥

होमाभिषवोभयकर्तुरेव भक्षणाधिकरणम् (७)

'अभिषुत्य .... हुत्वा .... भक्षयन्ति' इत्यत्र, होमाभिषवनिमित्तकं भक्षणं श्रूयमाणं, निमित्त-

---

[1] क्षामे निमित्ते—इति मातृकायाम् (सं) [2] .... क्षामतावेव ... इति च। सूत्रानुसारी चायं पाठः (सं)

[3] एकत्वेऽपि तत्त्वात् इति वा—एकत्वेऽपि तत्सत्त्वात् इति वा साधीयः। (सं)

साहित्यस्याविवक्षणादन्यतरस्मिन्नपि स्यात् । इति चेत् —

द्वाभ्यां भवति होमाभिषवाभ्यां सोमभक्षणम् ।

न निमित्तं होमाभिषवौ, किन्तु सोमसंस्कारार्थो भक्षो होमाभिषवसमानकर्तृको विधीयते । तत्रोपादेय कर्तृविशेषणयोर्विवक्षितत्वात् नैकैककर्तुर्भक्षः । आर्थिकन्तूभयोर्निमित्तत्वम् ।

इति होमाभिषवोभयकर्तुरेव भक्षणाधिकरणम् ॥ ७ ॥

पुनराधानं प्रतिवह्न्यनुगमनद्वयस्य निमित्तताधिकरणम् (८)

'यस्योभावग्नी अनुगतावभिनिम्रोचेत्–अभ्युदियाद्वा–पुनराधेयन्तस्य प्रायश्चित्तिः' इत्यत्र, हविरुभयत्ववदग्न्युभयत्वमप्यविवक्षितम् । इति चेत् —

द्वयोरग्न्योरनुगतौ पुनराधेयमिष्यते ॥ १७१ ॥

विधेयस्य वाक्यान्तरे उभयोत्पादकत्वेन विधानात्, अत्र निमित्तवेलायां द्वित्वाविवक्षायामपि पुनराधेय-विध्युत्तरं तद्वशादर्थादुभयत्वविवक्षेत्युभयानुगम एव पुनराधेयम् ।

इति पुनराधानं प्रतिवह्न्यनुगमनद्वयस्य निमित्तताधिकरणम् ॥ ८ ॥

पञ्चशरावस्य कर्मान्तरत्वाधिकरणम् (९)

दोहार्तौ विधीयमानः पञ्चशरावः प्रकृत ऐन्द्रयागे द्रव्यत्वेन साधनं, न यागान्तरं द्रव्यदेवता-विशिष्टम्; गौरवादिभ्यः । 'ऐन्द्र'मिति सान्नाय्यदेवताया नित्यानुवादः । इति चेत् —

ऐन्द्रं कर्मान्तरं दर्शात्

इन्द्रमहेन्द्रयोस्सान्नाय्ये वैकल्पिकत्वेन, इन्द्रस्य नित्यप्राप्त्यभावात्, सोऽपि विधेयः–पञ्चशरावपरिमाणक-ओदनश्च इति वाक्यभेदपरिहाराय द्रव्यदेवतासंबन्धकल्पितो याग उभयविशिष्टो विधीयते ।

इति पञ्चशरावस्य कर्मान्तरत्वाधिकरणम् ॥ ९ ॥

पञ्चशरावयागस्य नैमित्तिकदर्शयागाङ्गताधिकरणम् (१०)

विधेयस्यास्य कार्याकांक्षायां, द्रव्याभावेन सान्नाय्ययागनिवृत्तौ, [1]तत्कार्यहेत्वाकांक्षायां, परस्परा-न्वयेनोभयाकांक्षानिवृत्तेः, तत्प्रत्याम्नायो यागः । इति चेत् —

दर्शे प्रत्यामनेन्न तत् ।

दधिपयोऽन्तराभ्यां पुनरुत्पादिताभ्यां दर्शयागसंभवे तत्कार्यस्य हेत्वाकांक्षाविरहात्, नैमित्तिकं दर्शाङ्गं,

---

[1] तत्कार्यं = सान्नाय्यापूर्वम् । तस्य हेतुः = जनकः । तस्याकांक्षायां—इत्यर्थः । (सं)

द्रव्यनाशनदोषनिह्नवाय विधीयत इति न दर्शं प्रत्यामनेत् ।

इति पञ्चशरावयागस्य नैमित्तिकदर्शयागाङ्गताधिकरणम् ॥ १० ॥

सत्रायागूर्याप्रवृत्तस्य विश्वजिदावश्यकताधिकरणम् (११)

'यस्सत्रायागुरते स विश्वक्षिता यजेत' इत्यत्रागूर्य सत्रे प्रवृत्तोऽप्रवृत्तश्च विश्वजिता कुर्यात्, विशेषाश्रवणात् ।

फलकल्पनाभिया प्रवृत्त एव वा तदङ्गत्वेन । इति चेत् —

सत्रायागूर्याप्रवृत्तौ विश्वदिद्याग इष्यते ॥ १७२ ॥

प्रवृत्ताप्रवृत्तसाधारण्ये, प्रवृत्तस्य क्रत्वर्थः-अप्रवृत्तस्य पुरुषार्थः-इति वैरूप्यं स्यात् । प्रवृत्तस्यैवेत्यत्र, 'यस्सत्राय' इति निमित्तश्रुतिवैयर्थ्यम् । सङ्कल्पं कृतवतस्य नित्यत्वात् । उभयोः पुरुषार्थत्वे फलकल्पना स्यात् । अतस्सङ्कल्प्य कुतश्चिद्धेतोरप्रवृत्तौ, सत्रफलाय-विच्छेददोष समाधानाय च विश्वजित् ।

इति सत्रायागूर्याप्रवृत्तस्य विश्वजिदावश्यकताधिकरणम् ॥ ११ ॥

'बर्हिषा' इत्यादिश्रुतेर्व्रतकालविधानार्थताधिकरणम् (१२)

'बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमावास्यायाम्' इत्यत्र व्रतानुवादेन वत्सविधिर्न विशिष्टविधिः । भोजनस्य रागतसिद्धेः । इति चेत् —

व्रते कालविधिर्वत्सैः

'वत्सै'रिति वाक्ये । व्रते वत्सस्य पाण्यादिवन्नासाधनत्वम् । तद्भक्षणञ्च शक्यम् । विशसने श्रुतहानिः । 'पुरा वत्सानामपाकर्त्रोर्जायापती अश्नीतः' इत्यनेनैकवाक्यत्वात्, व्रतानुवादेन कालो विधीयते ।

इति बर्हिषेत्यादिश्रुतेर्व्रतकालविधानार्थताधिकरणम् ॥ १२ ॥

बर्हिषेत्याद्युक्तकालस्य सन्नयदसन्नयदुभयसाधारणताधिकरणम् (१३)

स कालस्सन्नयत एव । असन्नयतो वत्सापाकरणविरहात् तेन तल्लक्षणायोगात्, अनपायो हीति दाशमिके असोमयाजिनोऽप्याग्नेयोऽस्तीति तेन काललक्षणा नात्र । इति चेत् —

स्यादसन्नयतोऽपि सः ।

वत्सापाकरणं स्वकालद्वारा व्रतकाललक्षकम् । स्वस्य चान्वाधानात्परतः कालः । सोऽसोमयाजिनोऽपीति तस्याप्यनेन कालेनाधिकारो व्रते ।

इति बर्हिषेत्याद्युक्तकालस्य सन्नयदसन्नयदुभयसाधारणताधिकरणम् ॥ १३ ॥

सह शाखयेत्यस्य कालविधानार्थताधिकरणम् (१४)

चतुर्थे शाखायाः प्रहरति प्रतिपाद्यत्वं प्रस्तरवदित्युक्त[1]माक्षिप्यते प्रस्तरप्रहरणकाले, शाखापि प्रहर्तव्येति विवक्षायां, प्रस्तरेण सहशाखा प्रहरेदित्यापत्त्या, प्रहियमाणप्रस्तरं प्रतिशाखा तृतीयया अङ्गत्वेन विधीयत इति, सन्नयतः पौर्णमास्यां–असन्नयत उभयत्र शाखा। इति चेत् —

कालार्थ एव संयोगः प्रस्तरे शाखया त्विति ॥ १७३ ॥

अङ्गत्वे सहपदानर्थक्यात्, 'प्रस्तरं प्रहरणेन प्रतिपादयेत्–शाखया सह' इत्युक्ते, तस्या अपि प्रतिपाद्यत्वमेव गम्यते। अर्थतस्तु प्रस्तरप्रहरणकाले शाखापि इत्येव वाक्यविपरिणतिः। तत्र तत्र कृतकरशाखायाः न प्रयोजनापेक्षेत्यतोऽपि प्रतिपत्तिरिति नोत्पाद्या [1]अन्यत्र शाखा।

इति सहशाखयेत्यस्य कालविधानार्थताधिकरणम् ॥ १४ ॥

इति लघुवार्तिकटीकायां षष्ठस्य चतुर्थः पादः।

॥ अथ पञ्चमः पादः ॥

दर्शेऽभ्युदयेष्टौ नैमित्तिकदेवतापनयाधिकरणम् (१)

अकाले दर्शोपक्रमप्रायश्चित्तं श्रुतम्— 'यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति सत्रेधा तण्डुलान्विभजेद्ये मध्यमास्स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठा स्तानिन्द्राय प्रदात्रेदधं श्चरुं येऽणिष्ठा स्तान् विष्णवे शिपिविष्टाय श्रृते चरुम्' इति। तत्रोपक्रान्तकर्मणि गुणविधौ; तत्तद्देवताः –तद्विशेषणानि च–दधिश्रृतयोस्तत्तण्डुलसाहित्यं–चर्वधिकरणत्वं–तण्डुलानां चरुत्वञ्च—इत्यनेकविध्यापत्त्या वाक्यभेदप्रसङ्गात्, वाक्यत्रये तत्तद्गुणविशिष्टकर्मत्रयं विधीयते। इति चेत् —

विधिरभ्युदये पूर्वदेवतापनये मतः।

तण्डुलानिति प्रकृतहविर्मात्रमुपलक्ष्य, तण्डुलानामग्रेतन विनियोजकवाक्यप्राप्तं त्रित्वं 'त्रेधा'–इत्यनूद्य, 'विभजे'दिति प्रकृतहविष्षु पूर्वदेवताभ्यो विभागो विधीयते। एतच्छ्लोकार्धेनोक्तम्। इदमुपलक्षणम्। अग्रिमवाक्यैस्तत्तद्धविषि तत्तद्देवतान्तरविधिरित्यपि द्रष्टव्यम्।

ये मध्यमवाक्ये, द्विधा खण्डिततण्डुलोद्देशेन दातृत्वविशिष्टोऽग्निर्विधीयते–अन्यत्प्राप्तमनूद्यते। ये स्थविष्ठवाक्ये दधिसहिताखण्डिततण्डुलोद्देशेन प्रदातृत्वगुणविशिष्ट इन्द्रो विधीयते। येऽणिष्ठवाक्ये श्रृतसहितकणोद्देशेन शिपिविष्टत्वविशिष्टविष्णुर्विधीयते।

---

[1] ४–२–४

अत्र त्रिष्वपि देवेषु, एतद्विधिसंस्पर्शात्पूर्वं तत्तद्विशेषणानि मन्त्रार्थवादप्रसिद्धान्यनूदितानीति, सामानाधिकरण्येन तत्तद्गुणविशिष्टमेकैकं देवताकारकं विधीयत इति न तत्कृतो वाक्यभेदः । द्वितीय-तृतीयवाक्ययोर्दधिशृतसाहित्यकृतवाक्यभेदस्त्विष्यत एव । 'संभवत्येकवाक्यत्वे' इति न्यायात् ।

अभ्युदितेष्टिप्रकरणे 'सह श्रपयति' इत्येकं वाक्यमस्ति । तेन संप्रतिपन्नदेवताकयोस्सह श्रपणे, चरुत्वाधिकरणत्वयोरर्थप्राप्तयोरनुवाद इति न प्रकृतहानाप्रकृतप्रक्रिये इति न कर्मान्तरम् ।

इति दर्शेऽभ्युदयेष्टौ नैमित्तिकदेवतापनयाधिकरणम् ॥ १ ॥

उपांशुयाजेऽपि देवतापनयाधिकरणम् (२)

तत्रैवेष्टावुपांशुयाजान्येन देवतापनयः । तत्र देवतान्तरविध्यभावात् । इति चेत् —

लुप्तस्तत्रोपांशुयाजो देवतापनयाद्भवेत् ॥ १७४ ॥

तण्डुलपदस्य प्रकृतहविर्मात्रोपलक्षकत्वोक्तेः देवतान्तराविधानाच्च मुक्त एव सः । कृत्वाचिन्तयेदम् । ब्रह्मवृचब्राह्मणे दर्शेऽपि तद्विधानाभिप्रायेण वा ।

इत्युपांशुयाजेऽपि देवतापनयाधिकरणम् ॥ २ ॥

अनिरुहोऽभ्युदयेष्ट्यधिकरणम् (३)

निरुप्ते हविष्यभ्युदिते इदं प्रायश्चित्तम् । हविष उदासीनस्य निमित्तविशेषणत्वायोगात्–श्रुत-निर्वापपरित्यागे क्रियान्तरकल्पने च मानाभावात् । इति चेत् —

अनिरुप्ते निरुप्ते च प्रायश्चित्तमिदं समम् ।

अप्रवृत्तस्य हविषो विशेषणत्वायोगात्, तत्प्रवृत्तिमात्रस्यौदासीन्यविच्छेदकत्वात्, तावतैव निमित्तप्रतीति पर्यवसाने च, अविवक्षितो निर्वापो हविरुभयत्ववदित्यनिरुप्ते निरुप्ते च प्रायश्चित्तम् ।

इत्यनिरुप्तेऽभ्युदयेष्ट्यधिकरणम् ॥ ३ ॥

अनिरुप्तेऽभ्युदये वैकृतीभ्यो निर्वापाधिकरणम् (४)

तण्डुलग्रहणात्तदवस्थस्यैव देवतापनयादिः ; तत्पूर्वं ज्ञातेऽप्यभ्युदये प्राकृतीभ्य एव निर्वापः । इति चेत् —

निर्वापो वैकृतीभ्यस्स्यादनिरुप्ते यदोदयः ॥ १७५ ॥

तण्डुलपदस्य हविर्मात्रलक्षकत्वात् । अन्यथा दधिशृतयोर्देवतापनयाभावापत्तेः । ज्ञातेऽभ्युदये पूर्वमपि निर्वापात् देवतापनयादीति वैकृतीभ्य एव निर्वापः ।

इत्यनिरुप्तेऽभ्युदये वैकृतीभ्यो निर्वापाधिकरणम् ॥ ४ ॥

किञ्चिन्निरुप्तेऽभ्युदयेऽविशिष्टस्य तूष्णीं निर्वापाधिकरणम् (५)

एकादिमुष्टिनिर्वापे सत्यभ्युदयज्ञाने प्राकृतीभ्य एवाविष्टनिर्वापः, तासां प्रवृत्तत्वात्। निमित्ते नैमित्तिकावश्यंभावाद्वैकृतीभ्यो वा। इति चेत् —

किञ्चिन्निरुप्ते शिष्टस्य तूष्णीं निर्वाप इष्यते।

प्राकृतापनयो मध्येऽपि स्यात्। संयोगमात्रापेक्षत्वात्तस्य। वैकृतीनां संयोगस्तु एकविधिविहिते एकपदार्थे कार्यः प्राकृतीनामिव। न तदेकदेश इत्यवशिष्टस्य तूष्णीमेव निर्वापः।

इति किञ्चिन्निरुप्तेऽभ्युदयेऽवशिष्टस्य तूष्णीं निर्वापाधिकरणम् ॥ ५ ॥

सन्नयदसन्नयदुभयस्यैवाभ्युदये प्रायश्चित्ताधिकरणम् (६)

इयमिष्टिस्सन्नयत एव। दधिशृतसहिततण्डुलोद्देशेन देवताविधानस्य, दधिशृताभावे तदधिकरणकत्वस्य चायोगात्। इति चेत् —

स्यादसंनयतोऽप्येषा प्रायश्चित्तिर्निमित्ततः ॥ १७६ ॥

पादाद्ये अधिकरणत्वविधिनिरासात्–उद्देश्यसाहित्याविवक्षणाच्च, तण्डुलत्रये देवतात्रयविधिमात्रमुपजीव्यासन्नयतोऽप्यधिकारः।

इति सन्नयदसन्नयदुभयस्यैवाभ्युदये प्रायश्चित्ताधिकरणम् ॥ ६ ॥

सत्राय प्रवृत्तमात्रस्य विश्वजिदधिकरणम् (७)

'यदि सत्राय संदीक्षितानां साम्युत्तिष्ठासेत्, सोममभज्य विश्वजिता यजेत' तति श्रुते, यदीत्यादिनोक्तसाम्युत्तिष्ठासायां निमित्ते सोमविभागसमानकर्तृकत्वविशिष्टतया विधीयमानविश्वजित् क्रीतराजकस्यैद संभवेत्। इति चेत् —

अक्रीतराजकस्यापि सत्रोत्थानेऽस्ति विश्वजित्।

सोमविभागवचनस्य रागप्राप्तद्रव्यविभागमात्रानुवादिनः प्रदर्शनार्थत्वेन अविधायकत्वात्, क्रीताक्रीतराजकयोर्विश्वजित्।

इति सत्राय प्रवृत्तमात्रस्य विश्वजिदधिकरणम् ॥ ७ ॥

ज्योतिष्टोमे दीक्षापरिमाणानां वैकल्पिकत्वाधिकरणम् (८)

ज्योतिष्टोमे, 'एका दीक्षा–तिस्रो दीक्षाः द्वादश दीक्षाः' इति श्रुतदीक्षापरिमाणानां विकल्पः। इति चेत् —

द्वादश प्रकृतौ दीक्षाः

द्वादशरात्रीर्दीक्षितो भृतिं वन्वीति' इति श्रुतभृतिवननस्य पक्षान्तरेष्वसंभवात् द्वादशदीक्षानियमः। इति भाष्यम्।

इति ज्योतिष्टोमे दीक्षापरिमाणानां वैकल्पिकत्वाधिकरणम् ॥ ८ ॥

द्वादशाहे दीक्षापरिमाणनियमाधिकरणम् (९)

भृतिवननसामर्थ्यात् द्वादशत्वं दीक्षाणाम्। इति चेत् —

श्रुतकल्पत्रयन्तु वा ॥ १७७ ॥

प्रकरणाम्नातयोरेकत्रित्वपक्षयोर्विनाकारणमुत्कर्षायोगात्, 'दीक्षितो भृतिं वन्वीत' इत्येतावत एव विधानात्, द्वादशेत्यस्योपलक्षणत्वात्पक्षत्रयम्।

इति द्वादशाहे दीक्षापरिमाणनियमाधिकरणम् ॥ ९ ॥

द्वादशाहेऽपि यथाप्रकृतिकल्पत्रयस्य विकल्पः। इति चेत् —

द्वादशाहे द्वादशत्वं दीक्षाणां नियतन्तु वै।

'अभीन्धत एव दीक्षाभि'रिति श्रुतदीक्षाबहुत्वस्य वाक्यशेषे, 'द्वाभ्यां लोमावद्यन्ति द्वाभ्यां त्वचं द्वाभ्यामसृक् द्वाभ्यां माँसं द्वाभ्यामस्थि द्वाभ्यां मज्जानम्' इति द्वादशत्वे पर्यवसानात्, षट्त्रिंशदहस्त्वलिङ्गाच्च द्वादशत्वनियमः। इति वार्तिकम् ॥ १० ॥

गवामयने माघपौर्णमास्याः पुरस्ताद्दीक्षाधिकरणम् (११)

गवामयने 'चित्रापौर्णमासे दीक्षेरन् .... ' इत्यादिना चैत्रीं स्तुत्वा, तत उक्तं–'चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन् तेषामेकाष्टकायां क्रयस्संपद्यते' इति। तत्राविशेषात् याकाचित्पौर्णमासी स्यात्। चैत्रीस्तुतिरुपक्रमश्रुतद्विधिशेषः। एकाष्टकापदस्यापि कृष्णाष्टमीमात्रे प्रयोगात् द्वादशाष्टका इति। यद्वा–चैत्र्याः अनन्तरस्तुतत्वात् तद्विषय एवायं सामान्यश्रुतोऽपि पौर्णमासीशब्दः। इति चेत् —

गव्यदीक्षाकालविधौ भवेन्माघ्येव पूर्णिमा ॥ १७८ ॥

प्रक्रमे 'एकाष्टकायान्दीक्षेरन्नेषा वै संवत्सरस्य पत्नी' इत्युक्त्वा, तत्र दोषाभिधानपूर्वकं, 'चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन्तेषामेकाष्टकायां क्रयस्संपद्यते' इति, दीक्षातः प्रच्युतां क्रयसंपत्त्या अनुगृह्णाति।

संवत्सरपत्नी च माघ्युपरि अष्टमी । 'यां जनाः प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम् । संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली ॥' इति तद्विषये मन्त्रदर्शनात् । वृद्धा अपि तस्यामेवैकाष्टकाशब्दमुपचरन्ति । 'य एकाष्टकायान्दीक्षन्तेऽन्तनामानावृतू भवतः' इति शिशिरगताष्टमीं दर्शयत्युपक्रमः । तस्मान्माघ्याः पूर्वैकादश्यां गावामयनिकी दीक्षा ।

इति गवामयने माघपौर्णमास्याः पुरस्ताद्दीक्षाधिकरणम् ॥ ११ ॥

दीक्षोत्कर्षतन्नियमानामप्युत्कर्षाधिकरणम् (१२)

दीक्षितस्य पुरुषार्थहोमादयो निषिद्धाः 'दीक्षितो न जुहोति' इत्यादिना । अवभृथान्ते च दीक्षामोकः । तत्र कुतश्चिद्धेतोरवभृथोत्कर्षेऽपि शास्त्रतो दीक्षाननुवृत्तेः कर्तव्यान्यग्निहोत्रादीनि । इति चेत् —

उत्कर्षेऽवभृथस्य स्युर्नाग्निहोत्रादिकाः क्रियाः ।

दीक्षाया एव प्रतिषेधनिमित्तत्वं श्रौतं न तत्कालस्येति, केनापि तस्या अनुवृत्तौ न कर्तव्यान्यग्निहोत्रादीनि ।

इति दीक्षोत्कर्षे तन्नियमानामप्युत्कर्षाधिकरणम् ॥ १२ ॥

ज्योतिष्टोमोत्कर्षे प्रतिहोमाननुष्ठानाधिकरणम् (१३)

अवभृथोत्कर्षकृतदीक्षानुवृत्तेः पुरुषापराधजतया अवैधत्वात् अग्निहोत्रस्थानकप्रतिहोमास्स्युः । इति चेत् —

न तत्र प्रतिहोमास्स्युः कर्तव्या करणे हिते ॥ १७९ ॥

कुतोऽपि दीक्षानुवृत्तावनधिकारात्, अकर्तव्यत्वेन कर्तव्याकरणप्रयुक्तप्रतिहोमा न स्युः ।

इति ज्योतिष्टोमोत्कर्षे प्रतिहोमाननुष्ठानाधिकरणम् ॥ १३ ॥

उदवसानीयोत्कर्षेऽपि प्रतिहोमाननुष्ठानाधिकरणम् (१४)

कृतावभृथस्योदवसानीयोत्कर्षेऽपि अधिकारसंपत्तेरग्निहोत्रादयस्स्युः । अकरणे च प्रतिहोमाः । इति चेत् —

तथैवावभृथादूर्ध्वमिष्ट्युत्कर्षेऽपि नैव ते ।

'एतया पुनराधेयसंमितयेष्ट्येष्ट्वाग्निहोत्रं जुहोति' इति श्रुतेः, कृतेष्टेरेवाग्निहोत्रेऽधिकारात्, तत्प्राक् नाग्निहोत्रं—न वा प्रतिहोमाः ।

इत्युदवसानीयोत्कर्षेऽपि प्रतिहोमाननुष्ठानाधिकरणम् ॥ १४ ॥

प्रतिहोमे सायंप्रातरग्निहोत्रप्रभृत्यारंभाधिकरणम् (१५)

प्रतिहोमाश्चेद्याथाकाम्यं, युगपदुपस्थितेः । इति चेत् —

भवेयुः प्रतिहोमायद्यतिपत्तिक्रमेण ते ॥ १८० ॥

अग्निहोत्रातिपत्तिक्रमेण अग्निष्टोमादौ सायमुपक्रमाः, षोडशिनि प्रातरुपक्रमाः प्रतिहोमाः ।

इति प्रतिहोमे सायंप्रातरग्निहोत्रप्रभृत्यारंभाधिकरणम् ॥ १५ ॥

भेदनादिनिमित्तकहोमस्य दर्शपूर्णमासाङ्गत्वाधिकरणम् (१६)

दर्शप्रकरणे 'भिन्ने जुहोति' इति श्रुतो नैमित्तिको होमो वाक्याद्यत्र यत्र निमित्तं तत्र तत्र स्यात् प्रकरणातिक्रमेण । इति चेत् —

भिन्ने प्रकृत एव स्याज्जुहोतिस्तन्निमित्तकः ।

वाक्यस्वातन्त्र्ये फलाभावात्, तत्कल्पनायाश्च प्रकृतैकवाक्यतामात्रे तत्सिद्धावप्युपपत्तेस्तत्रैव निवेशः ।

इति भेदनादिनिमित्तकहोमस्य दर्शपूर्णमासाङ्गत्वाधिकरणम् ॥ १६ ॥

व्यापन्नशब्दार्थनिर्णयाधिकरणम् (१७)

'व्यापन्नमप्सु प्रहरेत्' इत्यत्र व्यापन्नशब्दार्थमाह —

व्यापन्नमित्यभोज्यं स्यात्कोशकीटादिदूषितम् ॥ १८१ ॥

आर्याणामिति शेषः ।

इति व्यापन्नशब्दार्थनिर्णयाधिकरणम् ॥ १७ ॥

अपच्छेदयौगपद्येऽपि प्रायश्चित्ताधिकरणम् (१८)

ज्योतिष्टोमे बहिष्पवमानाय प्रसर्पता, 'यदि प्रतिहर्तापच्छिन्द्यात् सर्ववेदसं दद्यात्, यद्युद्गाता अदक्षिणं तमिष्ट्वा पुनस्तेन यजेत तत्र तद्द्याद्यत्पूर्वत्र दास्यन् स्यात्' इत्यत्र यदोद्गातृप्रतिहर्त्रोर्युगपदपच्छेदस्तदा तस्यान्यतरेणापि व्यपदेष्टुमशक्तेर्निमित्तविघातान्न प्रायश्चित्तम् । इति चेत् —

प्रायश्चित्तमपच्छेदयौगपद्येऽपि विद्यते ।

स्वस्वप्रयत्नसाध्यापच्छेदे द्वयोर्निरपेक्षकर्तृत्वेन निमित्तयोः कालैक्येऽपि अविघातात्प्रायश्चित्तं स्यात् ।

इत्यपच्छेदयौगपद्येऽपि प्रायश्चित्ताधिकरणम् ॥ १८ ॥

यौगपद्येऽदाक्षिण्यसर्वस्वदाक्षिण्ययोर्विकल्पाधिकरणम (१९)

तत्र विरुद्धप्रायश्चित्तद्वयं प्रयोगभेदेन समुच्चेयम् । 'तेन पुनर्यजेत' इति वचनात् ।

इति चेत् —

तत्र द्वयोर्विकल्पस्स्यात्

प्रयोगान्तरगते निमित्ते सति प्रयोगान्तरस्थप्रायश्चित्तस्यानुपकारित्वात्, तस्मिन्नेवाशक्यसमुच्चयत्वात् प्रायश्चित्तयोर्विकल्पः ।

इति यौगपद्येऽदाक्षिण्यसर्वस्वदाक्षिण्ययोर्विकल्पाधिकरणम् ॥ १९ ॥

अनुपूर्व्येणापच्छेदे उत्तरापच्छेदनिमित्तप्रायश्चित्तानुष्ठानाधिकरणम् (२०)

यत्रोद्गात्रपच्छेदः प्रथमः, चरमः प्रतिहर्त्रपच्छेदः, तदापूर्वनैमित्तिकं कार्यम् । तस्यानुपसंजातविरोधित्वात् । नोत्तरम् । पूर्वविरुद्धस्य तस्याशक्यज्ञानत्वात् । इति चेत् —

पौर्वापर्ये परं बलि ॥ १८२ ॥

प्रत्यक्षशास्त्रेणोत्तरनैमित्तिककर्तव्यताज्ञानं निर्विघ्नं जायमानं, न स्वविरोधिपूर्वनैमित्तिककर्तव्यताज्ञानमनपबाध्योत्पत्तुमर्हति, भ्रमोत्तरविशेषदर्शनवत् । पूर्वं नोत्तरबाधकं–तदा तस्याप्राप्तत्वात् । जातेतूत्तरज्ञाने, बाधकत्वाभिमतपूर्वज्ञाननाशात् , न तेनोत्तरस्य बाध्यत्वाशङ्केति परं बलीयः ।

इति आनुपूर्व्येणापच्छेदे उत्तरापच्छेदनिमित्तप्रायश्चित्तानुष्ठानाधिकरणम् ॥ २० ॥

उद्गातुरुत्तरापच्छेदेऽपि सर्वस्वदक्षिणादानाधिकरणम् (२१)

प्रतिहर्त्रपच्छेदोत्तरमुद्गात्रपच्छेदे पुनःप्रयोगे द्वादशशतमेव पूर्वत्र नैजं दानम् । तदेवेति–दास्यन् स्यादिति–तस्यैव निर्देशार्हत्वात् ।

यद्वा–तस्यापि तदनन्तरनैमित्तिकसर्ववेदसस्यापि पूर्वत्र क्रमेण दातव्यत्वप्रतीतेर्विकल्पो द्वयोः । इति चेत् —

पश्चादुद्गात्रपच्छेदे सर्वस्वं स्यात्पुनः क्रतौ ।

द्वादशशतस्य नैमित्तिकसर्ववेदसेन बाधितत्वात् न पक्षयोरवकाशः । किन्तु तन्नियमत एव । न च तस्याप्यदाक्षिण्येन बाध इति शङ्क्यम् । तत्प्रयोगानिवेशेऽपि तत उत्कृष्य द्वितीयप्रयोगे निवेशसंभवात् । अन्यथा यत्र केवलोद्गात्रपच्छेदः तत्रापि द्वादशशतस्य द्वितीयप्रयोगनिवेशायोगः स्यात् ।

इत्युद्गातुरुत्तरापच्छेदेऽपि सर्वस्वदक्षिणादानाधिकरणम् ॥ २१ ॥

अहर्गणेऽपच्छेदे सर्वावृत्तिनिराकरणाधिकरणम् (२२)

द्वादशाहाद्यहर्गणेषु क्वचिदहन्युद्गात्रपच्छेदे सर्वस्यादक्षिणत्वेन संस्था पुनःप्रयोगाश्च । अहस्संघातस्य साधनत्वेन तन्निवेशिधर्माणां संघाते निवेशात् । इति चेत् —

आवृत्तिरह्नस्तस्यैवापच्छेदोऽहर्गणे यदि ॥ १८३ ॥

अपच्छेदः = उद्गात्रपच्छेदः। समूहस्य फलसाधनत्वाचोदनात् यागानामेव प्रत्येकस्वस्वापूर्वद्वारा दण्डचक्रन्यायेन फलजनकत्वात् यस्याह्नो वैगुण्यं तदेव आवृत्तं सत्, अनावृत्ताहरन्तरसहितं फलं जनयतीति तस्यैवावृत्तिः।

इत्यहर्गणेऽपच्छेदे सर्वावृत्तिनिराकरणाधिकरणम् ॥ २२ ॥

इति लघुवार्तिकटीकायां षष्ठस्य पञ्चमः पादः।

॥ अथ षष्ठः पादः ॥

सत्रे समानकल्पनां सहाधिकाराधिकरणम् (१)

दर्शादावुक्तः प्रयाजकल्पभेदः, '.... वासिष्ठादीनां नाराशंसो द्वितीयः प्रयाजः—तनूनपादन्येषा'मिति। अतिदेशपरम्परया स सत्राङ्गेष्टिष्वापन्नपि भिन्नकल्पानप्यधिकरोति। वासिष्ठादीनां तत्तत्प्रयाजे कर्तृत्वेन विधानात्, अन्यतरकल्पग्रहेऽपि तत्तत्कर्तृकत्वाभावात्। तेषां प्रयाजौ प्रत्युद्देश्यत्वकल्पने फलकल्पनाद्यापातात्। इति चेत् —

सत्रेषु भिन्नकल्पानामधिकारो न विद्यते।

वासिष्ठादीन् स्वामिन उद्दिश्य क्रतूपकारद्वारा तादर्थ्येन नाराशंसादिविधौ धात्वर्थविधिः। इतरथा-धात्वर्थे कर्तृविधिः, इति धातुपरार्थ्याद्यापद्येन। तथा चान्यतरपक्षग्रहे अन्यतरस्य तज्जन्यक्रतूपकाराभावाद् द्विगुणः क्रतुर्न फलं साधयेदिति भिन्नकल्पानां नाधिकारः।

इति सत्रे समानकल्पानां सहाधिकाराधिकरणम् ॥ १ ॥

भिन्नकल्पयोरपि राजपुरोहितयोः कुलाययज्ञे सहाधिकाराधिकरणम् (२)

कुलायां प्रकृत्य, 'एतेन राजपुरोहितौ सायुज्यकामौ यजेताम्' इति श्रुते द्वन्द्वे युगपदधिकरणवचनतायां तत्स्मरणेन पदद्वये लक्षणा-भिन्नकल्पता च स्यात्। न च राज्ञोः पुरोहितौ इति युक्तम्। पूर्वपदलक्षणा राजापदवैयर्थ्यापत्त्योः प्रसङ्गात्। तस्यैव पुरोहितवत्त्वेनाव्यावर्तकत्वात्। नापि राज्ञः पुरोहितौ इति, उपादेयैकत्वविवक्षणात् एकस्य तद्द्वयाभावात् नापि कर्मधारयः, राजत्वपुरोहितत्वयोर्भिन्नजातीयवृत्तेः। इति चेत् —

पुरोहितश्च राजाचाधिकृतौ द्वन्द्वतस्सह ॥ १८४ ॥

न च पदद्वये लक्षणा; युगपदधिकरणेत्यस्यान्यत्र निरस्तत्वात्। अतो वचनाद्यं कञ्चित्कल्पमाश्रित्य भिन्नकल्पयोरधिकारः।

इति भिन्नकल्पयोरपि राजपुरोहितयोः कुलाययज्ञे सहाधिकाराधिकरणम् ॥ २ ॥

सत्रे ब्राह्मणमात्रस्याधिकाराधिकरणम् (३)

'ऋद्धिकामास्सत्रमासीरन्' इत्यविशेषश्रुतेस्त्रयाणामधिकारः। 'ये यजमानास्त ऋत्विजः इति यजमानानुद्दिश्य ऋत्विक्कारस्य तत्संस्कारकतया विधानात् प्रधानैरेवार्त्विज्यं कार्यम्। शास्त्रान्त्याधिकरणे च गुणकर्तृपरिच्छेदकं ब्राह्मण्यमुक्तम्। न चेह ते सन्ति, इत्यविरोधात् त्रयाणामधिक्रिया। इति चेत् —

सत्रेषु ब्राह्मण एव भवेयुरधिकारिणः।

अप्राकृतकार्यत्ववारणाय, यत्तदोर्व्यत्यासेन, 'ये आर्त्विज्यपदार्थाः–ते याजमाना इति यजमानः पदार्थगुणतया विधीयन्ते' इति प्रकृतिप्राप्तयजमानान्यकर्तृकत्वबाधेऽपि न ब्राह्मणत्वबाधः। ऋद्धिकामशब्दस्य तेष्वेव संभवात्। अतः सत्रे ब्राह्मणानामेवाधिकारः।

इति सत्रे ब्राह्मणमात्रस्याधिकाराधिकरणम् ॥ ३ ॥

सत्रे विश्वामित्रतत्समकल्पानामेवाधिकाराधिकरणम् (४)

अविशेषाद्ब्राह्मणानां सर्वेषामधिकारः। प्रकृतौ वासिष्ठस्य ब्रह्मत्वोक्तावपि स्तोमभागवेदितुरेववासिष्ठत्वेन वाक्यशेषे श्रवणात्। अतः समानकल्पाः सर्वेऽधिक्रियन्ते। इति चेत् —

तत्रापि वैश्वामित्रास्स्युः समकल्पैस्सहेतरैः ॥ १८५ ॥

'विश्वामित्रो होता' इति वचनात् तेषां—तत्समानकल्पविप्राणाञ्चाधिकारः।

इति सत्रे विश्वामित्रतत्समकल्पानामेवाधिकाराधिकरणम् ॥ ४ ॥

सत्रे आहिताग्नेरेवाधिकरणम् (५)

तत्रानाहिताग्नयोऽपि केनचिदग्निमता सहाधिक्रियन्ते। 'यजमानेन संमितौदुंबरी' इत्यत्रेव, अग्नीनामपि परार्थतया फलिसंस्कारकत्वाभावात्। इति चेत् —

तत्रापि साग्निकाः

कृतेष्टेः कृतसोमस्य च सोमविकारेष्वधिक्रियेति[1] पञ्चमे स्थितत्वात्, आधानविधिगतात्मनेपदेन तत्फलस्य अग्नीनां कर्मयोग्यत्वस्य आधातृमात्र एव बोधनात्, नान्याहिताः अन्यस्य कर्म साधयन्ति, इत्याहिताग्नयः कृतेष्टिसोमाश्च सत्रे अधिक्रियन्ते।

इति सत्रे आहिताग्नेरेवाधिकाराधिकरणम् ॥ ५ ॥

---

[1] ५–४–९

सत्रे जुह्वादीनां साधारण्याधिकरणम् (६)

उपग्रहविशेषविरोधाभावात्, कस्यचित्पात्रेण सत्राणि कुर्युः। इति चेत् —

तेषां पात्रं साधारणं मतम्।

'आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च, 'दक्षिणे हस्ते जुहूमासादयति' इत्यादिना दाहगुणभावस्य–आसादनप्रतिपाद्यत्वस्य च पात्रेष्ववगमात्, तत्पात्रस्वामिनो मध्ये मरणे, तत्पात्रैर्दाहे क्रतुवैगुण्यात्, तैरदाहे दाहवैगुण्याच्च साधारणं पात्रमुत्पाद्यम्।

इति सत्रे जुह्वादीनां साधारण्याधिकरणम् ॥ ६ ॥

विकृतसप्तदशसामिधेनीषु वर्णत्रयाधिकाराधिकरणम् (७)

अध्वरकल्पादिषु श्रुतसाप्तदश्यासु वैश्य एवाधिक्रियते। दर्शप्रकरणस्थेन 'सप्तदश वैश्यस्य' इत्यनेन, दूरस्थसाप्तदश्यानुवादेन वैश्यस्य कर्तुर्विधानात्। दर्शे साप्तदश्याभावात्। इति चेत् —

त्रयोऽप्यध्वरकल्पादौ वर्णास्स्युरधिकारिणः ॥ १८६ ॥

तादर्थ्यषष्ठ्या वैश्योद्देशेन तदङ्गतया विधीयमानं साप्तदश्यं तत्कर्तृकत्वे निमित्ते दर्शाङ्गतया पर्यवस्यत्, नित्यपाञ्चदश्यबाधेन तत्रैव निवशत इति नोत्कर्षमर्हति। अध्वरकल्पादौ तु साप्तदश्यं क्रत्वर्थमिति अनैमित्तिकत्वात् त्रीनप्यधिकुर्यात्।

इति विकृतसप्तदशसामिधेनीषु वर्णत्रयाधिकरणम् ॥ ७ ॥

इति षष्ठस्य षष्ठः पादः।

॥ अथ सप्तमः पादः ॥

विश्वजिति पित्रादीनामदेयत्वाधिकरणम् (१)

'विश्वजिति सर्वस्वं ददाति' इत्यत्र, स्वशब्दार्थयोर्ज्ञातिधनयोः सर्वशब्दस्वारस्याद्दानं पित्रादीनामपि परप्रेष्यत्वापादनेन। इति चेत् —

स्वदाने देयमात्मीयम्

स्वत्वध्वंसपूर्वकपरस्वत्वापादनं दानम्। तत् धनेष्वेव संभवेत्। न ज्ञातिषु। सकृत्प्रयुक्तशब्दस्यैकार्थबोधकत्वस्ववारस्यादपि न भिन्नशक्त्युपस्थाप्ययोर्ग्रहणम्। अतो धनस्यैव दानम्।

इति विश्वजिति पित्रादीनामदेयत्वाधिकरणम् ॥ १ ॥

विश्वजिति पृथिव्या अदेयत्वाधिकरणम् (२)

महापृथिवी सार्वभौमस्य स्वमिति सापि देया। इति चेत् —

न भूमिः

कर्षकेभ्यः षड्भागोद्धरणमात्रस्य सार्वभौमकर्मतया न सा स्वमिति न देया ।

इति विश्वजिति पृथिव्या अदेयत्वाधिकरणम् ॥ २ ॥

विश्वजिति अश्वादीनामदेयत्वाधिकरणम् (३)

विश्वजित्येव, 'न केसरिणो ददाति' इति विहितप्रतिषिद्धत्वाद्विकल्पः । इति चेत् —

न तुरंगमः ।

दाशमिकपर्युदासाधिकरणन्यायेन केसर्यतिरिक्तं सर्वं देयमिति वाक्यैकवाक्यता । अतो नाश्वो देयः ।

इति विश्वजिति अश्वादीनामदेयत्वाधिकरणम् ॥ ३ ॥

विश्वजिति विद्यमानानामेव सर्वस्वानां दानाधिकरणम् (४)

'सर्वस्वं ददाति' इति सर्वोद्देशेन ददात्यर्थविधानात्, पुरुषोपभोग्यं सर्वं शयनासनपात्राद्य-विद्यमानमप्यर्जयित्वा देयम् । इति चेत् —

नासत्संपाद्य दातव्यम्

चोदकप्राप्तदानोद्देशेन द्वादशशतव्यावृत्तये सर्वताविधिरयमिति, विद्यमानैरेव सर्वत्वोपपत्तेर्नासत्संपाद्यम् । अशक्तेश्च कियत्सर्वमित्यपरिमेयत्वात् । तस्मान्नार्जयित्वा देयम् ।

इति विश्वजिति विद्यमानानामेव सर्वस्वानां दानाधिकरणम् ॥ ४ ॥

विश्वजिति धर्मार्थसेवकशूद्रस्यादेयताधिकरणम् (५)

धर्मार्थोपागतपरिचारकशूद्रस्यापि परविधेयत्वापादनेन दानम् । इति चेत् —

न शुश्रूषुश्च शूद्रकः ॥ १८७ ॥

स्वत्वाभावाद्दीयमानेन परविधेयत्वानङ्गीकृतेश्च । दासस्तु देयः ।

इति विश्वश्विति धर्मार्थसेवकशूद्रस्यादेयताधिकरणम् ॥ ५ ॥

विश्वजिति दक्षिणाकाले विद्यमानानामेव सर्वस्वानां देयताधिकरणम् (६)

दक्षिणादानात्पूर्वं व्ययप्रसक्तावपि तमकृत्वा तदपि, यागोत्तरं प्राप्तव्यत्वेन निश्चितमपि, सर्वत्व-संपत्तये देयम् । इति चेत् —

यावत्स्याद्दक्षिणाकाले दातव्यं तावदेव हि ।

विद्यमानेनैव सर्वत्वोपपत्तेः प्राप्तव्यस्य तदा स्वत्वाभावाच्च । अतो विद्यमानं देयम् ।

इति विश्वजिति दक्षिणाकाले विद्यमानानामेव सर्वस्वानां देयताधिकरणम् ॥ ६ ॥

विश्वजिति दक्षिणादानोत्तराङ्गानामनुष्ठानाधिकरणम् (७)

प्रकृतौ कर्मारंभ एव त्रिधा यजमानेनात्मीयं धनं वचनाद्विभक्तम्— 'इदं मे भक्षार्थम्' 'इदं मे क्रत्वर्थम्' 'इदं दक्षिणार्थम्' इति । तत् त्रिविधमपि सर्वतासंपत्तये दत्त्वा, चोदकप्राप्तक्रतु शेषस्त्याज्यः ।

शेषे विरोधभीश्चेत्, तन्मात्रापेक्षितमवशेष्यान्यत्सर्वं देयम् । इति चेत् —

भृत्यर्थे सकलं देयं क्रतुभुक्त्यर्थवर्जितम् ॥ १८८ ॥

दक्षिणार्थप्राप्तद्रव्यानुवादेन सर्वतामात्रविधौ लाघवमिति दक्षिणार्थमेव सर्वं देयम् ।

इति विश्वजिति दक्षिणादानोत्तराङ्गानामनुष्ठानाधिकरणम् ॥ ७ ॥

अहर्गणस्थेऽपि विश्वजिति सर्वस्वदानाधिकरणम् (८)

अष्टरात्राहीने विश्वजित्प्रथममहः । तत्र द्वादशाहविकारत्वादहीनानां, ज्योतिष्टोमाच्चोदकपरंपरया अन्वहं द्वादशशतदानं प्राप्तं अपोद्य, लिङ्गकल्पितवचानातिदेशतो नामातिदेशप्राबल्यात् सर्ववेदसमेव देयमित्याह —

सर्ववेदसमेव स्यादहीने विश्वजित्यपि ।

[1]इदन्तु प्राप्तिमात्रपरम् । 'विप्रतिषिद्धधर्मसमवाये भूयसां स्यात्सधर्मत्व'मिति न्यायेन सर्वेषामेक-प्रयोगवर्तिनामष्टानमह्ना द्वादशशतमन्वहमिति विश्वजित्यपि तावदेव देयम् ।

इत्यहर्गणस्थेऽपि विश्वजिति सर्वस्वदानाधिकरणम् ॥ ८ ॥

विश्वजिति द्वादशशतन्यूनधनस्यानधिकाराधिकरणम् (९)

द्वादशशतान्नूनमधिकं वा ददतोर्द्वयोरप्यधिकारः । सर्वत्वाविशेषात् । इति चेत् —

सर्ववेदसमिष्टं यदधिकं द्वादशाच्छतात् ॥ १८९ ॥

ज्योतिष्टोमे द्वादशशतं विधायोक्तं 'यद्येतावता नानमेयुरपि सर्वस्वेन' इति । तदिह द्वयं प्रकृति-प्राप्तम् । तत्र द्वितीयं नियम्यत इति द्वादशशताधिकमेव सर्वस्वं ददत् अधिकारी ।

इति विश्वजिति द्वादशशतन्यूनधनस्यानधिकाराधिकरणम् ॥ ९ ॥

---

[1] वार्तिककारीयमिदम् । पूर्वन्तु भाष्यकारीयम् ।

आधानेऽपरिमितं देयमित्यनेन संख्यान्तरविधानाधिकरणम् (१०)

आधाने, 'एका देया' 'षड् देयाः' 'द्वादश देयाः' 'चतुर्विंशतिर्देयाः' 'शतं देयम्' 'सहस्रं देयम्' 'अपरिमितं देयम्' इति श्रुतम् ।

तत्र परिमितं–अपरिमितं—इति पूर्वोपस्थितपरिमाणानां निषेधः । न परिमाणसामान्यस्य । तादृशस्य दानाशक्तेः । इति चेत् —

भृतिभेदोऽपरिमितम्

बहुत्वे रूढत्वादपरिमितशब्दस्य नावयवशक्तिः । सर्वैः ज्ञातपरिमाणेऽप्यपरिमितशब्दप्रयोगान्नासिद्धारूढिः । तस्मात्संख्यान्तरविशिष्टदानविधिः ।

न च 'एकं वृणीते .....' इत्यादिवत्, अनुवादमात्रमधस्तनं वाक्यजातमिति शङ्क्यम् । तत्रार्थवादकल्प्ये विधौ, लाघवात् 'त्रीनित्यत्रैव विधिः । अन्येऽनुवादाः ।' इति युक्तम् । इह तु, कृत्यप्रत्ययानां क्लृप्तविधिशक्तीनां श्रवणेन व्यवस्थितविकल्पविधिपरत्वात्सर्वेषामिति वैषम्यात् ।

इत्याधानेऽपरिमितं देयमित्यनेन संख्यान्तरविधानाधिकरणम् ॥ १० ॥

अपरिमितशब्देन सहस्राधिकस्य ग्रहणाधिकरणम् (११)

बहुत्ववाद्यपरिमितशब्दः सहस्रात् न्यूनामधिकां वा संख्यां वदेत् । इति चेत् —

तच्च पूर्वाधिकं भवेत् ।

सहस्रादनन्तरश्रुतत्वात् तदधिकबहुत्वमेव वदेत् ।

इत्यपरिमितशब्देन सहस्राधिकस्य ग्रहणाधिकरणम् ॥ ११ ॥

परकृति पुराकल्पानार्थवादत्वाधिकरणम् (१२)

दर्शादौ, 'इति ह स्माह वट्कुर्वार्ष्णिः माषानेव मह्यं पचत' इत्ययं मनुष्यधर्मो विधिः । वृष्णिगोत्राणां तत्कर्तृत्वस्तुतेः इति न। वार्ष्णिकृतत्वेन पाकस्यैव स्तुतेर्विधेयत्वमप्यविशेषात्सर्वान्प्रत्येव । इति चेत् —

स्तुतिस्स्यात्परकृत्यादौ तत्तद्गोत्रस्य कीर्तनम् ॥ १९० ॥

औदुंबराधिकरणसिद्धमारण्याशनविधिस्तावकत्वमनेनोद्घाटितम् ।

इति परकृतिपुराकल्पानामर्थवादत्वाधिकरणम् ॥ १२ ॥

सहस्रसंवत्सरशब्दस्य सहस्रदिनपरताधिकरणम् (१३)

'पञ्चपञ्चाशतस्त्रिवृतस्संवत्सराः। पञ्चपञ्चाशतः पशदशाः। पञ्चपञ्चाशतस्सप्तदशाः। पञ्चपञ्चाशत एकविँशाः। [1]विश्वसृजामृषीणां सहस्रसंवत्सरम्।' इति श्रुते गन्धर्वादीनामधिकारः। तेषां दीर्घायुषां संभवात्। ब्राह्मणादिकर्तृकाधानसाध्याग्न्यभावत्तेषां नाधिकार इति चेत्; तर्हि रसायनादिसिद्धिर्दीर्घायुषां मनुष्याणामधिकारोऽस्तु।

रसायनादीनामारोग्यहेतुत्वेऽपि नायुर्हेतुत्वं—मानाभावात्। इति चेत्; तर्हि एककुलोत्पन्नपुत्रपौत्रादिक्रमेण कुलकल्पोऽस्तु।

साङ्गत्यानुष्ठितस्य कर्तृगामि फलसाधनत्वान्नेयं कल्पना। इति चेत्; तर्हि एतद्यागात्सहस्रायुः फलमस्तु।

तथाविधशब्दाश्रवणात्—तत्कल्पनायांञ्च मानाभावात्। इति चेत्; तर्हि 'पञ्चपञ्चाशत' इत्यादेः पुरुषपरत्वमङ्गीकृत्य सार्धद्विशतानां पुरुषाणामधिकारः। वत्सरचतुष्टयेन च सहस्रसंवत्सरत्वं संपद्यत इत्यस्तु।

'चतुर्विंशतिपरमास्सत्रमासीन्' इति वचनविरोधः। इति चेत्; तर्हि 'यो मासः स संवत्सरः' इति वचनात् सहस्रमाससाध्यो यागोऽस्तु।

अष्टमे वर्षे उपनीय, द्वादशवर्षाणि वेदमधीत्य, विंशतौ विवाहे, जातपुत्रकृष्णकेशस्याधाने, तदूर्ध्वं सहस्रमासजीवनायोगः। इति चेत्; तर्हि 'संवत्सरप्रतिमा वै द्वादशरात्रयः' इति संवत्सरशब्दो द्वादशरात्रिपरः। तत्र द्वादशसहस्रं दिनानि षष्ट्युत्तरशतत्रयदिवसरूपसंवत्सरक्रमेण त्रयस्त्रिंशत्संवत्सरेभ्य ऊर्ध्वं मासचतुष्टयं भवति। तच्चायुराधानोर्ध्वमप्यविरुद्धमित्यस्तु।

संवत्सरशब्दस्य प्रतिमाविशेषणत्वात् न दिनविशेषणत्वम्। इति चेत् —

भवेद्वैश्वसृजेत्यत्र संवत्सपदं दिने।

तथा सति 'त्रिवृत्' इत्यादिसामानाधिकरण्याज्ञस्यम्। 'त्रिवृत्—पञ्चदशः—सप्तदशः—एकविंशः' —इति शब्दानां स्तोमवाचिनां स्तोत्रद्वारा तत्तत्सुत्यासु लक्षणया बहुलं प्रयोगात्, तत्समानाधिकृत संवत्सरशब्दोऽपि स्वावयवदिनलक्षक इति सर्वसामञ्जस्यम्।

इति सहस्रसंवत्सरशब्दस्य सहस्रदिनपरताधिकरणम् ॥ १३ ॥

॥ इति षष्ठस्य सप्तमः पादः ॥

---

[1] विश्वसृजाँ सहस्रसंवत्सरम्—इति अध्येतृसंप्रदायः।

॥ अथाष्टमः पादः ॥

चतुर्होतृहोमेऽनाहिताग्नेरेवाधिकाराधिकरणम् (१)

'चतुर्होतारं व्याचक्षीत' 'चतुर्होत्रा प्रजाकामो जुहुयात्' इति प्रकृत्य, 'एषा वा अनाहिताग्नेरिष्टिः' इति श्रुते विध्यभावात्, यैषा अनाहिताग्नेः क्रिया जपात्मिका सेष्टिः इत्यनुवादः। होमस्याहिताग्न्यधिकारः।

यद्वा, येयं चतुर्होतृहोमात्मिकेष्टिः साह्यानाहिताग्नेः इति वचनव्यक्त्यन्तरस्वीकारेणानाहिताग्न्यधिकारित्वमित्युभयाधिकारा होमाः। इति चेत् —

न संस्कृते चतुर्होता

तादर्थ्यषष्ठ्या, अनाहिताग्निमुद्दिश्य तच्छेषत्वेन विधीयमानत्वात्तदधिकारा एव होमा जपाश्च।

इति चतुर्होतृहोमेऽनाहिताग्नेरेवाधिकाराधिकरणम् ॥ १ ॥

अनाहिताग्निषूपनयनहोमाधिकाराधिकरणम् (२)

उपनयनाङ्गभूता होमा माणवकाचार्याभ्यां क्रियमाणा माणवकाध्ययनाङ्गभूतोपनयनार्थत्वात्, पूर्वमुद्वाहात् स्वाग्नीनाधायाहवनीये स्युः। स्नात्वा भार्यामुद्वहेत्' इति तु, अपत्यार्थम्। इति चेत् —

तथा नोपनयाहुतिः ॥ १९१ ॥

अविद्वत्त्वात्, अपत्यार्थदाराणामेव कर्मार्थत्वात्, तादृग्दारसंग्रहस्यैव स्नानोत्तरकाले विधानात्, न पूर्वमाधानमिति लौकिकेऽग्नौ स्युः।

इत्यनाहिताग्निषूपनयनहोमाधिकाराधिकरणम् ॥ २ ॥

अनाहितेऽग्नौ स्थपतीष्ट्यधिकरणम् (३)

स्थपतीष्टिः प्रकृतिप्राप्ताहवनीयस्योत्पत्तये, अविहितमप्याधानमाक्षिपेत्। इति चेत् —

नैवात्र स्थपतीष्टिस्स्यात्

आधानस्य स्वतन्त्रविध्भावे स्यादेवम्। यदा वसन्तादिवाक्यमाधानविधायकं, तदा विहिताधानजन्यसंस्काररूपाहवनीयत्वस्याविहितेनाजननात् लौकिकेऽग्नौ स्यात्।

इत्यनाहितेऽग्नौ स्थपतीष्ट्यधिकरणम् ॥ ३ ॥

अनाहितेऽग्नावव्वकीर्णिपश्वनुष्ठानाधिकरणम् (४)

'यो ब्रह्मचार्यवकिरेत्, स नैर्ऋतं गर्दभपशुमालभेत' इत्यत्र विदुष उद्वाहादूर्ध्वमाधायाहवनीये

पशुः स्यात् । इति चेत् —

नावकीर्णिपशुस्तथा ।

'अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत्' इति वचनात्, दोषासमाधाने गार्हपत्याभावात्, लौकिकेऽग्नौ स्युः ।

इत्यनाहितेऽग्नाववकीर्णिपश्वनुष्ठानाधिकरणम् ॥ ४ ॥

दैवकर्मणामुदगयनादिकालताधिकरणम् (५)

उपनयनादीनि सार्वकालिकानि, पैतृकाणि मासिश्राद्धादीनि च । इति चेत् —

कर्माण्युपनयादीनि स्मार्तोदगयनादिके ॥ १९२ ॥
इतरत्र तु पित्र्याणि कार्याणि स्मृतिचोदिते ।

'उदगयनपूर्वपक्षाहः पुण्याहेषु कार्याणि' इति स्मृतिविहितकाले चौलादीनि ।

इति दैवकर्मणामुदगयनादिकालताधिकरणम् ॥ ५ ॥

पित्र्यादिकर्मणामपरपक्षादिकालताधिकरणम् (६)

'अपरपक्षे पित्र्याणि' इति वचनात् पित्र्याण्यपरपक्षे ।

इति पित्र्यादिकर्मणामपरपक्षादिकालताधिकरणम् ॥ ६ ॥

ज्योतिष्टोमाङ्गयाञ्चाक्रयणयोर्नित्यताधिकरणम् (७)

ज्योतिष्टोमे, 'द्वादशरात्रीर्दीक्षितो भृतिं वन्वीत' इति याञ्चा ; 'अरुणया क्रीणाति' इति सोमक्रयश्च श्रुतौ । तौ तच्छून्यस्य भवतः । न तद्व्रतः । वैयर्थ्यात् । इति चेत् —

सत्त्वेऽपि याञ्चाक्रयणम्

द्वन्द्वैकवद्भावः । न धनसोमयोरर्थे द्वयम् । किन्त्वपूर्वार्थम् । इति तदभावेऽपूर्वं न स्यादिति नित्यं याञ्चाक्रयणम् ।

इति ज्योतिष्टोमाङ्गयाञ्चाक्रयणयोर्नित्यताधिकरणम् ॥ ७ ॥

ज्योतिष्टोमादिषु पयोव्रतादीनामपि नित्यताधिकरणम् (८)

'पयोव्रतं ब्राह्मणस्य' इत्यादिव्रत्यद्रव्याणि द्रव्यान्तराभावे । 'अग्नीदग्नीन् विहर' इति प्रैषोऽन्यतोऽज्ञाते प्रैषार्थे । 'अहतं वासः परिधत्ते' इति परिधेयान्तराभावे । 'यत्पशुर्मायुमकृतेति जुहोति' इति संज्ञप्तहोमो मायुकरणे । योऽस्मान् द्वेष्टि' इत्यादिर्द्वेष्यसद्भावे । तत्तल्लिङ्गात् । इति चेत् —

पयोव्रतमुखानि च ॥ १९३ ॥

सत्त्वेऽपीत्यनुवर्तते। अन्याभावादेर्निमित्तत्वाश्रवणात्, नियमादृष्टस्य चानन्यसाध्यत्वात्, नित्यानीमानि।

इति ज्योतिष्टोमादिषु पयोव्रतादीनामपि नित्यताधिकरणम् ॥ ८ ॥

अपररात्रे व्रतस्यानित्यताधिकरणम् (९)

यदा पय आदिकं पीयमान न जीर्यतीति शङ्कितं, तदपि किं नियमः ? नेत्याह —

न कालान्नियमोऽजीर्णे

रोगोत्पत्त्याशेषिविरोधात्तदा न नियमः।

इत्यपररात्रे व्रतस्यानित्यताधिकरणम् ॥ ९ ॥

छागस्यैवाग्नीषोमीयपशुत्वाधिकरणम् (१०)

अग्नीषोमीयं पशुमालभते ' इत्यत्र विधिवशात् मन्त्रनिरपेक्षात् पशुसामान्यं प्राप्तम्। छागस्येति मन्त्रनिगमादिवशप्राप्तावयववृत्तिः, छिन्नगमन इति अश्वादिसाधारण्येन, छागपक्षे वा वर्तते। इति चेत्।

पशुश्छागो हि मन्त्रतः।

नित्यवदाम्नातमन्त्रगतछागशब्दस्य जातिविशेषरूढस्य विधिवाक्यापेक्षितविशेषसमर्पकस्य विनाकारणं पाक्षिकत्वावयवयोगयोरयोगात्, विधिवाक्यावगतपशुत्वस्य छागेऽपि परिसमाप्तेः छागनियमः।

इति छागस्यैवाग्नीषोमीयपशुत्वाधिकरणम् ॥ १० ॥

इति लघुवार्तिकटीकायां षष्ठस्याष्टमश्चरणः।

॥ समाप्तश्चाध्यायः ॥

॥ अथ सप्तमोऽध्यायः ॥

तत्र प्रथमः पादः

प्रयाजादिधर्माणामपूर्वप्रयुक्तताधिकरणम् (१)

उपदेशविचारानन्तरं तद्धेतुकोऽतिदेशविचारः प्रस्तूयते। तदुपोद्घातत्वेन धर्मव्यवस्था, आद्याधिकरणे प्रतिपाद्यते।

तत्र प्रयाजादीनां दीक्षणीयादीनाञ्च यागकर्मिकायां क्रियायामन्वयः, न तत्करणिकायामपूर्वकर्मिकायाम्। अन्यथा, करणवदङ्गानामपि फलार्थतापत्तेः। प्रकरणानुमितवाक्यस्थयजेरुद्देश्यसमर्पकस्य सर्वयागसाधारण्यात्।

यद्वा, 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र प्रकृत्यर्थयागोद्देशेन तत्परप्रत्ययो धर्मान्विदधाति। तस्यानन्यार्थत्वात्। उत्पत्तिफलविनियोगयोरन्यलभ्यत्वात्। तत्रोद्देश्ययागस्य, दर्शपूर्णमासपदेन—स्वर्गकामपदेन वा विशेषणायोगात्, वस्तुतः फलवतो यागानुद्दिश्य धर्मविधौ च, सर्वत्रोपदेशतो धर्मलाभ इति, व्रीह्यादिवदवघातादिवच्च प्रयाजादीनामपि यागार्थत्वानुमानाच्च यागभावनान्वयः। न च सन्निधानस्य प्रकरणस्य वा विशेषकत्वम्; आद्ये श्रुतिजनिताविशेषप्रत्ययबाधात्। द्वितीयस्य ग्राहकत्वेनाविशेषकत्वात्। अपूर्वभावनासंबन्धेऽपि वाहीकयवान्नन्यायेन, क्वचिद्विशेषे उक्ता धर्माः विशेषान्तराणामपि तद्रूपत्वादुक्तप्राया एवेति नातिदेशारंभः। इति चेत् —

व्यवस्थातोऽतिदेशोऽस्ति

प्रधानवाक्यानामङ्गवाक्यानाञ्च प्रथमं स्वस्वार्थपर्यवसितानां प्रकरणाधिकरणोक्तन्यायेन पश्चाद्विशिष्टभावनाप्रतिपादनपरत्वादपूर्वभावनासंबन्धानन्तरं पार्ष्ठिकान्वयन्यायेनाङ्गानां करणसंबन्ध इति न पारिप्लवत्वम्। फलं यथा प्रधानभावनासंबन्धेऽपि न करणेन तुल्यम्; एवमङ्गान्यपीते नोक्तशेषः।

यजेस्तत्कर्मकक्रियाया वा निर्ज्ञातप्रकारतया पूर्वभावनाया एव तदाकांक्षणात्, तत्प्रकारविशेषत्वेन समिदादिव्यापारविधानम् अपेक्षासंनिधियोग्यत्वैरध्यवसीयते। अवघातव्रीह्यादयोऽपि यागस्वरूपमात्रपर्यवसायित्वे नियमवैयर्थ्यात्, अपूर्वभावनायामेव यागद्वारा संबध्यन्त इत्यदृष्टान्ताः। न च वाहीकयवान्नन्यायः; तत्र मानान्तरात्तथावगमेऽपि, अत्र शब्दैकप्रमाणके तद्दृष्टान्तानुदयात्। ततश्च यथाप्रकरणं व्यवस्थिता धर्मा इति, अनुपदिष्टधर्मकयागेषु तत्प्राप्तयेऽतिदेशविचार आरब्दव्य इति।

इति प्रयाजादिधर्माणामपूर्वप्रयुक्ताधिकरणम् ॥ १ ॥

समानमितरत् श्येनेनेति श्रुत्या श्येनीयविशेषधर्मातिदेशाधिकरणम् (२)

अतिदेशः, प्रत्यक्षवचनात्—नाम्नः—चोदनालिङ्गकल्पवचनाच्च त्रिप्रकारः। तत्र प्रत्यक्षवचनातिदेशः प्रथमं चिन्त्यते।

इषावेकाहे ज्योतिष्टोमविकारे, 'इषुं विष्टुतिं करोति सप्ताहं भवति' इति विकारं विधाय श्रुतं — तवाचीतर 'समानमितरत् श्येनेन' इति। तत्र नेतरशब्दः श्येनवैशेषिकाङ्गप्रापकः, तेषामसन्निहिततया सन्निहितवाचीतरशब्दानर्हत्वात्। किन्तु प्राकृतज्योतिष्टोमधर्माणां इषावतिदिष्टानां श्येनसाधारणानामनुवादः। इति चेत् —

श्येनाङ्गानामिषावसौ ॥ १९४ ॥

अतिदेशः। पूर्वोक्तसदृशसन्निहितवाचीतरशब्दवाच्यं नेषावस्ति। अतिदिष्टानां पूर्वोक्तविष्टुत्याद्यसादृश्यात्, सदृशलोहितोष्णीषादीनामसन्निधानात्। अतो वचनार्थवस्त्वाय संनिहितत्यागेन विष्टुत्यादिसदृशलोहितोष्णीषत्वादि इतरशब्देन ज्ञाप्यते।

यद्वा–प्रकृतिप्राप्ताङ्गेषु विष्टुत्यादिविकारे विहिते, तदितरप्राकृतमितरशब्देनोद्दिश्य श्येनवैशेषिकाङ्गसादृश्यं विधीयते ।

इति समानमितरच्छ्येनेनेति श्रुत्या श्येनीयविशेषधर्मातिदेशाधिकरणम् ॥ २ ॥

एतद्ब्राह्मणानीत्यादीनां पञ्चहविष्षु सार्थवादविध्यतिदेशाधिकरणम् (३)

चातुर्मास्येषु वैश्वदेविकानामाद्यानां पञ्चहविषां ब्राह्मणानि वारुणप्रघासिकाद्येषु पञ्चस्वतिदिष्टानि; 'एतद्ब्राह्मणान्येव पञ्च हवींषि' इति । तत्र 'वार्त्रघ्नानि वा एतानि हवींषि' इत्याद्यर्थवादमात्रं तद्धविस्संबंधिब्राह्मणं, नाङ्गविधयः, इति स्तुतिलाभायार्थवादमात्रातिदेशः । इति चेत् —

पञ्चसञ्चरणेऽयं स्यात्सविधिस्तुतिगोचरः ।

अङ्गवाक्यैकवाक्यप्रधानवाक्यस्यैव समग्रहविर्विधायकत्वमिति सार्थवादाङ्गविधीनां—'नव प्रयाजाः' इत्यादीनामतिदेशः ।

इत्येतद्ब्राह्मणानीत्यादीनां पञ्चहविष्षु सार्थवादविध्यतिदेशाधिकरणम् (३)

एतद्ब्राह्मणेत्यनेन एककपालैन्द्राग्नयोः सार्थवादविध्यतिदेशाधिकरणम् (४)

वैश्वदेवे 'द्यावापृथिव्य एककपालः–वरुणप्रघासेषु–काय एककपालः, ऐन्द्राग्नो द्वादशकपालश्च, साकमेधेषु श्रूयते–ऐन्द्राग्नएकादशकपालः वैश्वकर्मणएककपालः इति । ततः—'एतद्ब्राह्मण ऐन्द्राग्नः–एतद्ब्राह्मणएककपालः' इति । तत् पूर्ववत् सार्थवादविधिकाण्डस्यातिदेश इत्याह —

ऐन्द्राग्नैककपालस्थोऽप्येवमेव भवेदसौ ॥ १९५ ॥

इति एतद्ब्राह्मणेत्यनेन एककपालैन्द्राग्नयोः सार्थवादविध्यतिदेशाधिकरणम् ॥ ४ ॥

साकमेधे वारुणप्रघासिकैककपालातिदेशाधिकरणम् (५)

'एतद्ब्राह्मण एककपालः' इत्यत्र वैश्वदेविकैककपालब्राह्मणातिदेशः ; वचनस्यासति बाधके बह्वर्थत्वात् । वारुणप्रघासिके, 'हिरण्मय्यः स्रुचः शमीमय्यो वा' इत्यल्पधर्मविधानात्, प्रथमस्य मूलप्रकृतित्वाच्च । इति चेत् —

तत्राप्राघासिकाङ्गानां प्रदेशो वैश्वकर्मणे

स्वरसामैककपालेत्यग्निमे पौनरुक्त्या व्यवहितत्वैन्द्राग्नसाहचर्यादिभिर्वारुणप्रघासिकब्राह्मणातिदेशः । तथासत्यधिकधर्मागमोऽपि स्यादिति ।

इति साकमेधे वारुणप्रघासिकैककपालातिदेशाधिकरणम् ॥ ५ ॥

इति लघुवार्तिकटीकायां सप्तमस्य प्रथमः पादः ।

॥ अथ द्वितीयः पादः ॥

रथन्तरादिशब्दानां गानविशेषार्थताधिकरणम् (१)

'कवतीषु रथन्तरं गायति' इत्यादौ गानविशिष्टमन्त्रे रथन्तरादिशब्दप्रयोगात् मन्त्रपदविशिष्टोऽतिदिश्यते। इति चेत् —

रथन्तरादि संज्ञत्वात् प्रदेशौ गीतिगोचरः ॥ १९६ ॥

नागृहीतविशेषणान्येन— अतिदेशोपपत्तये च गानस्यैव वाच्यत्वे मन्त्रस्य लक्षणया प्रतीत्युपपत्तेर्न विशिष्टे शक्तिः।

इति रथन्तरादिशब्दानां गानविशेषार्थताधिकरणम् ॥ १ ॥

इति सप्तमस्य द्वितीयः पादः।

॥ अथ तृतीयः पादः ॥

अग्निहोत्रादिनाम्ना धर्मातिदेशाधिकरणम् (१)

कुण्डपायिनामयने 'मासमग्निहोत्रं जुहोति' इत्यत्र अग्निहोत्रशब्दो जुहोतिसामानाधिकरण्यात् नैयमिकस्येव नामधेयमिति न तद्धर्मातिदेशकः। इति चेत् —

अग्निहोत्रे प्रदेशस्स्यात्

अनेकार्थत्वस्यान्याय्यत्वात्, नैयमिकेऽग्निदेवतायाः प्रवृत्तिनिमित्तस्य लाभेन वैपरीत्यशङ्कानुदयात्, 'अग्निहोत्रवज्जुहोति' इति साध्यसादृश्येन गौणोऽग्निहोत्रशब्दः तद्धर्मानतिदिशेत्कौण्डपायने।

इत्यग्निहोत्रादिनाम्ना धर्मातिदेशाधिकरणम् ॥ १ ॥

प्रायणीयनाम्ना धर्मानतिदेशाधिकरणम् (२)

द्वाहशाहे प्रथममहः प्रायणीयनाम। गवामयनेऽपि प्रथमेऽहनि प्रयणीयशब्दः प्रयुक्तोऽतिदिशेद्द्वादशाहिक प्रायणीयधर्मान् पूर्वन्यायात्। इति चेत् —

प्रायणीये न यौगिके

'प्रारभ्य याति = प्रवर्तते कर्म अनेन' इति व्युत्पत्तेरुभयत्र तौल्येन गौण्या धर्मलक्षणा।

इति प्रायणीयनाम्ना धर्मानतिदेशाधिकरणम् ॥ २ ॥

सर्वपृष्ठशब्देन षट्पृष्ठानामतिदेशाधिकरणम् (३)

'विश्वजित्सर्वपृष्ठो भवति' इत्यत्र प्रकृतौ माहेन्द्रादिषु, 'सप्तदशानि पृष्ठानि' इति पृष्ठशब्द-

दर्शनात् तत् प्राप्तानुवादः सर्वपृष्ठशब्दः । बृहत्पृष्ठं 'रथन्तरं पृष्ठं' इत्युत्पत्तौ द्वयोरेव पृष्ठत्वावगमात् तदनुवादके पृष्ठानीतिवाक्ये पृष्ठपदं चतुर्षु स्तोत्रेषु लिङ्गसमवायाद्गौणम् । अतः प्रकृतिको विकल्पेन प्राप्तयोस्सर्वताविधिः । इति चेत् —

विश्वजित्सर्वपृष्ठेऽस्ति

बहुत्ववाचिसर्वशब्दस्वारस्यात् षाडहिकानां रथन्तरबृहद्वैरूपवैराजशाक्ररैवतानां वाचनिकोऽतिदेशो विश्वजिति ।

इति सर्वपृष्ठशब्देन षट्पृष्ठानामतिदेशाधिकरणम् ॥ ३ ॥

अवभृथनाम्ना सौमिकधर्मातिदेशाधिकरणम् (४)

वरुणप्रघासेषु 'वारुण्या निष्कासे न तुषैश्चावभृथं यन्ति' इति श्रुते, प्रकृतिप्राप्तापां व्युत्सेकं प्रणीताविमोक्षणाख्यं लक्षणयानूद्य, तत्र तुषनिष्कासो गुणो विधीयते । कर्मान्तरत्वेऽपि अवभृथशब्द-लक्षणातौल्यात् । इति चेत् —

प्रघासावभृथे तथा ॥ १९७ ॥

नामातिदेशः । अपां मोक्षेऽवभृथशब्दलक्षणायां मानाभावात्, प्राप्तानुवादेन करणद्वयविध्यशक्त्या कर्मान्तरेऽवश्यविधातव्ये, सौमिकावभृथलक्षणार्थोऽवभृथशब्दो नानार्थत्वपरीहाराय । न प्रकरणान्तर-मत्र भेदकम् ; अनुपादेयसंबन्धशून्यत्वात् ।

इत्यवभृथनाम्ना सौमिकधर्मातिदेशाधिकरणम् ॥ ४ ॥

वारुणप्रघासिकावभृथस्य तुषनिष्कासद्रव्यकत्वाधिकरणम् (५)

तस्मिन्कर्मान्तरे नामप्रापितपुरोडाशवति तुषादिविधौ गौरवात्, पुरोडाश एव कार्यः । इति चेत् —

तत्र द्रव्यं तुषादि स्यात्

तुषादिश्रुत्यर्थवत्त्वादिभ्यो नाम्ना सामान्यतोऽतिदिष्टस्योपदिष्टविशेषेण बाधः इति तुषाद्येव द्रव्यम् ।

इति वारुणप्रघासिकावभृथस्य तुषनिष्कासद्रव्यकत्वाधिकरणम् ॥ ५ ॥

राजसूये वैष्णवशब्दात् आतिथ्याधर्मानतिदेशाधिकरणम् (६)

आतिथ्यायां वैष्णवो नवकपालः । राजसूये वैष्णवस्त्रिकपालः । तत्रातिथ्याधर्मानाश्वबाल-प्रस्तरादीन् वैष्णवशब्दस्त्रिकपालेऽतिदिशेत् । इति चेत् —

अतिदेशो नास्ति[1] वैष्णवे ।

---

[1] वैदिके इति मातृकायमस्ति ।

उभयत्र द्रव्यदेवताविशिष्टयागकल्पकत्वतौल्यात् नातिदेशकता ।

इति राजसूये वैष्णवशब्दात् आतिथ्याधर्मानतिदेशाधिकरणम् । ६ ॥

निर्मथ्यादिशब्दैः धर्मानतिदेशाधिकरणम् (७)

'निर्मन्थ्येनेष्टकाः पचन्ति' 'बर्हिषा यूपावगमास्तृणाति' 'आज्येन यूपमनक्ति' इत्यत्र धर्मलिप्सया पाशुकमन्थनधर्मान्-दार्शिकबर्हिराज्यधर्मांश्चातिदिशेयुर्निर्मथ्यबर्हिराज्यशब्दाः । इति चेत्—

न निर्मथ्याज्यबर्हिष्ष्वप्यतिदेशो गुणे विधेः ॥ १९८ ॥

लोकतो मंथनादिप्रकारावगमात्, पाकादौ विधेयगुणसमर्पका एते न मुख्यार्थाच्च्यावनीयाः ।

इति निर्मथ्यादिशब्दैर्धर्मानतिदेशाधिकरणम् ॥ ७ ॥

प्रणयनशब्देन सौमिकधर्मानतिदेशाधिकरणम् (८)

चातुर्मास्येषु चतुर्षु पर्वसु, 'द्वयोः प्रणयन्ति' 'तस्माद्द्वाभ्यामेति' इति श्रुतम् । तत्र दार्शिकप्रणयनस्यातिदिष्टस्यानुवादवैयर्थ्यात्, तत्सार्थक्याय सौमिकप्रणयनस्य लक्षणया अनूदितस्य विधिः । इति चेत् —

प्राकृतं स्यात्प्रणयनम्

प्रकृतिप्राप्तस्यापि, 'तस्माद्द्वाभ्यामेति' इत्यर्थवादापेक्षितविधित्वेन कीर्तनं न परिसंख्या, 'द्वयोरेव' इति । त्रैदोष्यात् । न गुणविधिः, तदश्रवणात् । कीर्तनप्रयोजनन्त्वग्रिमे व्यक्तम् ।

इति प्रणयनशब्देन सौमिकधर्मानतिदेशाधिकरणम् ॥ ८ ॥

द्वयोः प्रणयन्तीत्यनेन मध्यमयोर्द्वयोरेव प्रणयनाधिकरणम् (९)

द्वयोरित्यत्राविशेषादनियमः । 'न वैश्वदेव उत्तरवेदिमुववपन्ति न शुनासीरीये' इत्युत्तरवेदिप्रतिषेधः तयोरेव प्रणयनप्राप्तिं सूचयति इत्याद्यन्तयोरेव । इति चेत् —

तत्तु [1]प्रथमयोर्भवेत् ।

मध्यमयोरेव, ऊरू वा एताविति-द्वाभ्यामेतीत्यस्योपपत्तये । मध्यमयोः ऊरुत्वेन स्तवनात् प्राप्तस्य सार्थवादविधिना पुनः कीर्तनं, तयोरेव 'उत्तरवेद्यामग्निं निदधाति' इत्युत्तरवेदिरूपगुणव्यवस्थार्थम् । अन्यथा चतुर्ष्वपि स्यात् । 'न वैश्वदेव उत्तरवेदिमुपवपन्ति' इति तु ; 'उपात्र वपन्ति' इत्युत्तरवेद्युत्पत्तेराद्यन्तयोः पर्युदासाय । इति भाष्यम् ।

---

[1] मध्यमयोः—इति साधु ।

वार्तिके तु ; एतद्दूषणपूर्वकं ऐकाधिकरण्यमुक्तम् ।

अर्थवादार्थं पुनःश्रवणं—इति तावदयुक्तम् । प्राप्ते विधिवैयर्थ्येनार्थवादानपेक्षणात् । मध्यमयोरुत्तरवेद्युपसंहारायेत्यप्ययुक्तम् । प्राकृताग्निविधानानुवादेनाद्यन्तयोरपि तद्विधेरवारणात् । 'उपात्र वपन्ति' इत्युत्पत्तेः न वैश्वदेववाक्येनाद्यन्तयोः पर्युदासाय मध्यमद्वयविषयतया तदपेक्षविनियोगोऽपि तद्विषय एवेति नार्थो द्वयोः प्रणयन्तीत्यस्य । कथञ्चिद्द्वयोः प्रणयन्तीति वाक्यवशात् उत्तरवेद्या मध्यमयोर्व्यवस्थायां, विनियोगापेक्षोत्पत्तेरपि तदुभयविषयकत्वेन व्यवस्था संभवे, 'न वैश्वदेवे' इत्यस्य वैयर्थ्यम् । तस्मादित्थमधिकरणम् —

*'द्वयोः प्रणयन्ति' इत्यत्र प्राकृतानुवादः अथवा लक्षणया सधर्मकं सौमिकं प्रणयनं आद्यन्तयोः पर्युदस्तोत्तरवेदिकं विधीयते । मध्यमयोर्विधौ, उत्तरवेद्या अपि तद्वशेनैव सिद्धेः, उपात्रेति विधिः प्रथमोत्तमयोः—न वैश्वदेव इति तत्रैव प्रतिषेधाद्विकल्पस्स्यात् ।

इति द्वयोः प्रणयन्तीत्यनेन मध्यमयोरेव प्रणयनाधिकरणम् ॥ ९ ॥

स्वरसामादिशब्देन धर्मातिदेशाधिकरणम् (९०)

पृष्ठ्यषडहतृतीयस्य सप्तदशस्याह्नः षष्ठस्थानत्वमुक्त्वा, त्रयाणां सप्तदशानामव्यवायेति दर्शयन्, गावामयनिकसप्तदशस्तोमातिदेशं सूचयति ।

आग्रयणे द्यावापृथिव्यैककपाले वैश्वदेविकैककपालधर्मयोः सर्वहोमापर्यावर्तनयोराज्यविधिपरे वाक्ये सिद्धवदनुवादः तद्धर्मप्राप्तिं दर्शयति ।

मैत्रावरुण्यामिक्षायां, 'न वाजिनेन यजती'ति प्रतिषेधो वैश्वदेविकधर्मप्राप्तिं सूचयति ।*

[1]धर्माप्तेःस्वरसामैककपालादिषु लिङ्गता ॥ १९९ ॥

इति त्रयोऽप्यतिदेशकाः ।

इति स्वरसामादिशब्देन धर्मातिदेशाधिकरणम् ॥ १० ॥

वास आदिशब्दानामाकृतिनिमित्तताधिकरणम् (११)

'अनो ददाति' 'वासो ददाति' इत्यत्र, अनोवाससोरुत्पादकवानतक्षणक्रिये अन्वयव्यतिरेकाभ्यां तत्तच्छब्दयोर्वाच्ये, अनोवासोदानाङ्गत्वेन विधीयेते इति कर्मण्यनुष्ठेये । इति चेत् —

---

* अत्र वार्तिके 'प्राकृतं वा नामत्वात्' इति सिद्धान्तसूत्रे, प्राकृतं = स्वाभाविकं, अर्थात् अपूर्वं प्रणयनं शाखान्तरवाक्यानुरोधाद्विधीयत इति निर्णीतम् । अत्र तु सोंशः न स्पष्टतया लिखितः ।

[1] अत्र श्लोको नास्ति । [2] इति मातृकान्तरे श्लोकोऽस्ति (सं)

वासोऽनसोः क्रयादाप्तिः

क्रियाव्यङ्ग्यजातिवाचित्वाच्छब्दयोः न क्रियातिदेशकत्वमिति क्रयलब्धयोर्दानम् ।

इति वास आदिशब्दानामाकृतिनिमित्तताधिकरणम् ॥ ११ ॥

गर्गत्रिरात्रे लौकिकेऽग्नावुपनिधानाधिकरणम् (१२)

गर्गत्रिरात्रे आज्यदोहसंज्ञसामानि प्रकृत्य, 'अग्निमुपनिधाय स्तुवेति' इति श्रुतम् । तत्राहवनीयादेः प्रयोजनाकांक्षत्वात् स एवोपधेयो वैदिकत्वसाम्यात् । इति चेत् —

आज्यदोहाग्न्यसंस्कृतिः ।

'आहवनीये जुहोति' इत्यादिविशेषवचनविनियुक्तानां नैराकांक्ष्यात्, न सामान्यशब्दस्य तद्ग्राहित्वम् । 'यस्याहिताग्नेरग्निरपक्षायति' इत्यादिना अन्यत्र नयने प्रायश्चित्तविधानात् । तस्माल्लौकिकोऽग्नि[1]रुपधेयः ।

इति गर्गत्रिरात्रे लौकिकेऽग्नावुपनिधानाधिकरणम् ॥ १२ ॥

उपशयो यूपो भवतीत्यादौ यूपशब्दस्य संस्काराप्रयोजकताधिकरणम् (१३)

'उपशयो यूपः' इत्यत्र दक्षिणतः शायिते काष्ठे प्रयुक्तो यूपशब्दः, संस्कारान् अञ्जनपरिव्याणादीनतिदेशेत् । इति चेत् —

न यूपकर्मोपशये

'उपशय एवापशुः' इति श्रुतेः, तत्र नियोजनाभावात्, न तत्प्रयुक्तसंस्काराः कार्याः । वाचनिकच्छेदनादिसादृश्यात् यूपशब्दस्तस्मिन्गौण इति नातिदेशकः ।

इत्युपशयो यूपो भवतीत्यादौ यूपशब्दस्य संस्काराप्रयोजकताधिकरणम् ॥ १३ ॥

पृष्ठैरुपतिष्ठते इत्यादौ पृष्ठशब्दस्य ऋग्वाचित्वाधिकरणम् (१४)

अग्नौ 'पृष्ठैरुपतिष्ठते' इति श्रुते पृष्ठशब्दो धर्मलक्षकः । तिष्ठतिः समीपस्थितिवाची । प्रत्ययो भावनायाः । तथा च, अग्निसमीपे स्थित्वा पृष्ठशब्देन तत्साधनरथन्तराद्याश्रमाभिवत्यादिलक्षणा । तिष्ठतेरभिधानलक्षणा च स्यात् । इति चेत् —

नाग्नौ पृष्ठास्सधर्मकाः ॥ २०० ॥

पृष्ठशब्दलक्षणा पक्षयोस्तुल्या । तिष्ठतिर्नाभिधानलक्षकः । किन्तु आत्मनेपदानुमिताभिधानप्रयोजनकस्सन्, तस्य मन्त्रकरणकत्वात् तत्प्रयोजनकतया स्वयमपि मन्त्रकरणक उपचर्यते । भावनाभाव्यनिर्वर्तकस्य भावनाकरणत्ववत् । तथा च, अग्निमुपेत्य पृष्ठसाधितैरभित्वेत्यादिभिरग्निमभिदध्यात् इति फलति ।

---

[1] उपनिधेयः इति साधु ।

तस्मान्न पृष्ठशब्दोऽतिदेशक इति ।

इति पृष्ठैरुपतिष्ठत इत्यादौ पृष्ठशब्दस्य ऋग्वाचित्वाधिकरणम् ॥ १४ ॥

इति सप्तमस्य तृतीयः ।

॥ अथ चतुर्थः पादः ॥

सौर्ये चरौ इतिकर्तव्यतावत्त्वाधिकरणम् (१)

'सौर्यश्चरुं निर्वपेत्' इत्यादौ, अवश्याम्नातव्येतिकर्तव्यतानाम्नानात् सा नास्त्येव । इति चेत् —

सौर्यादावस्ति धर्माप्तिः

फलकर्मिकां—धात्वर्थकरणिकां—इतिकर्तव्यताकांक्षां क्रियामुपदिश्य तस्याविधानात्, अन्यतस्सिद्धेतिकर्तव्यताशास्त्रेणाङ्गीकृतेति निश्चयात् अस्तिधर्माप्तिः ।

इति सौर्ये चरौ इतिकर्तव्यतावत्त्वाधिकरणम् ॥ १ ॥

सौर्ये चरौ वैदिकेतिकर्तव्यतावत्त्वाधिकरणम् (२)

तत्र वैदिक्या इतिकर्तव्यतायाः श्रुत्यादिभिस्तत्र तत्र निबद्धतया अन्यत्र नेतुमशक्यत्वात्, न तद्विधायिशास्त्राणां प्रकृतौ स्वार्थं विधाय निवृत्तव्यापाराणां परावृत्त्यान्यत्रापि विधौ आवृत्त्यापत्तेः, सामानविध्यस्य चाधिकरणे निराकृतत्वात् ; प्रयाजादिदर्शनस्य, क्वचिदैन्द्राबार्हस्पत्ये श्रुतबर्हिर्लवनादेः दर्शे उत्कर्षात्, पितृयज्ञे होतृवरणनिषेधस्य नित्यानुवादत्वात्, सौर्ये कृष्णलविशिष्टप्रयाजविधानोपपत्तेः क्वचिद्विशिष्यानिबद्धा स्मार्तेतिकर्तव्यता सर्वविकृतिषु स्यात् । इति चेत् —

वैदिकी सा सदृक्त्वतः

स्मार्ताया अपि परप्रत्यक्षवेदमूलकतया वैदिकत्वसत्त्वेऽपि, अग्नित्रयसाध्यत्वाभावात्—वेदत्रयसाध्यत्वाभावाच्च न सदृक्त्वमिति वैदिक्येवातिदेश्या । निबद्धत्वमतिदेशानुगुणं—न बाधकम् । आवृत्तिर्विधानानां स्वीक्रियत एत । विकृत्याकांक्षया तत्सदृशशब्दान्तराध्याहारो वा । इतिकर्तव्यता नाम, तत्तत्पदार्थविशिष्टोदशमाद्यन्यायेनातिदिश्यते । शास्त्रातिदेशपक्षे, 'अवघातेन वितुषीभावं कुर्याद्धविः' इत्याकारस्यैवातिदेशान्नोहबाधविरोधः ।

इति सौर्ये चरौ वैदिकेतिकर्तव्यतावत्त्वाधिकरणम् ॥ २ ॥

गवामयने ऐकाहिकेतिकर्तव्यतानुष्ठानाधिकरणम् (३)

गवामयनगताभिप्लवषडहे, 'ज्योतिर्गौरायुः' इति संज्ञायुक्तानि कर्माण्युत्पन्नानि । तत्र 'गणेषु द्वादशाहस्य' इत्याष्टमिकन्यायात् द्वादशाहधर्मा आयान्ति । नामातिदेशादेकाहज्योतिरादिधर्माः ।

तत्राविद्धस्य द्वयस्याप्यनुष्ठानम् । विरुद्धोपसदाद्येषु चोदनालिङ्गकल्पितवचनातिदेशस्य फलप्राप्युत्तरकालत्वेन गणत्वपुरस्कारेण तदानीं प्रवृत्तेः नाम्नश्च फलवाक्यश्रवणात् उत्पत्तौ च फलाश्रवणात् उत्तरकालप्रतीक्षया तस्यातिदेशकत्वे वचनानुरोधेनैव प्रवृत्तेः कल्पितवचनातिदेशो बलीयान् । इति चेत् –

गावामयनिकाज्योतिराद्या एकाहधर्मकाः ॥ २०१ ॥

फलवाक्यस्याप्युत्पत्त्यालोचनप्रवृत्तित्वात् नामविशिष्टत्वेनैव ततस्तदवगतेः उत्पत्तावपि क्रियास्वाभाव्यादाकांक्षानुवृत्तेः नाम्नः प्रत्यक्षत्वप्रथमावगतत्वाभ्यां कल्प्यवचनतः प्राबल्यमिति एकाहधर्मका एव ज्योतिराद्याः । अष्टरात्रगतविश्वजिन्न्यायेन षाष्ठेनात्रापि भूयसा न्याय एवेति केचित् ।

इति गवामयने ऐकाहिकेतिकर्तव्यतानुष्ठानाधिकरणम् ॥ ३ ॥

इति लघुवार्तिकटीकायां सप्तमस्य चतुर्थः पादः ।

॥ समाप्तश्चाध्यायः ॥

॥ अथाष्टमोऽध्यायः ॥

तत्र प्रथमः पादः

विशेषचिन्ताधिकरणम् (१)

अथ विशेषातिदेशः प्रस्तूयते । तत्र सौर्यादिषु वैदिकीतिकर्तव्यताया काचिद्विकल्पेन प्राप्नोति, विशेषहेत्वभावात्, इति न विशेषातिदेशक्षणारम्भः । इति चेत् —

एकस्मादेव धर्माणामतिदेशो व्यवस्यया ।

सौर्यादिशास्त्रस्य नियतै[1]क्यरूप्यं ते दवनाबोधकत्वायैकस्यैव धर्मो नियतोऽतिदेष्टव्यः ।

इति विशेषचिन्ताधिकरणम् ॥ १ ॥

विशेषकर्मणो धर्मातिदेशाधिकरणम् (२)

सत्यं शास्त्रार्थैकरूप्यम् । तदेव कथं नियन्तव्यम् ? इति चेत् —

यत्र यद्धर्मलिङ्गं स्यात्तत्र तद्धर्मसंक्रमः ॥ २०२ ॥

तद्धितनिर्दिष्टैकदैवत्यौषधद्रव्यकत्वं निर्वापवत्त्वमित्याद्याग्नेयसौर्यचोदनयोः सादृश्यात्, सौर्यचोदना तामुपस्थापयति । सा च त्र्यंशभावनां स्वार्थम् । तत्रापेक्षासन्निधियोग्यत्वैः तदीयेतिकर्तव्यता सौर्यभावनायां संबध्यते; 'यथा आग्नेयेन स्वर्गः कृतः तथा सौर्येण ब्रह्मवर्चसम्' इति । एवमन्यत्रापि

---

[1] अत्र अनुपपन्ना पक्तिः मातृकायाम् । सा समीकर्तव्या ।

यथासंभवं सादृश्यद्वारकस्तत्तदितिकर्तव्यतासंबन्धः । अयमेवार्थः उपरितनाधिकरणेषु विचार्यते ।

इति विशेषकर्मणो धर्मातिदेशाधिकरणम् ॥ २ ॥

सोमे ऐष्टिकधर्मानतिदेशाधिकरणम् (३)

यद्यपि सोमे सन्निपत्योपकारकाङ्गजातं–आकांक्षापूरणसमर्थद्रव्यदेवतं–तत्संस्कारादि आरादुपकारकञ्च स्तोत्रशस्त्राद्यस्ति; तथापि दीक्षणीयाद्युदवसानीयान्तास्विष्टिषु दर्शादिधर्मप्रवृत्तेः, तन्मध्यपतितसोमस्यापि तद्धर्मवत्ता । 'तस्यैकशतं प्रयाजानूयाजाः' इति दर्शनाच्च । इति चेत् —

अपूर्वस्सोमः

उक्त एव हेतुः । मध्यपातित्वमनाकांक्षत्वादप्रयोजकम् । तस्येति वाजपेययूपन्यायेनानुवादः । अतः सोमो न प्रकृतिपूर्वः ।

इति सोमे ऐष्टिकधर्मानतिदेशाधिकरणम् ॥ ३ ॥

ऐन्द्राग्नादावैष्टिकधर्मातिदेशाधिकरणम् (४)

'सौर्यं चरुं' इत्यादावुक्तरीत्या आग्नेयविध्यन्तः । द्विदेवतेष्वग्नीषोमीयस्य । द्विदेवतत्वेऽप्यक्षरादिषु सान्नाय्यस्येत्याह —

इष्टीनां प्रकृतिर्दर्शपूर्णिमे ।

इत्यैन्द्राग्नादावैष्टिकधर्मातिदेशाधिकरणम् ॥ ४ ॥

अग्नीषोमीयपशौ दार्शपौर्णमासिकधर्मातिदेशाधिकरणम् (५)

दैक्षेऽपि तद्धितान्ते न द्रव्यदेवतासंबन्ध इत्यादिभिरैष्टिकेतिकर्तव्यतेत्याह —

दैक्षस्यापि पशोस्सैव

ननु तृतीये, अनुष्ठानसादेश्यलक्षणात् स्थानप्रमाणात् शपदेशात्पशुधर्मप्राप्तिरुक्तेति चेत्; सत्यम् । क्रयसन्निध्युत्पन्नस्य अङ्गाकांक्षाया अनिवृत्तौ, अपर्यवसिताभिधानस्य, 'स एष उपवसथीयेऽहन्नि'त्युत्कर्षविध्यनुपपत्त्या अतिदेश इत्यदोषः ।

इत्यग्नीषोमीयपशौ दार्शपौर्णमासिकधर्मातिदेशाधिकरणम् ॥ ५ ॥

सवनीयादिपशावग्नीषोमीयधर्मातिदेशाधिकरणम् (६)

सवनीयनिरूढादिषु प्राणिद्रव्यकत्वसाम्यात्, विशसनाद्यपेक्षणाच्च दैक्षविध्यन्तः, इत्याह —

पशूनां दैक्ष इष्यते ॥ २०३ ॥

इति सवनीयादिपशावग्नीषोमीयधर्मातिदेशाधिकरणम् ॥ ६ ॥

ऐकादशिनपशुषु सवनीयधर्मातिदेशाधिकरणम् (७)

ऐकादशिनपशुषु सौत्यत्वसाम्यात्, 'द्वेरशने यूपमृच्छतः' इति द्वैरशन्यदर्शनाच्च सवनीयधर्मप्रवृत्तिरित्याह —

सौत्य एकादशिन्यास्स्यात्

इत्यैकादशिनपशुषु सवनीयधर्मातिदेशाधिकरणम् ॥ ७ ॥

पशुगणेष्वैकादशिनधर्मातिदेशाधिकरणम् (८)

गणत्वसाम्यात्सौत्रामण्यादिषु, सौत्यत्वसामान्याच्च प्राजापत्यादिषु, ऐकादशिनविध्यन्त इत्याह —

गणानां सा पुनर्भवेत् ।

सा = एकादशिनी ।

इति पशुगणेष्वैकादशिनधर्मातिदेशाधिकरणम् ॥ ८ ॥

अव्यक्तेषु यागेषु सौमिकधर्मातिदेशाधिकरणम् (९)

विश्वजिदाद्येष्वेकाहेषु—द्वादशाहे च सौमिकैष्टिकधर्मयोरविनिगमः । इति चेत् —

अव्यक्तचोदनानान्तु सोमः प्रकृतिरिष्यते ॥ २०४ ॥

स्वार्थविहितदेवतारहितत्वमव्यक्तत्वम् । तद्धितचतुर्थीमन्त्रवर्णैर्यागार्थविहिततद्रूपत्वं व्यक्तत्वम् । तद्राहित्यं विश्वजिदादिषु सोमोऽपि । ऐन्द्रवायवादिवाक्यैर्ग्रहाणां प्रति हितं देवतायाः प्रसङ्गादार्थिको यागसंबन्धः ।

इत्यव्यक्तेषु यागेषु सौमिकधर्मातिदेशाधिकरणम् ॥ ९ ॥

अहर्गणेषु द्वादशाहिकधर्मातिदेशाधिकरणम् (१०)

द्विरात्राद्यहर्गणेषु, 'पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्ते' इति विहिततदन्ततालाभाय गणत्वसामान्यात् द्वादशाहविध्यन्तः । इत्याह —

द्वादशाहोऽहर्गणानाम्

इत्यहर्गणेषु द्वादशाहिकधर्मातिदेशाधिकरणम् ॥ १० ॥

संवत्सरसत्रेषु गावामयनिकधर्मातिदेशाधिकरणम् (११)

आदित्यानामयनप्रभृति संवत्सरसत्रेषु, संवत्सरसत्रत्वसाम्यात् गावमयनिकधर्मा इत्याह —

गव्यस्स्यादयनस्पृशाम् ।

इति संवत्सरसत्रेषु गावामयनिकधर्मातिदेशाधिकरणम् ॥ ११ ॥

निकायिनां उत्तरेषु पूर्वनिकायिधर्मातिदेशाधिकरणम् (१२)

अनेकेऽहीनास्साद्यस्काः सहस्राधिकसंस्थाकाः युगपदुपक्रम्यविधीयमानाः निकायिनः। तत्र प्रथमो धर्मवान्, अन्ये त्वधर्मका; अव्यक्तत्वात्सोमविकाराः। इति चेत् —

उत्तरेषामादिमस्सात्साद्यस्क्रादिनिकायिषु ॥ २०५ ॥

एकनिकायवर्तित्वैकनामत्वाभ्यां आद्यस्य विकारा उत्तरे।

इति निकायिनामुत्तरेषु पूर्वनिकायिधर्मातिदेशाधिकरणम् ॥ १२ ॥

फलादीनामनतिदेशाधिकरणम् (१३)

फलयावज्जीवस्वर्गकामसमुदायाः दर्शादिसंबद्धाः सौर्यादिविकृतिष्वतिदिश्यन्ते। इति चेत् –

फलादीनां विकृतिषु न भवेदतिदेशनम्।

अङ्गस्य सतोऽतिदेशात् फलनियमयोः पुरुषार्थत्वात्, स्वर्गकामस्यापि षष्ठाद्यन्यायेनोद्देश्यत्वात्, षण्णां साहित्यस्य तेषामप्रवृत्तौ प्रवृत्त्ययोगात्, नोक्तानामतिदेशः। न च स्वर्गत्वेनाश्रुतफलेष्वतिदेशः, तादृशस्याङ्गत्वनियमात्फलत्वव्याहतेः। न च फलमुद्दिश्य कर्मविधिः, असन्निधानादित्युक्तं चतुर्थे। अतो न प्राकृतफलसंबन्धो विकृतेः।

इति फलादीनामनतिदेशाधिकरणम् ॥ १३ ॥

गोदोहनादिगुणकामानामनतिदेशाधिकरणम् (१४)

सौर्यादिविकृतौ प्राकृतप्रणयनादिप्रवृत्त्या तदाश्रितफलार्थगुणाः गोदोहनादयः—तत्फलानि च प्रवर्तेरन् प्रकृताविव। इति चेत्

तथैव गुणकामानामपि नास्त्यतिदेशनम् ॥ २०६ ॥

गुणानां कामाः = कांक्षेयत्यर्थः। आश्रयक्रिया, अङ्गत्वाप्रवर्तते। न च तदाश्रितगुणफलयोरङ्गत्वम्; येत प्रवृत्तिस्स्यात्। न चातिदिष्टप्रणयनादौ कामवशात् गोदोहनादिप्रवृत्तिः; दर्शापूर्वप्रयुक्तप्रणयनस्यैवाश्रयत्वात्। क्रत्वङ्गचमसस्य विना वचनं बाधायोगाच्च। अतो न गुणतत्फलप्रवृत्तिः।

इति गोदोहनादिगुणकामानामनतिदेशाधिकरणम् ॥ १४ ॥

सौर्यचरावभिमर्शनद्वयस्य विकल्पाधिकरणम् (१५)

'आग्नेयोऽष्टाकपालोऽमावास्यायाञ्चपौर्णमास्याञ्चाच्युतो भवति' इत्यत्र न संख्यावत् स्ववाक्यविहितकर्मभेदकं किञ्चिदस्तीति द्रव्यदेवतासंबन्धकल्पितो याग एक एव कालद्वये समुच्चितरूपो विधीयत

इत्यग्निहोत्रवदभ्यस्यते, इति तस्यैव कालद्वययोगात् पौर्णमास्यमावास्यासंज्ञत्वमिति, 'चतुर्होत्रा पौर्णमासीमभिमृशेत्–पञ्चहोत्रामावस्याम्' इति कालकृतव्यवस्थावत् सोर्यादावपि तत्तत्कालकृतव्यवस्थया मन्त्रौ भवतः। इति चेत् —

न सौर्यादिषु होत्रे स्याद्व्यवस्था कालभेदतः।

आग्नेयस्यैकत्वात् मन्त्रौ तत्र विकल्पितावप्यग्नीषोमीयसान्नाय्याद्यनुरोधेन अर्थाद्व्यवस्थितौ, न कालतः। न चार्थिकं चोदकः अतिदिशेत् इति यत्र क्वचित् क्रियमाणो सौर्यादौ ऐच्छिको मन्त्रयोर्विकल्पः।

उत्पन्ने कर्मणि कालद्वयसमुच्चयविधिवशादभ्यासोऽग्निहोत्रे युक्तः। उत्पत्तावेव विरुद्धकालद्वयसमुच्चयो गम्यमानः कर्मभेदकः, इति त्रिधा गुणाद्भेदः। तथा च सौर्यस्य प्राथमिकपौर्णमास्याग्नेय विकारत्वात्, यत्र क्व च क्रियमाणस्यापि चतुर्होत्रैवाभिमर्शनमिति केचित्।

आग्नेययोर्विकल्पेन सौर्यप्रकृतित्वमित्येवमप्यव्यवस्थैव मन्त्रयोर्विकृतौ इत्यन्ये।

इति सौर्यचरावभिमर्शनद्वयस्य विकल्पाधिकरणम् ॥ १५ ॥

सौर्यचरावाग्नेयधर्मातिदेशाधिकरणम् (१६)

इष्टिषु दर्शपूर्णमासधर्मप्रवृत्तौ मन्त्रयोर्विशेषानवगमात्, षट्सु कस्यचिद्धर्मः क्वचित् इत्यनियमः। इति चेत् —

आग्नेयो देवतैक्येन सौर्यप्रकृतिरिष्यते ॥ २०७ ॥

'सोऽग्नयेऽध्रियत' इत्यर्थवादादेकदैवत्वम्। 'आसावादित्यो नव्यरोचत तस्मा एतँ सौर्यं चरुम्' इत्युपक्रमात्सौर्ये एकदेवताकत्वम्। एवमन्यत्राप्यूह्यम्।

इति सौर्यचरावाग्नेयधर्मातिदेशाधिकरणम् ॥ १६ ॥

हविर्देवतयोस्सन्निपाते हविस्सामान्यस्य बलीयस्त्वाधिकरणम् (१७)

ऐन्द्रपुरोडाशे आग्नेयपयसि च द्रव्यदेवतासामान्यबलाबलाज्ञानात् अन्यतरधर्मस्स्यात्; प्रधानस्वमुख्यत्वाभ्यां देवतासामान्यप्राबल्यं वा। इति चेत् —

आग्नेयपयसो द्रव्यसाम्यात्सान्नाय्यधर्मता।

ऐन्द्रपुरोडाशस्य चाग्नेयधर्मतेत्यपि द्रष्टव्यम्। उद्देशपूर्वकत्यागे विशेष्यांशसंबन्धिनस्त्यज्यमानस्य हविषः सामान्यं, विशेषणांशसंबन्ध्यारादुपकारकदेवतासामान्यात् बलवत्। प्राधान्यन्तु न देवतायाः इति नवमे स्थास्यति। प्रातिपदिकार्थत्वान्मुख्यत्वेऽपि तद्वेलायां कर्मानवगमादतिदेशप्राप्तबहुधर्मबाधापत्तेश्च हविस्सामान्यं बलवत्, न देवतासामान्यम्।

इति हविर्देवतयोस्सन्निपाते हविस्सामान्यस्य बलीयस्त्वाधिकरणम् ॥ १७ ॥

शतकृष्णलाख्यहिरण्ये औषधधर्मातिदेशाधिकरणम् (१८)

कृष्णलचरौ उज्ज्वलत्वसाम्यादाज्यधर्माः । इति चेत् —

कृष्णलेष्वौषधाधर्माः

चरुशब्दवत्त्वविशदत्वाभ्याम् ।

इति शतकृष्णलाख्यहिरण्ये औषधधर्मातिदेशाधिकरणम् ॥ १८ ॥

मधूदकयोरुपांशुयाजीयाज्यधर्मातिदेशाधिकरणम् (१९)

चित्रेष्टौ नाना यागाः 'दधि मधु घृतं उदकं धानाः करम्भाः तण्डुलाः तत्संसृष्टं प्राजापत्यम्' इत्यत्र, 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इति तत्पदानूदित तत्तद्द्रव्ये प्रजापतिसंबन्धपृथक्त्वात् । तत्र मधूदकयोर्द्रवत्वसाम्यात्पयोधर्मप्रवृत्तिः । इति चेत् —

आज्यधर्मा मधूदके ॥ २०८ ॥

मधूदके इति द्वन्द्वैकवद्भावे सप्तम्येकवचनम् 'प्रवर्तन्ते' इति शेषः । वर्णसाम्यात्—नैमित्तिकद्रवत्ववत्त्वात्, अतिदिष्टधर्माणामुत्पवनादीनामबाधात्, पयोधर्मदोहनादिबाधात्, आज्यधर्मामधूदकयोः ।

इति मधूदकयोरुपांशुयाजीयाज्यधर्मातिदेशाधिकरणम् ॥ १९ ॥

इति लघुवार्तिकटीकायां अष्टमस्य प्रथमः पादः ।

॥ अथ द्वितीयः पादः ॥

ऐष्टिकसौत्रामण्योरैष्टिकधर्मातिदेशाधिकरणम् (१)

वाजिनयागे–सौत्रामण्यङ्गभूताश्विनसुराग्रहेषु च, 'सोमो वै वाजिनम्' 'सुरा सोमः' इत्यग्निहोत्रवन्नाम्ना सोमधर्मातिदेशः । इति चेत् —

सुरावाजिनयोरिष्टिः

विध्यभावेनार्थवादमात्रत्वादस्य हविस्साम्याद्वाजिने पयोधर्माः । सुराग्रहेषु चौषधाः ।

इत्यैष्टिकसौत्रामण्योरैष्टिकधर्मातिदेशाधिकरणम् ॥ १ ॥

पशौ सान्नाय्यधर्मातिदेशाधिकरणम् (२)

अग्नीषोमीयपशुयागे अग्नीषोमीयपुरोडाशधर्माः, द्रव्यसामान्यस्य संहतत्वस्य–देवतासामान्यस्य च स्पष्टत्वात् । इति चेत् —

सान्नाय्यं प्रकृतिः पशोः ।

पशुप्रभवत्वसाम्यात्सान्नाय्यपात्रोरवादर्शनाच्च पशौ सान्नाय्यधर्मः ।

इति पशौ सान्नाय्यधर्मातिदेशाधिकरणम् ॥ २ ॥

पशौ पयोधर्मातिदेशाधिकरणम् (३)

दधिविकारः पशुः–घनत्वसाम्यात् । इति चेत् —

तत्रापि शृतम्

पयोविकार एव । साक्षात्पशुप्रभवत्वगतिमत्त्वयोः साम्यात् ।

इति पशौ पयोधर्मातिदेशाधिकरणम् ॥ ३ ॥

आमिक्षायां पयोधर्मातिदेशाधिकरणम् ॥ ३ ॥

आमिक्षायाः संसृष्टदधिपयोभ्यां जननात्, उभयरसोपलब्धेश्चोभयधर्माः । संस्कारवाक्ये कर्मणो दध्नः प्राधान्यम् । सप्तम्या प्रयसो गुणत्वप्रतीतेः, 'सा' पदेन दध्न एव प्रधानस्य परामर्शात्तद्धर्मा सा । इति चेत् —

आमिक्षाशृतैकप्रकृतिर्मता ॥ २०९ ॥

चतुर्था एवामिक्षायाः 'पयस्त्वप्रधाना–प्रातर्दोहविकारा सा[1] तस्यैवायं प्रपञ्चः ।

इत्यामिक्षायां पयोधर्मातिदेशाधिकरणम् ॥ ४ ॥

द्वादशाहे सत्राहीनयोर्व्यवस्थया धर्मातिदेशाधिकरणम् (५)

द्वादशाहः सत्राहीनोभयात्मकः इति दशमे स्थास्यति । तत्रोभयधर्मास्सत्राहीनयोरव्यवस्थया प्रवर्तन्ते । इति चेत् —

अहीनसत्रप्रकृतिर्द्वादशाहो व्यवस्थया ।

सत्रात्मकस्य सत्रेषु, अहीनात्मकस्याहीनेषु धर्मः ।

इति द्वादशाहे सत्राहीनयोर्व्यवस्थया धर्मातिदेशाधिकरणम् ॥ ५ ॥

पञ्चदशरात्रादिषु सत्रधर्मातिदेशाधिकरणम् (६)

पञ्चदशरात्रे, कुण्डपायिनामयने 'अहीने' । अन्तिमसुत्यायामतिरात्रत्वात् । ततश्चाहीनात्मक-द्वादशाहविकारे द्वे । इति चेत् —

सपञ्चदशरात्रन्तु सत्रं स्यात्कौण्डपायिनाम् ॥ २१० ॥

---

[1] ४–१–९ 'निर्णीता' इति शेषपूरणं कर्तव्यम् ।

आस्युपायिचोदनाचोदितत्वेन सत्रत्वात् तत्तदात्मकद्वादशाहधर्मा एव तयोः ।

इति पञ्चदशरात्रादिषु सत्रधर्मातिदेशाधिकरणम् ॥ ६ ॥

इत्यष्टमस्य द्वितीयः ।

॥ अथ तृतीयः पादः ॥

बार्हस्पत्यचरौ आग्नेयस्य आग्नावैष्णवे चाग्नीषोमीयस्य धर्मातिदेशाधिकरणम् (१)

'आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन् सरस्वत्याज्यभागा स्यात् बार्हस्पत्यश्चरुः' इत्यत्र पौर्णमासीत्रिकधर्माः स्थानसाम्यात् प्रथमादिक्रमेण प्रवर्तन्ते । इति चेत् —

हविर्भेदे देवतायास्साम्येन प्रकृतिस्थितिः ।

विधिसमयावगतदेवतासाम्यात् न्यायगम्यस्थानसामान्यदौर्बल्यात्, द्विदैवत्येऽग्नीषोमीयस्य—बार्हस्पत्ये आग्नेयस्य धर्माः ।

इति बार्हस्पत्यचरौ आग्नेयस्य, आग्नावैष्णवे चाग्नीषोमीमस्य धर्मातिदेशाधिकरणम् ॥ १ ॥

जनकसप्तरात्रे त्रिवत्स्वहस्सु द्वादशाहधर्मातिदेशाधिकरणम् (२)

जनकसप्तरात्रे, 'चत्वारि त्रिवृन्त्यहान्यग्निष्टोममुखानि' इत्यत्र, चतुर्ष्वपि षाडहिकप्रथमस्य त्रिवृत्स्तोमस्य धर्माः अभ्यासेन प्रवर्तन्ते । इति चेत् —

सप्तरात्रे तु नानाह्नां प्रवृत्तिस्संघसाम्यतः ॥ २११ ॥

इह सहचोदितानां संघातत्रिवृत्त्वयोः शाब्दत्वात् प्रथमस्य त्रिवृत्त्वं चतुर्षु प्रवर्तते । स्तोमातिरिक्ताः संघातधर्माश्च रथन्तरबृहदादयः ततश्चाग्निष्टोममुखानीत्युपपद्यते । अन्यथा चतुर्णामग्निष्टोमत्वं स्यात् ।

इति जनकसप्तरात्रे त्रिवृत्स्वहस्सु द्वादशाहिकधर्मातिदेशाधिकरणम् ॥ २ ॥

षट्त्रिंशद्रात्रे षडहधर्मातिदेशाधिकरणम् (३)

षट्त्रिंशद्रात्रे, 'षडहाभवन्ति, चत्वारो भवन्ति' इति श्रुते, द्वादशाहगतदशरात्रधर्माः व्यत्यासात् द्विः प्रवर्तन्ते । इति चेत् —

षडहा वृत्तिरेवस्याच्चत्वारष्षडहा इति ।

चतुर्विंशतिसंख्याकगणस्यानुमानिकत्वात् चतुस्संख्यषडहविधेः प्रत्यक्षत्वात् षडहधर्माणां चतुर्धा प्रवृत्तिः।

इति षट्त्रिंशद्रात्रे षडहधर्मातिदेशाधिकरणम् ॥ ३ ॥

संस्थागणेषु द्वादशाहिकधर्मातिदेशाधिकरणम् (४)

'शतोक्थ्यं भवति' 'शतातिरात्रं भवति' इत्यत्र, उक्थ्यादिशब्दानां ज्योतिष्टोमनामत्वात्, दूरस्थतदनुवादेन शताभ्यासविधिः-इति तद्धर्माणां शतकृत्वः प्रवृत्तिः। इति चेत् —

संस्थागणशतोक्थ्यादौ धर्मास्स्युर्द्वादशाहिकाः ॥ २१२ ॥

नोक्थ्यादिशब्दाः क्रतुवचनाः। किन्तु, तत्संस्थानिमित्ताः। अतः तत्संस्थाकाः शतमुक्थ्या विधीयन्त इति द्वादशाहिकविध्यन्तस्य दशकृत्वः प्रवृत्तिः।

इति संस्थागणेषु द्वादशाहिकधर्मातिदेशाधिकरणम् ॥ ४ ॥

शतोक्थ्यादौ ज्योतिष्टोमात् स्तोत्रोपचयाधिकरणम् (५)

दशरात्रे आद्यन्तसुत्ययोरग्निष्टोमसंस्थत्वात्, तदुपर्युक्थ्यस्तोत्रं तत्संस्थत्वाय शतोक्थ्ये आनेयम्। तत् द्वादशाहिके तत्र प्रकृतावविद्यमानविशेषश्रवणात् तद्विकारत्वाच्च। इति चेत् —

शतोक्थ्यादिगतोक्थ्यादावेकाहाद्धर्मसंक्रमः।

स्वप्रकृतौ प्रथमदशमयोः तत्स्तोत्रासंबन्धात् मूलप्रकृतितो ज्योतिष्टोमति उक्थ्यस्तोत्रानयनम्, आतिदेशिकत्वाच्च दशरात्रे उक्थ्यस्य। अत उत्पत्तिस्थानादुक्थ्यागमः।

इति शतोक्थ्यादौ ज्योतिष्टोमात् स्तोत्रोपचयाधिकरणम् ॥ ५ ॥

गायत्रमेतदहर्भवति इत्यादावुत्पत्तिगायत्रीणामागमाधिकरणम् (६)

बृहस्पतिसवे प्रकृतितो नानाछन्दस्कमन्त्रप्राप्तौ गायत्री नियमश्रुतः 'गायत्रमेतदहर्भवति' इति। तत्र प्रकृतिप्राप्तत्रिष्टुबादिष्वक्षरलोपेन चतुर्विंशत्यक्षरा सा संपादनीया। अतः 'तिस्रोऽनुष्टुभश्चतस्रो-गायत्रियः' इत्युपपन्नम्। इति चेत् —

प्राप्ता उत्पत्तिगायत्र्योर्बृहस्पतिसवे मताः ॥ २१३ ॥

न संख्याविशेषवाची गायत्रीशब्दः। मन्त्रान्तरादिष्वतिप्रसक्तेः। अष्टाक्षरैस्त्रिभिः पादैर्युक्तामृचमतिदधाति। अत उत्पत्तिगायत्र्यानयनम्। 'तिस्रोऽनुष्टुभः' इति तु, गौणः प्रयोग इति।

इति गायत्रमेतदहर्भवतीत्यादावुत्पत्तिगायत्रीणामागमाधिकरणम् ॥ ६ ॥

॥ इत्यष्टम तृतीयः ॥

॥ अथ चतुर्थः पादः ॥

दर्वीहोमशब्दस्य होमनामधेयताधिकरणम् (१)

'यदेकया जुहुयाद्दर्विहोमं कुर्यात्' इत्यत्र, दर्व्या होम इति गुणविधिः । इति चेत् —

दर्विहोमाः कर्मनाम

तत्प्रख्यन्यायात् । अन्यतो दर्व्याः प्राप्तेः ।

इति दर्वीहोमशब्दस्य होमनामधेयताधिकरणम् ॥ १ ॥

दर्वीहोमशब्दस्य लौकिकवैदिकहोमवाचित्वाधिकरणम् (२)

तत्र लौकिकस्थालीपाकादिकर्तरि, 'दर्विहौमिकः' इति प्रयोगात् स्मार्तहोमनाम । इति चेत्—

वैदिकानामपीष्यते ।

वैदिकवास्तुहोमादिष्वपि प्रयोगात् ।

इति दर्वीहोमशब्दस्य लौकिकवैदिकहोमवाचित्वाधिकरणम् ॥ २ ॥

दर्वीहोमशब्दस्य होममात्रवाचित्वाधिकरणम् (३)

तत्र 'यज्युत्पत्तीनामपि चतुरवत्तं जुहोति' इति होमत्वापादनात्तेषामपि नाम । इति चेत् —

जुहोति चोदनानां स्यात्

यागादन्यस्यैवावत्तसंस्कारकहोमस्य, विधानात्, जुहोतिचोदितानामेव स्यात् ।

इति दर्वीहोमशब्दस्य होममात्रवाचित्वाधिकरणम् ॥ ३ ॥

दर्वीहोमानामपूर्वताधिकरणम् (४)

दर्वीहोमाः सोमप्रकृतिकाः, अश्रुतेति कर्तव्यताकत्वात् अव्यक्तत्वाच्च । तत्र पृथिव्यै स्वाहा — इत्यादौ चतुर्थ्या देवताप्रतीत्या अव्यक्तत्वासिद्धेः, यागत्वहोमत्वेन विरुपत्वाच्च । अतो नारिष्ठाग्निहोत्रादि-धर्मकाः । इति चेत् —

अपूर्वा एव ते मताः ॥ २१४ ॥

नारिष्ठाङ्गभूतेध्माबर्हिरादेः त्रैयं बकादिहोमेष्वभावदर्शनादिभिर्लिङ्गैरपूर्वा एते । न कस्यचिदङ्गं गृह्णीयुरिति ।

इति दर्वीहोमानामपूर्वताधिकरणम् ॥ ४ ॥

इति लघुवार्तिकटीकायां अष्टमस्य चतुर्थः पादः ।

॥ समाप्तश्चाध्यायः ॥

॥ अथ नवमोऽध्यायः ॥

तत्र प्रथमः पादः ।

अग्निहोत्रादिषूक्तानां धर्माणामपूर्वप्रयुक्तत्वाधिकरणम् (१)

अतिदेशविचारानन्तरं तद्धेतुक ऊहविचार आरभ्यते । ऊहो नाम प्राकृतपदार्थस्थानपतितपदार्थान्तरकार्यवशाद्विकृतः प्रयोगः । स च मन्त्रसामसंस्कारेषु—यथा अग्नये जुष्टमिति मन्त्रस्य प्रकृतावपूर्वीयदेवताप्रकाशनं कार्यम् । तत्स्थानपतितसूर्यप्रकाशनकार्यवशात् सूर्याय जुष्टमिति विकृतः प्रयोगः । अयञ्चावघातादीनामपूर्वभावनार्थत्वे स्यात् । यजिप्रयुक्तत्वे च यागमात्रे धर्मपारिप्लवत्वात्, सौर्यादावप्यग्नये जुष्टमित्यस्यैवोपदेशतः प्राप्तेर्नोहस्सिध्येत्, इति सप्तमाद्यसिद्धं अपूर्वप्रयुक्तत्वं धर्माणां स्मारयति–

प्रयोक्तपूर्वं धर्माणाम् ।

इत्यग्निहोत्रादिषूक्तानां धर्माणामपूर्वप्रयुक्तत्वाधिकरणम् ॥ १ ॥

सन्निपातिमप्यपूर्वप्रयुक्तत्वाधिकरणम् (२)

नन्वस्त्वारादुपकारकाणामपूर्वार्थत्वम् । संनिपातिनान्त्ववघातादीनां व्रीहिस्वरूपमुद्देश्य श्रूयमाणत्वाद्विवक्षितम् । तथा च नैवारचरौ व्रीहिनिवृत्तौ निवर्ततेऽवघातः । तत्र कुत ऊहावासरः ? इति चेत् —

स्याच्चैतत्सन्निपातिनाम् ।

एतत् = अपूर्वं प्रयुक्तत्वं, सन्निपातिनाञ्च स्यात् । चकारादारादुपकारकाणाञ्च । स्वरूपमात्रत्वे वैयर्थ्यापातात्, अपूर्वसाधनत्वाकारोऽवश्यं विवक्षणीयः । तत्र व्रीहिस्वरूपस्यापि विवक्षायां गौरवं स्यात् । तथा च नीवाराणामपि विधानेनापूर्वसाधनत्वात् अस्त्यवघातस्योहः ।

इति सन्निपातिनामप्यपूर्वप्रयुक्तत्वाधिकरणम् ॥ २ ॥

सन्निपातिनामपूर्वनिमित्तकत्वाधिकरणम् (३)

अन्यत्र श्रुतस्यान्यात्रानुष्ठानात्मकं अवघातप्रयाजाद्यनुष्ठाननिमित्तत्वमपूर्वस्य नास्ति । यस्मिन्विद्यमाने यत् क्रियते, तस्यैव तन्निमित्तत्वात् । यत्सिद्ध्यर्थं यत् क्रियते तस्य तत्प्रयोजकत्वात्, तयोश्चैकदैकत्र विरोधात् । प्रयोजकत्वस्य चापूर्वप्रतिपादनात् यजिरेव निमित्तम् । कादाचित्कानुष्ठानस्य निमित्तापेक्षत्वात् । अतस्तुल्यत्वात् व्रीह्यादिस्वरूपस्यैवावघातादिनिमित्तत्वे, नीवारादावूहो न स्यात् । इति चेत्–

निमित्तञ्चापि तेषान्तदित्येवं वर्णकत्रयम् ॥ २१५ ॥

अपूर्वस्य शाब्दं प्रयोजकत्वम् । निमित्तत्वमार्थिकम् । तस्य तद्वेलायां स्वरूपेणासिद्धत्वमस्तीति यजेरनिमित्तत्वात् अपूर्वनिमित्तकावघातादि नीवारादिष्वपि स्यात् ।

इति संनिपातिनामपूर्वनिमित्तकत्वाधिकरणम् ॥ ३ ॥

प्रोक्षणस्यापूर्वप्रयुक्तत्वाधिकरणम् (४)

'प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति' 'प्रोक्षिताभ्यां दृषदुपलाभ्यां पिनष्टि' इति विशेषणप्रधानशब्देन प्रोक्षणमुलूखलार्थं गम्यमानं, स्वरूपे वैयर्थ्यात् तत्कार्यार्थं, कार्यञ्च वाक्योपात्तं हन्ति पिषिरूपम् । न प्राकरणिकमपूर्वम् । न चोभयार्थत्वम् । प्रकरणस्य वाक्यकल्पनेनैवापूर्वार्थत्वबोधकतया, तत्पूर्वमेव हन्त्याद्यन्विततया निराकांक्षस्य पुनस्तदन्वयायोगात् । हन्तेरपूर्वार्थतया, तदर्थस्यापि तद्द्वारा अपूर्वोपकारकत्वेन, अग्निद्वारा अपूर्वोपकारकाधानस्येव वैयर्थ्याभावात् । अथाप्यवघातद्वारा अपूर्वार्थं प्रोक्षणं, तथापि अवघातस्य द्वारस्याभावात् न नखेषु प्रोक्षणम् । इति चेत् —

प्रोक्षणं हन्ति पिंषिभ्याम्

'न प्रयुज्यते' इत्युत्तरेणान्वयः । हन्तिस्वरूपस्योलूखलादिस्वरूपस्येव विनापि प्रोक्षणेन सिद्ध्यवगमात्, हन्तेर्या तण्डुलनिर्वृत्तिप्रणाल्या अपूर्वसाधनत्वव्यापारात्मकता, यच्चोलूखलादेस्तण्डुलप्रणाड्या अपूर्वव्यापारजनकत्वं, तदुभयरूपं द्वारद्वारिभावापन्नमुद्दिश्य प्रोक्षणं विधीयते । तद्रूपस्य तेन विनापि साधनतानवगमात् । अतः आनर्थक्यप्रतिहतिन्यायेन हन्ति पिष्यर्थत्वं वाक्यगम्यं बाधित्वा, प्रकरणादपूर्वार्थत्वमिति, नखनिर्भिन्नचरावपि तण्डुलद्वारा अपूर्वार्थव्यापारसाधनयोः सत्त्वात् तेष्वपि प्रोक्षणमूह्यम् । आधानस्यालौकिकाहवनीयार्थत्वात् वैषम्यम् । प्रकरणादपूर्वार्थत्वे वाक्यविरोधपरिहारायेदमधिकरणम् ।

इति प्रोक्षणस्यापूर्वप्रयुक्तत्वाधिकरणम् ॥ ४ ॥

वाङ्नियमस्य दीक्षणीयापूर्वप्रयुक्तत्वाधिकरणम् (५)

'यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयात्' इति श्रुतस्वरविशेषः फलवज्ज्योतिष्टोमापूर्वार्थः । दीक्षणीयापूर्वस्य क्रत्वर्थतया अफलत्वात् । इति चेत् —

सोमापूर्वेण[1] वाग्यमः ।

न प्रयुज्यत इत्यन्वयः । दीक्षणीयापदे स्वापूर्वलक्षणाद्वारा प्रधानापूर्वलक्षणायां, लक्षितलक्षणा स्यात् ।[2] स्वापूर्वलक्षणामात्रम् । तस्याप्यदृष्टत्वेनानिर्ज्ञातप्रकारत्वात्, फलवदपूर्वोपकारित्वाच्च वैयर्थ्यानवगमात् । तस्मात् स्वापूर्वप्रयुक्ता एते ।

---

[1] सोमापूर्वैश्च वाग्यमः—इति मातृकायाम् । [2] 'अतः' इति योजयितव्यम् ।

एवमुत्पवनादयोऽपि प्रोक्षणजन्यातिशयरूपापूर्वप्रयुक्ताः। प्रयाजाद्यङ्गान्यपि तत्तदपूर्वप्रयुक्तानि।

इति वाङ्नियमस्य दीक्षणीयापूर्वप्रयुक्तत्वाधिकरणम् ॥ ५ ॥

फलदेवतासंबद्धधर्माणामप्यपूर्वप्रयुक्तत्वाधिकरणम् (६)

'अगन्म सुवस्सुवरगन्य' 'अग्नेरहमुज्जितिमनूज्जेषम्' इति दर्शे समाम्नातौ मन्त्रौ लिङ्गात् स्वर्गाग्न्यर्थौ। फलस्य सर्वशेषितया तस्य च देवतातो याच्यमानतया अवैयर्थ्यात्। इति चेत् —

देवताफलसंबद्धस्ताभ्यां नैव प्रयुज्यते ॥ २१६ ॥

देवतासंबद्धः–फलसंबद्धश्च मन्त्र, ताभ्यां = देवताफलाभ्यां न प्रत्येकं प्रयुज्यते। फलदेवतयोर्मन्त्र-प्रकाशितत्वमात्रात्फलसिद्धेर्मानशून्यतया तन्मात्रार्थत्वे वैयर्थ्यात्। मन्त्रप्रकाशितफलदैवतः क्रतुः स्वापूर्व-द्वारा फलं साधयतीति प्रकरणादपूर्वार्थत्वम्। ततश्च सौर्यादावपि तदपूर्वीयफलदेवताप्रकाशनाय, 'अगन्म ब्रह्मवर्चसम्' इत्यादिक्रमेणोहः। लिङ्गविरोधपरिहाराय चेदम्।

इति फलदेवतासंबद्धधर्माणामप्यपूर्वप्रयुक्तत्वाधिकरणम् ॥ ६ ॥

धर्माणामदेवताप्रयुक्तत्वाधिकरणम् (७)

न पूर्वोक्तमपूर्वार्थत्वं धर्माणां युक्तम्। त्यज्यमानद्रव्येणाभिप्रेयमाणदेवतायाश्च सर्वशेषितया तदाराधनार्थयागस्य तत्प्रीतिद्वारैव फलजनकत्वस्य, 'तृप्त एवैनमिन्द्रः प्रजयापशुभिस्तर्पयति' इत्याद्यर्थ-वादाद्रात्रिसत्रप्रतिष्ठान्यायेन कल्पनात्। तस्य च स्थालीपुलाकन्यायेनान्यत्रापि तद्द्वारत्वावगमकत्वात्, नात्यन्तापरिदृष्टादृष्टार्थत्वम्। लोकानुसारतोऽपि पूजा पूज्यमानप्रीत्यर्थैव। तत्प्रीत्यर्थाश्च धर्मास्तत्प्रयुक्ताः। इति चेत् —

न देवतातिथिन्यायाद्यज्ञे प्राधान्यमश्नुते।

यजेतेत्यत्र पदश्रुत्या यागस्य क्रियाकरणत्वं, वाक्यीयस्य पुरुषविशेषणस्यापि स्वर्गादेर्विधिवशाद्भाव्यत्वम्। तत्र सिद्धरूपद्रव्यदेवतं भव्ययागार्थं सत् गुणभूतम्। तदर्थं करोति क्रिया लोकेऽपि दानभोजनयोरेव-स्वापूर्वद्वारकं फलजनकत्वम्। नातिथ्यादेः प्रीयमाणादपि फलम्। अतो विग्रहहविर्भोगप्रसादफल-दानादेः प्रत्यक्षादिविरोधात् मन्त्रादौ तद्वादाः यागनिवृत्तिद्वारा व्याख्येया इत्यपूर्वद्वारादेव यागादेः फलमिति अपूर्वप्रयुक्ता एव धर्माः।

अत्र यद्वक्तव्यं, तत् शारीरके, 'फलमत उपपत्तेः' इत्यधिकरणे निपुणतरमुपपादयिष्यत इति नात्रोच्यते।

इति धर्माणामदेवताप्रयुक्तत्वाधिकरणम् ॥ ७ ॥

प्रोक्षणादीनामपूर्वप्रयुक्तत्वाधिकरणम् (८)

दर्शपूर्णमासयोः 'व्रीहीनवहन्ति' इति श्रुतं प्रोक्षणं, प्रकरणबाधेन श्रुत्या व्रीहिस्वरूपप्रयुक्तम्। अतः प्रधानविधिविशेषणत्वशून्ये प्रोक्षणं न विकृतिष्वतिदेशार्हम्। व्रीह्यतिदेशे सौर्यादौ तदङ्गं प्रोक्षणमपि गच्छेत्। नीवारादिभिस्तु व्रीहिनिवृत्तौ, न प्रोक्षणं तेषु स्यात्, उपदेशातिदेशयोरभावात्। तथा 'त्रीन्परिधीन्, इति मन्त्रः त्रित्वसंख्याप्रयुक्तः, श्रुत्यर्थलाभात्। तथा, 'चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्रामावास्याम्' इति त्रिकसमुदायद्वयप्रयुक्तौ मन्त्रौ। अतः परिधिद्वयवति पितृयज्ञे नोहो मन्त्रस्य। सौर्यादौ च नाभिमर्शनमन्त्रः–समुदायाभावात्। इति चेत् —

व्रीह्याद्यैर्न प्रयुज्यन्ते प्रोक्षणप्रमुखान्यपि ॥ २१७ ॥

व्रीहिप्रयुक्तत्वे तद्रूपस्य तेन विनापि भावात् वैयर्थ्यं स्यात्। किञ्च फलत्वेन कर्तव्यतया चोदितस्य इतिकर्तव्यताविषयिणी आकांक्षा। व्रीहिस्वरूपन्तु सिद्धत्वान्न कर्तव्यतया चोद्यते, किन्तु कारकतया। अतो न द्रव्यस्वरूपस्य इतिकर्तव्यताकांक्षेति वाक्यश्रुती बाधित्वा प्रकरणादपूर्वार्थत्वम्।

तदयमर्थः –'प्रोक्षितैर्व्रीहिभिः साध्यमानेन यागेनापूर्वं कुर्या'दिति। तत्र नीवारहविष्कायां भावनायां व्रीहिस्थाने नीवाराणां निवेशादेषोऽर्थः–'प्रोक्षितैर्नीवारैर्यजेते'ति। ततश्च नीवारेष्वपि प्रोक्षणसिद्धिः। हवीरूपस्य साधने विवक्षितत्वान्न स्रुवादिष्वतिप्रसङ्गोऽवघातादेः। एवं यत्रैकमेव वाक्यं 'प्रोक्षितैर्व्रीहिभिर्यजेत' इति स्यात्, तत्रापि 'व्रीहिजातीयं प्रोक्षणसंस्कृतञ्च यत् तेन यजेत' इत्यर्थः। ततश्च नीवारैर्व्रीहिजातीये निवृत्तेऽपि प्रोक्षितसाधनताया अनिवृत्तेस्तत्रापि प्रोक्षणादिसिद्धिः। एवं 'तप्ते पयसि दध्यानयति' इत्यत्र संस्कारवेलायां साधनत्वाबोधेऽपि पश्चात्संस्कारविशिष्टस्यैव तत्पदेन परामृश्ययागसाधनत्वबोधनात् पूर्वकृतसंस्कारः आमिक्षायागापूर्वप्रयुक्त इति गम्यते। अन्यथा, कान्तिकादिनाप्यामिक्षालाभे संस्कारे वैयर्थ्यं स्यात्। तद्भूतभवद्भाविविनियोगद्रव्याणां संस्कारा अपूर्वार्था इति, विकृतिष्वप्राकृतार्थकेषु द्रव्यान्तरेषु ऊहितव्याः। तथा परिध्यभिमनर्शमन्त्रयोः संख्यासमुदायाभ्यां प्रयुक्तत्वे वैयर्थ्यात् अपूर्वप्रयुक्तत्वमित्यूहसिद्धिः। श्रुतिविरोधातिप्रसङ्गयोर्वारणायेदम्।

इति प्रोक्षणादीनामपूर्वप्रयुक्तत्वाधिकरणम् ॥ ८ ॥

अग्निष्टोमे उपांशुत्वस्य दीक्षणीयाद्यपूर्वप्रयुक्तत्वाधिकरणम् (९)

ज्योतिष्टोमे, 'त्सरा वा एषा यज्ञस्य–तस्माद्यत्प्राचीनमग्नीषोमीयात् तेनोपांशु चरन्ति' इत्यत्र, यज्ञस्य यत्प्राचीनं तेनोपांशु चरन्तीत्यन्वयः। अतो यज्ञशब्दो विधेयोपांशुत्वविशेषणप्राचीनत्वविशेषणसमर्पकस्सन् प्रवृत्तिविशेषकरस्स्यात्। त्सराविशेषणत्वे तद्वैपरीत्यादनर्थकस्स्यात्। इति यज्ञभागधर्मः परमापूर्वप्रयुक्तमुपांशुत्वम्। ततश्च सोमविकारेषु कुण्डपायिनामयनादिषु, अग्नीषोमीयप्राचीनाप्राकृत-

पदार्थेषु तद्भावारंभकेषु ऊह उपांशुत्वस्य । इति चेत् —

सोमोद्भवेनापूर्वेण नोपांशुत्वं प्रयुज्यते ।

अव्यवधानादत्र यज्ञशब्दः त्सराविशेषणम् । न यज्ञस्य प्राचीनमिति । तस्मादित्यनेन व्यवधानात् । तदयमर्थः—येयमुपांशुत्वानुष्ठितिः सा यज्ञस्य त्सरा । छद्मगतिः । शकुनिग्राहकमन्दगत्यादिव दिति स्तुतिः । तस्मादग्नीषोमीयस्य यत्किञ्चित्प्राचीनं तेनोपांशु चरन्ति इति विधिः । तत्र दीक्षया तदवान्तरापूर्वप्रयुक्तमुपांशुत्वमित्यवगमान्नाप्राकृतपदार्थ ऊहः । 'यावत्या वाचा' इति दीक्षणीयाप्रधानमात्रपरम् । उपांशुत्वन्तु दीक्षणीयाङ्गविषयम् । एवं 'मन्द्रं प्रायणीयायां' 'मन्द्रतरमातिथ्यायां' इत्येतावपि । 'उच्चैः प्रवर्ग्येण' इति तु प्रवर्ग्यकरणिकायां भावनायां उच्चैस्त्वस्य विशेषविधानात्साङ्गे ऊच्चैस्त्वमेव ।

इत्यग्निष्टोमे उपांशुत्वस्य दीक्षणीयाद्यपूर्वप्रयुक्तत्वाधिकरणम् ॥ ९ ॥

वाग्यमस्यापरमापूर्वप्रयुक्तत्वाधिकरणम् (१०)

दर्शादौ 'यज्ञं तनिष्यन्तावध्वर्युयजमानौ वाचं यच्छतः' इत्यादि 'तस्मात्प्रणीताः प्रणेष्यन्वा च यच्छति तां सह हविष्कृता वाचं विसृजति' इति श्रुतो वाग्यमो यज्ञशब्दसंयोगाद्यज्ञभागधर्मः परमापूर्वप्रयुक्तः । इति चेत् —

प्रणीता वाग्यमोऽप्येवं नैष्टिकेन प्रयुज्यते ॥ २१८ ॥

यज्ञस्य विस्तारेणान्वयः 'यज्ञं तनितुं वाचं यच्छेत्' इति । तत्र प्रणीतादिहविष्कृदाह्वानावधीकरणात् तन्मध्यस्थपदार्थावान्तरापूर्वप्रयुक्तत्वम् । अङ्गार्थस्यापि प्रधानोपकारकत्वान्न यज्ञसंयोगविरोधः ।

इति वाग्यमस्यापरमापूर्वप्रयुक्तत्वाधिकरणम् ॥ १० ॥

इष्टकासु सकृद्विकर्षणाद्यनुष्ठानाधिकरणम् (११)

अग्निचयने, 'हिरण्यशकलसहस्रेणाग्निं प्रोक्षति' 'दध्ना मधुमिश्रेणावोक्षति' इत्यादिश्रुते, अग्निशब्दः, तदधिकरणस्थण्डिलपरः । तत्र प्रतीष्टकं प्रोक्षणादिकार्यम् । प्रतिसंस्कार्यं संस्कारावृत्तेर्न्याय्यत्वात् । पक्वामसंयोगे द्रव्यान्तरानारंभेण, एकाकर्षणेऽन्यानाकर्षणेन, संधिदर्शनेन च, अवयव्यभावात् । इति चेत् —

प्रतीष्टं कं नाग्निधर्मः

प्रोक्षणाकर्षणादि एकावयवित्वबुद्धेवावयविनि मानत्वात्, अनाकर्षणेऽपि वृक्षादीनां, संधिदर्शनेऽपि पटादावयविसत्त्वात्, पक्वामसंयोगेऽनारंभकत्वस्य प्रक्रियामात्रत्वात्, अवयविनि सकृत्प्रोक्षणादिः ।

'व्रीहीन्प्रोक्षती'त्युत्र तु, व्रीहीनभिलक्ष्योदकप्रक्षेपः प्रोक्षणम् । न प्रतिव्रीहि । इति संप्रदायविदः ।

इतीष्टकासु सकृद्विकर्षणाद्यनुष्ठानाधिकरणम् ॥ ११ ॥

उत्तमान्यानामह्नां पत्नीसंयाजान्तताधिकरणम् (१२)

द्वादशाहे, 'पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते, न बर्हिरनुप्रहरन्ति, असंस्थितो हि तर्हि यज्ञः' इति श्रुते, यद्यपि पत्नी संयाजान्ते व्यापारोपरमविधावसंस्थितत्वं हेतुर्भाति, अर्थवादत्वेऽपि तस्य घृतार्थवादवत् वाक्यशेषतयाप्युपपत्तेर्नाविशेषप्रवृत्तविधिसंकोचो युक्तः, यथा चिरभोक्तरि 'नास्य भोजनं समाप्यते' इति वदन्ति । तस्मात्सर्वेषां पत्नीसंयाजान्ते व्यापारोपरमः । इति चेत् —

पत्न्यन्तत्वं विनोत्तमम् ।

'द्वादशाहेन यजेत' इत्येकप्रयोगतायाः द्वादशसु सुत्यास्वप्यवगमात्, तदर्थं दीक्षोपसदादीनां पूर्वं तन्त्रेणानुष्ठितत्वेनोपरितनेष्वपि क्वचिदवस्थाप्य तन्त्रेण केषञ्चिदनुष्ठानमनियतप्राप्तं प्रागुत्तमाहस्सु पत्नीसंयाजान्तताया: नियम्यते । अविवाक्ये दशमेऽहनि मानसग्रहान्तता वाचनिकी । हार्योजनाद्यहश्शेषस्तन्त्रेणान्त्येऽहनि कार्यः । तथा च न वाक्यशेषस्यापि गौणता । अतो यथाप्रकृत्यन्त्यवर्जं पत्नीसंयाजान्तत्वं द्विरात्रादिषु, अन्त्यस्याह्नः सर्वसंस्थातयोहः ।

इत्युत्तमान्यानामह्नां पत्नीसंयाजान्ताधिकरणम् ॥ १२ ॥

त्रिःप्रथमामन्वाहेत्यादिषु अभ्यासस्य स्थानधर्मताधिकरणम् (१३)

दर्शे सामिधेनीर्विधाय, एकादशऋचः पठिताः । तासां पञ्चदशत्वायाभ्यासः श्रुतः—'त्रिः प्रथमामन्वाह त्रिरुत्तमां, ताः पञ्चदश' इति तत्र प्रथमामिति स्त्रीलिङ्गात् प्रथमस्थानकप्रवोवाजीयानाकार्यार्थस्तस्या एवाभ्यासविधिः । अतो यत्र क्वचनस्थितापि सा अभ्यसनीया । एवमाजुहोतेत्यपि । इति चेत् —

अभ्यासस्सामिधेनीनां स्थानधर्मत्वमृच्छति ॥ २१९ ॥

प्रथमशब्दस्य प्राथम्यवाचिनो गुणवचनत्वेनाश्रयतो लिङ्गत्वं, न ऋग्वाचकतया । तस्यालाक्षणिकत्वात् । अतो यैवतत्स्थाना, सा त्रिरभ्यसनीया विकृतिषु । न च पदपादादावेवाभ्यासः । अच एवाभिधानसमर्थत्वात् । ताः पञ्चदशेति वचनाच्च । अतो नित्यानुवादस्त्रीलिङ्गम् ।

इति त्रिःप्रथमामन्वाहेत्यादिषु अभ्यासस्य स्थानधर्मत्वाधिकरणम् ॥ १३ ॥

आरंभणीयेष्टेः पुरुषसंस्कारताधिकरणम् (१४)

दर्शादिकरणे 'आग्नावैष्णवमेकादशकपालं निर्वपेत् दर्शपूर्णमासावारभमाणः, 'सरस्वत्यै चरुं—सरस्वते चरुम्' इति श्रुता आरंभणीया प्रयाजादिवत्प्रतिप्रयोगमावर्त्या, अङ्गत्वाविशेषात् । इति

शङ्कित्वा; आरप्स्यमाणसंयोगात् आरम्भद्वारकमिदमङ्गम्। आरंभश्चामरणप्रयोगाणां सकृदेव। 'यावज्जीवं मयेदं कर्तव्यम्' इत्यध्यवस्यारंभस्याविशेषात्, इति वृत्तिकारः।

नैतत्। प्रथमप्रवृत्तित्वात्तस्य अध्यवसायवाचित्वेऽपि, तत्तन्निमित्ते तत्तत्पर्वकालीनजीवनेन तत्तत्प्रयोगस्य पृथगेवाध्यवसायः, पुत्रजन्मावृत्तौ जातेष्ट्यध्वसायावृत्तिवत्। ततश्च तादृगध्यवसायावृत्त्या आरंभणीयाप्यावर्तेतेति न सिद्धान्तसिद्धिः स्यात्। तस्मादेवं वाच्यम्।

अन्वाधानाख्यप्रथमपदार्थाङ्गमियम्। नारिप्समानपुरुषस्य। फलकल्पनापत्तेः। अतस्तदावृत्तौ तदङ्गमिष्टिरप्यावर्त्या। इति चेत् —

आरंभणीयानावृत्ताविष्ट्योरावृत्तिमश्नुते।
नान्वारंभाङ्गमेषेतीमौ न्यायौ वृत्तिभाष्ययोः॥ २२०॥

आरंभशब्दस्याद्यप्रवृत्तिवाचिनो लक्षणयान्वाधाने वृत्तेः, एकस्मिन्कर्मणि आद्यप्रवृत्तेः एकतया तद्द्वारिकेष्टिरपि क्रियोपपदविहितलटा शानजभिहितपुरुषसंस्कारमुखेन उक्तरूपारंभाङ्गम्। तदावृत्त्यभावान्नावर्तते।

इत्यारंभणीयेष्टेः पुरुषसंस्कारताधिकरणम्॥ १४॥

निर्वापमन्त्रे सवित्रादिपदानामनूहाधिकरणम् (१५)

दर्शे देवस्येत्यादिनिर्वपाम्यन्तो मन्त्रो निर्वापाङ्गम्। तत्र सवित्रश्विपूषशब्दानिर्वापस्तावकत्वे अदृष्टार्थतापस्त्या गौण्या अग्निप्रकाशकाः—मान्त्रवर्णिकदेवताविधानार्था वा। विकृतिष्वन्यदेवतासूह्याः। इति चेत् —

न निर्वापे सवित्रश्विपूष्णामूहः प्रवर्तते।

नाग्नौ गौणा एते। देवतान्तरे रूढेर्बलीयस्त्वात्। नाप्युत्पत्तिशिष्टाग्न्यादिभिस्तद्धितनिर्दिष्टैर्विकल्प्ते। वाक्यभेदे निर्वपाम्याद्यवृत्तिदोषाच्च। तस्मान्निर्वापप्ररोचनार्थाः विकृतावपि तथैवोपकुर्वन्तीति नोह्याः।

इति निर्वापमन्त्रे सवित्रादिपदानामनूहाधिकरणम्॥ १५॥

अग्नये जुष्टमित्यत्र अग्निशब्दस्य विकृतावूहाधिकरणम् (१६)

तत्रैव मन्त्रे जुष्टशब्दस्य सेवितत्ववाचिनस्तत्काले तद्बाधेनासमवेतार्थत्वात्तद्विशेषणभूताग्निशब्दोपिऽपूषादिशब्दवदसमवेतार्थो नोह्यः। इति चेत् —

तस्मिन्नग्निपदन्तूह्यं समवेताभिधानतः॥ २२१॥

'जुष्टं यथा स्यात् तथा निर्वपामि' इत्यर्थकः ऊह्यो मन्त्रः।

इति अग्नये जुष्टमित्यत्र अग्निशब्दस्य विकृतावूहाधिकरणम्॥ १६॥

तण्डुलावापमन्त्रे धान्यशब्दस्योहाधिकरणम् (१७)

'धान्यमसि धिनुहि देवान्' इति। तत्र सतुष सतुषद्रव्यवाचिधान्यशब्दस्यासमवेतार्थत्वात् न शाक्यानामयनीयतरसे ऊहः। इति चेत् —

तथा मांसपुरोडाशे चोह्यं धान्यपदं भवेत्।

'गावः पीयन्ते' 'शालयो भुज्यन्ते' इत्यादिवत् लक्षणयापि समवेताभिधायित्वसंभवं नादृष्टार्थः कल्प्यः। अतस्समवेतार्थत्वात् 'मांसमसि' इत्येवोहः। न 'मृगोऽसि' इति। प्रकृतौ लक्षणाया अवैधत्वेनार्थिकत्वात्।

इति तण्डुलावापमन्त्रे धान्यशब्दस्योहाधिकरणम् ॥ १७ ॥

इडोपाह्वानमन्त्रे यज्ञपतिशब्दस्यानूहाधिकरणम् (१८)

दर्शे इडानिगदे 'उपहूता मनुष्याः .... ये यज्ञतिं वर्धान' इति श्रुते, सामर्थ्यलक्षणलिङ्गात् स्वामिवृद्ध्यर्थत्वमवगम्यते। इडास्तुत्यर्थतातु तदेकवाक्यत्वात्। तच्च दुर्बलम्। दृष्टार्थत्वञ्चैवं लभ्यते, उत्साहजननात्। स्तुतावदृष्टार्थत्वम्। तस्मात् 'ये यज्ञपतीन् वर्धान्' इत्यूहस्सत्रादौ। इति चेत्—

इडामन्त्रे यज्ञपतेर्नोहस्सत्रेषु विद्यते ॥ २२२ ॥

प्रत्यक्षश्रुत्या कृत्स्नस्येडोपह्वाने विनियोगात्, 'ये यज्ञपतिं' इति यच्छब्दश्रुत्या वृद्धौ परार्थत्वावगतेः कृत्स्नैकवाक्यत्वस्य प्रत्यक्षत्वात्, इडावान्तरप्रकरणाच्च लिङ्गबाधेन एकयजमानवृद्धिप्रकाशनेन इडा-स्तुतिः इति नोहः।

इतीडोपाह्वानमन्त्रे यज्ञपतिशब्दस्यानूहाधिकरणम् ॥ १८ ॥

सूक्तवाके यजमानशब्दस्योहाधिकरणम् (१९)

सूक्तवाके, 'अयं यजमानः आयुराशास्ते' इत्यादिकं न फलप्रकाशकम्। कृत्स्नस्य श्रुत्या प्रहरणाङ्गत्वावगतेः। इति चेत् —

विद्यते यजमानस्य सूक्तवाके फलित्वतः।

'ऊहः' इत्यनुषङ्गः। श्रुतिविनियुक्तमन्त्रस्य स्वार्थसमवायकल्पकतया सर्वेषामवान्तरवाक्यानां फल-प्रकाशकत्वदृष्टेश्च प्रहरणफलमायुरादि सर्वेषु कथं स्यादित्येतदर्थं 'इमे यजमाना आयुराशासते' इत्यादि-क्रमेणोहः।

इति सूक्तवाके यजमानशब्दस्योहाधिकरणम् ॥ १९ ॥

सुब्रह्मण्यानिगदे हरिवच्छब्दस्यानूहाधिकरणम् (२०)

ज्योतिष्टोमे देवताप्रकाशनार्थः सुब्रह्मण्या निगदः, 'इन्द्रागच्छ हरिव आगच्छ' इत्यादिः।

सोऽग्निष्टुत्यतिदिष्टः । तत्र 'आग्नेयी सुब्रह्मण्या' इति विधानात्, इन्द्रपदस्थाने अग्निपदमूह्यम् । तद्विशेषणहरिवदादिपरशब्दानामपि, 'पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी । ताभ्यामेष सर्वं हरति' इति समवेतवचनत्वात्, तत्स्थाने रोहितवदादिशब्दा ऊह्याः । तद्द्वारा द्रव्यप्रकाशने दृष्टार्थत्वम् । स्तुतौ-त्वदृष्टार्थत्वप्रसङ्गः । इति चेत् ।

आग्नेयसुब्रह्मण्यायां नोह्या हरिवदादयः ॥ २२३ ॥

हरिवदादिगुणवाचकानामर्थवादतया स्वार्थातात्पर्यात् विद्यमानैरविद्यमानैर्वा गुणैरग्नेरपि स्तुत्युपपत्तेः नोह्याः । ननु 'आग्नेया ग्रहा भवन्ति' इति वचनात् न देवतापरऊहो भवेत् । तत्र विधानानर्थक्यम् । किञ्च तदनन्तरं, 'अग्ने धूमकेतो' इत्यादिप्रत्यक्षमन्त्राम्नानात् नोहशङ्का । सत्यम् । तदुभयं नास्तीति कृत्वा चिन्तयेदमित्यदोषः ।

इति सुब्रह्मण्यानिगदे हरिवच्छब्दस्यानूहाधिकरणम् ॥ २० ॥

सोमक्रयणसाधनसाण्डे तस्यै शृतमित्याद्यनूहाधिकरणम् (२१)

ज्योतिष्टोमे 'इयङ्गौस्सोमक्रयणी, तया ते क्रीणामि, तस्यैते शृतं तस्यै दधि' इत्यादि श्रुतो मन्त्रः । स साद्यस्क्रे, 'त्रिवत्सस्साण्डस्सोमक्रयणः' इति श्रुते अतिदिष्टः । तत्र एकहायन्यां तेषामभावेऽपि त्रिचतुरवर्षोत्तरं संभवात् तद्द्वारा तस्याः प्रकाशनं दृष्टार्थम् । साण्डादपि जायमाना गौस्तानि ददाति इति तद्द्वारा साण्डेऽपि समवेतार्थत्वात्, 'तस्य दुग्धं' इत्यादिपुल्लिङ्गता ऊह्यम् । इति चेत् —

न तस्यै शृतमित्यादिर्बस्ते चोहं प्रपद्यते ।

कर्माङ्गतावस्थायामभावान्मरणसंभवेनाग्रेऽप्यनिर्णयात् स्तुत्यर्थतैव प्रकृतौ । तथा साण्डेऽपि नोहः ।

इति सोमक्रयणसाण्डे तस्यै शृतमित्याद्यनूहाधिकरणम् ॥ २१ ॥

सारस्वत्यां मेष्यामध्रिगुवचनाभावाधिकरणम् (२२)

अतिरात्रे, 'सारस्वतीं मेषीमतिरात्रे चतुर्थीं' इति श्रुतम् । तत्र पशूनां सामानविध्यं कृत्वा चिन्ता ।

मेष्यामपि 'प्रास्मै' इति नियतलिङ्गपशुपदाभिप्रायेण पुल्लिङ्गेदंशब्दोपपत्तेः, दैव्या शमितारः' इत्यध्रिगुप्रैषो भवेत् । इति चेत् —

पशुसामानविध्यश्चेन्मेष्यां लुप्तो मनुर्भवेत् ॥ २१४ ॥

पशुपदस्या[1]प्राकृतत्वात्, चोदनायां मेषीपदश्रवणात् तस्याश्च 'अस्मै'शब्दानर्हत्वात् लोपः ।

---

[1] पशुपदस्याप्रकृतत्वात्—इति मातृकायाम् ।

वस्तुतोऽग्नीषोमीयप्रकृतित्वात्ततोऽतिदिष्टः, 'प्रास्यै' इत्यूह्यः ।

इति सारस्वत्यां मेष्यामध्रिगुवचनाभावाधिकरणम् ॥ २२ ॥

यज्ञायज्ञीये गिराशब्दस्य स्थाने इराशब्दस्यैव कर्तव्यताधिकरणम् (२३)

ज्योतिष्टोमे यज्ञायज्ञिये, 'न गिरागिरेति ब्रूयात्, ऐरं कृत्वोद्गेयम्' इति श्रुतम् । तत्र गिरा-इरापदयोर्विकल्पः । इरापदस्य वाचनिकत्वात् गिरापदस्य प्रत्यक्षपाठात् । तन्निषेधस्य च पाक्षिकानुवादत्वात् । इरायाः प्रकरणात् स्तोत्रार्थता । यज्ञायज्ञियस्यापि 'यज्ञायज्ञियेन स्तुवीत' इति श्रुत्या स्तोत्रसाधनता । तयोः परस्परनियमप्राप्तमनुवदति उद्गेयमिति । तथा च गिरेरयोः स्तोत्रगानाभ्यां संबन्धस्य काल्पनिकत्वाविशेषात् । इति चेत् —न ।

नियतस्स्यादिराशब्दः ।

इरायाः प्रकरणसनाथश्रुत्या गानसंबन्धः, गिरायास्तु प्रगाथैकवाक्यतया स्थानसादेश्यादेव स्तोत्राङ्गत्वे, तदवयवगिरायास्तदङ्गत्वं स्थानगम्यमिति दुर्बलत्वान्नियतमिरापदम् । एवं पाठविध्योर्विधिर्बलीयान् । अतो न पाक्षिकत्वं निषेधस्यापि ।

इति यज्ञायज्ञीये गिराशब्दस्यैव कर्तव्यताधिकरणम् ॥ २३ ॥

इरापदस्य प्रगीतताधिकरणम् (२४)

तदिरापदमप्रगीतमेव प्रयोक्तव्यम् । 'विमुक्तादिभ्योऽण्' इति इराशब्दमत्वर्थयोगेऽण्प्रत्ययः । तथा च 'इरापदोपेतं कृत्वा' इति लब्धम् । यदि प्रगीतात्तद्धितः, आयीरा इति प्रातिपदिकात् 'वृद्धाच्छः' इति तद्धिते आयीरीयं कृत्वा इति विधिर्भवेत् । तस्मादप्रगाणम् । इति चेत् —

प्रगीतस्स प्रयुज्यते ।

अप्रगीतात् तद्धितोत्पत्तावपि गिरापदस्थानापत्त्या तद्गीतिलाभस्स्यात् । गिरायानिवृत्तौ तद्गीतेरपि गेयाकांक्षत्वात् । इरापि सामसाध्यस्तोत्रसाधनतां गीत्यभावे न लभेत । विमुक्तादिसूत्रादण्प्रत्ययेपि 'पूर्वस्मान्मतौ छः सूक्तसाम्नोः' इति सूत्रात् सामानुवृत्तेः ऐरं सामेति स्याद्गानसंबन्धः । 'तस्य विकारः' इत्यणि इरायाविकार इति विग्रहे आयीरा स्यादिति गानं लभते । तस्मात्प्रगीतप्रयोगः ।

इति इरापदस्य प्रगीताधिकरणम् ॥ २४ ॥

इति लघुवार्तिकटीकायां नवमस्य प्रथमः पादः ।

॥ अथ द्वितीयः पादः ॥

गीतीनां सामनामताधिकरणम् (१)

सप्तमद्वितीयचरणे सामशब्दः, तद्विशेषरथन्तरादिशब्दाश्च गीतिमात्रवाचकाः, न तद्विशिष्ट-

ऋग्वाचकाः, इत्युक्तमुत्तरविचारार्थं स्मारयति ।

गीतयस्सामशब्दोक्ताः ।

इति गीतीनां सामनामताधिकरणम् ॥ १ ॥

ऊहग्रंथस्य पौरुषेयत्वाधिकरणम् (२)

यस्मिन् ग्रन्थे सामगाः तृचे तृचे एकैकं साम गायन्ति स ऊह[1] (ग्रन्थो नित्यः । अनध्यायवर्जनेन –कर्तुरस्मरणात्–अध्यापकानां वेदत्वप्रसिद्ध्या च योनि) [2]ग्रन्थेन तुल्यत्वाच्च । इति चेत् —

स्यादूहश्च सकर्तृकः ॥ २२५ ॥

ऊहसमाख्यानात्– 'यद्योन्यां तदुत्तरयोर्गायति' इति योनावध्ययनसिद्धस्योत्तरयोर्विधानात् पौरुषेयत्वं विस्पष्टम् । अध्ययनसिद्धत्वे विधिवैयर्थ्यात् । कर्त्रस्मरणमनादरादप्युपपन्नम् । ऋक्सामयोर्वेदत्वात्, तत्संयोगस्य पौरुषेयत्वेऽपि स्वाध्यायादिपरिपालनम् । तस्मात् न्याय्यं गृहीत्वा अन्याय्यं त्याज्यम् ।

इत्यूहग्रंथस्य पौरुषेयत्वाधिकरणम् ॥ २ ॥

साम्न ऋक्संस्कारकर्मताधिकरणम् (३)

सामानि ऋचं प्रति प्रधानभूतान्यारादुपकारकाणि । तत्संस्कारकत्वे अक्षराभिव्यक्तिः–अदृष्टान्तरवैयर्थ्यम् । अकर्मकाले प्रधानकर्मकर्मकाले संस्कारकर्मेति वैरूप्यादयुक्तम् । तस्मात्प्रधानकर्म आरादुपकारकम् । इति चेत् —

साम संस्कारकर्म स्यात्

अक्षराभिव्यक्तेस्सामसाध्याया दृष्टत्वात्, तादृगक्षराणाञ्च क्रत्वङ्गस्तोत्रसाधत्वात् नारादुपकारकत्वम् । गानस्य ऋचाञ्च उत्तराग्रन्थे स्तोत्रे क्रमेण पाठात् तदङ्गम् । कर्मकालगानन्तु शिक्षार्थम्, रथहस्त्यादिशिक्षावत् । तस्मात्संस्कारकर्म ।

इति साम्नऋक्संस्कारकर्मताधिकरणम् ॥ ३ ॥

तृचे प्रत्युचं कृत्स्नसाम्नस्समापनाधिकरणम् (४)

'एकं साम तृचे क्रियते स्तोत्रीयम्' इति श्रुते 'साम क्रियते' इत्युक्तकरोतिपरप्रत्ययेन ऋग्गतं त्रित्वं सामाङ्गत्वेन विधीयते । तच्च एकस्य साम्नस्त्रेधा विभक्तस्य अंशेन एकैकऋक्संबन्धे स्यात् । प्रत्यृचं समस्य गाने त्रित्वं न सामाङ्गं स्यात् । करोतेरभ्यासार्थत्वञ्च, सामसंस्कार्याया अप्यृचः आर्थं साधनत्वमपीति, युक्तं तत्त्रित्वस्य तदङ्गत्वम् । इति चेत् —

---

[1]–[2] अत्र धनुश्चिह्नान्तर्गतो भागो मातृकायां नास्ति ।

[3] .... व्यक्तेः—इति पञ्चमीविभक्तिः अत्र स्यात् ।

तद्भवेत्प्रत्यृजं तृचे ।

तृचे क्रियमाणं प्रत्यृचं भवेत् । स्तोत्रीयत्वं साम्नः = स्तोत्रसाधनकर्मसंस्कारत्वम् । ऋचाञ्च प्रत्येकमेव स्तोत्रसाधनत्वं, न तु सङ्घशः । व्यासज्य गाने साम्नः स्तोत्रसाधनत्वं पीड्येत । तथा च त्रित्वस्य सामाङ्गत्वायोगात् स्तोत्रसाधनऋक्परिच्छेदकं त्रित्वं स्तोत्राङ्गत्वेन विधीयते । तद्विधौ तिसृषु गानं प्राप्तं 'क्रियते' इत्यनूद्यत इति नाभ्यासलक्षणा दोषाय, अनुवादत्वात् । त्रित्वं सामाङ्गमित्यपि वक्तुं शक्यम् । एकस्यैव साम्नस्तिसृष्वभ्यस्यमानत्वात् ।

इति तृचे प्रत्यृचं कृत्स्नसाम्नस्समापनाधिकरणम् ॥ ४ ॥

समास्वेव तिसृष्वृक्षु गानाधिकरणम् (५)

समासु विषमासु तिसृषु गानम् । अविशेषात् । इति चेत् —

प्रगेयं तत्समास्वेव

संशरविलेशपरिहाराय समास्वेव स्यात् । 'शॄ हिंसायां'– 'लिश अल्पीभावे'— इति धातुद्वयात्, संशरस्साम्नो हिंसा, विलेशः = ऋगक्षरगतन्यूनत्वम् ।

इति समास्वेव तिसृष्वृक्षु गानाधिकरणम् ॥ ५ ॥

उत्तरयोर्गायतीत्यत्र उत्तराग्रंथसमधीतयोरेव ऋचोर्ग्रहणाधिकरणम् (६)

'यद्योन्यां तदुत्तरयोर्गायति' 'रथन्तरमुत्तरयोर्गायति' इत्यादौ योन्युत्तरयोरुत्तराग्रन्थाधीतयोर्वाचकत्वं स्यात् । उत्तराशब्दस्य ग्रन्थविशेषे रूढत्वात्, निरपेक्षवृत्तेः योगाद्बलीयस्त्वात् उत्तराग्रन्थे क्रत्वङ्गप्रकरणपाठात् । अत उत्तराग्रन्थाधीतयोरेव गानम् । ([1]तदेतदाह —

रूढमुत्तरयोरिति ॥ २२६ ॥)

इत्युत्तरयोर्गायतीत्यत्र उत्तराग्रन्थसमधीतयोरेव ऋचोर्गानाधिकरणम् ॥ ६ ॥

अतिजगत्यामभ्यस्यमानायां त्रिशोकगानाधिकरणम् (७)

द्वादशाहे पार्ष्टिकचतुर्थेऽन्हि, 'त्रैशोकं साम ब्रह्मसामातिजगतीषु स्तुवते' इति श्रुतम् । 'विश्वाः पृतनाः' इत्यतिजगती । तदुत्तरे 'नेमि नमन्ति' इत्याद्ये बृहत्यौ । तत्र तृचगाने संशरनिवारणाय, अतिजगत्यौ बृहत्योः स्थाने आनेये । तथा चातिजगतीष्विति बहुत्वोपपत्तिश्च । इति चेत् —

त्रैशोकं विषमत्वेऽपि बृहत्योर्भवतीति च ।

बृहत्योः क्रत्वर्थोत्तराग्रन्थपाठावैयर्थ्यापत्तेः लिङ्गन्यायौ बाधित्वा, 'उत्तरयोर्गायति' इति विध्यनुसारेण

---

[1] धनुश्चिन्हान्तर्गतो भागो मातृकायां नास्ति ।

च बृहत्योरेव गानम् । अतिजगतीबहुत्वमपि, एकविंशस्तोमसंपत्तये सप्तकृत्वोऽभ्यासापेक्षम् ।

इति अतिजगत्यामभ्यस्यमानायां त्रिशोकगानाधिकरणम् ॥ ७ ॥

बृहतीपंक्त्योरेव प्रग्रथनेन रथन्तरस्य गानाधिकरणम् (८)

ज्योतिष्टोमे बृहद्रथन्तरे बृहत्योः—'अभित्वाशूर, इत्यत्र रथन्तरं 'त्वामिद्धि' इत्यत्र बृहत् उत्पन्ने । तयोः पङ्क्ती उत्तरे 'न त्वावां अन्यः'— 'सत्वन्नश्चित्र' इति । तत्र श्रुतं—'न वै बृहद्रथन्तरमेकं छन्दः—यत्तयोः पूर्वा बृहतीककुभावुत्तरे' इति ।

तत्र प्रग्रथने अक्षरसाम्येऽपि, ऋकसंपत्तेरमुख्यत्वात् तृचगानबाधापत्तेः ककुबुत्पत्तेश्च दाशतय्यामर्थवत्त्वाय, उत्पत्तिककुभावानेये । इति चेत् —

बृहद्रथन्तरे गेये प्रगाथककुभोर्मते ॥ २२७ ॥

'काकुभः प्रगाथः' इति स्मरणात्, प्रगाथ समाख्यानात् प्रकर्षेण गानं यत्र स प्रगाथः । प्रकर्षश्चाम्नातक्पाठादाधिक्यं, पंक्तेरुत्तरापाठानर्थक्यापाताच्च, 'अभित्वा' इति संपूर्णायां प्रथमं गानम् । ततस्तस्याश्चतुर्थपादः—पंक्तेः पूर्वार्धश्चैका ककुबष्टाविंशत्यक्षरा त्रिपदा द्वितीया स्तोत्रीया । पंक्त्याः द्वितीयपादः—उत्तरार्धश्च, एका ककुप्द्वितीया । एवं प्रगाथेऽपि तृचगानोपपत्तेः, तद्विधेरत्यन्ततो बाधाभावात्प्रग्रथनम् ।

इति बृहतीपंक्त्योरेव प्रग्रथनेन रथन्तरस्य गानाधिकरणम् ॥ ८ ॥

बृहती विष्टारपंक्त्योः प्रग्रथनेन रौरवयौधाजययोः गानाधिकरणम् (९)

रौरवयौधाजये बार्हते तृचे भवतः । तयोः पूर्वा बृहती, उत्तरा विष्टारपंक्तिः । तत्र प्रत्यक्षतो 'बार्हते तृचे भवतः' इति श्रवणात्, उत्पत्तिबृहत्योरानयनम् । इति चेत् —

प्रागाथिकबृहत्योश्च स्याधौधाजयरौरवम् ।

प्रगाथस्मरणसमाख्यानोत्तरापाठ लिङ्गदर्शनैः प्रगथनम् । लिङ्गन्त्वेवं—'षष्टिस्त्रिष्टुभो माध्यन्दिनं सवनम्' इति माध्यन्दिनसवने पञ्च स्तोत्राणि । तेषां सप्त सूक्तानि नव सामानि च साधनानि । तत्र पञ्चदश स्तोभो माध्यंदिनः पवमानः प्रथमस्तोत्रम् । तस्य सूक्तत्रयं—पञ्च सामानि च । तत्राद्यं सूक्तं गायत्री तृचः । तस्मिन् गायत्रमहीयवे सामनी गेये । द्वितीयं प्रगाथरूपम् । तयोः पूर्वा बृहती, उत्तरा विष्टारपंक्तिः । तयोरेवं प्रगथनम्—बृहत्याश्चतुर्थपादं द्विरभ्यस्य विष्टारपंक्तेः पूर्वार्धेन योजने द्वितीया बृहती संपद्यते । तदीयं चतुर्थपादं द्विरभ्यस्य उत्तरार्धेन योजने तृतीया बृहती । तस्मिन् तृचे रौरवयौधाजये सामनी । तृतीयं सूक्तं त्रिष्टुप्छन्दस्कतृचः । तस्मिन् औशनसं साम ।

चतुर्थसूक्ते पूर्वा बृहती—उत्तरा पंक्तिः। तयोः पूर्ववर्णकोक्तरीत्या प्रग्रथने, उत्तरे द्वे ककुभौ भवतः। तस्मिन् तृचे रथन्तरं साम। तन्माहेन्द्रस्तोत्रपृष्ठम्। तस्य सप्तदशस्तोमसंपत्तये बृहत्यां त्रिरभ्यासः प्राप्तः। उत्तरककुभोः सकृत्सकृत्। द्वितीयपर्याये बृहत्यां सकृत्, ककुभि त्रिः। द्वितीयककुभि सकृत्। तृतीयपर्याये बृहत्यां सकृत्। ककुभोस्त्रि स्त्रिः।

पञ्चमसूक्तं गायत्रीतृचः। तस्मिन्वामदेव्यं साम। तत् द्वितीयं पृष्ठम्। तत्रापि त्रिभिः पर्यायैः साम्नः सप्तदशाभ्यासाः। षष्ठसूक्ते बृहतीपंक्त्योः प्रग्रथने बार्हतस्तृचो भवति। तस्मिन् नौधसं साम। तस्य च सप्तदशाभ्यासाः पूर्ववत्। तत् तृतीयं पृष्ठम्। एवं सप्तमे सूक्ते बृहती पंक्त्योः प्रगाथे बार्हतस्तृचः। तत्र कालेयं साम पूर्ववदभ्यसनीयम्। तत् चतुर्थं पृष्ठम्। तत्राद्य-सूक्तस्य सामद्वयानुरोधात् द्विरभ्यासे षड्गायत्र्यः। तत्र द्वितीयस्य बार्हतस्यापि द्विरभ्यासे षड्बहत्यः। तृतीये त्रिष्टुप्त्रयं—चतुर्थसूक्ते पञ्च बृहत्यो द्वादश ककुभः। पञ्चमे सप्तदश गायत्र्यः। षष्ठसप्तमयोः चतुस्त्रिंशद्बृहत्यः। तदेवं तृतीयसूक्तातिरिक्तसूक्तषट्के त्रयोविंशतिर्गायत्र्यः, पञ्चचत्वारिंशद्बृहत्यः, द्वादशककुभश्च संपन्नाः। तत्र ककुबष्टाविंशत्यक्षरा। तस्यां गायत्रीपादद्वययोजने तावत्यस्त्रिष्टुभो भवन्ति। तथा सत्यष्टौ गायत्र्यो गताः पञ्चदश गायत्रीषु पञ्चचत्वारिंशपादांस्तावतीषु बृहतीषु योजयित्वा तावत्य-स्त्रिष्टुभः कार्याः। ककुबुत्पन्ना द्वादश। तृतीयसूक्ते तिस्रः। तथा च 'षष्टिस्त्रिष्टुभः' इति लिङ्ग-मुपपन्नम्।

इति बृहतिविष्टारपंक्त्योः प्रग्रथनेन रौरवयौधाजययोर्गानाधिकरणम् ॥ ९ ॥

अनुष्टुब्गायत्र्योः प्रग्रथनेन श्यावाश्वान्धीगवयोर्गानाधिकरणम् (१०)

श्यावाश्वान्धीगवे आनुष्टुभे तृचे भवतः। तयोः पूर्वा अनुष्टुप्—उत्तरे गायत्र्यौ। तत्रापि पूर्ववदेव पूर्वोत्तरपक्षौ। लिङ्गन्तरप्रदर्शनार्थं वर्णकान्तरम्। लिङ्गन्त्वेवम् —

चतुर्विंशतिर्जगत्यः— एका ककुप् तृतीयसवन इति। तत्र द्वे स्तोत्रे पञ्चछन्दास्सप्तसामा आर्भवः पवमानः। गायत्रं हि, ते सामनी गायत्रे तृचे भवतः। तत्र षड्गायत्र्यः तिस्रो जगत्यो भवन्ति। श्यावाश्वांधीगवे आनुष्टुभे तृचे भवतः। तरु षडनुष्टुभः—चतस्रो जगत्यो भवन्ति। ततश्च सप्त जगत्यः। उष्णिहि सर्फं—ककुभि पौकलं इति सप्तम्मेकवचनात् तृचगानापवादः। अष्टविंश-त्यक्षरयोरुष्णिक्ककुभोः एका जगती—गायत्रीपादश्च। ककुभि मध्यमपादो द्वादशाक्षरः, उष्णिहि चरमः। कावमन्त्यं जगतीष्विति। तथा च पवमाने एकादश जगत्यो गायत्रीपादश्च। द्वितीये च यज्ञायज्ञियस्तोत्रे प्रगाथे पूर्वा बृहती। उत्तरा विष्टारपंक्तिः। तयोः प्रग्रथनेन ककुभावुत्तरे। तत्र एकविंशतिस्तोमसंपत्तये त्रिभिः पर्यायैः सप्तकत्रिके, सप्त बृहत्यः चतुर्दश ककुभश्च। तत्र द्वाविंशाक्षर-

मध्यमपादाश्चतुर्दश । तेषु सप्तपादास्सप्तसु, बृहतीषु योजनीयाः । ततस्सप्त जगत्यो भवन्ति । अवशिष्टा अष्टाक्षरा अष्टाविंशतिपादाः । तेषु षड्भिः पादैरेका जगती – इति क्रमेण चतुर्विंशतिपादैः चतस्रो जगत्यो भवन्ति । ये तु द्वादशक्षराः सप्त पादाः पूर्वमवशिष्टाः, पवमानशेषोऽष्टाक्षरः पादस्तेषु योजनीयः । ककुभां शेषेष्वष्टाक्षरेषु चतुर्षु पादेषु चत्वार्यक्षराणि पूर्वत्र योजनीयानि । तानि षण्णवत्यक्षराणि द्वे जगत्यौ । चतुरक्षरन्यूनाष्टाक्षर ककुप्पादचतुष्टयं अष्टाविंशत्यक्षरा एका ककुप् । तदेवं यज्ञायज्ञिये त्रयोदश जगत्यः, पवमानगता एकादश इति, 'चतुर्विंशतिर्जगत्यः–एका ककुप्' इति लिङ्गमुपपन्नम् ।

इत्यनुष्टुब्गायत्र्योः प्रग्रथनेन श्यावाश्वान्धीगवयोर्गानाधिकरणम् ॥ १० ॥

पादप्रगथनेन ब्रह्मसामगानाधिकरणम् (११)

गवामयने 'चतुरुत्तरशतमैन्द्रा बार्हताः प्रगाथाः' इति श्रुतम् । तत्र त्रित्वप्रापि चोदकसामञ्जस्याय तृचे गेयम् । प्रगाथवचनन्तु प्रथमतृचदेकामृचं ऋग्द्वयं च द्वितीयस्तृचः । तत एकामृचं तत ऋग्द्वयं च द्वितीयस्तृचः इत्येवं क्रमेण । इति चेत् —

द्वयोर्द्वयोः प्रग्रथनात् तृचत्वं बार्हतेषु च ॥ २२८ ॥

'अन्या अन्या ऋचो भवन्ति' इति वचनात् नैकस्यामृचि द्विर्गानमिति पादप्रग्रथनं, न ऋक्प्रग्रथनमिति ।

इति पादप्रग्रथनेन ब्रह्मसामगानाधिकरणम् ॥ ११ ॥

नीतिसंपादकानामक्षरविकारादीनां विकल्पाधिकरणम् (१२)

सामवेदे सहस्रशाखावगतगीतिप्रकरणमेकार्थत्वाद्विकल्प इत्याह —

गीतिभेदाविकल्पेरन् ।

इति नीतिसंपादकानामक्षरविकारादीनां विकल्पाधिकरणम् ॥ १२ ॥

ऋचा स्तुवते–साम्ना स्तुवते–इति विधिना साम्नैव स्तवविधानाधिकरणम् (१३)

क्वचिद्विकृतावप्राकृतानि स्तोत्राणि विधाय श्रुतम्—'यदृचा स्तुवतेऽप्रगीतया तदसुरा अन्ववायन्, यत्साम्ना समभिव्यक्तया स्तुवते तदसुरा नान्ववायन्, य एवं विद्वान् साम्ना स्तुवीते'ति । तत्र द्वयोर्विकल्पः । वचनात् । इति चेत् —

न ऋक्सामे उभे स्मृतेः ।

विध्वंसकासुरानागमस्तुत्युपोद्बलितविधिविभक्त्या साम्नो विधानात् तेनैव स्तवनम् ।

इति ऋचा स्तुवते साम्ना स्तुवते इति विधिना साम्नैव स्तवविधानाधिकरणम् ॥ १३ ॥

अयं सहस्रमानवः इत्यृचाप्रगीतयैवाहवनीयोपस्थानाधिकरणम् (१४)

क्वचिद्विकृतौ, 'अयं सहस्रमानवः इत्येतया आहवनीयमुपतिष्ठ' इति श्रुतम् । सा च संहितायामप्रगीता–गानग्रन्थे प्रगीता च पठिता । तत्राविशेषादुभाभ्यामनियमेनोपस्थानम् । इति चेत् –

प्रगीतया चोपस्थानम्

अनवगतायामृचिगानागानायोगात् अप्रगीता तदर्था । प्रगीता त्वनन्यप्रयोजना । तस्मात्तयैवोपस्थानम् ।

इति अयं सहस्रमानवः इत्यृचा प्रगीतयैवाहवनीयोपस्थानाधिकरणम् ॥ १४ ॥

अग्निर्मूर्धा इत्यादियाज्यानुवाक्यादीनां तानेन प्रयोगाधिकरणम् (१५)

'अग्निर्मूर्धा' इत्यादिर्मन्त्रः उदात्तानुदात्तस्वरितरूपत्रैस्वर्येण प्रचयाधिकपूर्वस्वरैश्चातस्स्वर्येण च शाखाभेदेन पठ्यते । तत्र द्वयोस्समुच्चये मन्त्रावृत्त्यापाताद्विकल्पः । इति चेत् —

तानश्च मनुषु स्मृतः ॥ २२९ ॥

'यज्ञकर्मण्यजपन्यूङ्खसामसु' इति पाणिनीये जपप्रणवसामभिन्नमन्त्राणां यज्ञे ऐकस्वर्यमुक्तम् । तदनुमितवेद 'स्तानो यज्ञकर्मणि' इति । एकश्रुतौ तानशब्दः पूर्वाचार्यप्रसिद्धः । तस्मात्करणमन्त्रेष्वैकस्वर्यम् । स्वराध्ययनन्तु, अर्थविशेषपरिज्ञानार्थम् ।

इत्यग्निर्मूर्धा इत्यादियाज्यानुवाक्यादीनां तानेन प्रयोगाधिकरणम् ॥ १५ ॥

रथन्तरमुत्तरयोर्गायति इत्यादावुत्तरावर्णवशेन गानाधिकरणम् (१६)

'यद्योन्यां तदुत्तरयोर्गायति' इत्यादौ, 'कयानश्चित्र' इति योनिऋचि पञ्चमस्य इकारस्य आयिभावेन लोपदर्शनात्, 'अभीषुणस्सखीना'मित्युत्तरऋच्यपि पञ्चमस्थानसकारलोपे आयीभावः कार्यो यथाप्रकृति । इति चेत् —

साम्नां स्यादुत्तरासूह आयीभावविकारजः ।

इकारलोपेन नायीभावः । किन्तु सामगप्रसिद्ध्या ईकारो वृद्धः । तत्रैकारो भवति । तस्य पूर्वभागः चकारः । तौ विश्लेषेण गीयमानौ आयीभावं प्रपद्येते । तथा चोत्तरऋच्यपि द्वादशाक्षररेफस्योपरितन इकारः पूर्ववदैकारो विस्रस्यमानः आयीभवति, इत्युत्तरावर्णवशेनोहः । अन्यथा–अक्षरानभिव्यञ्जकत्वेन स्तोत्रासाधनत्वापातात् ।

इति रथन्तरमुत्तरयोर्गायति इत्यादावुत्तरावर्णवशेन गानाधिकरणम् ॥ १६ ॥

उत्तरयोः स्तोभातिदेशाधिकरणम् (१७)

तत्र वामदेव्ये औ ओहायीति स्तोभो नोत्तरयोरतिदेष्टव्यः । प्रथमवर्णवत् अक्षराभिव्यञ्जकगानमात्रातिदेशस्यैव वाचनिकत्वात् । इति चेत् —

स्तोभा अप्यतिदिश्येरन्

स्वरो वर्णविश्लेषो विराम इत्येते गीत्युपयोगित्वादतिदिश्यन्ते । तद्वत् गीतिकालपरिच्छेदद्वारा स्तुत्युपकारित्वेन च सामवदतिदेश्यास्स्तोभाः । अन्यथा तत्कृतगीत्यंशलोपात् तज्जोपकारहान्या वैगुण्यं स्यात् । अक्षराणां प्राधान्याद्वैषम्यम् ।

इत्युत्तरयोः स्तोभातिदेशाधिकरणम् ॥ १७ ॥

स्तोभलक्षणाधिकरणम् (१८)

स्तोभत्वं न विवर्णत्वम् । अग्न आयाहीत्यकारविकारे ओकारे गतत्वात् । नाधिकत्वम् मन्दतुत्वेत्यत्र दतुत्वेत्यक्षरत्रयं गानकाले त्रिरभ्यस्तं, तत्रातिव्याप्तेः । इति चेत् —

विवर्णमधिकन्तु ते ॥ २३० ॥

अधिकत्वे सति ऋग्विलक्षणवर्णः स्तोभ इति ।

इति स्तोभलक्षणाधिकरणम् ॥ १८ ॥

नीवारादिषु प्रोक्षणावघातादिधर्मानुष्ठानाधिकरणम् (१९)

गतस्सामोहः । अथ संस्कारोहः ।

वाजपेये 'नैवारश्चरुर्भवति' इति श्रुतम् । तत्र प्रकृतौ, 'व्रीहिभिर्यजेत' 'व्रीहीन्प्रोक्षति' 'व्रीहीनवहन्ति' इत्यादीनामाग्नेयाद्यपूर्वप्रयुक्तत्वं तत्र तत्रोक्तम् ।

तत्र सर्वोपसंहारेणायं वाक्यार्थः — 'प्रोक्षणसंस्कृतैः अवघातवितुषीकृतैश्च व्रीहिभिः पुरोडाशं कृत्वा तेन यजेत' इति । तत्र नीवाराणां व्रीहिस्थाने, चरोः पुरोडाशस्थाने निवेशात्, इतरस्य यथातिदेशमवस्थानात्, 'नैवारं चरुं निर्वपेदाग्नेयवत्' इत्युक्ते, व्रीहिस्थानापन्ननीवारादिषु सिद्ध ऊहः । पूर्वपक्षी तु, नीवारमध्वशननखपरिधीरापदानां—व्रीहिषडहोलूखलमुसलयूपगिरापदस्थानापत्तौ प्रमाणं नेति मन्यते । तं प्रत्याह —

व्रीह्यादिस्थानमापन्नाः स्युर्नीवारनखादयः ।

नैवारः इति तद्धितो विकारार्थस्तण्डुलरूपव्रीहिकार्यञ्च प्रत्यक्षं चरोः पुरोडाशकार्यकारित्वं देवतायोगात् ।

अतस्तत्प्रकृतिभूतव्रीहिस्थानत्वान्नीवारास्तद्धर्माल्लभन्ते । षडहाभावे मध्वशनं विधीयमानं, तत्कार्यकारित्वात्तद्धर्माल्लभते इति कृत्वा चिन्तायाः अन्यत्र फलम् । नखनिर्भिन्नचरौ नखानामुलूखलादिस्थानापन्नत्वं स्पष्टमिति तद्धर्मप्रोक्षणादिप्राप्तिः । स पशुकचातुर्मास्येषु 'परिधौ पशुं नियुञ्जीत' इत्यत्र यूपकार्ये नियोजने परिधिविधानात् स्थानापत्त्या तद्धर्मलाभः । 'ऐरं कृत्वोद्देय'मित्यत्र, गिरापदे निवृत्ते, तद्गीतेरिरापदस्य च परस्पराकांक्षया संबन्ध इति तद्गीतिलाभः ।

इति नीवारादिषु प्रोक्षणावघातादिधर्मानुष्ठानाधिकरणम् ॥ १९ ॥

परिधौ यूपधर्मानुष्ठानाधिकरणम् (२०)

नीवारादयो व्रीह्यादिकार्यार्थत्वेन विधानात् तत्तद्धर्माल्लभन्ते । अग्निपरिधानार्थतयोत्पन्नपरिधौ वचनात्पशुनिरोधकार्यार्थधर्माणां प्रकृतौ तत्कार्यशेषे अनुष्ठानात् तच्छेषे परिधौ ते भवन्ति । यूपत्वोत्पादकपरिव्याणादयो न तदुत्पत्त्यनर्हे स्युः, खलेवाल्यामिव । इति चेत् —

परिधौ यूपधर्माप्तिः स्यान्नियोजनसाधने ॥ २३१ ॥

अन्यार्थोत्पन्नस्यापि परिधेः, पुरोडाशार्थकपालस्य तुषोपवाप इव नियोजने वाचनिकविनियोगादङ्गत्वम् । अनङ्गत्वेऽपि साधनमात्रमिव धर्माः—कार्यं प्रतिगच्छतां द्वारं अङ्गत्वं [1]तादर्थ्यन्तु सदपि व्रीह्यादिष्वशाब्दत्वात्, शाब्दसाधनत्वमात्रेणैव ते द्वारतां भजन्ते । अस्ति च परिधेरपि साधनत्वं वचनात् । छेदनाञ्जनपरिव्याणादिविधयश्च इतरेतरानालोचनेन काष्ठगतं दृष्टमदृष्टं वा गमयन्ति, सर्वाणि नियोजनाङ्गम् । न तु यूपत्वं नामैकम् । परिधित्वविघातकतक्षणोच्छ्रयणाद्ययोगेऽपि, अञ्जनपरिव्याणादयः खलेवाल्यामिव नियोजनार्थे परिधौ कार्याः ।

इति परिधौ यूपधर्मानुष्ठानाधिकरणम् ॥ २० ॥

शृतादौ प्रणीताधर्मानुष्ठानाधिकरणम् (२१)

अभ्युदयेष्टौ दधिशृतयोः प्रणीताधर्मोत्पवनादयो न कार्याः, प्रणयनं प्रत्यङ्गत्वस्य साधनत्वस्य वा अश्रवणात् । इति चेत् —

शृतदध्नोरभ्युदये प्रणीताकार्यमिष्यते ।

आर्थिकसाधनेऽपि साधनत्वस्य द्वारत्वप्रयोजकस्य सत्त्वात् कार्याः । अत्र चरुश्रपणहेतुत्वं वाचनिकमिति केचित् ।

इति शृतादौ प्रणीताधर्मानुष्ठानाधिकरणम् ॥ २१ ॥

---

[1] इदं पदं मातृकायां नास्ति ।

बृहद्रथन्तरयोः धर्मव्यवस्थाधिकरणम् (२२)

ज्योतिष्टोमे पृष्ठसाधनत्वेन बृहद्रथन्तरे विहिते। तयोर्धर्माः– 'रथन्तरे प्रस्तूयमाने संमीलयेत् नोच्चैर्गेयं–नव नवगेय'मिति। बृहति प्रस्तूयमाने समुद्रं मनसा ध्यायेत्, उच्चैर्गेयम्' इत्यादि। तदिदं धर्मद्वयमेकापूर्वसाधनधर्मत्वात् व्रीहिधर्मा यवेष्विव सङ्कीयते। न च चित्रत्व-शूरत्वादिरूपप्रकार-भेदात्, अपूर्वैक्येऽपि, व्रीहिस्तुवादाविव न संकर इति शङ्क्यम्; अक्षराभिव्यक्त्यंशद्वारा तौल्यात्। उक्तप्रकारस्य ऋग्धर्मत्वेन गानधर्मत्वाभावाच्च। अतस्सङ्करः। इति चेत् —

रथन्तरबृहद्धर्मा यथाशब्दं व्यवस्थिताः ॥ २३२ ॥

अपूर्वैक्येऽपि 'रथन्तरे' 'बृहति' इति निर्देशावैयर्थ्याय; 'उच्चैः' [1]'नीचैः' इत्यनयोस्समुच्चयायोगेन च व्यवस्था। व्रीहियवयोरेवं निर्देशादृष्टेः हविः प्रकृतित्वसाम्याद्युक्तस्सङ्करः। न चापूर्वैक्यम्; 'बृहत्पृष्ठं भवति' 'रथन्तरपृष्ठं भवति' इति विधिभेदेन स्तोत्रभेदात्, अदृष्टार्थयोरपि विकल्पस्य वाचनिकत्वादसमुच्चयः। 'पृष्ठैः स्तुवते' इति तु नोत्पत्तिविधिरिति तु[2] सप्तमे स्थितम्। अतोऽपूर्वभेदे न सङ्करशङ्कापि।

इति बृहदथन्तरयोः धर्मव्यवस्थाधिकरणम् ॥ २२ ॥

कण्वरथन्तरे बृहद्रथन्तरधर्मसमुच्चयाधिकरणम् (२३)

वैश्यस्तोमे 'कण्वरथन्तरं पृष्ठं भवति' इति श्रुते प्रकृतिवत् धर्मविकल्पः। विकल्पितसाम-स्थानापन्नस्यापि तथैव धर्मग्राहित्वात्। इति चेत् —

कण्वे समुच्चितास्ते च

प्रकृतौ निर्देशभेदकृता व्यवस्था। इदन्त्वप्राकृतं साम, उभयकार्ये विधीयमानं समुच्चित्यैव धर्मान् गृह्णी-यात्। इति भाष्यम्।

वार्तिके तु, अपूर्वैक्येऽपि धर्माणां प्रकृतौ द्वारभेदात् विकृतावपि भिन्नद्वारत्वप्राप्तौ, तदुभयकार्ये विधीयमानं कण्वरथन्तरं, कदाचित् रथन्तरकार्यं–कदाचित् बृहत्कार्यं साधयत्, तयोर्धर्मान्विकल्पेनैव गृह्णीयात्। अपूर्वभेदे तु, रथन्तरसाध्यापूर्वं साधयतस्तद्धर्मवत्ता–बृहदपूर्वं साधयतः अतद्धर्मवत्ता–इति न सङ्करः, इत्युक्तम्। तदाह —

गोसवादौ व्यवस्थिताः।

इति कण्वरथन्तरे बृहद्रथन्तरधर्मसमुच्चयाधिकरणम् ॥ २३ ॥

---

[1] इदं पदं मातृकायां नास्ति। [2] अयं 'तु' शब्दः आम्रेडितः।

द्विसामके बृहद्रथन्तरधर्मयोर्व्यवस्थाधिकरणम् (२४)

प्रकृतिप्राप्तसामद्वयसमुच्चयः 'गोसव उभे कुर्यात्' 'संसव उभे कुर्यात्' इति श्रुतः। तत्र द्वयोस्समुच्चित्योभयकार्यकरत्वात् धर्मसमुच्चयः। इति चेत् —

गोसवे तु व्यवस्थैव धर्माणां सामगत्वतः ॥ २३३ ॥

भाष्यमते स्तुत्येकदेशस्य रथन्तरेण, एकदेशान्तरस्य बृहताच साध्यत्वात्, तत्तत्साम्नि तत्तद्धर्मव्यवस्था। वार्तिकमते तु स्तोत्रयोरेव समुच्चयात् धर्मव्यवस्था स्फुटैव।

इति द्विसामके बृहद्रथन्तरधर्मयोर्व्यवस्थाधिकरणम् ॥ २४ ॥

सौर्यादिषु पार्वणहोमाद्यननुष्ठानाधिकरणम् (२५)

'स्रुवेण पार्वणौ होमौ जुहोति' इति पर्वदेवत्यौ होमौ तद्धितश्रुतेर्विहितौ। [1] 'प्रीयते देवेभ्यो हविरस्मिन्' इति कालः पर्व। तद्दैवत्य होमयोः प्रयाजादिवदारादुपकारकत्वात्, सौर्यादावप्यतिदेशः। इति चेत् —

विकृतावतिदेशोऽस्ति नैव पार्वणहोमयोः।

भावव्युत्पन्नः पर्वशब्दः प्रकृतक्रियापरः। पृणति इति कर्मणः पर्वशब्दव्युत्पत्तेः। तत्र प्रतित्रिकमग्नीषोमयोरिव व्यासक्तं देवतात्वम्। होमावपि सामवायिकाङ्गच्छलाद्धोमसंघद्वयसंस्कारार्थौ। न च सौर्यादौ संस्कार्यं तत्स्थानापन्नं वास्ति, एकैकविकारत्वात्तेषामिति न तत्र तयोः प्रवृत्तिः।

'आग्नावैष्णवमेकादशकपालं निर्वपेत् प्रातस्सवने सरस्वतीमाज्यस्य बार्हस्पत्यश्चरुः'। 'आग्नावैष्णवमेकादशकपालं निर्वपेन्माध्यन्दिने सरस्वतीम्' इत्यादि 'आग्नावैष्णवमेकादशकपालं निर्वपेत् तृतीयसवने सरस्वतीम्' इत्यादित्रिकत्रयमेकफलकम्। तेषु त्रिकेषु प्रातःकालिकानामेककालीनत्वात्, प्रयोगैक्यम्। एवमन्यत्रिकयोः। तत्र पौर्णमासत्रिकस्थानपतितत्रिकसंस्कारः, त्रिकापूर्वप्रयुक्तौ मा बाधीति, उत्तमप्रयाजस्विष्टकृत्सूक्तवाकन्यायेन होमातिदेशः। एवममावास्यायामप्यस्त्विति केचित्।

इति सौर्यादिषु पार्वणहोमाद्यननुष्ठानाधिकरणम् ॥ २५ ॥

दर्शपूर्णमासयोर्होमद्वयस्य व्यवस्थाधिकरणम् (२६)

सूक्तवाकन्यायेन संस्कार्यानुरोधान्निष्कर्षः।

इति दर्शपूर्णमासयोर्होमद्वयस्य व्यवस्थाधिकरणम् ॥ २६ ॥

---

[1] प्रियते—इति ग्रन्थान्तरे।

समिदादीनां यागनामताधिकरणम् (२७)

'समिधो यजति' इत्यादौ द्वितीयान्तशब्दैर्देवता उद्दिश्य सामवायिकाङ्गत्वयागो विधीयते। इति चेत् —

समिदाद्याः प्रयाजास्तु स्युरारादुपकारकाः।

तद्धितचतुर्थो मन्त्रस्य वा देवतात्वप्रतिपादकत्वात्, द्वितीयायाः कर्मत्वबोधित्वात्, देवतायास्त्यागे कर्मत्वायोगात्, विष्णुं यजति' इत्यद्यनुवादेषु उद्देशगतकर्मत्वोपचारात्, समिदादिशब्दानाञ्च मन्त्रप्राप्तदेवतानुवादकत्वनामत्वयोरन्यतरत्वात्, संस्कृतदेवतायाः भूतभाव्युपयोगाभावेन सक्तुवद्वैयर्थ्यात्। त्रिकसंस्कारस्य तपूर्वार्थत्वेन वैषम्यात्। आरादुपकारकास्समिदादयः।

इति समिदादीनां यागनामताधिकरणम् ॥ २७ ॥

इति लघुवार्तिकटीकायां नवमस्य द्वितीयः पादः।

॥ अथ तृतीयः पादः ॥

विकृतौ मन्त्रगतव्रीह्यादिशब्दानामूहाधिकरणम् (१)

'अग्नये जुष्टं निर्वपामि–व्रीहीणां मेध सुमनस्यमानः' इत्यादिद्रव्यदेवताप्रकाशनार्था मन्त्राः सौर्यनैवारपुरोडाशादौ नोह्याः। मन्त्रस्वरूपस्यातिदेशशास्त्रप्रापितस्य, अन्यथाकरणे शास्त्रविरोधात्। प्राकृतकार्याय अत्र देवतादिप्रकाशनं तु, अग्न्यादिपदैरेव लक्षणादिना भविष्यति। 'ऐन्द्र्या गार्हपत्य'-मित्यत्र मन्त्रगतेन्द्रपदस्येव गार्हपत्ये। अन्यथा तत्राप्यूहापत्तेः। तस्मान्मन्त्रस्यान्यथाभावः–प्रकृतौ शक्तस्य विकृतौ लाक्षणिकत्वमेव भवति। न पदान्तरप्रक्षेपः। इति चेत् —

द्रव्यदेवतमूह्यं स्यात्।

प्रकृतावग्निपदं न स्वरूपविवक्षया पतितम्। अदृष्टार्थतापातात्। किन्तु देवतावाचिपदविवक्षया। अतो विकृतावपि मन्त्रो देवतावाचिपदयुक्त एव प्रयोक्तव्यः, इति परित्यज्याग्निपदं सूर्यपदं प्रक्षेप्यम्। व्रीहिपदमपि हविःप्रकृतिद्रव्यवाचि, अवाच्याभिप्रायमित्यूहः। ऐन्द्रीस्वरूपेणैव विनियुक्ता, न तु उपस्थेयदेवतावाचिपदयुक्ततयेति वैषम्यम्।

इति विकृतौ मन्त्रगतव्रीह्यादिशब्दानामूहाधिकरणम् ॥ १ ॥

पौण्डरीकेषु बर्हिष्षु स्तरममन्त्रस्योहाधिकरणम् (२)

'मौद्गं चरुं निर्वपेत् श्रियै श्रीकामः' इति प्रकृत्य 'पौण्डरीकाणि बर्हींषि' इति श्रुतम्। प्रकृतौ 'दर्भैस्स्तृणीत हरितैः' इति बर्हिस्संस्तरणमन्त्रः। तत्र दर्भपदं पुण्डरीकैरित्यूह्यम्। हरित-

पदन्तु प्रकृतौ द्रव्यप्रकाशकमिति अदृष्टार्थं–विकृतावपि तथैवेति नोह्यम् । इति चेत् —

तथा द्रव्यविशेषणम् ॥ २३५ ॥

गुणद्वारा गुणिप्रकाशकत्वोपपत्तेः नादृष्टार्थमिति रक्तैः–इत्यूह्यम् ।

इति पौण्डरीकेषु बर्हिष्षु स्तरणमन्त्रस्योर्हाधिकरणम् ॥ २ ॥

अग्नीषोमीयपशौ लौकिकयूपस्पर्शप्रायश्चित्ताधिकरणम् (३)

'यद्येकं यूपमुपस्पृशेत् एष ते वायो' इति ब्रूयात्, यदि द्वौ–एतौ ते वायो इति, यदि बहून् एते ते वायव इति–प्रायश्चित्तं लौकिकवैदिकस्पर्शनयोः प्रकरणाद्वैदिक एवेति चेत् —

यूपस्य लौकिकस्पर्शे प्रायश्चित्तमुदीरितम् ।

'यूपो वै यज्ञस्य दुरिष्टमामुञ्चति' तस्माद्यूपो नोपस्प्रष्टव्यः' इति प्रतिषिध्य, अनन्तरं यद्येकमित्याद्युच्यमानं दोषनिर्घातार्थमित्यवगमात्, तस्य च प्रतिषिद्धलौकिके संभवात्, तत्रैव प्रायश्चित्तम् ।

इत्यग्नीषोमीयपशौ लौकिकयूपस्पर्शप्रायश्चित्ताधिकरणम् ॥ ३ ॥

द्विपशुयागे पाशमन्त्रयोः एकवचनान्तबहुवचनान्तपदयोः द्विवचनान्तत्वेनोहाधिकरणम् (४)

अग्नीषोमीये पशौ पाशोन्मोचनमन्त्रौ–अदितिः पाशं प्रमुमोक्तु–पाशान्प्रमुमोक्तुः' इति च । तयोः प्रकरणे निवेशो वक्ष्यते । तत्र 'मैत्रं श्वेतमालभेत–वारुणं कृष्णम्' इत्यादिद्विपशुकेषु, बहुवचनान्तस्य, प्रकृतौ बहुत्वस्य निर्देशमात्रार्थतया, विकृतावपि तथात्वसंभवात् अविकारेण प्रवृत्तिः । एकवचनान्तस्य प्रकृतौ समवेताभिधायितया ऊहः स्यात् । यद्वा संख्याविशिष्टपाशस्य समस्याभिधानाय एकवचनान्तस्य ऊहेन प्रवृत्तिः । बहुवचनान्तस्य असमस्याभिधायिनोऽप्रवृत्तिः । द्वयोश्चोदकप्राप्तत्वाविशेषात्, आद्यस्योहेन द्वितीयस्याविकारेण प्रवृत्तिर्वा । इति चेत् —

द्वावप्यूह्यौ द्विपशुके प्रयोगे पाशमन्त्रकौ ॥ २३६ ॥

सत्यं द्वयोः प्रवृत्तिः, बहुवचनान्तस्याप्यूहेनैव । प्रकृतावेकस्मिन्नपि बहुवचनं छान्दसम् । न द्वयोः–तथा अदर्शनात् । विकृतौ स्वायत्तप्रयोगे असाधुप्रयोगायोगात्, तस्याप्यूहः इति द्वयोरूहेनैव प्रवृत्तिः ।

इति द्विपशुयागे पाशमन्त्रयोः एकवचनान्तबहुवचनान्तपदयोः द्विवचनन्तत्वेनोहाधिकरणम् ॥ ४ ॥

अग्नीषोमीयपशौ पाशैकत्वपाशबहुत्वाभिधायिमन्त्रयो-र्विकल्पाधिकरणम् (५)

बहुवचनान्तमन्त्रस्य प्रकृतावसमवेतार्थत्वात् यत्र बहुपाशकत्वं तत्रोत्कर्षः। इति चेत् —

पाशानित्येष मन्त्रोऽपि निवेशं प्रकृतौ भजेत् ।

प्रातिपदिकार्थपाशस्य द्वितीयार्थकर्मत्वस्य च समवेततया, उपसर्जनाविवक्षितबहुत्वानुरोधेन नोत्कर्षः। पाशकर्मकोन्मोचनस्यैव विवक्षणात्। अतो बहुवचनमवयवबहुत्वपरं छान्दसम्।

इत्यग्नीषोमीयपशौ पाशैकत्वपाशबहुत्वाभिधायिमन्त्रयोर्विकल्पाधिकरणम् ॥ ५ ॥

दर्शपूर्णमासयोर्द्विपत्नीकप्रयोगे 'पत्नीं संनह्य' इति मन्त्रस्यानूहाधिकरणम् (६)

दर्शादौ 'पत्नीं संनह्य' इति मन्त्रः, एकपत्नीकप्रयोगे समवेतार्थः, द्विबहुपत्नीकेषु ऊहितव्यः। इति चेत् —

प्रकृतौ पत्न्यनेकत्वे पत्नीमित्यस्य नोह्यता ॥ २३७ ॥

एककर्मणि प्रयोगाणां समानविधानतया प्रकृतिविकृतिभावायोगात्, एकपत्नीकप्रयोगे समवेतसंख्याभिधानतात्पर्यकल्पनानुपपत्तेः एकवचनस्य च निर्देशमात्रार्थत्वे नादृष्टार्थत्वान्नोहः। न चैकवचनबलात् द्विबहुपत्नीकप्रयोगयोरमन्त्रत्वम्—पाशन्यायेन अविवक्षितसंख्यायास्तादृक् सामर्थ्याभावात्। तस्मात्सर्वत्र प्रकृतावविकारप्रयोगः।

इति दर्शपूर्णमासयोः द्विपत्नीकप्रयोगे पत्नीं संनह्य इति मन्त्रस्यानूहाधिकरणम् ॥ ६ ॥

द्विबहुपत्नीककर्तृकविकृतिप्रयोगेऽपि पत्नीं संनह्य इति मन्त्रस्यानूहाधिकरणम् (७)

आम्नानसामर्थ्यात्प्रकृतौ [1]अनेकपत्नीकप्रयोगयोरविकारेऽपि विकृतावनाम्नानादूहितव्यः। इति चेत्—

विकृतौ तदनेकत्वेऽप्यूह्यतास्य न विद्यते ।

निर्देशमात्रार्थतया प्रकृतावदृष्टार्थस्य विकृतावपि तथात्वसंभवान्नोहः। न चासाधुत्वम्—द्वित्वबहुत्वयोरेकवचनस्य छान्दसत्वात्। बहुवचनस्य न द्वित्वे छान्दसत्वमिति पाशवैषम्यम्।

इति द्विबहुपत्नीककर्तृकविकृतिप्रयोगेऽपि पत्नीं संनह्य इति मन्त्रस्यानूहाधिकरणम् ॥ ७ ॥

---

[1] एकानेकपत्नीकप्रयोगयोः इति साधु।

सवनीयपशूनामग्नीषोमीयसमानविधानत्वे प्रास्मा अग्निं इति मन्त्र अनूहाधिकरणम् (८)

संस्थानां समानविधानत्वपूर्वपक्षस्य अग्नीषोमीयेणान्येषां पशूनां सामानविध्यस्य च पूर्वाधिकरणोक्तोपजावनेन प्रयोजनमाह —

तथोक्थ्यादेरैकविध्ये प्रास्मा इत्यस्य नोह्यता ॥ २३८ ॥

उक्थ्यषोडश्योर्द्विबहुपशुकत्वेऽपि पत्नीशब्दवत् प्रास्मा इत्येकवचनस्य निर्देशमात्रार्थत्वान्नोहः । संस्थानामग्निष्टोमविकारत्व, पशूनामग्नीषोमीयविकारत्वे चोह एव । न च मेषीन्यायेन लोपः पूर्वपक्षे शङ्क्यः ; पुंस्त्वस्य स्त्रियामत्यन्ताविद्यमानत्ववत् एकत्वे तथात्वाभावात् । प्रत्येकवृत्त्येकत्वाभिप्रायत्वोपपत्तेः । अतः पूर्वपक्षे नोहः । सिद्धान्ते तु ऊह एव ।

इति सवनीयपशूनामग्नीषोमीयसमानविधानत्वे प्रास्मा अग्निं इति मन्त्रस्यानूहाधिकरणम् ॥ ८ ॥

नीवाराणां व्रीहिप्रतिनिधित्वे मन्त्रे व्रीहिशब्दस्यानूहाधिकरणम् (९)

श्रुतद्रव्याचारे नीवारादिप्रतिनिधौ, 'व्रीहीणां मेधे'त्यस्य समवेतार्थत्वायोहः । इति चेत् —

व्रीहिप्रतिनिधावूहो नीवारादौ न विद्यते ।

तृतीयस्य षष्ठचरणे मुख्येन प्रतिनिधेः सामानविध्यस्योक्तेः, व्रीह्यवयवबुद्ध्या नीवारोपादानात् नीवारत्वेनानङ्गत्वान्नोहः ।

इति नीवाराणां व्रीहिप्रतिनिधित्वे मन्त्रे व्रीहिशब्दस्यानूहाधिकरणम् ॥ ९ ॥

द्विपशुयागे 'सूर्यं चक्षुर्गमयतात्' इत्यादिमन्त्राणामनूहाधिकरणम् (१०)

अग्नीषोमीये अध्रिगुप्रैषे 'सूर्यं चक्षुर्गमयतात्' इत्यादिसंसर्गिद्रव्यवाचकपदानां, द्विबहुपशुकप्रयोगेषु ऊहः । पशुसंख्यानुरोधात् । न गोलकभेदात्–प्रकृतावपि द्विवचनापत्तेः । अस्येति पशूपादानात् तदुपाधिकमेकवचनं, मैत्रं श्याममित्यादौ द्विवचनान्तं–आग्नेयं कृष्णाग्रीवमित्यादौ बहुवचनान्तमूह्यम् । इति चेत् —

नोह्यास्स्युः पश्वनेकत्वे संसर्गिद्रव्यवाचकाः ॥ २३९ ॥

निर्गतचाक्षुषतेजसां (प्रदीपेतेजसां) प्रदीपप्रभान्यायेनैकीभूतानां सूर्यगमनसंभवान्नोहः ।

इति द्विपशुयागे 'सूर्यं चक्षुर्गमयतात्' इत्यादिमन्त्राणामनूहाधिकरणम् ॥ १० ॥

---

[1] इदमधिकम् ।

द्विपशुयागे अध्रिगुप्रैषे एकधेत्यस्य मन्त्रस्य अभ्यासाधिकरणम् (११)

तत्रैव 'एकधास्य त्वच माच्छ्यतात्' इत्यत्र, एकधाशब्दस्य प्रकृतौ त्वगेकत्वेन साहित्यार्थत्वायोगात् एकप्रयत्नार्थत्वेऽपि, विकृतावविकारप्रयोगाय, 'एकधा गाः पायय' इतिवत् साहित्यार्थकत्वमिति नाभ्यासः। इति चेत् —

तत्रत्वभ्यसितव्यत्वमेकधेति पदं व्रजेत्।

चोदकस्य कार्यप्रधानतया शब्दपरत्वाभावात्, यथा प्रकृत्येकप्रयत्नसाध्यत्वं तदर्थः। प्रत्येकं त्वचोऽभिधातुं, 'एकधा–एकधा' इत्यभ्यासः।

इति द्विपशुयागे अध्रिगुप्रैषे एकधेत्यस्य मन्त्रस्याभ्यासाधिकरणम् ॥ १२ ॥

द्विपश्वादिपशुविकृतौ मेधपतिशब्दस्य देवतानुसारेणोहाधिकरणम् (१३)

तत्रैव 'उपनयत मेध्यादुर आशासाना मेधपतिभ्यां मेधम्' इति क्वचित् 'मेधपतये मेधम्' इत्यपि श्रुतम्। तत्र मेधस्य पशोः स्वामी-यजमानश्च देवता च। तत्र देवताद्वयस्य दम्पत्योश्च बहुत्वात्, एकवचनयोः प्रकृतावसमवेतार्थत्वात्, विकृतावप्यनूहः। अर्थसंभवे तदनुपपत्तेः, द्विवचनस्य प्रकृतौ देवतापरस्य विकृतावपि तत्पर ऊहः। एकवचनस्य कर्तृपरः। एकमन्त्रस्य द्विवत् शाखाभेदेन वैलक्षण्येऽपि एकार्थकत्वस्यावश्यवाच्यत्वात् द्विवचनस्य कर्तृत्वाधिष्ठानपर ऊहः। एकवचनान्तस्य देवतात्वपरः।

इति द्विपश्वादिपशुविकृतौ मेधपतिशब्दस्य देवतानुसारेणोहाधिकरणम् ॥ १२ ॥

बहुदैवत्ये पशावपि एकवचनान्तमेधपतिशब्दस्य अनूहाधिकरणम् (१३)

बहुदैवत्यवैश्वदेवादिपशुषु एकवन्निगदोऽप्यूह्यो बहुष्वेकवचनायोगात्। इति चेत् —

तत्रैकवचनान्तस्य नास्त्यूहो बहुदैवते ॥ २४० ॥

देवतात्वाभिप्रायैकवचनस्य वैश्वदेवादिसमवेतत्वान्नोहः।

इति बहुदैवत्ये पशावपि एकवचनान्तमेधपतिशब्दस्य अनूहाधिकरणम् ॥ १३ ॥

एकादशिन्यां एकवचनान्तमेधपतिशब्दस्योहाधिकरणम् (१४)

'आग्नेयः कृष्णग्रीवः सारस्वती मेषी' इत्याद्यैकादशिनादिपशुगणेषु, एकवचनस्य देवतागणाभिप्रायत्वात् नोहः इति चेत् —

देवतारूपभेदे तु तत्राप्यूहः प्रवर्तते ।

देवतात्वस्य नानात्वात् स्पष्ट एवोहः ।

इत्येकादशिन्यामेकवचनान्तस्य मेधपतिशब्दस्योहाधिकरणम् ॥ १४ ॥

इति लघुवार्तिकटीकायां नवमस्य तृतीयः पादः ।

॥ अथ चतुर्थः पादः ॥

'षड्विंशतिरस्य वंक्रयः' इत्यादौ समस्योहाधिकरणम् (१)

तत्रैव 'षड्विंशतिरस्य वंक्रयः' इति श्रुतं द्विपश्वादिषु गणेषु चोदकप्राप्तम् । तत्र षड्विंशति संख्यापश्वोस्संबन्धपरत्वाद्वाक्यस्य, प्रतिपशुतत्प्रकाशनाय 'षड्विंशतिरस्यास्य वंक्रयः' इत्यूहः । न चाकरणमन्त्रतया अविकारश्शङ्क्यः, शमितॄणामन्यूनोद्धरणाय पार्श्वसाकल्यवादतोदृष्टार्थत्वात् । तथा च संख्याप्रधानत्वात्, 'षड्विंशती अनयोर्वंक्रयः' इति वा ऊहः । चोदितपशुप्रधानं वाक्यं 'षड्विंशति वंक्रियः पशुः' इति । ततश्च षड्विंशतिरस्यास्य वंक्रयः' इति वा ऊहः । इति चेत् —

वंक्रीणां पश्वनेकत्वे समस्य वचनं मतम् ॥ २४१ ॥

पशोश्चोदितत्वेऽपि हृदयादिद्वारैव यागसाधनत्वात्, वंक्रीप्रधानत्वम् । अत एव 'ता अनुष्ठ्योच्च्यावयतात्' इति प्रतिनिर्देशः । पशोः संख्याप्राधान्ये तामिति वा स्यात् । अतो द्विपञ्चाशदनयोर्वंक्रयः' इत्यादिक्रमेण समस्य वचनम् । न चाश्वलायनादिभिः प्रतिपशुभेदेन वंक्रीणां प्रकाशनाय षड्विंशतिपदाभ्यास उक्तः इति शङ्क्यम् । प्रकृतौ पार्श्वद्वयस्य समस्यवचनवत् विकृतावपि समस्यवचनस्यैव युक्ततरत्वात् ।

इति षड्विंशतिरस्य वंक्रयः इत्यादौ समस्योहाधिकरणम् ॥ १ ॥

चतुस्त्रिंशद्वाजिन; इत्यनेनाश्वमेधिकसवनीयाश्वस्य चतुस्त्रिंशद्वंक्रिरूप-विशेषमनादृत्य समस्यवचनाधिकरणम् (२)

अस्वमेधे सवनीयास्त्रयः—'अश्वस्तूपरोगोमृगस्ते प्राजापत्याः' इति । तत्र प्राकृताभिगुवचनं तूपरगोमृगयोः । अश्वस्य तु, 'चतुर्त्रिंशद्वाजिनो देवबन्धोर्वंक्रीरश्वस्य स्वधितिस्समेति' इति वैशेषिकमन्त्राम्नानात् । इति चेत् —

प्राकृतेऽश्वादिवंक्रीणां समस्यैव वचो भवेत् ।

'न चतुस्त्रिंशदिति ब्रूयात्' इति वैशेषिकस्य प्रतिषेधे 'षड्विंशतिरित्येव ब्रूयात्' इति चोदकप्राप्तानु-

वादायाप्राकृत एव 'षड्विंशतिरेषां वंक्रयः' इति समस्य वचनमिति भाष्यम् ।

इति चतुस्त्रिंशद्वाजिनः इत्यनेनाश्वमेधिकसवनीयाश्वस्य चतुस्त्रिंशद्वंक्रिरूपविशेषवचन-
मनादृत्य समस्यवचनाधिकरणम् ॥ २ ॥

अत्र वार्तिकोक्तविशेषप्रदर्शनायाहः—

न्यायद्वयं वक्ष्यमाणं टुप्टीकायामुदीरितम् ॥ २४२ ॥

आश्वमेधिकसवनीयाश्वस्य, चतुस्त्रिंशद्वाजिनः इत्यस्य प्राकृतमन्त्रेण सह विकल्पाधिकरणम् (३)

'न चतुस्त्रिंशदिति ब्रूयात्' इति ऋक्प्रतिषेधो गिरापदप्रतिषेधवन्नियतः – न वैकल्पिकः । पाठप्राप्तायाः प्रत्यक्षविहितेरापदेनेव, 'षड्विंशतिरित्येव ब्रूयात्' इति वचनविहितप्राकृतेन सर्वधा-बाधात् । इति चेत् —

निषिद्धोऽपि चतुस्त्रिंशन्मन्त्रः पक्षे प्रवर्तते ।

इरापदस्य प्रत्यक्षविधिविधानात् पाठमात्र[1]प्राप्तेरापदस्य निवृत्तेः प्राप्तायाः अनुवादो न गिरेति निषेधः । 'षड्विंशतिरित्येव' इति तु, एवकारार्थविधिः । तद्विशेषणं ब्रूयादिति प्रकृतिप्राप्तानुवादः । एव-कारार्थश्च ऋक्प्रतिषेधः । स च प्राप्तिपूर्वकः, प्रापकं विधिमनुजानन्, तदुपजीवनेन पश्चात्प्रवर्तते । अतो विहितप्रतिषिद्धत्वाद्विकल्पः ।

इत्याश्वमेधिकसवनीयाश्वस्य, चतुस्त्रिंशद्वाजिनः इत्यस्य प्राकृतमन्त्रेण
सह विकल्पाधिकरणम् ॥ ३ ॥

न चतुस्त्रिंशदिति ब्रूयात् इति निषेधेन समग्राया ऋच एव प्रतिषेधाधिकरणम् (४)

न चतुस्त्रिंशदिति गिरापदप्रतिषेधवत् चतुस्त्रिंशत्पदमात्रप्रतिषेधः । षड्विंशतिरिति तु तस्या-मेव पदमात्रविधिः । अतः षड्विंशतिर्वाजिनो देवबन्धोरित्यश्वस्य मन्त्रः । प्राकृतस्य च तदंशे बाधः । इति चेत् —

प्राकृतस्यापि करणं समस्तप्रतिषेधतः ॥ २४३ ॥

नात्र गिरापदप्रतिषेधवच्चतुस्त्रिंशत्पदप्रतिषेधः । तथात्वे तत्स्थाने षड्विंशतिपदाप्राप्त्या तस्यापि विधौ

---

[1] पाठमात्रप्राप्तगिरापदस्य—इति साधु ।

वाक्यभेदः स्यात् । इरापदविधौ तु गिरापदप्रतिषेधानुवादो घटते । न चात्र षड्विंशतिपदविधिः । एवकारोपहतशक्तित्वादित्युक्तम् । अतः आद्यप्रतीकेन समस्तऋचः प्रतिषेधे, चोदकप्राप्तानुवादः षड्विंशतिरिति ब्रूयादिति । ततश्च ऋचो विकल्पनात्, यदा ऋक्प्रवृत्तिः तदा तूपरगोमृगयोः समस्य-वचनम् । यदा निवृत्तिः तदा त्रयाणां षडशीतिरेषां इति समस्य वचनम् ।

इति न चतुस्त्रिंशदिति ब्रूयात् इति निषेधेन समग्राया ऋच
एव प्रतिषेधाधिकरणम् ॥ ४ ॥

अग्नीषोमीयपशावुरूकपदेन वपाभिधानाधिकरणम् (५)

तत्रैव 'वनिष्टुमस्य माराविष्टोरूकं मन्यमानाः' इति श्रुतम् । तत्र रभेदात् उलूकबुद्ध्या वनिष्ठोर्लवनप्रतिषेधः । इति चेत् —

उरूकेति वपायां स्यात्

न तावल्लवननिषेधः, तस्य विधानात् । नाप्युलूकसादृश्यबुद्धिनिषेधः अदृष्टार्थतापातात् । तस्माद्वपोद्धरणकाले, वपां मन्यमानाः वनिष्टुं माराविष्ट इति दृष्टार्थ एव निषेधः । उरु=विस्तीर्णं, उकः=मेदः यत्रेति अवयवार्थद्वारा मेदस्विन्यां वपायां युक्तउरूकशब्दः । तथाचानेकवपासु विकृतिषु उरूकशब्द ऊह्यः ।

इत्यग्नीषोमीयपशावुरूकपदेन वपाभिधानाधिकरणम् ॥ ५ ॥

प्रशसाबाहू इत्यत्र प्रशसापदस्य प्रशंसापरत्वाधिकरणम् (६)

तत्रैव वाक्यान्तरं 'प्रशसा बाहू कृणुतात्' इति । तत्र शसु हिंसायां इति सोपसर्गधातोः उत्पन्नसकारान्ततृतीयैकवचनं प्रशसेति । तच्चासेर्वाचकम् । अतो बाह्वोश्छेदनहेतुरुच्यते । इति चेत् —

प्रशसेति प्रशस्तयोः

स्वधिति साधनकत्वाद्विशसनस्य नासेः प्रकाशनमुपयुज्यते । मन्त्रवर्णात् बाहूद्धरणे तद्विधिस्त्वतिक्लिष्टः कल्प्यः । तस्मात् शंसु स्तुतौ इत्यस्मादुत्पन्नः प्रशसाविति द्वितीयाद्विवचनान्तः । तस्य औकारलोपाकारादेशयोः छान्दसयोः प्रशसेति, प्रशस्ताविति यावत् । साकल्योद्धरणश्च प्रशंसेति बाहुविवृद्धावूहः ।

इति प्रशसा बाहू इत्यत्रप्रशसापदस्य प्रशंसापरत्वाधिकरणम् ॥ ७ ॥

श्येनमस्य वक्षः इत्यादौ श्येनादिशब्दानां कार्त्स्न्यवचनाधिकरणम् (७)

तत्रैव 'श्येनमस्य वक्षः कृणुतात्' इति श्रुते वक्ष उद्धृत्य कर्तनादिना पत्रपुच्छवच्चोदितघटनेन श्येनाकारं कर्तव्यम् । अमी पिष्टपिण्डाः सिंहाः क्रियन्ताम्' इत्यादिवत् । इति चेत् —

श्येनमित्यादिकं तस्य कार्त्स्न्यस्य प्रतिपादकम् ॥ २४४ ॥

एवं हि अदृष्टार्थत्वहविर्विनाशयोः प्रसङ्गात्, साकल्येनोद्धरणविवक्षया श्येनशब्दः प्रयुक्तः। तस्य स्वत एव सदृशत्वात्। एवमंसादिष्वपि। एतदेव 'गात्रं गात्रमस्यानूनं कृणुतात्' इति श्रुतम्।

इति श्येनमस्य वक्षः कृणुतात् इत्यादौ श्येनादिशब्दानां
कार्त्स्न्यवचनाधिकरणम् ॥ ७ ॥

दर्शार्थोद्धृताग्निलोपे प्रायश्चित्तरूपज्योतिष्मत्याः अननुष्ठानाधिकरणम् (८)

अग्निहोत्रे 'यस्याग्निरुद्धृतोऽहुतेऽग्निहोत्र उद्वायेदग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेत्' इति श्रुतम्। तत्राग्निविशिष्टे नाशे निमित्ते, आरादुपकारिकेयमिष्टिर्विधीयते, नोद्धानविशिष्टाग्नौ निमित्ते। तस्य चागम्यत्वात्। श्रौतोद्धानस्यैव निमित्तत्वसंभवात्। निमित्तञ्च न प्रकरणेन विशेष्टुं शक्यमिति दर्शार्थोद्धृतोद्धानेऽपि स्यात्प्रायश्चित्तम्। इति चेत् —

दर्शार्थं नाग्निहोत्रस्य कालोद्धाननिमित्तकम्।

अग्निसंबन्धोद्धानस्य नित्यत्वात्, न निमित्तता। अग्निव्याप्तत्वन्तु घटादिनाशाव्यापि। श्रुतउद्धान-व्याप्तोऽग्निः कादाचित्को निमित्तम्। इष्टिश्चाग्निहोत्राग्न्युत्पादकत्वेन सामवायिकाङ्गमिति दशार्थोद्धृ-ताग्न्युद्धाने, अग्निहोत्रार्थोद्धृताग्न्युद्धानप्रायश्चित्तं न स्यात्।

इति दर्शार्थोद्धृताग्निलोपे प्रायश्चित्तरूपज्योतिष्मत्याः
अननुष्ठानाधिकरणम् ॥ ८ ॥

धार्योद्धाने प्रायश्चित्तरूपज्योतिष्मत्यननुष्ठानाधिकरणम् (९)

'धार्यो गतश्रिय आवहनीयः' इति श्रुतिः। तत्र सर्वार्थमुद्धृताहवनीयस्य धार्यमाणस्य, अग्निहोत्रार्थत्वस्यापि सत्त्वात् तदर्थोद्धृतोद्धानप्रायश्चित्तं स्यात्। इति चेत् —

तद्वद्गतश्रियो धार्ये

किञ्चिदुद्देशेनोद्धृतस्य कर्मान्ते त्यागप्रसक्तौ, गतश्रीत्वनिमित्ते धारणं विहितम्। म्रियमाणश्च प्रसङ्गा-दन्यस्याप्युपकरोतु—अङ्गत्वञ्चास्तु। उद्धरणन्तु नाग्निहोत्रार्थमिति न तत्रेष्टिः।

इति धार्योद्धाने प्रायश्चित्तरूपज्योतिष्मत्यननुष्ठानाधिकरणम् (९)

दर्शार्थस्योद्धरणस्यामन्त्रकत्वाधिकरणम् (१०)

दर्शाद्युपक्रमे आहवनीयस्योद्धरणे, अग्निहोत्रार्थोद्धरणमन्त्रः 'वाचा त्वा होत्रा' इत्यादिः प्रयोज्यः। तदनङ्गत्वेऽप्युपकारकतया साधनत्वप्रयुक्तधर्मावश्यंभावस्य, यागार्थदधिपयसोः प्रणीता धर्मेषु दृष्टेः। अग्निहोत्रस्यापि वा अकालकृतमुद्धरणमङ्गम्। अन्यथा वैगुण्यापत्तेः। इति चेत् —

न दर्शाद्युद्धृतौ मनुः ॥ २४५ ॥

अनुपादेयनिमित्तविशेषणकाले कर्मविधानात् तत्पूर्वमग्निहोत्रानधिकरात् न तदर्थमुद्धरणं न वा मन्त्रः ।

इति दर्शार्थस्योद्धरणस्यामन्त्रकत्वाधिकरणम् ॥ १० ॥

प्रायणीयचरौ प्रदानधर्माणामननुष्ठानाधिकरणम् (११)

'आदित्यः प्रायणीयः पयसि चरुः' इत्यत्र, चरुदेवतयोः–चरुपयसोश्च संबन्धे विध्यावृत्तिप्रसङ्गात्, द्रव्यद्वयविशिष्टदेवताविधिरिति पयसोऽपि देवतासंबन्धात्प्रदेयत्वम् । अतस्तद्धर्माः शाखाच्छेदादयः कार्याः । सहश्रपणप्राप्ताधारत्वानुवादः सप्तमी, अभ्युदितेष्टिवत् । इति चेत् —

प्रदेयधर्मः पयसि पयस्यार्थे न विद्यते ।

'पयोऽधिकरणकेनादित्येन चरुणा यजेत' इति विशिष्टविधौ वाक्यभेदाप्रसक्तेः, न सप्तमी अविवक्षितार्था कार्या । द्रव्यद्वये देवतासंबन्धविधौ संबन्धभेदाद्वाक्यभेदस्स्यात् । विशिष्टे तद्विशिष्टस्य कामचाराद्वाक्यभेदः । उद्देश्यसाहित्याविवक्षणाच्च । तस्मात्पयसि प्रणीता धर्माः । न प्रदेयधर्माः ।

इति प्रायणीयचरौ प्रदेयधर्मानुष्ठानाधिकरणम् ॥ ११ ॥

अभ्युदयेष्टौ दधिश्रृतयोः प्रदेयधर्मानुष्ठानाधिकरणम् (१२)

अभ्युदयेष्टावपि 'दध्नि चरुं' 'शृते चरुं' इति पूर्ववदधिकरणत्वप्रतीतेः दधिश्रृतयोर्न प्रदेयधर्माः । इति चेत् —

कर्तव्योऽभ्युदये स स्यात्

अनुत्पत्तिविधावनेकार्थविध्यशक्तेः, प्रदेयत्वेन निश्चिते देवतान्तरसंबन्धविधिः इत्यादेः षष्ठे स्थितत्वात् प्रदेयधर्माः कार्याः ।

इत्यभ्युदयेष्टौ दधिश्रृतयोः प्रदेयधर्मानुष्ठानाधिकरणम् ॥ १२ ॥

पशुकामेष्टौ दधिश्रृतयोः प्रदेयधर्मानुष्ठानाधिकरणम् (१२)

'यः पशुकामस्स्यात्सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यात्' 'ये मध्यमास्तान्विष्णवे शिपिविष्टाय श्रृते चरुम्' 'ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुम्' इत्यादिश्रुतम् ।

तत्र अभ्युदितेष्टि तुल्यश्रुतित्वात् दधिपयसोः प्रदेयधर्मास्स्युः । इति चेत् —

पशुकामेष्टिगो न सः ॥ २४६ ॥

अपूर्वकर्मविधौ प्रायणीयन्यायेन अधिकरणत्वस्य विवक्षणीयतया प्रणीता धर्मा एव, न प्रदेयधर्माः ।

इति पशुकामेष्टौ दधिश्रृतयोः पयोधर्मानुष्ठानाधिकरणम् ॥ १३ ॥

ज्योतिष्टोमे श्रपणानां प्रदेयधर्माननुष्ठानाधिकरणम् (१४)

ज्योतिष्टोमे, 'पयसा मैत्रावरुणं श्रीणाति' इत्यादि श्रुतम्। तत्र पय आदेः सोमस्सस्य च मिश्रणमुभयोः प्रदानार्थम्। दृष्टार्थत्वात्। अन्यथा संस्कारस्यादृष्टार्थता स्यात्। इति चेत् —

मिश्रणे पय आदीनां सोमधर्मो न विद्यते।

द्वितीयातृतीयाभ्यां रसस्य पय आदेश्च प्राधान्यगुणत्वयोरवगमात्, तदनुरोधेनादृष्टार्थत्वमिति न पय आदौ क्रयादिः। इदमपि प्रयाजशेषस्य गुणत्वादृष्टार्थत्वयोर्यजिः।

इति ज्योतिष्टोमे श्रपणानां प्रदेयधर्माननुष्ठानाधिकरणम् ॥ १४ ॥

ईशानाय परस्वत इत्यनेन यागान्तरविधानाधिकरणम् (१५)

अश्वमेधे, 'ईशानाय परस्वत आलभेत' 'पर्यग्निकृतानारण्यानुत्सृजन्ति' इति श्रुतम्। अरण्यपशुविशेषाः परस्वतः। न च ईशानायालभत इति स्पर्शमात्रविधिः, तत्रैवालब्धेषु पर्यग्निकरणविशिष्ट उत्सर्गलाभः। द्वैतीयपात्नीवताधिकरणपूर्वपक्ष इव न तावदुत्सर्गः पर्यग्निकरणं वा, तयोरानन्तर्यं वा विधीयते, तेषां प्राप्तेः। आनन्तर्यवाचकवाक्याभावात्। न च क्लृप्तोपकारपर्यग्निकरणविधावन्वयात्, तस्योद्देश्यताविशिष्टस्पर्शनमीशानवाक्ये विधीयते। पर्यग्निकृतवाक्ये तु तद्विशिष्टोत्सर्गः। इति चेत् —

अश्वमेधपशूत्सर्गे तदन्ताङ्गततेर्विधिः ॥ २४७ ॥

ईशानवाक्ये द्रव्यदेवताविशिष्टयागविधिना तदुभयसंबन्धानिर्वाहात्। पर्यग्निकरणवाक्ये तु यागानुवादेन विशेषणपरपर्यग्निकृतशब्देन तदान्तङ्गरीतिः पात्नीवतवाक्य इवापूर्वत्वाद्विधीयत इति चोदकलोपो-गृहमेधीयादिवत्।

इतीशानाय परस्वत इत्यनेन यागान्तरविधानाधिकरणम् ॥ १५ ॥

आज्येन शेषं संस्थापयतीत्यनेन कर्मान्तरविधानाधिकरणम् (१६)

'त्वाष्ट्रं पात्नीवतं' इत्यादि प्रकृत्य, 'आज्येन शेषं संस्थापयति' इति श्रुतम्। तत्र शेषसंस्थापनाज्ययोः स्वारस्यात् तस्मिन्नेवाज्यं प्रतिनिधिर्विधीयते। न कर्मान्तरम्। देवताया अलाभात्। पर्यग्निकरणान्ताङ्गरीतिविधिनैराकांक्ष्यमसिद्धमेव, पशुनोपक्रान्ते यागे मध्ये पशोस्त्यागविधानात्, द्रव्याकांक्षयागे आज्यविधौ शब्दयोरानुगुण्यम्। कर्मान्तरविधौ शेषसंस्थापनशब्दावनुपपन्नौ। इति चेत्—

आज्येन शेषमित्येष यागान्तरविधिर्भवेत्।

'त्वाष्ट्रं पात्नीवतमालभेत' इत्यत्र यागकल्पनात्–प्रत्यक्षयज्यश्रवणाच्चाग्नीषोमीयविध्यन्ताप्राप्तेः, पर्यग्नि-

कृतोत्सर्गशेषसंस्थापनयोरभावापातः । यदि तु देवतामुद्दिश्य त्यज्यते पशुः, ततः श्रुतेनैव यागसिद्धेर्न प्रतिनिधिना कार्यम् । तस्मात् त्वाष्ट्रवाक्यात् यागविधिः । पर्यग्निकृतवाक्ये तदन्ताङ्गरीतिविधिः इत्येव पूर्वोक्तं युक्तम् । आज्येनेति तु आज्यप्रातिपदिकार्थे पात्नीवतपदानुषङ्गेण संस्थापयति परप्रत्ययार्थे भावना, 'पात्नीवतमाज्यं कुर्यादिति विधीयते द्रव्यदेवताविशिष्टा । आज्यपदे तृतीयापि संस्थापयति प्राप्तानुवादः । शेषसंस्थापयतिशब्दौ तु सादृश्यात्–पत्नीवद्देवत्यो यागः, तच्छेषसमापनमिवेति ।

इत्याज्येन शेषं संस्थापयतीत्यनेन कर्मान्तरविधानाधिकरणम् ॥ १५ ॥

इति लघुवार्तिकटीकायां नवमस्याध्यायस्य चतुर्थः पादः ।

॥ समाप्तश्चाध्यायः ॥

॥ अथ दशमः अध्यायः ॥

तत्र प्रथमः पादः

विकृतौ लुप्तार्थानां प्राकृतानां बाधाधिकरणम् (१)

पदार्थान्यथाभावात्मके ऊहे विचारिते तन्निवृत्त्यात्मा बाधः सापवादो निरूप्यते । तत्र प्राकृताङ्गजातं तच्छास्त्रं वा प्रकृतिवदनादृतप्रयोजनविशेषं स्वरूपेणैव सौर्यादावति दिश्यते, 'सौर्येण ब्रह्मवर्चसं कुर्यात् आग्नेयान्यङ्गानि तानि कृत्वा' इति । अतश्च स्वयंदितबर्हिषि प्राकृतलवनप्रयोजनाभावेऽप्यदृष्टार्थं लवनम् । अतो बाधविचारो नारभ्यते । इति चेत् —

अतिदेशः पदार्थानामुपकारमुखो मतः ॥ २४८ ॥

अपेक्षासंनिधियोग्यत्वैरुपकारपिण्डः, ततस्तत्पदार्थविशिष्टोऽतिदिश्यते, 'सौर्येणापूर्वं कृत्वा फलं कुर्यात्, यथा आग्नेयेन तथा' इति । केन व्यापारेण व्याप्रियमाणस्य फलसाधनत्वम्? इत्यङ्गजन्योपकाररूपव्यापारविशेषस्यैवाकांक्षितत्वात्, सौर्यचोदनोपमिताग्नेयचोदनया तदर्थभूतांशत्रयविशिष्टभावनोपस्थितौ, फलकरणे अनपेक्षिते परित्यज्य, अङ्गजन्योपकारस्य सन्निहितस्य, आकांक्षापूरणयोग्यग्रहणमिति लुप्तप्राकृतप्रयोजनस्यानतिदेशात् नादृष्टार्थत्वकल्पनेति । शास्त्रातिदेशेऽपि, 'लवनेन बर्हिर्मूला द्वियोजयेत्' इत्यादिक्रमेण प्रकृतौ निरूपितरूपस्यैवातिदेशात् न स्वयंदितबर्हिषि तादृक् शास्त्रातिदेश इत्यारभ्यो बाधविचारः ।

इति विकृतौ लुप्तार्थानां प्राकृतानां बाधाधिकरणम् ॥ १ ॥

कृष्णले अवघातबाधाधिकरणम् (२)

'प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः' इत्यत्र, अचरौ चरुशब्दो धर्मलक्षणार्थोऽग्निहोत्रशब्दवत्। ततश्च लुप्तार्थोऽप्यवघातो वचनात् श्रपणवत्कार्यः। इति चेत् —

कृष्णलेनावघातश्च

अलुप्तार्थनिर्वापादिभिर्वैशद्येन चरुशब्दोपपत्तेः, 'घृते श्रपयति' इति विधानात् पाकानुष्ठितिरिति लुप्तार्थं न कार्यम्।

इति कृष्णले अवघातबाधाधिकरणम् ॥ २ ॥

वैश्वदेवे चरौ विष्णोरावाहनबाधाधिकरणम् (३)

'वैश्वदेवं चरुं निर्वपेद् भ्रातृव्यवान्। तं बर्हिषदं कृत्वा शम्यया स्फ्येन च व्यूहेत्, इदमहममुञ्चामुञ्च व्यूहामीति। यदधोऽवमृज्येन यच्च स्फ्य आश्लिष्येत् तद्विष्णवे उरुक्रमायावद्येत्' इति श्रुतम्। तत्र वैश्वदेविकैरेव प्रसङ्गसिद्धेरकरण[1]मिति चेत् —

विष्णोरावाहनं न च।

आश्लेषनिमित्तकवैष्णवयागस्य निमित्तानिश्च या दविहितमावाहनं कृतमपि व्यर्थमिति नावाहनं विष्णोः।

इति वैश्पदेवे चरौ विष्णोरावाहनबाधाधिकरणम् ॥ ३ ॥

दीक्षणीयादिष्वारंभणीयाबाधाधिकरणम् (४)

दर्शपूर्णमासायोः श्रुता आरंभणीया नाङ्गेषु दीक्षणीयादिषु। आरप्स्यमानपुरुषसंस्कारद्वारा अङ्गभूतेष्टिः, प्रधानारंभेणार्थिकारं भवतीषु सोमाङ्गेष्टिषु आत्मीयारंभशून्यासु लुप्तद्वारत्वान्न कार्याः। तदाह—

आरंभणीयानाङ्गेषु दीक्षणीयादिकेष्टिषु ॥ २४९ ॥

इति दीक्षणीयादिष्वारंभणीयाबाधाधिकरणम् ॥ ४ ॥

अनुमत्यादिष्वारंभणीयाया अभावः (५)

अनेकेष्टिपशुसोमात्मकराजसूयारंभस्य, इष्टिभिरपि प्रधानभूताभिर्व्यपदेशार्हता। अतः अनुमत्यादिष्वप्यारम्भणीया स्यात्। इति चेत् —

नानुमत्यादिषु तथा

---

[1] विष्णोरुरुक्रमस्यावाहनं कार्यम्। अन्यथा तत्क्रतोर्वैगुण्यापातात्—इत्यत्र शेषपूरणं पूर्वपक्षे कार्यम्।

अनेकेषु विजातीयेषु व्यासक्त आरम्भो नेष्टिभिर्व्यपदेशार्हः । अग्नीषोमीय इव पुरोडाशोऽपि ताः । अतः प्रकृतिवत् कृत्स्नविषयारम्भाभावन्न कार्या ।

इत्युनुमत्यादिष्वारम्भणीयाभावाधिकरणम् ॥ ५ ॥

आरम्भणीयायामारम्भणीयाबाधाधिकरणम् (६)

आरम्भणीया दर्शाङ्गत्वेऽपि पृथगारम्भवती । आरप्स्यमानपुरुषसंयोगेन तदारम्भयोग्यताधानाय करणात् । अतोऽलुप्तद्वारा स्वस्मिन्नपि स्यात् । इति चेत् —

नापि स्वस्यां प्रवर्तते ।

दर्शाद्यङ्गमारम्भणीयायामतिदिश्यते । न चैतद्विधिवेलायां तदङ्गत्वमस्यां ज्ञातम् । अतोऽविहितवद्विधानस्य—विहितवच्चातिदेशस्यैकस्मिन्वाक्येऽयोगात्, तदतिरिक्ताङ्गान्तराणामेव तस्यामतिदेश इति न स्वस्मिन् स्वयं कार्या ।

इत्यारम्भणीयायामारम्भणीयाबाधाधिकरणम् ॥ ६ ॥

खलेवाल्यां यूपाहुतिबाधाधिकरणम् (७)

साद्यस्क्रे ' उर्वरा वेदिः, खल उत्तरवेदिः, खलेवाली यूपः ' इति श्रुतम् । बलीवर्दबन्धनार्थं निखातामेथिः खलेवाली । तत्राग्नीषोमीये यूपच्छेदनाय ' उत विष्णो विक्रमस्व ' इति स्रुवेणाहवनीये होतव्यमिति श्रुतहोमश्चोदकप्राप्तः खलेवाल्यं स्यात् । इति चेत् —

यूपाहुतिः खलेवाल्यां नास्ति

यथास्थितायां तस्यां पशुबन्धनविधानात्, छेदनद्वारा नियोजनाङ्गभूता आहुतिर्लुप्तार्थत्वान्न कार्या ।

इति खलेवाल्यां यूपाहुतिबाधाधिकरणम् ॥ ७ ॥

साद्यस्क्रे खलेवाल्यां स्थाण्वाहुति बाधाधिकरणम् (८)

तत्रैव ' वनस्पते शतवल्शो विरोह ' इत्यात्रश्चने जुहोति ' इति श्रुता स्थाण्वाहुतिः, आत्रश्चने क्रियमाणा यूपानुपयोगात् अदृष्टार्थेति खलेवाल्यामपि क्वचित् स्थाणावदृष्टार्थं कार्या । इति चेत् —

स्थाण्वाहुतिस्तथा ॥ २५० ॥

नास्ति । आत्रश्च्यते अस्मात् इत्यात्रश्चनं, यूपापादानम् । तत्र कृता आहुतिः, तदीये कृता तस्योपकुर्यात् । देवदत्तधारितस्रजः शुचिदेशनिधानमिव देवदत्तस्य । खलेवाल्यां तादृक्स्थाण्वभावान्न कार्या ।

इति साद्यस्क्रे खलेवाल्यां स्थाण्वाहुतिबाधाधिकरणम् ॥ ८ ॥

उत्तमप्रयाजस्य संस्कारकर्मताधिकरणम् (९)

दर्शादावुत्तमप्रयाजः 'स्वाहाकारं यजति' इति श्रुतः स्वाहाकारविशिष्टयागविधिः। श्रुतदेवतालाभेमान्त्रवर्णिक्या अकल्पनात्। [1]स्वस्य वाकाशविनियोगान्न संस्कार्यत्वम्। न च मन्त्रविरोधः, मातृशब्दस्येवाग्न्यरदिशब्दानां विधिगतदेवताप्रकाशकत्वात्, स्वाहाग्निमित्यादिमन्त्रस्य श्रुत्यविनियुक्तस्य स्वार्थाकल्पकतया, अग्न्यादिप्रकाशकमन्त्रस्य सामर्थ्यानवगमेन मान्त्रवर्णिकदेवताया अलाभात्। तस्मादारादुपकारकः। इति चेत् —

प्रयाजो यक्ष्यमाणानां भवेत्संस्कृतिरुत्तमः।

विधेर्देवताविशिष्टयागगोचरत्वे गौरवात्, मन्त्रप्राप्तस्वाहाकारनिमित्ततन्नामकयागविधिः। उपांशुयाजन्यायेन मांन्त्रवर्णिकाग्न्यादयो देवताः, आज्यभागादिषु यक्ष्यमाणाः यागेन संस्क्रियन्ते। दृष्टस्मृतिश्च संस्कारः। देवताप्रकाशकमन्त्रस्य चासामर्थ्यं यागं प्रत्यसिद्धमेव। अतः सौर्यादावग्न्यादिप्रधानदेवतापदानां निवृत्तिः।

इत्युत्तमप्रयाजस्य संस्कारकर्मताधिकरणम् ॥ ९ ॥

अग्नियागस्यारादुपकारकताधिकरणम् (१०)

दर्शादावाज्यभागौ कृत्वा, अग्नीषोमाभ्यामाज्यभागौ यजति इति श्रुतम्। तत्राग्नेयाज्यभागः प्रधानाग्निदेवतासंस्कारः सामवायिकाङ्गत्वलाभाय। इति चेत् —

नाज्यभागौ

द्विवचनं दृष्टान्तार्थम्। 'अग्निमग्न आवह, अग्निमाहव' इति निगदे अग्नेर्द्विः पाठात् प्रधानयागाङ्गाग्निराद्य इति गम्यते। देवताविधिवाक्ये, अग्नीषोमाभ्यां—इत्येकपदेनोभयविधौ, सोमस्य गुणत्वं यागं प्रत्यग्नेश्च प्राधान्यमिति वैरूप्यं मा भूदित्युभयोरपि गुणत्वमित्यारादुपकारकः। अतस्सौर्यादौ नाग्निनिवृत्तिः। अग्नीषोमीयविकारेष्वत्यतिदेशः।

इत्यग्नियागस्यारादुपकारकताधिकरणम् ॥ १० ॥

पशुपुरोडाशस्य देवतासंस्कारकताधिकरणम् (११)

'अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशयागञ्च प्रतिदेवतायागुणत्वावगमात, पुरोडाशवैपरीत्ये मानाभावात्, 'आसोमं वहन्त्यग्निना प्रतितिष्ठते' इत्यधिकारात्, आग्नीध्राग्निर्लता च

---

[1] अस्पष्टार्थमिदं वाक्यम्।

पशौ देवतेत्यवगमात्, पुरोडाशेन च तद्देवतात्वे मानाभावात्, पुरोडाशयाग आरादुपकारक इति न निरूढादावग्नीषोमोयनिवृत्तिः। इति चेत् —

पशुगतः पुरोडाशश्च संस्कृतिः ॥ २५१ ॥

पशोस्सोमाङ्गत्वेन पुरोडाशदेवतासंस्कारत्वशङ्काभावात्, पश्वङ्गसन्दष्टः पुरोडाशस्तदङ्गम्। तत्र सामवायिकत्वसंभवे आरादुपकारकत्वाकल्पनात्, 'यैव पशोर्देवता सैव सैव पुरोडाशेन संस्कर्तव्या। उभयदेवत्यविकृतिषु निवृत्तिरग्नीषोमयोः।

इति पशुपुरोडाशस्य देवतासंस्कारकताधिकरणम् ॥ ११ ॥

सौर्यं चरुमित्यत्र चरुशब्दस्य ओदनवाचिताधिकरणम् (१२)

'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इत्यत्र लोकप्रसिद्ध्या चरुशब्दः स्थालीवचनः। नैघण्टुका अपि 'उखा स्थाली चरुः' इत्युपादिशन्ति। याज्ञिकानामप्योदनमात्रे प्रसिद्ध्यभावात्, स्थाल्यामनवस्तावितान्तरुरूष्मपाके प्रयोगाद्विशेषणशक्तो विशेषलक्षकः। न च तस्यानदनीयत्वात् कपालाधारत्वं, देवतासंबन्धस्तु तत्स्थोदनद्वारेति युक्तम्। द्रव्यदेवतासंबन्धेन यागकल्पनाय देवतातद्धितस्यैवाङ्गीकार्यत्वात्। कृष्णलादिने वानदनीयेनापि यागोपपत्तेः। इति चेत् —

चरुरोदनभेदस्यात्

'आदित्यः प्रायणीयश्चरुः' इत्युक्त्वा, 'अदितिमोदनेन' इति श्रुताद्वाक्यशेषात् ओदनवचनत्वम्। याज्ञिकानां प्रसिद्धेश्चरु[1]धर्मायशब्दोऽर्थाः वितवेयत्ववतां पामरप्रसिद्धितो बलवत्त्वात्। लक्षणयापि स्थाल्यां प्रयोगोपपत्तेः नानार्थत्वायोगात्। अतो हविर्विकारश्चरुरोदनः।

इति सौर्यं चरुमित्यत्र चरुशब्दस्यौदनवाचिताधिकरणम् ॥ १२ ॥

सौर्यचरौ स्थाल्यामेव पाकाधिकरणम् (१३)

स ओदनश्चोदकप्राप्तः कपाले श्रप्यः। अष्टत्वस्यासंभवेऽपि संख्येयमात्रस्याबाधात्। यदि च कपालोष्मणा चरुपाकात्, अप्राकृतकार्यत्वमिति भावः, तर्हि यत्र क्वचित्पक्तव्यम्। इति चेत् —

तत् स्थाल्यामेव पच्यते।

चरुशब्दवाच्यभक्तविशेषस्य अन्यत्र पाकेनालाभात् स्थाल्यामेव पाकः।

इति सौर्यचरौ स्थाल्यामेव पाकाधिकरणम् ॥ १३ ॥

---

[1] अस्पष्टार्थापंक्तिरियम्।

सौर्यचरौ पेषणादिबाधाधिकरणम् (२४)

चोदकप्राप्तपेषणसंयवनादीनि चरावपि । इति चेत् —

तस्मिन्पेषः संयवनं संवापस्तापनं तथा ॥ २५२ ॥
उपधानं सप्रथमं श्लक्ष्णीकरणभावनम् ॥
अध्यूहनं प्रज्वलनं व्युद्धृत्यासादनं तथा ॥ २५३ ॥
कर्तव्यत्वं न लभते प्रयोजनविलोपतः ॥

इति सौर्यचरौ पेषणादिबाधाधिकरणम् ॥ १४ ॥

इति लघुवार्तिकटीकायां दशमस्य प्रथमः पादः ।

॥ अथ द्वितीयः पादः ॥

कृष्णलचरौ पाकानुष्ठानाधिकरणम् (१)

प्राजापत्यकृष्णलचरौ पाको न कार्यः । 'घृते श्रपयति' इति वचनस्य अशक्यार्थविधायतया अप्रामाण्यात् । इति चेत् —

श्रुतत्वात् कृष्णले पाकः ।

प्राकृतप्रयोजनाभावेऽपि च व्यत्वायोष्णीकरणलक्षणः । यदि तु तावानेव मुख्यः पाकः, तर्हि सुतरां कर्तव्यो वचनबलात् ।

इति कृष्णलचरौ पाकानुष्ठानाधिकरणम् ॥ १ ॥

कृष्णलचरौ उपस्तरणाभिघारणयोर्बाधाधिकरणम् (२)

तस्मिन्नुपस्तरणाभिघारणे चोदकप्राप्तेः कार्ये । न च तयोः 'अमृताहुतिमेवैनां करोति' इति स्वादिमार्थत्वावगतेः, कृष्णले च तदकरणं, तस्यार्थवादत्वात् । स्वार्थपरत्वेऽपि चतुरवत्तसंपत्तये तयोरपेक्षणात् । न च 'चत्वारि चत्वारि कृष्णलान्यवद्यति चतुरवत्तस्याप्त्यै' इति श्रुतेः, तच्चतुष्टेनैव संपत्तिः ; एकेनैव तत्संपत्तेर्वीप्सावैयर्थ्यात् । न च वीप्सार्थोऽपि विधेयः, प्रकृतिप्राप्तावदाने संख्यावीप्सार्थयोर्विध्ययोगात् । द्व्यवदानस्यापि चतुष्ट्वसंपत्त्यर्थतया तस्य वाक्यतः सिद्धौ तदनुवादायोगेत संख्यामात्रविध्ययोगाच्च । अतः अमृत्वाप्तिवचनमर्थवादः । इति चेत् —

नास्त्युपस्तरणादिकम् ॥ २५४ ॥

प्रकृतौ हविषोऽसंसर्गायोपस्तरणादिः । कृष्णले च तदप्रसङ्गात् तयोर्लोपः । अवत्तोद्देशेन होमविधौ,

उद्देश्यगत चतुष्ट्वविवक्षायोगात्, न तदर्थमपि ते ।

इति कृष्णलचरौ उपस्तरणाभिघारणयोर्बाधाधिकरणम् ॥ २ ॥

कृष्णलचरौ भक्षसद्भावाधिकरणम् (३)

प्रकृतौ भक्षः पुरुषप्रीत्यर्थ इति कृत्वोच्यते । कृष्णलैर्भक्ष्यमाणैः पुरुषप्रीत्ययोगात्, 'चुञ्छुषाकारं भक्षयति' इति वचनस्य तत्संसक्तघृतविषयम् । अतः कृष्णलानां भक्षो लुप्तार्थः । इति चेत् —

श्रुतेर्भक्षणमस्त्यस्मिन्

'घृते चरुं' इति वाक्ये कृष्णलानां विशेष्यतया तेषामेव भक्षविभिः । नोपसर्जनघृतस्य । अनदनीयानामपि प्रदानवद्वाचनिको भक्षः इति तत्करणम् ।

इति कृष्णलचरौ भक्षसद्भावाधिकरणम् ॥ ३ ॥

कृष्णलचरौ 'एकधा ब्रह्मण उपहरति' इत्यनेन सहोपहार-विधानाधिकरणम् (४)

तत्रैव 'एकधा ब्रह्मण उपहरति' इति श्रुतैकधाशब्दस्य समानकर्तृकत्वे प्रयोगदृष्टेः, इडाप्राशित्र चतुर्धाकरणशंयुवाककालभक्षे सद्धस्त्वविधानात्, अन्येषान्तु लोपः । इति चेत् —

भक्षोपहृतयस्सह

सहत्वेऽपि तत्पदप्रयोगात् चोदकप्राप्तभक्षाणामबाधाय सहत्वमेवैकधाशब्दार्थ इति भिन्नकालत्वमात्रबाधो न भक्षाणाम् ।

इति कृष्णलचरौ 'एकधा ब्रह्मण उपहरति' इत्यनेन सहोपहारविधानाधिकरणम् ॥ ४ ॥

कृष्णले चरौ ब्रह्मणे सर्वभक्षभागार्पणाधिकरणम् (५)

तत्रैव 'सर्वं ब्रह्मणे परिहरति' इति श्रुतम् । तत्र चोदकप्राप्तपुरुषान्तरसंबन्धाबाधाय ब्रह्मणे परिहर्तव्यस्य सर्वत्वं-ब्रह्मसंबन्धिसर्वस्य परिहर्तव्यत्वं वा विधेयम् । इति चेत् —

ब्रह्मेतरेषां नो भक्षः

वचनव्यक्तिद्वयार्थस्यापि प्रकृतित एव प्राप्तेः, वचनावैयर्थ्याय, 'यत्प्रकृतौ नानापुरुषेभ्यो भक्षार्थं हरति -तत्सर्वं ब्रह्मणे' इति पुरुषान्तरेभ्योऽपनीय ब्रह्मसंबन्धः क्रियते ।

इति कृष्णले चरौ ब्रह्मणे सर्वभक्षभागार्पणाधिकरणम् ॥ ५ ॥

भक्षभागानां स्वस्वकाले ब्रह्मणा भक्षणाधिकरणम् (६)

सहोपहृतभक्षाणां सहैव भक्षः, भक्षार्थत्वादुपहारस्येति भक्षणे नानाकालत्वबाधः । इति चेत् –

भक्षास्तस्यापि कालतः ॥ २५५ ॥

सहोपहृतानामपि स्वकाले भक्षणाविरोधात्, चोदकप्राप्तकालाबाधाय तत्तत्काले भक्षः ।

इति ब्रह्मभागानां स्वस्वकाले ब्रह्मणा भक्षणाधिकरणम् ॥ ६ ॥

ब्रह्मभक्षे चतुर्धाकरणादीनामभावाधिकरणम् (७)

दर्शे चतुर्धाकरणानन्तरं 'इदं ब्रह्मणः इदं होतुः' इत्यादिव्यादेशो विहितः, चोदकप्राप्तः कृष्णले कार्यः । इति चेत् —

चतुर्धा कृतिनिर्देशमपि तत्र न विद्यते ।

द्वन्द्वैकवद्भावे । सर्वस्य ब्रह्मणे परिहृतत्वात्, न चतुर्धाकरणं–न वा व्यादेशः ।

इति ब्रह्मभक्षे चतुर्धाकरणादीनामभावाधिकरणम् ॥ ७ ॥

ज्योतिष्टोमे ऋत्विग्दानस्यानत्यर्थताधिकरणम् (८)

'ऋत्विग्भ्यो दक्षिणां ददाति' इत्यत्र पदश्रुत्या दानकर्तव्यत्वप्रतीतेः, वाक्यप्रतीतानतिकर्तव्यत्वबाधः इत्यदृष्टार्थं दानम् । द्वादशशतनियम–मन्त्र–कर्माननुगुणद्रव्यत्वादेरसंदिग्धमदृष्टार्थत्वमिति दानमपि तथा । इति चेत् —

ऋत्विग्दानं भृतिस्तेषां

ऋत्विग्भ्यः इति तादर्थ्यचतुर्थ्या तेषां भाव्यत्वावगमात्, कर्मकरेभ्यो दानस्य लोकतोऽपि दृष्टार्थत्वात्, संख्यादिनियमस्यादृष्टार्थत्वेऽपि दानमात्रं दृष्टार्थमिति सत्रे तन्निवृत्तिः ।

इति ज्योतिष्टोमे ऋत्विग्दानस्यानत्यर्थताधिकरणम् (८)

ज्योतिष्टोमे भक्षस्य प्रतिपत्त्यर्थताधिकरणम् (९)

दर्शादौ सोमे च शेषभक्षाः परिक्रयार्थाः । भक्षणजप्रीतिद्वारा आनत्यर्थस्य दृष्टत्वात् । इति चेत् —

न हविश्शेषभक्षणम् ॥ २५६ ॥

अतस्सत्रेऽपि स्यात् । तृतीये चतुर्धाकभक्षानिर्देशात् परिक्रयार्थत्वशङ्का निराकृता इति विशेषः ।

इति ज्योतिष्टोमे भक्षस्य प्रतिपत्त्यर्थताधिकरणम् ॥ ९ ॥

सत्रे ऋत्विग्वरणाभावाधिकरणम् (१०)

ज्योतिष्टोमे 'अग्निर्होता । समे होता 'इत्यादिना ऋत्विग्वरणं विहितं, सत्रेऽपि 'ये यजमानास्त ऋत्विजः' इति वचनावगतर्त्विक्त्वसंपत्तये, चोदकप्राप्तेश्च कर्तव्यम् । इति चेत् —

तेषां न सत्रे वरणम्

प्राकृतवरणस्य स्वयंप्रवृत्तसत्रिषु लुप्तद्वारत्वादकरणम् । यागकर्तृत्वरूपमृत्विक्त्वं प्रकृतौ वरणविधानात्, तत्साध्यमपि सत्रे तल्लोपान्न विहितानामेव ऋत्विक्त्वं अध्वर्युत्वादिकञ्च स्यात् । कर्मकरवाचित्वे तु तस्य न वरणेनापि तत्त्वं सत्रे स्यात् इति तन्निवृत्तिः ।

इति सत्रे ऋत्विग्वरणाभावाधिकरणम् ॥ १० ॥

सत्रे परिक्रयाभावाधिकरणम् (११)

दक्षिणादानं नादृष्टार्थम् । किन्तु परिक्रयार्थं, इत्युक्तम् । तदेव परिक्रयणं सत्रेऽपि स्यात् । 'नह्यत्र गौर्दीयते न वासो न हिरण्यम्' इति निषेधेन, अश्वादिप्राकृतद्रव्यान्तरप्राप्तेस्सूचनात् । इति चेत् —

नापि स्यात्तत्र दक्षिणा

'अदक्षिणानि सत्राणीत्याहुः । न ह्यत्र गौर्दीयते' इति प्रसिद्धवाचकहिशब्देनानुवादरूपत्वावगमात्, न प्राप्तिसूचकत्वमिति परिक्रयो निवर्तते ।

इति सत्रे परिक्रयाभावाधिकरणम् ॥ ११ ॥

उदवसानीयस्य सत्रानङ्गतया तत्र दानस्य परिक्रयार्थत्वाधिकरणम् (१२)

'सत्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन्' इति श्रुतम् । तत्र फलवत्सत्रसमभिव्याहारो बहिःश्रुतमपि वाजपेयबृहस्पतिसवन्यायेनाङ्गत्वेन गमयति काललक्षणापरिहारायेति यजमानैरेव कार्यः पृष्ठशमनीयः । दक्षिणादानञ्चात्रेयदानवददृष्टार्थम् । इति चेत् —

शमनीयो न सत्राङ्गम्

उदवसानपदार्थस्त्यागो निःशेषपरिसमाप्तिं गमयतीति नाङ्गान्तरावशेषसंभवः । वाजपेये यथोक्तप्रयोगसमाप्तावप्यङ्गान्तराविरोधः 'संस्थाप्य पौर्णमासीम्' इतिवत् । श्रौतोदवसाननिमित्ते यागविधौ च न लक्षणाशङ्कापि ।

इत्युदवसानीयस्य सत्रानङ्गतया तत्र दानस्य परिक्रयार्थत्वाधिकरणम् ॥ १२ ॥

उदवसानीये ऐकैकश्येन प्रयोगाधिकरणम् (१३)

आख्यातोपात्तबहुत्वस्योपादेयकर्तृविशेषणस्य विवक्षणादुदवसानीयः सत्रिभिः संहत्य प्रयोक्तव्यः इति चेत् ....

तत्कुर्युः सत्रिणः पृथक् ॥ २५७ ॥

उदवसाने निरपेक्षाणां कर्तृत्वात्, तत्समानकर्तृकतया गम्यमानो यागो[1] निषणत्वेनानूद्यते–न विधीयत इति न तद्बलात् साहित्यं कर्तृणाम्। अतः ऐकैकश्येन प्रयुञ्जीरन्।

इति उदवसानीये ऐकैकश्येन प्रयोगाधिकरणम् ॥ १३ ॥

उदवसनीये सत्रिभ्योऽन्येषामृत्विक्त्वाधिकरणम् (१४)

यदि संहत्य कुर्युः, तदा तैरेव साङ्गं कर्तव्यम्। उदवसानसमानकर्तृकत्वस्य साङ्गेऽवगमात्। इति चेत् —

संहत्य करणेऽपि स्युस्तदन्ये तत्र ऋत्विजः।

यजेरन्निति यागमात्रे समानकर्तृकत्वं गम्यते। अङ्गेषु तु यथाप्रकृति दक्षिणाशब्दस्य परिक्रयसाधनवाचिनोऽबाधाय चान्य एव वरणीयाः। न चाङ्गत्वपक्षेऽपि दक्षिणावशादन्यवरणसंभवे, 'ये यजमाना' इत्यस्य पृष्ठशमनीयादन्यत्र संकोचे च संभवति, अङ्गत्वनिराकरणवैयर्थ्यम्; संहत्य फलनिरासकत्वात्तस्य।

इत्युदवसानीये सत्रिभ्योऽन्येषामृत्विक्त्वाधिकरणम् ॥ १३ ॥

कामेष्टौ दानस्यादृष्टार्थताधिकरणम् (१५)

सारस्वते सत्रे, 'प्लाक्षं प्रस्रवणं प्राप्याग्नये कामायाष्टाकपालं निर्वपन्ति, तस्यामश्वाञ्च पुरुषीञ्च धेनुके दद्युः' इति श्रुतं दानं, दक्षिणाशब्दाभावेऽपि दृष्टार्थपरिक्रयार्थम्। 'ये यजमाना' इत्यस्य प्राकृताङ्गविषयतया, अप्राकृते यूपावटबर्हिर्न्यायेनान्य वरणसंभवात्। इति चेत् —

गवादिदानं कामेष्टावदृष्टैकप्रयोजनम् ॥ २५८ ॥

यजमानानां कर्तृणां प्रयोगाङ्गत्वात्, प्राकृताङ्गमध्यपतितमप्राकृतमपि तैरेव प्रसङ्गसिद्धं नान्यानाक्षिपति, इत्यदृष्टार्थं दानम्।

इति कनिष्टौ दानस्यादृष्टार्थताधिकरणम् ॥ १५ ॥

---

[1] यजेरन्नित्यत्र बहुत्वं न विधीयते। धात्वर्थो याग एव विधीयते। बहुत्वन्तु उदवसानसमानकर्तृकत्वश्रवणादेव प्राप्तमनूद्यते इति न तद्बलात् साहित्यं कर्तृणां – द्वियज्ञवैषम्यञ्च—इति साधु।

दर्शपूर्णमासयोः द्वेष्याय दानस्यादृष्टार्थताधिकरणम् (१६)

दर्शादौ, 'यदि पत्नीः संयाजयन्कपालमभिजुहुयात्, वैश्वानरं द्वादशकपालं निर्वपेत्। तस्यैकहायनी गौर्दक्षिणा। तां द्वेष्याय दद्यात्' इति श्रुतं दक्षिणाशब्दात्परिक्रयार्थम्। इष्टेर्नैमित्तिक-दर्शाङ्गतया तत्तन्त्रमध्यपातेऽपि वचनादन्वाहार्यसमुच्चयो गौः। इति चेत् —

द्वेष्याय दानमप्येवं

'ऋत्विगाचार्यौ नातिचरितव्यौ' इति वचनात्, न ऋत्विग्द्वेष्योऽस्तीति, अनृत्विजे दीयमानमदृष्टार्थम्। दक्षिणाशब्दश्च दानमात्रपरः।

इति दर्शपूर्णमासयोः द्वेष्याय दानस्यादृष्टार्थताधिकरणम् ॥ १६ ॥

जीवतामेवास्थियज्ञाधिकरणम् (१७)

'यदि सत्राय दीक्षितानां प्रमीयेत, तं दग्ध्वा कृष्णाजिनेऽस्थीन्युपनह्य, योऽस्य नेदिष्ठः स्यात् तं तस्य स्थाने दीक्षयित्वा तेन सह यजेरन्। ततः संवत्सरेऽस्थीनि याजयेयुः' इति श्रुतम्। तत्रास्थि-शब्देन तच्छरीरकपुरुषस्य लक्षणया प्रतीतेः, स यष्टा, तस्यैव फलम्। अन्येषां ण्यन्तपरस्मैपदनिर्देशात् परार्थकर्मणि याजयितृत्वप्रतीतेः ऋत्विक्त्वम्। इति चेत् —

अस्थियागस्तु जीवताम्।

मृतस्य सर्वाधिकारनिवृत्तेर्न तत्कर्तृत्वाशङ्का। याजयतिस्तु अन्येषां जीवतां ये याजकाः तत्परः। अस्थिशब्दोऽपि तत्सहायजीवत्पुरुषलक्षक इति तदधिकारं कर्म।

इति जीवतामेवास्थियज्ञाधिकरणम् ॥ १७ ॥

अस्थियज्ञे अस्थ्नां जपाद्यननुष्ठानाधिकरणम् (१८)

मृताधिकारं कृत्वा चिन्ताः—तत्र दीक्षणीया वपनपावनादयश्चोदकप्राप्तेः कार्याः। इति चेत् —

लुप्यते जपसंस्कारो मृतस्यैव भवेद्यदि ॥ २५९ ॥

यमनियमादिपरिग्रहरूपदीक्षार्था दीक्षणीया, तदसंभवान्न भवेत्। केशश्मश्रूवभावान्न वपनम्। जपस्त्व-शक्य इति व्यक्तम्।

इत्यस्थियज्ञे अस्थ्नां जपाद्यननुष्ठानाधिकरणम् ॥ १८ ॥

अस्थियज्ञे औदुंबरीमानशुक्रस्पर्शानुष्ठानाधिकरणम् (१९)

यजमानगुणकशुक्रान्वारम्भणादिकं मृतस्य कर्तृत्वायोगान्न कार्यम्। इति चेत् —

कर्तव्यमेव तत्रापि शुक्रान्वारंभणादिकम् ।

अचैतन्येऽपि काष्ठादौ कर्तृप्रत्ययप्रयोगात्, तदुपात्तव्यापारवतः कर्तृत्वमित्यस्थिनि कर्तव्यं शुक्रान्वारंभणादि ।

इत्यस्थियज्ञे औदुम्बरीमानशुक्रस्पर्शानुष्ठानाधिकरणम् ॥ १९ ॥

अस्थियज्ञे अस्थ्नां काम्यकर्माद्यननुष्ठानाधिकरणम् (२०)

गुणकामा विकृतौ प्रवर्तेरन्निति चेदस्थियागेऽपि चोदकप्राप्तेस्स्युः । इति चेत् —

गुणकामास्तत्र न स्युः सदोमानादिसंश्रयाः ॥ २६० ॥

मृतस्येष्टमनिष्टं वा इत्यध्वर्युणा अज्ञानात् न ते स्युः ।

इत्यस्थियज्ञे अस्थ्नां काम्यकर्माद्यननुष्ठानाधिकरणम् ॥ २० ॥

अस्थियज्ञे अस्थ्नां सूक्तवाकगताशासनाननुष्ठानाधिकरणम् (२१)

सूक्तवाकस्य चोदकप्राप्तेः, अस्थियागेष्टावायुरादिपदानामपि प्रवृत्तिः । इति चेत् —

नायुराशास्त इत्याद्याः

आशास्यमानफलप्रकाशकानामाशासननिवृत्तौ निवृत्तिः ।

इत्यस्थियज्ञे अस्थ्नां सूक्तवाकगताशासनाननुष्ठानाधिकरणम् ॥ २१ ॥

अस्थियज्ञे होतृकामाभावाधिकरणम् (२२)

यं कामयेत पापीयान् स्यादिति नीचैस्तरां तस्य याज्यया वषट् कुर्यात् 'इत्याद्याः, होतुः कामनासंभवात् प्रवर्तन्ते । इति चेत् —

न च स्युर्होतृकामनाः

यजमानेन काम्यमानं फलं यजमानाय होत्रा कामनीयम् । न च मृतस्य कामनेति तेऽपि निवर्तन्ते ।

इत्यस्थियज्ञे होतृकामाभावाधिकरणम् ॥ २२ ॥

यजमानस्य दिष्टगतावपि सर्वस्वारस्यसमापनाधिकरणम् (२३)

सर्वस्वारो नामैकाहः स्वर्गकामस्य विहितः । तत्रार्भवस्तोत्रकाले, 'ब्राह्मणाः ! समापयत मे यज्ञमिति प्रैषमृत्विग्भ्यः प्रदाय संविशत्याहवनीयम्' इति श्रुतम् । तत्र न शेषस्य समापनम् । मरणेन निवृत्ताधिकारत्वात् तस्य । न ऋत्विग्भिरपि; यजमानकार्यस्यैव तैः कर्तव्यत्वात् । इति चेत् —

सर्वस्वारस्समाप्यस्स्यन्मृते

'मरणकामः' इत्यङ्गीकृतमरणस्य सर्गार्थमेव कर्म। स चासमाप्तात्फलं भवेत्। प्रत्यक्षप्रैषेण समाप्ति-विधानाच्च। प्रैषेष्वप्राप्तार्थेषु विध्यवश्यंभावात्। विधिमन्त्रयोरित्यधिकरणे प्राप्तार्थप्रैषेष्वेव विधित्व-निरासात्। तस्मात् समापनीयस्सर्वस्वारः।

इति यजमानस्य दिष्टगतावपि सर्वस्वारस्य समापनाधिकरणम् ॥ २३ ॥

यजमानस्य दिष्टगतौ श्रर्वस्वारस्य शुक्रस्पर्शादि-योग्याङ्गानुष्ठानाधिकरणम् (२४)

तत्र किं कर्तव्यम्? किं न? इत्याह —

कर्मास्थि यज्ञवत् ॥ २६१ ॥

तत्र यो निर्णयस्स एवात्रापि।

इति यजमानस्य दिष्टगतौ सर्वस्वारस्य शुक्रस्पर्शादियोग्याङ्गानुष्ठानाधिकरणम् ॥ २४ ॥

सर्वस्वारे यजमानस्य दिष्टगतावपि आयुराशंसनाधिकरणम् (२५)

तत्रायुराशास्त इत्यादि न स्यात्। अङ्गीकृतमरणत्वात्। इति चेत् —

आयुराशास्त इत्येतत् तत्र स्याद्यावदार्भवम्।

यावदार्भवकालीनजीवनस्याशास्यत्वात्, तदन्तास्विष्टिषु होत्रा वक्तव्यान्यायुरादिपदानि।

इति सर्वस्वारे यजमानस्य दिष्टगतावपि आयुराशंसनाधिकरणम् ॥ १५ ॥

द्वादशाहे ऋतुयाज्याद्यनुष्ठानाधिकरणम् (२६)

अप्रवृत्तवरणवदृतुयाज्यावरणम्। दक्षिणादानवदात्रेयदानञ्च सत्रे न स्यात्। इति चेत् —

ऋतुयाज्यावृत्तिस्सत्रेऽप्यदृष्टार्थत्वतो भवेत् ॥ २६२ ॥

आत्रेयदानमित्यप्यध्याहार्यम्। हेतोस्तुल्यत्वात्।

इति द्वादशाहे ऋतुयाज्याद्यनुष्ठानाधिकरणम् ॥ २६ ॥

पवमानेष्टौ निर्वापानुष्ठानाधिकरणम् (२७)

'अग्निहोत्रहवण्या हवींषि निर्वपति' इति प्रकृतौ वचनात्, यथाहुतमग्निहोत्रं तया स कार्यः। पवमानहविर्निर्वापवेलायां तादृशस्याभावात् वैगुण्यं स्यात्। अतो न कार्यः पवमानेष्टौ निर्वापः।

इति चेत् —

निर्वापः पवमानेष्टौ गुणलोपान्न लुप्यते ।

अतिदेशेन हविस्संस्कारलक्षणकार्यमुखेन निर्वापप्राप्तिवेलायां, तदङ्गभूताग्निहोत्रहवणी अभावादेव न प्राप्यत इति न तदा तस्यास्तदङ्गत्वमित्यवैगुण्यात्कार्यो निर्वापः ।

इति पवमानेष्टौ निर्वापानुष्ठानाधिकरणम् ॥ २७ ॥

वाजपेये मुष्टिलोपाधिकरणम् (२८)

वाजपेये 'बार्हस्पत्यो नैवारस्सप्तदशशरावः क्षीरे चरुर्भवति' इति श्रुतम् । प्रकृतौ 'चतुरो मुष्टीन्निर्वपति' इति श्रुतचतुष्टसंख्यामुष्टिद्रव्ययोश्चोदकप्राप्तयोरबाधे, सप्तदशशरावपरिमितौ दानासंभवात्, 'संख्यया संख्याबाधः–शरावद्रव्येण मुष्टिद्रव्यस्य' इत्युभयबाधे गौरवात्, अनियमेनान्यतरबाधः । प्रधानद्रव्यानुग्रहः, तदङ्गसंख्याबाधो वा । इति चेत् —

संख्यामुष्टिविरोधे स्यान्निर्वापे मुष्टिलोपनम् ॥ २६३ ॥

इतरेतरविशेषितद्रव्यसंख्ययोः कारकमुखेन क्रियाङ्गत्वान्न संख्याद्रव्याङ्गम् । तत्र मुख्यसंख्यानुग्रहो मुष्टिपरिमाणलोपः ।

इति वाजपेये मुष्टिलोपाधिकरणम् ॥ २८ ॥

धेनुमालभेत इत्यादिश्रुतौ धेन्वादिशब्दानां गवादिवाचिताधिकरणम् (२९)

'द्यावापृथिव्यां धेनुमालभेत–वायव्यं वत्सं–ऐन्द्रमृषभम्' इति श्रुतेषु गोत्वैकार्थसमवेतासाधारणगुणश्रवणेऽपि, गोरुपदेशातिदेशाभ्यामप्राप्तेः तद्गतधर्मलक्षका धेन्वादिशब्दाः । इति चेत् —

गोरसाधारणैर्धेनुत्वाद्यैश्छागो निवर्तते ।

गोवृत्त्यसाधारणधर्मस्य प्रथमश्रुतस्य नानुमानिकाजेन बाधः इति श्रुतानुगुण्येन गोरेवालंभ इत्यजनिवृत्तिः ।

इति धेनुमालभेत इत्यादिश्रुतौ धेन्वादिशब्दानां गवादिवाचिताधिकरणम् ॥ २९ ॥

वायव्यं श्वेतमालभेत इत्यनेनाजस्यैवालंभाधिकरणम् (३०)

'वायव्यं श्वेतमालभेत' इति साधारणगुणश्रवणमानुमानिकाजेऽपि संभवान्न तेन तस्य बाध इत्याह —

साधारणैश्च श्वेतादिगुणैर्नासौ निवर्तते ॥ २६४ ॥

इति वायव्यं श्वेतमालभेत इत्यनेनाजस्यैवालंभाधिकरणम् ॥ ३० ॥

साद्यस्क्रे चित्रायाश्च खलेवाल्यास्तण्डुलस्य च यथाक्रमं खादिरत्वव्रैहत्वा-नियमाधिकरणम् (३१)

साद्यस्क्रे 'खलेवाली यूपो भवति' इति, चित्रेष्टौ 'दधिमधुघृतमापोधानास्तण्डुलस्तत्संसृष्टं प्राजापत्यम्' इति श्रुतम्। तत्र चोदकाबाधाय यूपस्य खलेवालीत्वं-व्रीहीणाञ्च तण्डुलत्वं विधीयते। यथासिद्धग्रहणे, खदिरादयो व्रीहयश्च-तत्संस्काराश्छेदनादयोऽवघातादयश्च बाध्येरन्। खलेवाल्या यूपकार्ये विधौ, यूपशब्दस्तत्कार्यलक्षणार्थस्स्यात्। इति चेत् —

निवृत्तिं खदिरत्वादिः खलेवाल्यादिषु व्रजेत्।

यूपस्य खलेवालीत्वविधावदृष्टार्थत्वश्रुतानुपूर्वीभङ्गेनाप्रत्यक्षवाक्यकल्पना च स्यात्। खलेवाल्याः यूपत्व-विधौ पश्वनपक्रमणं दृष्टं प्रयोजनम्। श्रुतवाक्यभङ्गश्च। तस्मात् सिद्धरूपा खलेवाली ग्राह्या। दर्शादौ श्रपणविधानात् प्रकृतिद्रव्यमुपादाय प्रयोगमध्ये हविस्संपाद्यम्। एवं विकृतावपि श्रपणविधिसत्त्वे तण्डुलेषु श्रुतनाशप्रसङ्गात् श्रपणनिवृत्तौ, तत्प्रकृत्यनुपादानात् तदाश्रितव्रीहिशास्त्राप्रवृत्तेः, लोकसिद्धा ये के च तण्डुला ग्राह्याः।

इति साद्यस्क्रे चित्रायाश्च खलेवाल्यास्तण्डुलस्य च यथाक्रमं खादिरत्वव्रैहत्वा-नियमाधिकरणम् ॥ ३१ ॥

खलेवाल्यां तक्षणाद्यननुष्ठानाधिकरणम् (३२)

खलेवाल्यां छेदनादिसंस्काराः, संभवात् चोदकप्राप्तेश्च कार्याः। इति चेत् —

तस्यां न स्युश्छेदनाद्याः

छित्त्वा निखातोच्छ्रितायां लुप्तार्थास्ते न कार्याः।

इति खलेवाल्यां तक्षणाद्यननुष्ठानाधिकरणम् ॥ ३२ ॥

खलेवाल्यां पर्यूहणादिसंस्काराणामनुष्ठानाधिकरणम् (३३)

पर्यूहणपरिवृंहणपरिषेचनप्रोक्षणाञ्जनपरिव्याणादयः प्रकृतो यूपत्वोत्पत्त्यर्थाः। इह त्वयूपे यूप-कार्यनियोजनविधानात लुप्तद्वारास्ते न कार्याः। इति चेत् —

स्युस्तु पर्यूहणादयः ॥ २६५ ॥

छेदनादिपरिव्याणान्तास्संस्कारः दृष्टादृष्टकार्याः संभूय नियोजनाङ्गम्। अर्थात्संस्कारसमुदायो यूपशब्द-निमित्तम्। तत्र लुप्तार्थच्छेदनाद्यकरणेऽपि, अलुप्तद्वाराः पर्यूहणादिपरिव्याणान्ताः कार्याः।

इति खलेवाल्यां पर्यूहणादिसंस्काराणामनुष्ठानाधिकरणम् ॥ ३३ ॥

महापितृयज्ञे भाष्यमतेन धानासु अवघातानुष्ठानाधिकरणम् (३४)

महापितृयज्ञे, 'पितृभ्यो बर्हिषद्भ्यो धानाः' इति श्रुतधानास्ववघातो न कार्यः। स्वरूपनाशे सक्तुत्वापातात्। इति चेत् —

प्राकृतक्रमभेदेऽपि न पदार्थो निवर्तते।

प्रकृतौ यागसाधनत्वेन श्रुतव्रीह्यवघातः, तथेह धानावस्थायां क्रियमाणो विघातकः स्यात्। भर्जनात्पूर्वं करणे क्रमलोपेऽपि पदार्थालोपात् पूर्वं कार्याः। इति भाष्यम्।

इति महापितृयज्ञे भाष्यमतेन धानासु अवघातानुष्ठानाधिकरणम् ॥ ३४ ॥

वार्तिककारमतेन पेषणस्य प्राकृततासमर्थनाधिकरणम् (३५)

प्रकृतावपि यागसाधनदेवतासंबन्धिपुरोडाशश्रपणार्थमेवावघातः। तथा 'गुणलोपे च मुख्यस्य' इत्यनेन गतार्थश्च, इति वार्तिके तत्रैव, 'पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थं' इति श्रुतमन्थमुदाहृत्य विचारितम्। मृतवत्सा धेनुरभिवान्या। द्रवद्रव्ये प्रक्षिप्यमथिताः सक्तवो मन्थः। तत्र पाकानन्तरपेषणं न प्राकृतम्। प्रकृतो पाकात्पूर्वं तदर्थश्च तत्। अन्यथा पुरोडाशनिर्वर्तकपाकायोगात्। मन्थे तु पेषणं विना तण्डुलेषु पाक इति नेदं पेषणं प्राकृतम्। लुप्तार्थत्वात् सक्तुभावायाधर्मकं कार्यम्। इति चेत् —

न प्राकृतक्रमान्यत्वात्पदार्थोऽप्राकृतो भवेत् ॥ २६६ ॥

प्रकृतौ पेषणपाकयोर्द्वितीयया हविरर्थत्वावगमात् तदङ्गत्वम्। अर्थात्पेषणं पूर्वम्। तद्वदत्रापि अर्थादेव पश्चात्। तत्र क्रमान्यत्वेऽपि प्राकृतधर्मयुक्तमेव कार्यम्। तस्य प्राकृतत्वात्।

इति वार्तिककारमतेन पेषणस्य प्राकृततासमर्थनाधिकरणम् ॥ ३५ ॥

इति लघुवार्तिकटीकायां दशमस्य द्वितीयः पादः ॥

॥ अथ तृतीयः पादः ॥

पश्वादौ सामिधेन्यादिप्राकृतेतिकर्तव्यतानुष्ठानाधिकरणम् (१)

अग्नीषोमीयपशौ 'एकादश प्रयाजान् यजति एकादशानूयाजान्' इति, चातुर्मास्येषु 'नव प्रयाजान्' इत्यादि, इष्टकावायव्यपशौ 'हिरण्यगर्भस्समवर्तताग्र इत्याधारमाधारयति' इत्येवं जातीयकेषु तत्तद्गुणयुक्तपदार्थविधिः, न गुणमात्रस्य। प्रकारमात्रातिदेशेन पदार्थानामप्राप्तेः। अतो गृहमेधीयन्यायेन क्लृप्तोपकारप्राकृताङ्गपुनर्विधानेनापूर्वत्वावगमाच्चोदकलोपः। इति चेत् —

एकादशप्रयाजादौ गुणमात्रविधिर्मतः।

अध्यायाघाधिकरणन्यायेन पदार्थविशिष्टोपकारातिदेशात्, तत्तदनुवादेन लाघवाय तत्तद्गुणमात्रं विधेयम्। उपपदार्थविधिश्चोभयत्र। तथा च प्राकृतपुनर्विधानाभावात् नापूर्वत्वमिति नातिदेशलोपः।

इति पश्वादौ सामिधेन्यादिप्राकृतेतिकर्तव्यतानुष्ठानाधिकरणम् ॥ १ ॥

वायव्यपशौ 'हिरण्यगर्भः' इत्यादिमन्त्रस्योत्तरस्मिन्नाघारे गुणत्वाधिकरणम् (२)

वावव्यपश्वाघारे हिरण्यगर्भमन्त्रविधिः प्रथमस्यौवाघारे, तस्यैव प्राजापत्यत्वेन मन्त्रलिङ्गाविरोधात्। उत्तरस्यैन्द्रत्वात्। 'प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय' इति वाक्यशेषाच्च। इति चेत् —

हिरण्यगर्भमन्त्रस्यादुत्तराघारसंश्रयः ॥ २६७ ॥

न स्वाहाकारो वषट्कारो वा इति श्रुतेः प्रथमस्यामन्त्रकतया तन्नियमादृष्टकल्पनापत्तेः, उत्तरस्मिन्मन्त्रनियमादृष्टयोस्सत्वात् तत्र मन्त्रविधानम्। वाक्यशेषस्तु इन्द्रेऽपि यौगिकत्वात्, यो ह खलु वाव प्रजापतिः स उ वेवेन्द्रः' इति श्रुतेश्चोपपन्नः। अत एव मन्त्रलिङ्गमप्युपपन्नम्। तस्मादुत्तरस्यैव मन्त्रः।

इति वायव्यपशौ 'हिरण्यगर्भः' इत्यादिमन्त्रस्योत्तरस्मिन्नाघारे गुणत्वाधिकरणम् ॥ २ ॥

चातुर्मास्येषु सोमेषु आसादननियोजनयोः प्राकृतगुणविधित्वाधिकरणम् (३)

'उत्करे वाजिनमासादयति' 'परिधौ पशुं नियुञ्जीत' इत्यत्र, उत्करस्य तीक्ष्णाग्रत्वात् तुङ्गत्वाच्च, परिधेश्चाणीयस्त्वात्, न प्राकृतासत्त्यनपक्रमणकार्यकरत्वमित्यदृष्टार्थमप्राकृतमासादनान्तरं-नियोजनान्तरञ्चोत्करविशिष्टं परिधिविशिष्टञ्च विधीयते, धात्वार्थविध्यनुग्रहाय। इति चेत् —

उत्करादेर्गुणस्यैव विधिरासादनादिके

पृथ्वग्रत्वस्थविष्ठत्वसंपादनेन प्राकृतकार्यकरत्वोपपत्तौ न विशिष्टाध्याश्रयणम्। वाक्यार्थविधिश्च तुल्यः। तस्मात्प्राकृतासादननियोजनयोर्गुणमात्रविधानम्। तत्र नवमे परिधित्वाविघातिनो नियोजनार्थाञ्जनपरिव्याणादयः कार्या इत्युक्तम्। तन्न्यायेनोत्करेऽपि वेदिधर्मा आसादनादयः कार्याः। इति केचित्।

इति चातुर्मास्येषु सोमेषु आसादननियोजनयोः प्राकृतगुण-विधित्वाधिकरणम् ॥ ३ ॥

अग्निचयने प्राकृतवैकृतोभयदीक्षाहुतीनामनुष्ठानाधिकरणम् (४)

अग्नौ प्रकृतिप्राहादीक्षाहुतिषट्कस्य सहैव मन्त्रषट्कं प्राप्तं 'आकूत्यै प्रयुजेऽग्नये त्वाहा' इत्यादि।

तत्रैवाप्राकृताः षण्मन्त्राः, 'आकूतिमग्निं प्रयुंजँ स्वाहा' इत्यादयः । ते च दीक्षार्थाः । तथा विनियुक्ताः 'षड्भिर्दीक्षयति' इति । दीक्षाहुत्यभ्यासश्च श्रुतौ 'द्वादश जुहोति, इति । तत्र प्रत्यक्षपठितविहितवैकृतमन्त्रैः आनुमानिकमन्त्रनिवृत्तिः । द्वादशानामपि होमानां तैरेवाभ्यस्तैः करणसंभवात् । इति चेत् —

अग्नौ दीक्षार्थमन्त्राणां प्राकृतैस्स्यात्समुच्चयः ॥ २६८ ॥

न तावद्वैकृतानां होमार्थत्वम् । दीक्षार्थतया श्रुतस्वाहाकारान्तमन्त्राणां तदङ्गहोमप्रणाड्या दीक्षोपयोगः । ततश्च प्राकृताबाधेनातिदिष्टोपदिष्टमन्त्राणां द्वादशसु मन्त्रेषु समुच्चयसंभवे, नाश्रुताभ्यासकल्पना । तावतैव दीक्षार्थतासिद्धेः ।

इत्यग्निचयने प्राकृतवैकृतोभयदीक्षाहुतीनामनुष्ठानाधिकरणम् ॥ ४ ॥

पुनराधानेऽग्न्याधानदक्षिणानां निवृत्त्यधिकरणम् (५)

पुनराधानेऽग्न्याधानप्रकृतिके श्रुतम् 'पुनर्निष्कृतो रथो दक्षिणा–पुनरुत्स्यूतं वा सः पुनरुत्सृष्टोऽनड्वान्' इति । पुनर्योजित = पुनर्निष्कृतः । आधाने एका द्वे इत्यादिश्रुतदक्षिणा प्रकृतिप्राप्ता वैकृती च समुच्चेया । 'उभयीर्ददाति' इति वचनात् । इति चेत् —

प्राकृत्या न समच्चेया पुनराधेयदक्षिणा ।

उभयीरित्यत्र विध्यश्रवणात् अन्यशेषत्वाच्च दक्षिणयोस्तुल्यार्थतया समुच्चयायोगात् वैकृत्या प्राकृतबाधः । प्रकृतिविकृत्योः क्रमानुमानात् क्रमदानाभिप्रायः उभयीरित्यनुवादः ।

इति पुनराधनेऽग्न्याधानदक्षिणानां निवृत्त्यधिकरणम् ॥ ५ ॥

आग्रयणे वासोवत्साभ्यामन्वाहार्यस्य निवृत्त्यधिकरणम् (६)

आग्रयणे, वासः– प्रथमजो वत्सश्च दक्षिणा' इति श्रुतं प्राकृतानत्यर्थत्वात्प्राकृतान्वाहार्यनिवर्तकमित्याह —

अन्वाहार्यस्याग्रयणे वासो वत्सं निवर्तकम् ॥ २६९ ॥

इत्याग्रयणे वासोवत्साभ्यामन्वाहार्यस्य निवृत्त्यधिकरणम् ॥ ६ ॥

वासोवत्सयोरन्वाहार्यधर्मानुष्ठानाधिकरणम् (७)

अन्वाहार्यकार्यापत्त्या वासो वत्सं तद्धर्मकमित्याह —

तत्रान्वाहार्यधर्मस्स्यात्

इति वासोवत्सयोरन्वाहार्यधर्मानुष्ठानाधिकरणम् ॥ ७ ॥

आग्रयणे वत्से पाकाभावाधिकरणम् (८)

वत्से चोदकप्राप्तः पाकः, विशस्य तन्मांसे कार्यः । इति चेत् —

वत्से पाको निवर्तते

श्रुतहान्यश्रुतकल्पनयोर्लक्षणायाश्च परीहाराय जीवन्वत्सो देयः इति पाकनिवृत्तिः ।

इत्यग्रयणे वत्से पाकाभावाधिकरणम् ॥ ८ ॥

आग्रयणे वाससि पाकाभावाधिकरणम् (९)

वाससस्त्वाविरोधात्पाकस्तत्र स्यात् । इति चेत् —

नापि वाससि पाकस्स्यात्

प्रकृतावन्नसंपत्त्यर्थो नादृष्टार्थे इति न वाससि पाकः ।

इत्याग्रयणे वाससि पाकाभावाधिकरणम् (९)

आग्रयणे वासोवत्सयोरभिघारणाभावाधिकरणम् (१०)

अन्वाहार्यधर्मोऽभिघारणमदृष्टार्थत्वाद्वासोवत्सेऽपि स्यात् । इति चेत् —

न तयोरभिघारणम् ॥ २७० ॥

स्वादिमार्थं, नादृष्टार्थमिति तस्यापि निवृत्तिः ।

इत्याग्रयणे वासोवत्सयोरभिघारणाभावाधिकरणम् ॥ १० ॥

ज्योतिष्टोमे गवामेव द्वादशशतस्य दक्षिणात्वाधिकरणम् (११)

ज्योतिष्टोमे, 'गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा' इति श्रुतम् । तत्र तस्येति षष्ठ्यन्तशब्देन गवादीन्युद्दिश्य विधीयमाना संख्या प्रतिप्रधानं संपद्यत इति प्रत्येकं द्वादशशतं देयम् । इति प्रथमः (पक्षः) गवादीनां, गवाद्युद्देशेन दक्षिणात्वेन–तेषु च संख्यायाश्च विधौ वाक्यभेदापातात्, गवादिद्रव्यसंख्योभयविशिष्टा दक्षिणा दाने विधीयते । तत्र, यत्रकुत्रचित् द्रव्ये निविष्टा संख्या दक्षिणान्वितत्वेनानुष्ठिता इति यत्र क्वचन संख्या स्यात् । अव्यवधानाद्वा माषाणाम् । इति द्वितीयः ।

नैतत् द्वयम् । शब्देन समुच्चितानां संख्यान्वयप्रतीतेः, तेषां बहुत्वेपि, क्रतोः–गवादिसमाहारस्य वा तस्येति निर्देशात्, इतरेतरसंहितेषु निविष्टा संख्या सर्वसंपादनीया स्यात् ।

तत्र वाक्योपात्तद्रव्यसंबन्धे सति, न प्राकरणिकेन क्रतुना–अशाब्दसमाहारेण वा संबध्यते। अतस्तस्येति गवादिनिर्देशः। तस्याप्येकवचननिर्देशात् एकजातीयस्यानियमेन स्यात्। पशूनामप्यनियमः। एकवचनान्तत्वान्नावीनां निर्देशः। गवादीनामाद्यानि चत्वार्यवशिष्टानि। इति चेत् —

द्वादशं शतमित्येषा संख्यागोमात्रसंश्रया।

तत्र महोपकारत्वानिषिद्धत्वमुख्यत्वैः तस्येति गोनिर्देशः। तदयमर्थः–'गोगतसंख्या, गवादिदशद्रव्याणि च समुच्चितरूपा दक्षिणा, 'ऋत्विग्भ्यो दक्षिणां ददाति' इति वाक्यविहितदानाङ्गं विधीयत इति।

गौश्चेत्यादिरुत्पत्तिविधिः, ऋत्विग्भ्य–इत्यादिर्विनियोगविधिः। इति केचित्।

इति ज्योतिष्टोमे गवामेव द्वादशशतस्य दक्षिणात्वाधिकरणम् ॥ ११ ॥

विभज्यगोदक्षिणायादानाधिकरणम् (१२)

इयं दक्षिणा, विभज्य–अविभज्य वा? अविभज्यैव देया। ऋत्विग्भ्यः इति श्रुतबहुत्वस्य दानाङ्गत्वात्। इति चेत् —

विभज्य दक्षिणा देया

तादर्थ्यचतुर्थ्या ऋत्विजां भाव्यत्वावगमात् न संख्याविवक्षिता। आत्मीयं द्रव्यं ऋत्विजां अनन्यापेक्षं यथोपयोक्ष्यते तादृशदानस्यैवानत्यर्थतया, दानविधेरपि तादृगर्थत्वावधारणात्, 'तु थो वो विश्ववेदा विभजतु' इति मन्त्रा पाक्षिकत्वाबाधाभ्यामपि छागन्यायेन विभज्यैव दानम्।

इति विभज्य गोदक्षिणायादानाधिकरणम् ॥ १२ ॥

ज्योतिष्टोमे समाख्यानुसारेण दक्षिणाविभागाधिकरणम् (१३)

विभागः समस्सर्वेषाम्। लोकवत् प्रयासानुरूपो वा। इति चेत् —

विभागस्स्यात्समाख्यया ॥ २७१ ॥

द्वादशाहे दीक्षाक्रमविधायिवाक्ये, ब्राह्मणाच्छंसिप्रभृतिषु 'अर्धिनो दीक्षयति' इति, आग्नीध्रादिषु 'तृतीयिनः' इति, पोत्रादिषु 'पादिनः' इति च दर्शनात् तदनुसारी विभागः प्रकृतावबसीयते।

इति ज्योतिष्टोमे समाख्यानुसारेण दक्षिणाविभागाधिकरणम् ॥ १३ ॥

भूनामैकाहे धेनुदानेन कृत्स्नक्रतुदक्षिणाबाधाधिकरणम् (१४)

'अथैषभूः' इत्येकाहं विधाय, 'तस्य धेनुर्दक्षिणा' इति श्रुतम्। तत्र प्रकृतौ दक्षिणाशब्दस्य भृतित्वरूपगुणवाचित्वात् भृतित्वगुणाश्रयाणां गवादीनां नानात्वेन प्रत्येकं दक्षिणात्वावगतेः, अत्र च गोत्वलिङ्गेन धेन्वास्तत्स्थानत्वावगमात् गोमात्रस्य ससंख्यस्य तया निवृत्तिः। नाश्वादेः। इति चेत्—

सर्वस्या दक्षिणायास्स्याद्भुवि धेनुर्निवर्तिका ।

गवादीनां विशेष्यत्वे, दक्षिणाशब्दस्य तद्गुणत्वे च, तस्य 'गुणवचनानामाश्रयतो लिङ्गवचनानि' इति व्याकरणात् बहुवचनान्तत्वं—भृतिसंस्कृतगवादीनामानर्थक्यञ्च स्यात् । गवाद्युपसर्जनकभृतिवचनत्वे तस्या एकत्वात्, एकवचनं दक्षिणापदे स्यात्—आनत्यर्थत्वञ्च । तस्माद्गवाद्यात्मिकैका दक्षिणा प्रकृतौ । विकृतौ सैव धेन्वात्मिकासंपन्नेति समस्तप्राकृतगवादिनिवृत्तिः ।

इति भूनामैकाहे धेनुदानेन क्रतुदक्षिणाबाधाधिकरणम् ॥ १४ ॥

एकां गां इत्यनेन गोगतसंख्याबाधाधिकरणम् (१५)

'यदि सोममपहरेयुः, एकां गां दक्षिणां दद्यात्—अभिदग्धे सोमे पञ्च गा दद्यात' इति श्रुतम् । तत्र द्वितीयाश्रुत्या वाक्यगम्यगोसंबन्धबाधेन, एकामित्यस्य दानसंबन्धप्रतीतेः वाक्यद्वयेऽपि एकया पञ्चभिश्च कृत्स्नद्रव्यनिवृत्तिः । इति चेत् —

एकां पञ्च गवामेव

एकामित्यस्य क्रियान्वये, गवाद्यानां षण्णामन्यतमत् एकशब्दार्थस्स्यात् । तत्र गामित्यस्य लक्षणया पक्षे तत्तदन्यतमद्रव्यानुवादकत्वं पक्षे गौरेवेति स्यात् । 'एकां दद्यात्—ताञ्च गाम्' इति विधिः, ततो वाक्यभेदः । 'गां दद्यात्' इति गोर्विधाने, प्रकृतिप्राप्तद्वादशशतसंख्या तत्परिच्छेदिकास्तीति एकामित्यनर्तकम् । तस्यापि विधौ वाक्यभेदः । अथ धेनुवत् विवक्षितसंख्यगोर्विधेरेकामित्यनुवाद[1]प्रतिवर्षक स्यात् । पञ्च गा दद्यादित्यत्र बहुवचनस्य त्रित्वपर्यवसितेर्न पञ्चेत्यनुवादः । तस्मात् गामित्यस्य एकामिति संबन्धो वाक्यीयो विधीयते । संख्यायादानान्वयेऽपि प्रातिपदिकोक्तसंख्यात्वसाम्यात् द्वादशशतसंख्यास्थाननिवेशे, प्रकृतिवत् गव्येव निविशते इत्यश्वाद्यनिवृत्तिः ।

इति एकां गां इत्यनेन गोगतसंख्याबाधाधिकरणम् ॥ १५ ॥

साद्यस्क्रे त्रिवत्सेन सोमक्रयसाधनमात्रबाधाधिकरणम् (१६)

साद्यस्क्रे वर्षत्रयोपेतः, 'त्रिवत्सस्साण्डस्सोमक्रयणः' इति श्रुतम् । पूर्वन्यायेन तत्रापि साण्डे त्रिवत्सत्वविधिरिति पुंगवत्वसाम्यात् वृषभस्यैव निवृत्तिः । इति चेत् —

कृत्स्नस्यापि त्रिवर्षकः ॥ २७२ ॥

साण्डानुवादेन त्रिवत्सविधौ, अग्नीषोमीयादावपि प्रसङ्गात्, क्रयोद्देशेन तद्विधिरिति क्रयसाधनकृत्स्नद्रव्यनिवृत्तिः ।

इति साद्यस्क्रे त्रिवत्सेन सोमक्रयसाधनमात्रबाधाधिकरणम् ॥ १६ ॥

---

[1] अस्पष्टार्थं पदम् ।

अश्वमेधे प्राकाशावित्यनेनाध्वर्युभागबाधाधिकरणम् (१७)

अश्वमेधे 'प्राकाशावध्वर्यवे ददाति' इति श्रुतम्। हिरण्मयदीपस्तम्भः–तादृग्दर्पणं वा प्राकाशः। तत्र संनिहिताध्वर्युसंबन्धबाधेन श्रुत्या ददात्यन्वयात्, कृत्स्नदक्षिणानिवृत्तिः। अध्वर्युशब्दश्च योगात् ऋत्विग्मात्रानुवादः। इति चेत् —

प्राकाशदानमध्वर्युभागस्यैव निवर्तकम्।

अध्वर्युशब्दावैयर्थ्याय क्रियासंबन्धोत्तरकालीनसंप्रदानसंबन्धः – उभयविशिष्टदानान्तरं वा प्राकृताध्वर्व्वानत्यर्थे विधीयत इति तद्भागमात्रनिवृत्तिः।

इत्यश्वमेधे प्राकाशावित्यनेनाध्वर्युभागबाधाधिकरणम् ॥ १७ ॥

उपहव्ये कृत्स्नक्रतुदाक्षिण्यस्य बाधाधिकरणम् (१८)

उपहव्यनामकैकाहे 'अश्वश्श्यावो रुक्मललाटो दक्षिणा–सब्रह्मणे देयः' इति श्रुतम्। तत्र ब्रह्मणे देयः इति वचनात् ब्रह्मभागः प्राकृतः प्राकाशन्यायेन निवर्तते। अन्यानत्यर्थं चोदकप्राप्तदक्षिणा देया। इति चेत् —

श्यावोऽश्वस्सकलस्स्यापि स्यात्

'श्यावो दक्षिणा' इति वाक्ये क्रतुसंबन्धविधानात्, 'या दक्षिणा क्रतोः सा श्यावाश्वात्मिका' इत्यतो धेनुन्यायेन कृत्स्ननिवृत्तिः। सा च दक्षिणा 'स ब्रह्मणे देयः' इति ब्रह्मसंबन्धविधेः पुरुषान्तरेभ्योऽपनीतेति लौकिकदानाद्युपायेनान्ये नमयितव्याः। अत्र विशिष्टविधौ गौरवात् पञ्चदशान्यानीत्यादिवत् वाक्यभेदापत्तेश्च, प्राकृतदक्षिणासंबन्ध्यश्वानुवादेन श्यावगुणविधिः एकां गामितिवत्। अतो न कृत्स्ननिवृत्तिः। इति केचित्।

इत्युपहव्ये कृत्स्नक्रतुदाक्षिण्यस्य बाधाधिकरणम् ॥ १८ ॥

ऋतपेये सोमचमसेन कृत्स्नक्रतुदक्षिणाबाधाधिकरणम् (१९)

ऋतपेये श्रुतं, 'औदुंबरस्सोमचमसो दक्षिणा, सप्रियाया सगोत्राय देयः' इति। अत्र सोमचमसो ब्रह्मभागमेव बाधते। 'यत्पशून् दद्यात् सोऽनृतं कुर्यात्' इति पशुनिन्दया सर्वदा न प्राप्तेः, अप्रसक्तस्य निषेधायोगात्। इति चेत् —

सोमचमसस्तथा ॥ २७३ ॥

विधित्सितसोमचमसस्तुत्यर्था निन्दा, न निन्दया प्रतिषेधं कल्पयित्वा, तदनुपपत्त्या सर्वप्राप्त्यर्था। अतो न्यायेन सर्वनिवृत्तिः।

इत्यृतपेये सोमचमसेन कृत्स्नक्रतुदक्षिणाबाधाधिकरणम् ॥ १९ ॥

सोमचमसेन कृत्स्नक्रतुदक्षिणापुरुषान्तरयोर्बाधाधिकरणम् (२०)

'सोमचमसो ब्रह्मणे देयः' इत्येकवाक्यत्वं कृत्वा चिन्त्यते । चमसो दक्षिणेति दक्षिणा संयोगात् तस्याश्च प्रकृतित एकस्याः प्राप्तेस्सत्यपि ब्रह्मसंबन्धे कृत्स्ननिवृत्तिः । चमसस्य ब्रह्मसंबन्धात्पुरुषान्तरापनयः । अन्यथा दक्षिणाशब्दः तदेकदेशब्रह्मदक्षिणायां लाक्षणिकस्स्यात् । इति चेत् —

वाक्यैक्ये तु ब्रह्मभागमात्रस्यैव निवर्तकः ।

वाक्यैक्ये, ब्रह्मणे दक्षिणात्वेन सोमचमसो देय इत्यन्वयात् तद्भागावयवलक्षणया तद्भागस्यैव निवृत्तिः । अन्यथा तस्यैव वाक्यस्य, 'क्रतौ दक्षिणा सोमचमस एव' 'स च ब्रह्मण एव' इति व्यापारद्वयकरणे वाक्यभेदात् । क्रत्वपेक्षया तस्य दक्षिणावयवत्वेऽपि ब्रह्मापेक्षया संपूर्णदक्षिणात्वेन लाक्षणिकत्वाभावाच्च । एकवाक्यत्वपक्षे ब्रह्मभागस्यैव निवृत्तिः ।

इति सोमचमसेन कृत्स्नक्रतुदक्षिणापुरुषान्तरयोर्बाधाधिकरणम् ॥ २० ॥

वाजपेये रथस्य भागनियामकताधिकरणम् (२१)

वाजपेये 'सप्तदश रथाः—सप्तदश शकटाः—सप्तदश दास्याः'—इत्यादि विधाय, 'यजुर्युक्तं रथमध्वर्यवे ददाति' इति श्रुतम् । यजमानारोहणाय, 'इन्द्रस्य वज्रोऽसि वार्त्रघ्नः' इत्यादिभिर्यजुर्वेदमन्त्रैः सज्जीकृतो यजुर्युक्तः । तत्र प्राकाशन्यायेन कृत्स्नाध्वर्युभागनिवृत्तिः । इति चेत् —

यजुर्युक्तस्तु नाध्वर्युभागस्य विनिवर्तकः ॥ २७४ ॥

सप्तदश रथाः अन्यान्यपि द्रव्याणि वाजपेये दक्षिणात्वेन विहितानि । तत्र यजुर्युक्तस्यानियमेन कस्मैचिद्दानप्रसक्तौ अध्वर्यव इति नियम्यते । यद्यजुर्युक्तं ददाति तदध्वर्यव इति । द्रव्यान्तरसहितस्यैव नियमः । अतो न देयान्तरनिवृत्तिः । प्राकाशयोस्तु प्रथमत एवापूर्वतया अध्वर्युसंबन्धविधानात् देयान्तरनिवृत्तिरिति वैषम्यम् ।

इति वाजपेये रथस्य भागनियामकताधिकरणम् ॥ २१ ॥

इति लघुवार्तिकटीकायां दशमस्य तृतीयः पादः ।

॥ अथ चतुर्थः पादः ॥

अग्न्यादौ नारिष्टहोमादिभिर्नक्षत्रेष्ट्यादीनां समुच्चयाधिकरणम् (१)

नक्षत्रेष्टौ श्रुतम्, 'सोऽत्र जुहोति' इति । तत्रत्यमन्त्राः—'अग्नये स्वाहा कृत्तिकाभ्यस्स्वाहा' इत्यादयः । सन्ति तु प्रकृतौ नारिष्टहोमाः । तत्र होमसामान्यादुपस्थितत्वप्रसूतनारिष्टकार्ये

प्रयोजनापेक्षिणः उपहोमाः प्रत्यक्षविधिना विधीयमानाः आतिदेशिकान् बाधन्ते, शरा इव कुशान्। इति चेत् —

नक्षत्रेष्ट्युपहोमाद्या न नारिष्टादिबाधकाः।

होमत्वस्यात्यन्तसाधारणस्य न नारिष्टकार्योपस्थापकत्वम्। विधीयमानहोमविशेषः तत्कार्यानुपस्थापक इति तु व्यक्तम्। व्रीहीनीवारादिवत् दृष्टार्थत्वाभावात्। नान्यत्तद्दृष्टजनकत्वग्राहिप्रमाणमस्ति। नवा क्लृप्तोपकारतया प्रत्यक्षश्रुतेरप्युपहोमैर्निराकांक्षता विकृतेरित्यतिदिष्टोपदिष्टयोः समुच्चयो भिन्नविषयत्वात्।

इत्यग्न्यादौ नारिष्टहोमादिभिर्नक्षत्रेष्ट्यादीनां समुच्चयाधिकरणम् ॥ १ ॥

शरमयबर्हिषा कौशबर्हिर्बाधाधिकरणम् (२)

दृष्टान्तवैषम्यार्थमिदम्। कुशशरयोः शास्त्रीयत्वात्समुच्चयः। इति चेत् —

कुशकार्ये विधानाच्च तेषां स्युर्बाधकाश्शराः ॥ २७५ ॥

इति शरमयबर्हिषा कौशबर्हिर्बाधाधिकरणम् ॥ २ ॥

वाजपेये रथघोषदुन्दुभिघोषाभ्यां दर्भमन्त्रयोरुभयो-र्बाधाधिकरणम् (३)

वाजपेये, 'रथघोषेण माहेन्द्रस्तोत्रमुपाकरोति' इत्यत्र, षष्ठीतत्पुरुषे पूर्वपदलक्षणापत्तेः इतरेतर-द्वन्द्वे, 'भ्या'मित्यापत्तेः समाहारद्वन्द्वो रथघोषेणेति। तत्र रथो दर्भयोर्निवर्तकः घोषो मन्त्रस्य इति अविशेषिशितघोषान्मन्त्रनिवृत्तिः। इति चेत् —

स्याद्रथस्य तु घोषस्तु बाधको मन्त्रदर्भयोः।

समाहारे पदद्वयलक्षणापत्तेः, रथस्य घोषेण दर्भमन्त्रयोर्निवृत्तिः।

इति वाजपेये रथघोषदुंदुभिघोषाभ्यां दर्भमन्त्रयोरुभयोर्बाधाधिकरणम् ॥ ३ ॥

बृहस्पतिसवादौ बार्हस्पत्यग्रहादिभिः प्राकृतैन्द्रवायवादि-ग्रहाणां समुच्चयाधिकरणम् (४)

बृहस्पतिसवे, 'बार्हस्पत्यं गृह्णाति', विषुवति 'अर्कं गृह्णाति, महाव्रते' 'शुक्रं गृह्णाति' इत्यादौ, प्रत्यक्षविहितग्रहैः तत्तद्यागनिर्वृत्तेः प्राकृता निवर्तन्ते। इति चेत् —

बार्हस्पत्यादिभिर्नैव बाध्यन्ते प्राकृता ग्रहाः ॥ २७६ ॥

प्रत्यक्षवचनैर्यागेऽविधानात् देवताविशिष्टग्रहाणामदृष्टार्थतया, प्राकृतकार्यकारित्वस्यान्यतोऽप्यनवगमात्, प्रकृतौ नानाग्रहाणामिव विकृतावपि प्राकृतवैकृतानां समुच्चित्य प्रयोगवचनग्रह इति समुच्चयः। न च

बार्हस्पत्ये अग्निष्टुतीव ग्रहानुवादेन देवताविधिः, गौरवपरिहारायेति वाच्यम्; तत्र आग्नेया ग्रहाः इति बहुस्थले तथात्वम्। अत्र तूद्देश्यगतबहुत्वाविवक्षायामपि बहुषु बहुवचनापेक्षणादभिधानबाधापत्तेर्विशिष्टविधिरेव मुक्तः। अत्र ग्रहं संमार्ष्टि इत्यादिवत् प्रत्येकवृत्त्यैकत्वाभिप्रायेणापि वचनोपपत्तेर्न विशिष्टविधिर्युक्त इति केचित्।

इति बृहस्पतिसवादौ बार्हस्पत्यग्रहादिभिः प्राकृतैन्द्रवायवादिग्रहाणां समुच्चयाधिकरणम् ॥ ४ ॥

वाजपेये प्राजापत्यपशुभिः क्रतुपशूनां समुच्चयाधिकरणम् (५)

'सप्तदश प्राजापत्यान्' इत्युपदिष्टेन पशुत्वरूपप्रकृतिलिङ्गात् तत्कार्यापत्त्या प्राकृताग्नीषोमीयादिनिवृत्तिः। इति चेत् —

प्राजापत्यैर्न दैक्षाद्याः

पशुत्वस्यातिप्रसङ्गित्वात् प्राकृतकर्मणि संख्यादेवतयोर्विध्ययोगात्, अदृष्टार्थानां प्राकृतवैकृतानां समुच्चयः।

इति वाजपेये प्राजापत्यपशुभिः क्रतुपशूनां समुच्चयाधिकरणम् ॥ ५ ॥

सांग्रहणीष्टौ आमनहोमैरनुयाजानां समुच्चयाधिकरणम् (६)

सांग्रहण्यां, 'आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोति' इति श्रुतम्। तत्र त्रित्वलिङ्गात् अनूयाजानां त्रित्वविशिष्टहोमानुवादेन मन्त्रविधानात् तन्मन्त्राणां निवृत्तिः। इति चेत् —

नानुयाजास्तथामने

त्रित्वस्यातिप्रसञ्जकत्वात्, विशिष्टानुवादेन मन्त्रविधौ वाक्यभेदात्, अदृष्टार्थानां समुच्चयः।

इति सांग्रहणीष्टौ आमनहोमैरनुयाजानां समुच्चयाधिकरणम् ॥ ६ ॥

महाव्रते ऋत्विगुपगानेन पत्न्युपगानस्य समुच्चयाधिकरणम् (७)

गवामयने महाव्रतं नामैकाहः। तत्र 'दिक्षु दुन्दुभयो नदन्ति' इत्यादि विधाय, 'पत्नय उपगायन्ति' इति श्रुतम्। तत्र 'उपचितं गानं उपगानम्' इति वा, 'गानस्योपचयः उपगानम्' इति वा, शारीरगानस्यैवोपगानम्। न दुन्दुभ्यादिनादस्य। तस्मादपगातॄणां उद्गात्रादिसहायानां ऋत्विजां निवृत्तिः पत्नीभिः। इति चेत —

पत्नीभिर्नोपगाः

काण्डवीणादिनादेऽपि लोके गानशब्ददृष्टेः, अवर्णात्मकदुन्दुभ्यादिगानस्योपचयं वीणादिभिः कुर्वन्त्यो भिन्नविषयत्वान्नोपगातृनिवर्तिकाः।

इति महाव्रते ऋत्विगुपगानेन पत्न्युपगानस्य समुच्चयाधिकरणम् ॥ ७ ॥

अञ्जनाभ्यञ्जने नवनीताभ्यञ्जनस्य गौग्गुलवाभ्यञ्जनादिभिः समुच्चयाधिकरणम् (८)

अञ्जनाभ्यञ्जनसंज्ञः एकोनपञ्चाशद्रात्रस्सत्रविशेषः। तत्र 'गौग्गुलवेन प्रातस्सवनेऽभ्यञ्जते, पैलुदारवेणमाध्यंदिने सवने, सौगन्धिकेन तृतीयसवने' इति श्रुतम्। तत्र दृष्टैककार्यत्वान्नवनीतस्य प्राकृतस्य वैकतान्निवृत्तिः। इति चेत् —

गुग्गुल्वाद्यैर्न नवनीतकम् ॥ २७७ ॥

प्राकृतस्य स्नेहनार्थत्वात्, वैकृतस्य [1]रूक्षीकरणार्थत्वात् नैककार्यत्वम्। प्राकृताभ्यञ्जने तत्तत्सवन तत्रद् द्रव्योभयविध्यशक्तेश्च न तत्र गुणविधिः। अतस्समुच्चयः।

इत्यञ्जनाभ्यञ्जने नवनीताभ्यञ्जनस्य गौग्गुलवाभ्यञ्जनादिभिः समुच्चयाधिकरणम् ॥ ८ ॥

महाव्रते अहतवाससः तार्प्यादिभिः समुच्चयाधिकरणम् (९)

महाव्रते, 'तार्प्यं (घृताक्तकंबलं) यजमानः परिधत्ते, दर्भमयं पत्नी' इति श्रुतम्। तत्र गुह्याच्छादने परिदधाति प्रयोगात्, तत्र विधीयमानवैकृताभ्यां प्राकृताहतवासो निवृत्तिः। इति चेत्–

तार्प्येण नाहतं

वैकृतयोर्गुह्याच्छादनायोग्यत्वात्, उपरिवासः कार्ये विधानमिति भिन्नार्थत्वात्समुच्चयः। अतो, 'वासांसि विभ्रंशयन्ति' इति वासोबहुत्वदर्शनोपपत्तिः।

इति महाव्रते अहतवाससः तार्प्यादिभिः समुच्चयाधिकरणम् ॥ ९ ॥

महाव्रते रथन्तरादिसाम्नां श्लोकादिसामभिस्समुच्चयाधिकरणम् (१०)

तत्रैव 'श्लोकेन पुरस्तात्सदस्तुवन्ति अनुश्लोकेन पश्चात्' इति श्रुतसाम्नोः स्तुतिलिङ्गात् प्राकृतगायत्रादिनिवर्तकत्वात्। इति चेत् —

न श्लोकाद्यैर्गायत्रमुख्यकम्।

प्राप्तस्तुत्यनुवादेन सामदेशयोर्विधौ वाक्यभेदात् विशिष्टस्तोत्रान्तरविधिरित्यदृष्टार्थत्वात् वैकृतैस्समुच्चयः।

इति महाव्रते रथन्तरादिसाम्नां श्लोकादिसामभिस्समुच्चयाधिकरणम् ॥ १० ॥

विकृतिविशेषे प्राकृतसाम्नां कौत्सादिभिर्बाधाधिकरणम् (११)

क्वचिद्विकृतौ 'कौत्सं भवति' 'काण्वं भवति' 'वसिष्ठस्य जनित्रे भवतः' 'क्रौञ्चानि

---

[1] अरूक्षीकरणार्थत्वात्—इति साधु।

भवन्ति ' इति श्रुतानि सामानि, प्राकृतस्तोत्रा संयुक्तत्वात्, न प्राकृतनिवर्तकानि । इति चेत् —

कौत्सकाण्वजनित्रादिसामभिर्बाध्यते तु तत् ॥ २७८ ॥

लिङ्गप्रकरणाभ्यां प्राकृतऋगक्षराभिव्यक्त्यर्थत्वावगतेः एकार्थत्वात्प्राकृतनिवृत्तिः ।

इति विकृतिविशेषे प्राकृतसाम्नां कौत्सादिभिर्बाधाधिकरणम् ॥ ११ ॥

कौत्सादिभिर्व्यवस्थया एकादिबाधाधिकरणम् (१२)

कौत्सादीनि प्राकृतसर्वसामनिवर्तकानि, अविशेषात् । इति चेत् —

तदुद्वापं तानि कुर्युस्स्वस्वसंख्यानुसारतः ।

यथासंख्यबाधेनापि वचनोपपत्तेः न सर्वबाधः । अतः 'एकेनैकस्य, द्वाभ्यां द्वयोः' इत्यादिना प्राकृत-निवृत्तिः ।

इति कौत्स्यादिभिर्व्यवस्थया एकादिबाधाधिकरणम् ॥ १२ ॥

विवृद्धाविवृद्धस्तोमकक्रतुषु यथाक्रमं प्राकृतसामबाधाबाधाधिकरणम् (१३)

यत्र स्तोमविवृद्धिः, 'अथैषोऽभिषेचनीय[1]श्चतुस्त्रिंशः पवमानः' इति, तत्र राजसामानि प्रत्यक्ष-श्रुतानि प्राकृतसामबाधकानि । विवृद्धेरागमेन पूरणस्य वक्ष्यमाणतया तत्र निवेशायोगात् । इति चेत्–

आवापो राजसामादेः

विवृद्धावागमस्यावाचनिकत्वेन विवृद्ध्यनुपपत्तिकल्प्यत्वात्, अत्र तु श्रुतैरेव तदुपपत्तेर्नागमो न्याय्यः ।

इति विवृद्धाविवृद्धस्तोमकक्रतुषु यथाक्रमं प्राकृतसामबाधाबाधाधिकरणम् ॥ १३ ॥

पवमाने विवृद्धाविवृद्धस्तोमकक्रतूनां सामावापोद्वापाधिकरणम् (१४)

अविवृद्धौ विवृद्धौ च प्रत्यक्षश्रुतसाम्नामावाप इत्युक्तम् । स यत्र क्वचन स्यात् । तन्निमित्त उद्वावोऽपि । 'त्रीणि ह वै यज्ञस्योदराणि गायत्रीं बृहत्यनुष्टुप्च । अत्रैवावपन्ति–अत एवोद्वपन्ति' इति हिशब्दवर्तमानोपबन्धाभ्यां नावापोद्वापौ नियन्तुमलम् । इति चेत् —

उभयं पवमानगम् ॥ २७९ ॥

आवापः उद्वापश्चैत्युभयं, अपूर्वत्वात् 'उपरि हि' इत्यादिवद्विधिः । अतः पवमानगतगायत्र्यादिष्वेव तौ । यद्यप्येकविंशेनातिरात्रेण प्रजाकामं याजयेदित्यादौ सर्वस्तोत्रेष्वपि विवृद्धिरावापादिति वक्ष्यते ;

---

[1] द्वाविंशत्पवमान इति ग्रन्थान्तरेषु ।

तथापि तस्य न्यायमात्रगम्यस्य, अन्यत्रावापपरिसंख्यापकवचनाविरोधेन पवमानमात्रविषयत्वात् । न चायमेव विधिरावापस्येति युक्तम् । एवकारोपहतविधिशक्तिकस्य, एवकारार्थरूपपरिसंख्याविधित्वात् । न च कौत्स्यादीनामध्ययनसिद्धरूपाबाधाय कण्वरथन्तरन्यायेन स्वयोनितदुत्तरयोरेव गानमिति न प्राकृतीष्वावाप इति वाच्यम् : तासां उत्तराग्रन्थे क्रत्वर्थतया अपठितत्वेनाङ्गत्वानवगमात् प्राकृतीष्वेव गानात् । कण्वरथन्तरस्य तु, स्वयोनिगाने निमित्तं वक्ष्यते । तस्मात्पवमानेष्वेवावापोद्वापौ ।

इति पवमाने विवृद्धाविवृद्धस्तोमकक्रतूनां सामावापोद्वापाधिकरणम् ॥ १४ ॥

यागादौ विधिशब्देनैव देवताभिधानाधिकरणम् (१५)

'आग्नेयोऽष्टाकपालः' इत्यत्र, 'अग्निपदार्थो देवता' इति विध्यर्थः । तस्या अनुष्ठानं तद्वाचिशब्दोच्चारणम् । तच्च पर्यायोच्चारणेऽपि भवतीति न विधिगतशब्दनियमः । न चोपस्थित-परित्यागेनानुपस्थितोच्चारणमयुक्तमिति विधिगतशब्दनियम इति वाच्यम् ; यत्र पर्यायशब्दद्वयं विधिगतं 'अग्नये पवमानाय पुरोडाशं' इत्यादौ, तत्रान्यतरोच्चारणेनापि तदुपपत्तावुभयानुच्चारणापत्तेः । न चारुण्यादिवदेकवाक्यगतत्वात्समुच्चयश्शङ्क्यः : विधेयस्यैव तथात्वात् । अत्र त्वर्थस्यैव विधेयतया शब्दोच्चारणस्य विध्यविषयस्यानुष्ठानकाले देवतावाचिशब्दोच्चारणप्रसक्तावन्यतरेणापि तत्संभवात् । इति चेत् —

विधिस्थमग्न्यादिपदं नियतं निगमेष्वपि ।

अत्र निगमशब्दो नावाहनादिपरः । तत्र विधिगतपदस्य प्रत्यक्षपाठेन पर्यायप्रसक्तेः । किन्तु, यागानु-ष्ठानकाले विधिगतपदं नियतं सर्वत्रेति । आग्नेय इत्यत्र नार्थस्य देवतात्वविधिः, तस्याननुष्ठेयत्वात् । किन्तु विधिगतदेवतावाचियावत्पदोच्चारणस्य विधिः । न चानुपस्थितस्य कथं विधिरिति शङ्क्यम् ; आग्नेयपदेनैव लक्षणया तदुपस्थितेः । तस्मात्पुरुषव्यापारव्याप्यस्यैव विधेयत्वात्, प्रकृतिषु विकृतिषु च विधिगतदेवतावाचिशब्दोच्चारणं विधेः । अर्थस्य देवतात्वमार्थिकमनूद्यते ; यच्छब्दस्योच्चारणं तस्य देवतात्वमिति ।

इति यागादौ विधिशब्देनैव देवताभिधानाधिकरणम् ॥ १५ ॥

अतिदेशस्थलेऽपि वैधशब्देनैव देवताभिधानाधिकरणम् (१६)

'सौर्यं चरुं निर्वपेत्' इत्यादिषु विकृतिषु निर्वापावाहनादिषु न विधिगतशब्दनियमः । त्यागमात्र एव विधिगतशब्दोच्चारणनियमात् । प्रकृतौ तु सर्वत्राग्निशब्दस्य प्रत्यक्षपाठान्नियमः । अत्र तु पाठाभावात् केनचिद्वाचकशब्देनोपलक्षणम् । इति चेत् —

विधिस्थपदमेव स्यात् सौर्यादिविकृतिष्वपि ॥ २८० ॥

प्रकृतावग्निशब्दोच्चारणविधिर्न यागमात्रे । अङ्गानामपूर्वसंबन्धस्योक्तत्वात् । अतोऽग्निपदयुक्तः प्रयोगः कार्यः इति प्रकृतावर्थः । विकृतावपि तत्स्थानापन्नसूर्यपदं प्रयोगे देवतावाचिपदोच्चारणं यत्र प्रसक्तं, तत्र सर्वत्रेति तदेव प्रयोक्तव्यम् ।

इत्यतिदेशस्थलेऽपि वैधशब्देनैव देवताभिधानाधिकरणम् ॥ १६ ॥

आधानेऽग्नेः सगुणेनाभिधानाधिकरणम् (१७)

पवमानेष्टिषु, 'अग्नये पवमानाय' इत्यादिषु एकेनैवार्थनिर्देशोपपत्तेः, चोदकानुग्रहायाग्निशब्द एव प्रयोक्तव्यः । इति चेत् —

अग्निः पावक इत्यादौ सगुणं तेषु तद्भवेत् ।

नार्थस्य विधानम् । किन्तु, विधिगतदेवतावाचिशब्दोच्चारणस्य । अत उभयनियमः ।

इत्यधानेऽग्नेः सगुणेनाभिधानाधिकरणम् ॥ १७ ॥

आधानाज्यभागयोर्निर्गुणेन देवताभिधानाधिकरणम् (१८)

पवमानेष्ट्याज्यभागौ प्रकृत्य 'बुधन्वानाग्नेयः कार्यः, पावकवान् सौम्यः' इति श्रुतम् । तत्र 'आग्नेयाज्यभागो बुधन्वत्पदयुक्तः कार्यः' इत्यर्थप्रतीतेः, देवताद्वारेण तद्युक्तत्वमिति, 'बुधन्वन्तमग्निमग्न आवह' इत्यादिक्रमेण निगमेषु प्रयोगः । बुधन्वत्पदवन्मन्त्रस्य लिङ्गप्रकरणक्रमैः प्राप्तेः । इति चेत् —

गुणो बुधन्वदादिस्स्यान्नाधानेष्ट्याज्यभागयोः ॥ २८१ ॥

बहवो मन्त्रा अग्निलिङ्गास्सोमलिङ्गाश्च प्रकरणपठिता अनियमप्राप्ताः । तत्र बुधबुधन्वत्पावकवद्युक्तमन्त्रनियमोऽनेन क्रियते । आग्नेयशब्देन सर्वमुद्दिश्य वा बुधन्वत्त्वं साक्षाद्विधीयते । एवञ्च चोदकप्राप्तदेवता न विकृता भवति ।

इत्याधानाज्यभागयोर्निर्गुणेन देवताभिधानाधिकरणम् ॥ १८ ॥

गवानुबन्ध्यपृषदाज्यहोमयोः विधिशब्दाभ्यामेवोस्रावनस्पतिशब्दाभ्यामभिधानाधिकरणम् (१९)

ज्योतिष्टोमे 'गौरनूबन्ध्यः' इति श्रुतम् । तत्र प्रकृतितः 'छागस्य वपाया मेदसः' इति मन्त्रान्तरं सन्निधावाम्नातम् । पशौ वनस्पतियागः स्विष्टकृद्विकारः । तत्रोभयत्र यथाप्रकृतिविधिशब्दादन्येन निगमेष्वभिधानम् । प्रकृतौ पशुशब्देन विधिः, 'छागशब्दो निगमे । 'अग्निं स्विष्टकृतं यजति इति विधिः 'ये दैव्या ऋत्विजस्तेभिरग्ने' इति मन्त्रः । तत्र नोस्राशब्दनियमः । तस्य पठितत्वेऽपि विध्यभावात् । एवं वनस्पतावपि । इति चेत् —

अनूबन्ध्यावनस्पत्यौ स्यातामुस्रावनस्पती ।

प्रकृतौ तद्भेदस्यार्थिकत्वेन,, अभेदस्यैव चोदकप्राप्तेः, अनूबन्धायाः द्रव्यत्वेन विधिशब्दनियमाभावे[1]ऽपि प्रत्यक्षपठितोस्राशब्दपाक्षिकत्वापत्तेर्नैवाभिधानम् । वनस्पतौ तु देवतात्वाद्विधिशब्दनियमः ।

इति गवानुबन्ध्यपृषदाज्यहोमयोः विधिशब्दाभ्यामेवोस्रावनस्पतिशब्दाभ्या-
मभिधानाधिकरणम् ॥ १९ ॥

अवभृथेऽग्निवरुणयोः सस्विष्टकृच्छब्देनाभिधानाधिकरणम् (२०)

अवभृथे 'अग्निवरुणौ स्विष्टकृतौ यजति' इति श्रुतम् । तत्र स्विष्टकृच्छब्दोऽग्नौ रूढः । भूतस्विष्टकरणस्य तदानीमभावात् । अतोऽग्नीवरुणयोरसमर्थः कार्यलक्षणार्थः 'स्विष्टकृत्कार्ये अग्नी-वरुणौ' इति । तथा च निगमे अस्विष्टकृच्छब्दकमभिधानम् । इति चेत् —

स्यातामावभृथावग्नीवरुणौ स्विष्टकृद्गुणौ ॥ २८२ ॥

प्रयोगान्तरापेक्षं भूतत्वं स्विष्टकरणञ्च गृहीत्वा यौगिकत्वोपपत्तौ न रूढिकल्पनम् । तद्योगस्य अग्नीवरुण-योरपि संभवात् न कार्यलक्षकता । तस्मात्सगुणाभिधानम् ।

इत्यवभृथे अग्नीवरुणयोः सस्विष्टकृच्छब्देनाभिधानाधिकरणम् ॥ २० ॥

**अग्नीषोमीयपशौ सर्वत्रैव प्रयोगे निर्गुणेनाग्निशब्देनाग्नेरभि-
धानाधिकरणम् (२१)**

अग्नीषोमीयपशुपुरोडाशे स्विष्टकृति 'अग्निं यजति' इति स्विष्टकृद्गुणलोपः श्रुतः प्रधानमात्रार्थः । इति चेत् —

छिद्रापि धान्यां सर्वेषु अगुणस्स्विष्टकृद् भवेत् ।

प्रयोग एव स्विष्टकृद्विधानात्सर्वत्र लोपः ।

इत्यग्नीषोमीयपशौ सर्वत्रैव प्रयोगे निर्गुणेनाग्निशब्देनाग्नेरभिधानाधिकरणम् ॥ २१ ॥

अनुयाजेषु स्विष्टकृद्यागस्य संस्कारकर्मताधिकरणम् (२२)

'उत्तरार्धात्स्विष्टकृते' इति पुरोडाशादिद्रव्यकः एकः, तृतीयान् याजश्च स्विष्टकृद्देवतो दर्शादौ श्रुतः । तत्रेतरेतददेवतासंस्कारत्वे प्रमाणाभावात् द्वावप्यारादुपकारकौ । इति चेत् —

अनूयाजस्स्विष्टकृतस्तृतीयस्संस्कृतिर्मतः ॥ २८६ ॥

---

[1] विधिशब्द नियमाभावेन इति साधु ।

देवतास्मृतिरूपप्रयोजनलाभे, नादृष्टकल्पनायुक्ता । आद्यस्य तु प्रधानयागदेवतासंस्कारेण कृतार्थत्वात् न वैपरीत्यम् । द्वितीयस्य तु न दृष्टमन्यदिति प्रथमदेवतासंस्कारकत्वम् । अतोऽवभृथेऽग्नीवरुणयोः तृतीय[1]प्रयाजदेवतात्वं न केवलाग्नेः ।

इत्यनुयाजेषु स्विष्टकृद्यागस्य संस्कारकर्मताधिकरणम् ॥ २२ ॥

दर्शपूर्णमासयोर्याज्यापुरोऽनुवाक्ययोस्संस्कारकर्मताधिकरणम् (२३)

दर्शादौ, 'तिष्ठन् याज्यामन्वाह, आसीनपुरोऽनुवाक्याम्' इति श्रुतयाज्यानुवाक्यावचनमर्थकर्म अदृष्टार्थं, देवतास्मृत्यर्थत्वे लिङ्गादेव तत्प्राप्तेरुच्चारणविध्ययोगात् । इति चेत् —

याज्यानुवाक्यावचनं न भजेदर्थकर्मताम् ।

लिङ्गप्राप्ततदनुवादेन, निष्ठन्–आसीनः–इति गुणमात्रविधानात् नादृष्टार्थता ।

इति दर्शपूर्णमासयोर्याज्या पुरोऽनुवाक्ययोस्संस्कारकर्मताधिकरणम् ॥ २३ ॥

मनोतायामूहाभावाधिकरणम् (२४)

अग्नीषोमीये, 'त्वं ह्यग्ने प्रथमो मनोता' इति श्रुतम् । तत्रेदं प्रकृत्यर्थम् । अग्निप्रकाशकस्य सवनीयादावुत्कर्षप्रसक्तौ, प्रतिप्रसवाल्लक्षणयाप्यनीषोमप्रकाशनसमर्थत्वात् प्रकृतौ दृष्टार्थः । अतो वायव्यादावतिदिष्टः कार्यवशाद्यथादेवतमूहितव्यः । इति चेत् —

ऊहो मनोतामन्त्रस्य वायव्यादौ न विद्यते ॥ २४८ ॥

सवनीयादौ मन्त्रस्य सामान्यसंबन्धप्रमाणाभावात्, उत्कर्षाप्रसक्तेः न प्रकृत्यर्थं वचनम् । वायव्यादावूहप्राप्तौ तद्वारणार्थमिति अपिशब्दस्याबाधः । तस्मात् 'ऋचं नोहेत्' इति निषेधो न' इति कृत्वा-चिन्तयेदम् ।

इति मनोतायामूहाभावाधिकरणम् ॥ २४ ॥

कण्वरथन्तरस्य स्वयोनौ गानाधिकरणम् (२५)

वैश्यस्तोमे, 'कण्वरथन्तरं पृष्ठं भवति' इति श्रुतम् । तत्र प्रकृतिप्राप्तपृष्ठे सामान्तरविधानात् प्राकृतसाम्नोर्बाधः । ऋचान्तु प्राकृतीनां न बाधकमस्तीति बृहद्योनौ रथन्तरयोनौ वा गानम् । कण्वरथन्तरमिति यौगिको रथन्तरशब्दोऽरथन्तरे तद्धर्मलक्षणार्थ इति रथन्तरयोनावेव गानम् । इति चेत्—

स्वयोनावेव गेयं स्यात्सामकण्वरथन्तरम् ।

---

[1] तृतीयानुयाजदेवतात्वं—इति साधु ।

न तावत्कण्वस्य रथन्तरसंबन्धे प्रमाणमस्ति इति सामविशेषे रूढः कण्वरथन्तरशब्द इति न नाम्ना रथन्तरयोनिप्राप्तिः। नाप्युभययोनिप्राप्तिः; कण्वरथन्तरयोनेस्तदुत्तरयोश्च प्रकरणक्रमाभ्यां क्रत्वर्थतयाधीतोत्तराग्रन्थपाठस्यानन्यार्थत्वेन, 'एकं साम तृचे क्रियते' 'यद्योन्यां तदुत्तरयोः' इति वचनविहिततृचगानस्य तास्वेवानुष्ठानात्। कण्वकौत्सादेस्तद्योनिरुत्तराग्रन्थे न पठितेति प्राकृतीष्वेव गानम्।

इति कण्वरथन्तरस्य स्वयोनौ गानाधिकरणम् ॥ २५ ॥

कण्वरथन्तरस्य स्वयोन्युत्तरयोर्गानाधिकरणम् (२६)

कण्वरथन्तरं प्रकृतिप्राप्तबृहदुत्तरयोर्वा गेयम्। आम्नानसिद्धपरित्यागऋगन्तरसञ्चारयोर्यत्र क्वचन गानेऽप्यविशिष्टत्वात् इति चेत्:—

गानमुत्तरयोस्तस्य स्वयोन्युत्तरयोर्भवेत् ॥ २८५ ॥

स्वयोनेरिव तदुत्तरयोरपि उत्तराग्रंथपाठावैयर्थ्याय तयोरेव गानम्।

इति कण्वरथन्तरस्य स्वयोन्युत्तरयोर्गानाधिकरणम् ॥ २६ ॥

अग्निष्टुति स्तुतशस्त्रयोरविकाराधिकरणम् (२७)

अग्निष्टुति 'आग्नेया ग्रहा भवन्ति' इति श्रुतम्। तत्र प्रकृतिप्राप्तनानास्तोत्रशस्त्रमन्त्राणां देवतापरऊहस्स्यात्, तेषां संस्कारकर्मत्वात्। इति चेत्—

ग्रहान्यत्वेऽपि विकृतिर्नैव स्यात् स्तोत्रशस्त्रयोः ॥

स्तुतशस्त्राधिकरणेऽर्थक्रमत्वस्य स्थितत्वात्, अदृष्टार्थतया नोहः।

इत्यग्निष्टुति स्तुतशस्त्रयोरविकाराधिकरणम् ॥ २७ ॥

चातुर्मास्येषु आज्यशब्दस्याविकारेणावाहनाधिकरणम् (२७)

चातुर्मास्ये श्रूयते, 'पृषदाज्ये नानूयाजान् यजति' इति। प्रकृतौ च सन्त्याज्यपशब्दयुक्ता निगमाः—'देवा आज्यपा आवह' 'स्वाहा देवा आज्यपा जुषाणाः' 'देवानामाज्यपानां प्रिया धामानि' 'देवा आज्यपा आज्यमजुषन्त' इति। आज्यपशब्देन चात्र प्रयाजानुयाजदेवता उच्यन्ते। तदिह पृषदाज्येनानुयाजे कर्तव्ये, निगमादिषु, 'आज्यदधिपान्' इति वक्तव्यम्। 'द्वयं वा इदं सर्पिश्च दधि च' इति श्रुतेः। 'दधिपान्' इति वा वक्तव्यम्। 'द्विरुपस्तृणाति–सकृदभिघारयति' इति श्रवणादाज्यसंस्कारकं दध्येव हविरिति। 'पृषदाज्यपान्' इति वा स्यात्। द्रव्य-

द्वययोगे द्रव्यान्तरस्य योगे द्रव्यान्तरस्य तन्नामकस्योत्पत्तेः। अत एव 'पृषदाज्येन' इति द्रव्यान्तरे करणविभक्तिः। इति चेत्--

ऊहा आज्यपशब्दस्य पृषदाज्ये न विद्यते ॥ २८६ ॥

न पृषदाज्यशब्दस्य रूढिशक्तिः। 'पृषन्मणिः, 'पृषद्वपुः' इत्यादौ तस्य चित्रितत्व वाचित्वात्। ततश्च चित्रितमाज्यं तच्छब्दार्थः। तदर्थमेव च दधिग्रहा। तस्मात् 'आज्य-पान्' इत्येव यथाप्रकृति प्रयोगः। समप्राधान्य दधिप्राधान्ययोः ग्रहणवाक्य एव श्रवणम्। यागे च पृषत्तागुणकमाज्यं हविरिति यागीयद्रव्यसंस्कारकं ग्रहणमप्याज्यस्यैव। दध्नः प्राधान्यवादाः दधिघृतयोस्समप्राधान्यवादमात्रम्। तस्मादविकारः।

इति चातुर्मास्येषु आज्यपशब्दस्याविकारेणावाहनाधिकरणम् ॥ २८ ॥

इति लघुवार्तिकटीकायां दशमस्य चतुर्थः पादः

॥ अथ पञ्चमः पादः ॥

एकदेशग्रहणे प्राथमिकानामेव ग्रहणाधिकरणम् (१)

प्राकृताना बहूनाम् एकदेशग्रहः श्रुतः। 'द्यावापृथिव्य एककपालः' 'वैष्णवस्त्रिकपालः' 'तस्या एकां सामिधेनीमन्वाह' तथा, त्रिरात्रादिषु द्वादशाहैकदेशग्रहः। तत्र सर्वत्र, आदितो मध्यतोऽन्ततो वा ग्रहणम्। इति चेत्—

आदितस्स्यादुपादानं त्रिकपालादिषु क्रमात् ॥

कपालोपधानादीनां प्राचीनपदार्थैस्तत्राद्यस्योपस्थापितस्य न परित्यागकारणम्। एवं, तेन द्वितीयः—तेन तृतीयः—इत्येवमपेक्षितेषूपात्तेषु अवशिष्टानि प्रयोजनाभावाल्लुप्यन्ते। तस्मादाद्यो पादान मन्यलोपः।

इत्येकदेशग्रहणे प्राथमिकानामेव ग्रहणाधिकरणम् ॥ १ ॥

एकत्रिके आद्ये तृचे गानाधिकरणम् (२)

अथैष एकत्रिकः, तस्यैकस्यां स्तोत्रीयायां बहिष्पवमानं स्तुवीत। तिसृषु होतुराज्यम्। एकस्यां मैत्रावरुणस्य। तिसृषु ब्राह्मणाच्छसिनः। एकस्यामच्छावाकस्य। तिसृषु माध्यन्दिनः

पवमानः'। इत्यादिश्रुतम्। प्रकृतौ माध्यन्दिने त्रयस्तृचाः गायत्रः प्रथमः, बार्हतो द्वितीयः त्रैष्टुभस्तृतीयः। तत्रैवेदं वचः—'त्रिच्छन्दा आवापो माध्यन्दिनः पवमानः' इति। इह तृचेभ्यः ऋक्त्रये प्राप्ते त्रिच्छन्दस्त्वस्य प्रकृतिप्राप्तस्यानुग्रहाय तृचानामाद्योपादानम्। यद्यपि प्रथमगायत्र्या द्वितीया-तया तृतीयोपस्थाप्यते, तथापि प्रत्यक्षश्रुतत्रिच्छन्दस्त्वानुग्रहाय तृचेष्वाद्यानां ग्रहणम्। इति चेत् —

एकत्रिकक्रतोर्माध्यन्दिन आद्ये तृचे मतम् ॥ २८७ ॥

प्रकृतौ, श्रुतिरियं-अयं पाठः-इति बलाबलम्। विकृतौ तु सर्वमेव चोदकेन प्रकृतौ लब्धात्मकं प्राप्यत इति, विकृतावेव यः शीघ्रोपस्थितिकः स ग्राह्य इति आद्यगायत्री तृचो ग्राह्यः।

इत्येकत्रिके आद्ये तृचे गानाधिकरणम् ॥ २ ॥

एकस्यामृचि धूर्गानाधिकरणम् ॥ ३ ॥

एकत्रिक एव क्रतौ व्यतिषङ्गेण, एकस्यां तिसृषु च स्तोत्रेषु संपाद्यमानेषु यत् धूर्गानं तत् तृचे स्यात्, चोदकात्। इति चेत्—

तस्मिन् धूर्गानमभ्याससंपाद्यं तृचसंश्रयम् ॥

'आवृत्तं धूर्षु स्तुवते' इत्यावृत्तिविधानात्। न च सामावृत्त्यनुवादः, स्तोत्रावृत्तेरेव विधानात् एकस्या ऋचः अभ्यासः।

इत्येकस्यामृचि धूर्गानाधिकरणम् ॥ ३ ॥

द्विरात्रादिषु दशरात्रस्य विध्यन्तानुष्ठानाधिकरणम् ॥ ४ ॥

अहीनात्मकद्वादशाहविकाराः द्विरात्रादयः। तत्र पादाद्यन्यायेन प्रायणीयामारभ्य प्रवर्तन्तेऽहानि। इति चेत् :—

दशरात्रोऽहर्गणेषु प्रथमस्संप्रवर्तते ॥ २८८ ॥

द्विरात्रप्रकरणे, 'यत्प्रथमं, तद्द्वितीयं तत् तृतीयं-जगतीमन्तर्गच्छति, इत्याम्नानात्, प्रायणीयोदयनीयवर्जं मध्यमदशरात्रस्यादितःप्रवृत्तिः।

इति द्विरात्रादिषु दशरात्रस्य विध्यन्तानुष्ठानाधिकरणम् ॥ ४ ॥

'सप्तभिराधूनोति' इत्यनेन अग्नौ धूननाद्यर्थानां मन्त्राणामनियमेनोपादानाधिकरमम् ॥ ५ ॥

अग्निचयने आधूननार्थाः बीजावपनार्थाश्च मन्त्रा बहव आम्नाताः प्रयोगे तदेकदेशसंख्या विहिताः—'सप्तभिराधूनोति' चतुर्दशभिर्वदति' इति। तत्र पाठानुग्रहाय आदित उपादानम्। इति चेत् :—

नाद्योपादाननियमो मन्त्रेष्वाधूननादिषु ॥

बलवत्प्रकरणेन सर्वेषामङ्गत्वं बोधितं मा बाधीति अनियतग्रहणेन संख्या संपाद्या।

इति, सप्तभिराधूनोति इत्यनेन अग्नौ धूननाद्यर्थानां मन्त्राणामनियमेनोपादानाधिकरणम् ॥ ५ ॥

विवृद्धस्तोमकेऽप्राकृतानां साम्नामागमाधिकरणम् ॥ ६ ॥

'एकविंशेनातिरात्रेण प्रजाकामम् याजयेत्' इत्यादिविवृद्धस्तोमकक्रतौ प्रकृतिप्राप्तऋक्सामयो रभ्यासः, आगमाश्रवणात्। इति चेत् —

सामागमेन संख्यायाः पूरणं स्तोमवृद्धिषु ॥ २८९ ॥

पृथक्त्वनिवेशिनी संख्या, अभ्यासेऽसमंजसा स्यात्। अत आगमः। तत्रापि साम्नामेव। 'त्रीणि ह वै' इति वचनेन पवमानगतगायत्र्यादिश्वेवावापश्रुतेः। ऋचि ऋगारोपायोगात्। अत एव वचनात् स्त्रोत्रान्तरेष्वगत्याभ्यासः।

इति विवृद्धस्तोमकेऽप्राकृतानां साम्नामागमाधिकरणम् ॥ ६ ॥

बहिष्पवमाने ऋगागमाधिकरणम् (७)

बहिष्पवमानेऽपि पूर्वन्यायात् सामागमः। इति चेत्—

भवेदेतस्य तु बहिष्पवमानेष्वृगागमः ॥

'एकं हि तत्र साम' इति बहिष्पवमाने वचनान्न सामागमः। 'पराग्बहिष्पवमानेन' इति पराक्शब्देनाभ्यासः। तस्मात् ऋगागमः।

इति बहिष्पवमाने ऋगागमाधिकरणम् ॥ ७ ॥

सामिधेनीष्वत्रशिष्टानामागमेन संख्यापूरणाधिकरणम् (८)

'एकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्य' इत्यादौ, संख्यासामंजस्याय दशानामृचामागमः। नैतत्। प्राकृतावेकादश पठित्वा, पञ्चदशत्वाय, 'त्रिः प्रथमामन्वाह—त्रिरुत्तमाम्' इत्यभ्यास विधिः पूरणसंख्याभिप्रायः। त्रित्वपरत्वेऽदृष्टार्थतापातात्। तथा च प्रथमोत्तमयोः षट् षट् अभ्यासाः। इति चेत् —

आग्नेयीनामागमस्स्यात्सामिधेनी विवृद्धिषु ॥ २९० ॥

पूरणसंख्यायाः त्रित्वस्य च न संप्रतिपत्तिः। द्विः–चतुः–अभ्यासेनापि तदुपपत्तेः। अतस्त्रित्वानियमः प्रकृतौ। विकृतावपि, 'अभ्यासस्सामिधेनीनां स्थानधर्मस्स्यात्, इति [1]नावमिकन्यायेन आगन्तूनां षण्णां अन्तिमायाः–प्रवोवाजीयायाश्च त्रिस्त्रिरभ्यासः कार्यः। तासां संस्थाववशादनुवचन संबंधः। संख्येयपरिच्छेदद्वारा अनुवचनाङ्गत्वात्, संख्यायाः परिच्छेदस्य च संख्येयानामनुवचनासंबंधे अयोगात्। अत्र '[2]समंस्यादश्रुतत्वात्' इति न्यायेन त्रित्वपूरणसंख्ययोस्संप्रतिपत्तिसंभवात्, विकृतावपि तथैव स्यात्–नागमः, इति केचित्।

इति सामिधेनीष्ववशिष्टानामागमेन संख्यापूरणाधिकरणम् ॥ ८ ॥

षोडशिनः प्राकृतत्वाधिकरणम् (९)

ज्योतिष्टोमे 'षोडशिना वीर्यकामः' इति पुरुषार्थतया श्रुतष्षोडशी, क्रत्वर्थतयापि श्रुत;' 'अप्यग्निष्टोमे राजन्यस्य गृह्णीयात्–अप्युक्थ्ये ग्राह्यः–अतिरात्रे ब्राह्मणस्य, उत्तरेऽहनि द्विरात्रस्य गृह्यते मध्यमेऽहन् त्रिरात्रस्य–चतुर्थे चतुर्थेऽहन्यहीनस्य' इति। तत्र 'उत्तरेऽहन्' इत्यादिवचनैः विकृतिसंबंधावगमात्, तत्प्रायपठितानि 'अप्यग्निष्टोमे राजन्यस्य' इत्यादीनि प्रकरणं भङ्त्वा विकृत्यग्निष्टोमादावुत्कृष्टयानि। इति चेत्:—

षोडशी प्रकृतावेव स्याद्राजन्यनिमित्तकः

प्रकरणेऽप्यग्निष्टोमसत्त्वेन वाक्यप्रकरणयोरविशेषात् प्रकृतावेव स्यात्। राजन्यादिनिमित्तत्वेन विहितस्यानैमित्तिको विकृतिषु विधिः 'उत्तरेऽहन्' इत्यादिः।

इति षोडशिनः प्राकृतत्वाधिकरणम् ॥ ९ ॥

आग्रयणादेव षोडशी ग्रहणाधिकरणम् (१०)

स षोडशी उक्थ्यादाग्रयणाच्च विकल्प्य समुच्चित्यवाग्राह्यः। उक्थ्यान्निर्गृह्णाति' 'आग्रयणाद्गृह्णाति' इति वचनद्वयात्। इति चेत् —

तद्ग्रहस्स्यादाग्रयणात्

---

[1] 9-1-10 [2] 10-31-3

[3] अत्र वीप्सा ग्रन्थान्तरेषु नास्ति।

'तं पराञ्चमुक्थ्येभ्यो निर्गृह्णाति षोडशिनम्' इति वाक्यस्य, उक्थ्यपरभावविधित्वात्, 'उक्थ्यान्निर्गृह्णाति' इत्यस्यापि तत्समानार्थत्वात्, आग्रयणादेव ग्राह्यः ।

इत्याग्रयणादेव षोडशिग्रहणाधिकरणम् ॥ १० ॥

षोडशिग्रहस्य तृतीयसवन एव ग्रहणाधिकरणम् (११)

स षोडशी सवनत्रयेऽपि ग्राह्यः । 'प्रातस्सवने गृह्णाति' 'माध्यन्दिने सवने गृह्णाति' 'तृतीयसवने गृह्णाति' इति श्रवणात् । इति चेत्:—

तृतीय सवने तु सः ॥ २९१ ॥

'यत् प्रातस्सवने गृह्णाति, वज्रो वै षोडशी' इत्यादिना सवनत्रयं निन्दित्वा तृतीयसवने ग्राह्यः' इति श्रवणात्, सर्वमिदमेकं वाक्यं जर्तिलवाक्यवत् । अतस्तृतीयसवने स्यात् ।

इति षोडशिग्रहस्य तृतीयसवन एव ग्रहणाधिकरणम् ॥ ११ ॥

षोडशिग्रहस्य सस्तोत्रशस्त्रताधिकरणम् (१२)

'अप्यग्निष्टोमे राजन्यस्य. अप्युक्थ्ये ग्राह्यः' इत्यत्र, न षोडशिनि उक्थ्याग्निष्टोमस्थे च स्तोत्रशस्त्रे । उद्देश्ये अग्निष्टोमादिसंस्थत्वविरोधात् । तदा हि षोडशिसंस्थस्स्यात् । अतोऽस्तुतशस्त्रष्षोडशी । इति चेत्—

सराजन्यनिमित्तोऽपि भवेत् सस्तुतशस्त्रकः ।

योऽग्निष्टोमसंस्थः, यश्चोक्थ्यसंस्थः स राजन्यस्य न तथा । किन्तु षोडशिसंस्थः । उद्देश्यगततत्तत्संस्थोपमर्देन विधानात् । 'एकविंशं स्तोत्रं भवति प्रतिष्ठित्यै हरिवच्छस्यते' इति वचनात्' 'ग्रहं वा गृहीत्वा' इति वचनाच्च सस्तुतशस्त्रष्षोडशी ।

इति षोडशिग्रहस्य सस्तोत्रताधिकरणम् ॥ १२ ॥

अङ्गिरसां द्विरात्रे षोडशिनः परिसंख्याभावाधिकरणम् (१३)

अंगिरसां द्विरात्रे, 'वैखानसं पूर्वेऽहन्त्साम भवति—षोडश्युत्तरे' इति श्रुतम् । तत्र उत्तरेऽहन्यप्राप्तषोडशिविधिः, न प्राप्तस्य द्विरात्रान्तरेभ्यः परिसंख्या । न तावत् चोदकप्राप्तपरिसंख्या, तत्प्राप्तेः पूर्वमनेन विधानेन विधानात् । 'उत्तरेऽहन् द्विरात्रस्य गृह्यते, इत्यस्य, प्राकृतविकल्पापवादेन नियमविधितया प्रापकत्वायोगात् । न च तत्प्राप्तनियमस्यैव ततोऽन्यत्र तेन परिसंख्या,

सामान्यवचनप्राप्तेः प्रागेवाङ्गिरसां द्विरात्रे विशेषवचनेन विधानादिति । नैतत् । 'उत्तरेऽहन् द्विरात्रस्य 'इत्यत्र द्विरात्रसंयोगात्, अंगिरसां द्विरात्रेऽपि तेनैव नियमितः षोडशी । 'षोडश्युत्तरे' इत्यत्र तु, द्विरात्रसंयोगाभावात् प्रकल्प्यरसः । अतोऽनेन द्विरात्रान्तरेभ्यो नियमं, परिसंख्याय प्राकृतविकल्पोऽन्यत्र स्थाप्यते । इति चेत् —

सकलानां द्विरात्राणां उत्तरेऽहन्यसौ मतः ॥ २९२ ॥

परिसंख्यास्त्रिदोषत्वाद्वैखानसविधिशेषोऽर्थवादः 'षोडश्युत्तरे' इति । अतः सर्वद्विरात्रेषु, 'उत्तरेऽहन्' इति वचनविहितनियमस्य नापवादः ।

इत्यंगिरसां द्विरात्रे षोडशिनः परिसंख्याभावाधिकरणम् ॥ १३ ॥

नानाहीनेषु चतुर्थे दिने षोडशिग्रहग्रहणाधिकरणम् (१४)

'चतुर्थे चतुर्थेऽहन्यहीनस्य गृह्यते' इत्यत्र अहीनस्येत्येकवचनात्, वीप्सा–एकाहीने चतुर्थं गृहीत्वा पुनस्तच्चतुर्थे प्राप्ते–इत्येवं परा । इति चेत्—

अहीनस्य चतुर्थेऽहन्येकत्रैव भवेदसौ

एकस्य चतुर्थमहरेकमेव । चतुर्थाच्चतुर्थन्त्वष्टममिति चतुर्थ एव ग्राह्यः । जातावेकवचनम् । वीप्सा तु विशेषप्राप्तानुवादः ।

इति नानाहीनेषु चतुर्थे दिने षोडशिग्रहग्रहणाधिकरणम् ॥ १४ ॥

विकृतौ ग्रहाणामाग्रयणाग्रताया उत्कर्षाधिकरणम् (१५)

ज्योतिष्टोमे, 'यदि जगत्सामा, आग्रयणाग्रात् ग्रहान् गृह्णीयात्' इति श्रुतम् । अत्र प्रकरणात् जगत्सामशब्दो ज्योतिष्टोमपर इति नोत्कर्षः । इति चेत् —

उत्क्रष्टव्या विषुवतित्वहन्नाग्रयणाग्रता ॥ २९३ ॥

जगत् साम यस्य–इति जगत्सामा । न च क्वापि क्रतो जगत्सामसंज्ञकं सामास्तीति, जगत्यामुत्पन्नं तथेति, तादृक्सामवति गवामयनहृदयविषुवति उत्क्रष्टव्या ।

इति विकृतौ ग्रहाणामाग्रयणाग्रताय उत्कर्षाधिकरणम् ॥ १५ ॥

जगत्सामशब्देन विषुवतो ग्रहणाधिकरणम् (१६)

यदि जगत्सामा' इत्यत्र बृहद्रथन्तरवान् ज्योतिष्टोमः प्रकरणादुच्यते। तथासति विकल्पे नाग्रयणाग्रत्वविधिस्स्यात्। न चोभयसामा ज्योतिष्टोमस्तथा। तत्र तयोर्वचनाद्वैकल्पिकत्वेन समुच्चयायोगात्। तस्मात् 'ईशानस्य जगत इति जगच्छब्दवत्यां उत्पन्नं रथन्तरं तथेति तद्वति स्यात्। इति चेत् —

जगत्यां साम यत् तस्मात् जगत्साम तदुच्यते

जगत्पदात् ऋग्लक्षणा-ऋचा च सामलक्षणेति गौरवं स्यात्। अतो जगत्यामुत्पन्नं तथा। सा च विषुवत्येवेत्युत्कर्षः। पूर्वं नैमित्तिकविचारः, अत्र जगत्सामशब्दार्थविचारः इत्यपौनरुक्त्यम्।

इति जगत्सामशब्देन विषुवतो ग्रहणाधिकरणम् ॥ १६ ॥

गोसवदौ उपवत्यग्रवत्योरभावाधिकरणम् ॥ १७ ॥

ज्योतिष्टोमे, '[1]उपवतीं रथन्तरपृष्ठस्य प्रतिपदं कुर्यात्' 'अग्रवतीं बृहत्पृष्ठस्य' इति श्रुतम्। पतिवत्-बहिष्पवमानस्तोत्रस्याद्या ऋक्। गोसवे उभे कुर्यात् इत्यादिषु प्रतिपदोः समुच्चयासंभवात्, विकल्पः, मुख्यत्वाद्वा उपवती स्यात्। इति चेत्-

उपाग्रवत्योरग्र्यत्वं सं सवादिषु नो भवेत् ॥ २९४ ॥

इतरेतरव्यवच्छेदेन प्रकृतौ निमित्तत्वात्, समुच्चितोभयरूपनिमित्तविघातादुयनिवृत्तिः।

इति गोसवादावुपत्यग्रवत्योरभावाधिकरणम् ॥ १७ ॥

ऐन्द्रवायवस्य सर्वादावप्रतिकर्षाधिकरणम् (१८)

ज्योतिष्टोमे उपांश्वन्तर्यामावधाराग्रहौ विधाय 'वाग्वा एषां यदैन्द्रवायवो यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते वा च मे वानु प्रयन्ति' 'अण्व्या धारया गृह्णाति' इति श्रुतम्। तत्र ग्रहणानां प्रातिस्विकविधिविहितानां विधिवैयर्थ्यात्, तदनुवादेन, ऐन्द्रवायवाग्रत्वं तेषु गुणो विधीयते। उपांश्वन्तर्यामयोरपि तत्संपत्तये सर्वादितः प्रतिकर्षः। इति चेत्—

ग्राह्यः स्वस्थान एवैन्द्रवायवः पाठलक्षिते

धारासंयोगात् धाराग्रहाणामैन्द्रवायवाग्रत्वं पाठप्राप्तमनूद्य ग्रहणान्येव संक्षेपतो विधीयन्ते क्रत्वर्थत्वाय। 'ऐन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पेरन्निति' [1]इति वाक्यात्

---

[1] इदं पदं मातृकायां नास्ति।

फलार्थतया विहितानां प्रकरणात् क्रत्वङ्गत्वाप्रसक्तेः अतस्संक्षेपविधिरप्यर्थवान् ।

इत्यैन्द्रवायवस्य सर्वादावप्रतिकर्षाधिकरणम् ॥ १८ ॥

कामसंयोगेऽप्यैन्द्रवायवस्यादावप्रतिकर्षाधिकरणम् (१९)

तथैव प्रातिस्विकविधेः पूर्वं 'ऐन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत 'इत्यादि श्रुतम् । तत्र ग्रहाणां नित्यत्वात्, तदाश्रितैन्द्रवायवाग्रत्वमनित्यं फलाय विधीयते इत्युपांश्वादेः प्राक् प्रतिकर्षः । इति चेत् —

गुणकामाधिकारेऽपि ग्राह्यस्स्वस्थान एव सः ॥ २९५ ॥

प्रकृतग्रहाश्रयणेन कामाय गुणो विधेयः । तत्र ग्रहाणां तत्तद्विधितः, ऐन्द्रवायवाग्रत्वस्य च पाठात्प्राप्तेस्तुल्यत्वात्, धात्वर्थविधिलिप्सया ग्राह्य एव कामे विधीयन्त इति स्वस्थाने ग्रहः ।

इति कामसंयोगेऽप्यैन्द्रवायवस्यादावप्रतिकर्षाधिकरणम् ॥ १९ ॥

आश्विनाग्रादीनां ग्रहाणां प्रतिकर्षाधिकरणम् (२०)

तत्रैव 'शुक्राग्रान् गृह्णीत प्रतिष्ठाकामो मंथ्यग्रान् गृह्णीताभिचरन्'–इत्यादिष्वपि पूर्ववत् ग्रहणानां फले विधानात् स्वस्थानग्रहः । इति चेत् —

शुक्रा मंथिग्रहादेस्तु विधौ स्यात्प्रतिकर्षणम्

ग्रहादेः = तदग्रतानां इत्यर्थः । शुक्राग्रत्वादौ पूर्ववत् पाठादप्राप्तेरनुवादायोगात्, उभयविधौ वाक्यभेदापत्तेः, ग्रहणान्याश्रित्य शुक्राग्रत्वादिकामाय विधीयते ।

इत्याश्विनाग्रादीनां ग्रहाणां प्रतिकर्षाधिकरणम् ॥ २० ॥

आश्विनादीनां ग्रहाणामैन्द्रवायवस्य पुरस्तात् प्रतिकर्षाधिकरणम् (२१)

कामायशुक्रग्रहस्सर्वादितः क्रष्टव्योऽविशेषात् । इति चेत् —

तदैन्द्रवायवात्पूर्वं कृष्यते,

सन्निहितधाराग्रहाणामेवाश्रयत्वेनानुवादात्, ऐन्द्रवायवापूर्वमपकर्षः । पूर्वोक्तसंक्षेपविधेरिदमपि प्रयोजनम्, यत् धाराग्रहाणां तद्वशेनाश्रयत्वम् ।

इत्याश्विनादीनां ग्रहाणामैन्द्रवायवस्य पुरस्तात्प्रतिकर्षाधिकरणम् ॥ २१ ॥

सादनस्यापि प्रतिकर्षाधिकरणम् (२२)

कामाय शुक्रग्रहे कृष्यमाणे, सादनं न कृष्यते, अवचनात् । इति चेत् —

सादनं तथा ॥ २९६ ॥

अनासाद्यान्यग्रहणायोगात् , अर्थात्तदपकर्षः ।

इति सादनस्यापि प्रतिकर्षाधिकरणम् ॥ २२ ॥

प्रदानस्याप्रतिकर्षाधिकरणम् (२३)

ग्रहणासादनोपक्रमत्वात्प्रदानस्य, शुक्रादिप्रदानमपि सर्वादितः स्यात् । इति चेत् —

ग्रहसादनकर्षेऽपि प्रदानं नैव कृष्यते ।

गृहीत्वा आसादितानां क्रमेण प्रदानम् । नित्यक्लृप्तौ न पुरोडाशद्रव्यवदानवत् प्रदानोपक्रमत्वम् । अतः स्वस्थान एव प्रदानम् ।

इति प्रदानस्याप्रतिकर्षाधिकरणम् ॥ २३ ॥

त्र्यनीकायामैन्द्रवायवाग्रतोक्तेः समानविध्यर्थताधिकरणम् (२४)

द्वादशाहे आद्यन्तौ प्रायणीयोदयनीयावैन्द्रवायवाग्रौ दशमश्चाहः । अथेतरेषां नवानामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रं, अथाग्रयणाग्रम्–इत्यादि त्रिरभ्यासः श्रुतः । तत्र प्रथमत्रिकप्रथमद्वितीययोरह्नोः रथन्तरबृहत्सामत्वात् , ऐन्द्रवायवशुक्राग्रत्वे प्रकृतिप्राप्ते अनूद्येते ।

अङ्गान्तरपरिसंख्यार्थो वा पुनर्विधिः ।

तथात्वे त्रैदोष्यादाग्रयणाग्रता स्तुत्यर्थमौचित्येन । इति चेत् —

त्र्यनीकायामादितोऽह्नोरनिमित्तोऽग्रताविधिः ॥ २९७ ॥

प्रकृतितस्तत्तत्सामनिमित्तकत्वेन प्राप्तयोरनैमित्तिकत्वाय पुनर्विधिः । तत्प्रयोजनं गर्गत्रिरात्रादिविकृतिषु निमित्ताभावेऽपि प्राप्तिः । अहरपूर्वप्रयुक्ततया प्राप्तस्य परमापूर्वप्रयुक्तत्वसिद्धिश्च ।

इति त्र्यनीकायामैन्द्रवायवाग्रतोक्तेः समानविध्यर्थताधिकरणम् ॥ २४ ॥

व्यूढद्वादशाहस्य समूढविकारत्वाधिकरणम् (२५)

द्वादशाहो द्विविधः–समूढो व्यूढश्च । समूढस्तूक्तः । व्यूढस्तु—'ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, अथ दशानामैन्द्रवायवाग्रं प्रथमं–अथ शुक्राग्रम्–अथ द्वे आग्रयणाग्रे अथैन्द्रवायवाग्रं–

अथ द्वे शुक्राग्रे–अथाग्रायणाग्रम्, अथ द्वे ऐन्द्रवायवाग्रे' इति। समूढवत् व्यूढोऽपि क्रत्वर्थः फलार्थश्च। कामासंयुक्तवचनेन–तत्संयुक्तवचनेन च संयोगपृथक्त्वन्यायात्। इति चेत् —

व्यूढो विकारोऽनीकानाम्

लोकसिद्धदध्यादेर्वचनद्वयादुभयार्थत्वेऽपि, व्यूढत्वस्य लोकासिद्धेस्तत्स्वरूपज्ञापनपरमेकं वचः। अपरन्तु 'यं यं कामयते तमेतेनाप्नुवन्ति' इति फलसंबन्धार्थम्। न च प्रकरणं वाक्यसंयुक्तस्येष्टे इति केवल फलार्थो व्यूढः।

इति व्यूढद्वादशाहस्य समूढविकारत्वाधिकरणम् ॥ २५ ॥

संवत्सरसत्रे अनीकानां विवृद्ध्यधिकरणम् (२६)

गवामयने एकषष्ट्यधिकानि त्रीणिशतान्यहानि। अशीतिशतं पूर्वं पक्षः। तथोत्तरम्। मन्ये विषूवान्। तत्राहः क्लृप्तिं तांडिनस्समामनन्तिः—'प्रायणीयं प्रथममहः, चतुर्विंशं द्वितीयम्–ततश्चत्वारोऽभिप्लवाष्षडहाः–एकः पृष्ठ्यष्षडहः स मासः स द्वितीयः–स तृतीयः – स चतुर्थः–स पञ्चमः; ततस्त्रयोऽभिप्लवाष्षडहाः, एकः पृष्ठ्यष्षडहः, ततोऽभिजिन्नामैकाहः, त्रयः स्वरसामानः इत्यष्टाविंशतिः। आद्याभ्याम् अहोभ्यां सह षण्मासाः। इदं पूर्वं पक्षः। ततो विषूवान्। अथोत्तरं पक्षः। त्रयः स्वरसामानः। विश्वजिन्नामैकाहः। पृष्ठ्यष्षडहः त्रयस्त्रिंशारंभणः। त्रयोऽभिप्लवाष्षडहाः। तान्यष्टाविंशतिरहानि। पुनः पृष्ठ्यष्षडहस्त्रयस्त्रिंशारम्भणः। चत्वारोऽभिप्लवाष्षडहाः। तान्यष्टाविंशतिरहानि। पुनः पृष्ठ्यष्षडहस्त्रयस्त्रिंशारम्भणः। चत्वारोऽभिप्लवाष्षडहाः समासः। सतीयः–स तृतीयः–स चतुर्थः। ततस्त्रयोऽभिप्लवाष्षडहाः। आयुर्गौरिति द्वे अहनी। द्वादशाहस्य दशाहानि, महाव्रतञ्चातिरात्रश्चेति द्वात्रिंशदहानि, आद्यैरष्टाविंशत्यहोभिस्सह षण्मासाः।

तत्र भाष्ये, द्वादशाहिकव्यनीकां चोदकप्राप्तामाश्रित्य, 'दण्डकलितवदावृत्तिः' इति पूर्वपक्षं कृत्वा, स्वस्थानविवृद्धिः इति सिद्धान्तितम्। तदित्थम् —

'ऐन्द्रवायवाग्रं प्रथममहरित्यादावहर्गणस्य विवक्षितत्वात्, अह्नामेवाङ्गभूता ऐन्द्रवायवाग्रत्वादयोऽहरपूर्वप्रयुक्ताः। अतो गवामयनेऽपि प्रथमव्यनीकाः नवस्वहस्सु समाप्ताः पुनरावर्तन्ते इत्येवं प्रथमः पक्षः विंशतिवारमभ्यासेन पूर्यते।

सिद्धान्तस्तु, उद्दिश्यमानप्रथमस्याह्नोऽह्नो वा प्राथम्येन विशेषणायोगात्, प्रथममिति वा — अहरिति वा उद्देश्यम्। तत्राहः उद्देश्यत्वे, अथेत्याद्यनुपपत्तिः। अतः प्रथममित्युद्देश्यं प्रकृतौ विवक्षितम्। तद्विकारे गवामयनेऽपि प्रथमं पक्षो विंशतिदिनानि एकभागः इति क्रमेण नवधा विभज्य, आद्यायां विंशतौ ऐन्द्रवायवाग्रत्वम्। द्वितीयविंशतौ शुक्राग्रत्वम्। तृतीयविंशतावाग्रयणाग्रत्वम्।

इत्येवं क्रमेण स्वस्थानविवृद्धिः इति ।

तदनुपपन्नम् । अभिप्लवे ज्योतिर्गौरायुरित्याद्येकाहज्योतिरादिनामभिर्लिङ्गकल्पितवचनाद्-बलीयोभिस्तद्धर्माः प्राप्नुवन्ति । अभिप्लवे हि प्रथमतृतीयपञ्चमानां रथन्तरसामत्वात् ऐन्द्रवायवाग्रता । द्वितीयचतुर्थषष्ठानां बृहत्सामत्वात् शुक्राग्रता । न तु त्र्यनीकाप्राप्तिः । तस्माद्वार्तिककारीयमधिकरणं वर्ण्यते ।

गवामयनप्रकरणे प्रत्यक्षं त्र्यनीकाविधायिवचनमस्ति 'ऐन्द्रवायवाग्रं प्रथममहः' इत्यादि । तत्र पूर्ववत्पूर्वोत्तरपक्षौ दर्शनीयौ । तदाह —

गव्ये स्वस्थानवृद्धयः ।

इति संवत्सरसत्रे अनीकानां विवृद्ध्यधिकरणम् ॥ २६ ॥

व्यूढे मन्त्राणां छन्दोव्यतिक्रमाधिकरणम् (२७)

व्यूढात्मकद्वादशाहे छन्दोव्यतिक्रम आम्नातः, 'छन्दाँसि वा अन्योन्यस्य लोकमभ्यध्यायन् गायत्री त्रिष्टुभः— तिष्टुब् जगत्याः—जगतीगायत्र्याः' इति । तत्र भक्षपवमानपरिधिकपालानां मन्त्रार्थवादादौ गायत्र्यादिशब्दैरभिलपितानां मन्त्राणामर्थानाञ्च छन्दांस्यतिक्रमितव्यानि, विशेषाभावात् । तेन गायत्रशब्दनिर्दिष्टः प्रातस्सवनीयभक्षः, त्रैष्टुभशब्दनिर्दिष्टमाध्यंदिनीयभक्षस्य स्थाने, माध्यन्दिनीयश्च जागतशब्दितस्य तार्तीयसवनिकस्य स्थाने, तार्तीयसवनिकः प्रातस्सवने । तथा बहिष्पवमानो माध्यंदिने, माध्यन्दिनपवमानस्तृतीयसवने, आर्भवः प्रातस्सवने । तथा मध्यमः स्थविष्ठः परिधिर्दक्षिणस्थाने, दक्षिणश्चाणीयानुत्तरस्य, उत्तरश्चाणिष्ठो मध्यमस्थाने, परिधातव्यः । तथाष्टाकपालो माध्यन्दिने—एकादशकपालस्तृतीयसवने—द्वादशकपालश्च प्रातस्सवने कार्यः । तथा, 'श्येनोऽसि गायत्रछन्दाः' इति मन्त्रः, 'सुपर्णोऽसि त्रिष्टुप्छन्दाः' इत्यस्य स्थाने, इत्यादिक्रमेणोह्याः । इति चेत् —

छन्दो व्यतिक्रमो व्यूढे मन्त्रैकविषयो मतः ॥ २९८ ॥

मन्त्रगतानामेव व्यतिक्रमो नार्थानाम् । न हि तेषां गायत्रादिशब्दत्वं, स्तुतिमात्रत्वात् । तस्मान्मन्त्रगतछन्दसामेव व्यतिक्रमः ।

इति व्यूढे मन्त्राणां छन्दोव्यतिक्रमाधिकरणम् ॥ २७ ॥

इति लघुवार्तिकटीकायां दशमस्य
पञ्चमः पादः ।

॥ अथ षष्ठः पादः ॥

रथन्तरादिसाम्नां तृचे गानाधिकरणम् (१)

रथन्तरादिसामानि स्तोत्रीयाण्यध्ययनवेलायां एकस्यामृचि गीतत्वात्, क्रतावपि तथैव गेयानि। 'एकं साम तृचे क्रियते' इति तु लट्त्वादविधिः। इति चेत् —

बृहद्रथंतरादीनां गानं कार्यं तृचे मतम्।

'ऋक् सामो वाच मिथुनी संभवाव' इत्युपक्रम्य, एकां द्वेच प्रस्याख्याय, तिस्र ऋचोऽङ्गीचकार। तथा 'अष्टाक्षरेण प्रथमायाः प्रस्तौति–द्व्यक्षरेणोत्तरयोः' इति लिङ्गानुगृहीतस्य लेट्त्वेन विपरिणतवचनस्य बलात् तृचे गानम्।

इति रथन्तरादिसाम्नां तृचे गानाधिकरणम् ॥ १ ॥

स्वर्दृक्शब्देन वीक्षणस्य कालार्थताधिकरणम् (२)

'रथन्तरे प्रस्तूयमाने संमीलयेत्' इति विधाय, 'स्वर्दृशं प्रति वीक्षेत' इति श्रुतम्। तत्र स्वर्दृक्शब्दवीक्षणयोः कालार्थसंयोगे, स्वर्दृक्शब्दलक्षणापातात्, अन्तरस्य अन्यतरत् अङ्गम्। इति चेत् —

कालार्थ एव संयोगो वीक्षणस्वर्दृशोर्भवेत् ॥ २९९ ॥

'संमीलयेदास्वर्दृशम्' इति संमीलनवीक्षणवाक्ययोरेकार्थत्वेन एकवाक्यत्वे संभवति, नामेकवाक्यत्वम्। स्तावकपदैरेकवाक्यस्य स्वर्दृक्पदस्य न स्वर्दृक्पदापेक्षा। 'प्रति' शब्दाच्च तस्य काललक्षकत्वं विस्पष्टम्। तस्मात्कालार्थस्संयोगः।

इति स्वर्दृक्शब्देन वीक्षणस्य कालार्थताधिकरणम् ॥ २ ॥

गावामयनिके पृष्ठ्यषडहे बृहद्रथन्तरयोर्विभागाधिकरणम् (३)

द्वादशाहिकपार्ष्ठिकाहस्सु, रथन्तरबृहद्वैरूपवैराजशाक्ररैवतानि सामानि पृष्ठस्तोत्राङ्गत्वेन विहितानि, चोदकेन गवामयने प्राप्तानि। तत्रेदं श्रुतम्—'पृष्ठ्यष्षडहो बृहद्रथन्तरसामा कार्यः' इति। तेन च वैरूपादीनि निवर्तन्ते। तत्रान्वहं बृहद्रथन्तरे भवतः। द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यं समासवचनम्' इति कात्यायनोक्तेः। बृहत् च रथन्तरं च इति कृत्वा द्वन्द्वम्। 'बृहद्रथन्तरे सामनी अस्य' इति द्वन्द्वगर्भबहुव्रीहिणा इतरेतरयुक्तयोरेवान्यपदार्थसंबन्धलाभात्। इति चेत् —

गव्यादिपृष्ठ्यषडहे नान्वहं पृष्ठसामनी।

द्वन्द्वगर्भबहुव्रीहावपि षडहस्यैव समासार्थतया तत्र समुच्चित्यान्वयेऽपि, प्रत्यहमुभयसंबन्धस्य चोदक-

विरोधिनोऽग्रहणात्, विभाषावचनेन द्वन्द्वस्यानित्यत्वाच्च । कात्यायनवचनन्तु, यत्र द्वन्द्वादिकरणाकरणयोः रूपभेदः—'वाक्त्वचप्रियः' 'पञ्चगवधनः' इत्यादौ तत्र समासनियमार्थम् । नैतादृग्विषयम् । करणाकरणयो रूपैक्यात् । अतः प्रत्येकप्रापि चोदकानुग्रहायानेकपदबहुव्रीहिः । 'बृहच्च रथन्तरञ्च साम अस्य' इति । अत एकं सामैकस्मिन् दिने प्रयोक्तव्यम् ।

इति गावामयनिके पृष्ठ्यषडहे बृहद्रथन्तरयोर्विभागाधिकरणम् ॥ ३ ॥

प्रायणीयोदयनीययोरैकादशिनानां विभागाधिकरणम् (४)

द्वादशाहे, 'ऐकादशिनात् प्रायणीयोदयनीययोरालभेरन्' इति श्रुतम् । तत्र प्रायणीयोदययोः, 'पूर्वेद्युरमावास्याया'मितिवत्, उद्देश्ययोः परस्परसाहित्याविवक्षणात्, उभयत्रैकादशिनाः कार्याः । इति चेत् —

द्वादशाहैकादशिन्यां विभाज्यालंभ इष्यते ॥ ३०० ॥

द्वादशाहाङ्गत्वेन वचनान्तरविहितैकादशिनानां अपेक्षितदेशः प्रायणीयोदयनीयावुद्देश्यावपि विधीयेते । देशश्चाङ्गम् । तत्र 'शतमाभ्यां देयम्' इत्यादिष्विव प्रायणीयश्चोदयनीयश्च । अन्तिमस्त्वन्तिमे कार्याः ।

इति प्राणीयोदयनीययोरैकादशिनानां विभागाधिकरणम् ॥ ४ ॥

सर्वपृष्ठे देशविशेषव्यवस्थाधिकरणम् (५)

'विश्वजित्सर्वपृष्ठः' इत्यत्र षाडहिकपृष्ठसाधनसाम्नां वाचनिकोऽतिदेशः इत्युक्तं सप्तमे । तानि यथाप्रकृति माध्यंदिनपवमान मैत्रावरुणसाम्नोर्मध्ये गातव्यानि । इति चेत् —

पृष्ठ्यानां विश्वजिति पृष्ठस्तोत्रनिवेशनम् ।

'रथन्तरं बहिष्पवमाने कुर्यात्–आर्भवे बृहत्–मध्यत इतराणि–वैरूपं होतुः पृष्ठेवैराजं ब्रह्मसाम–शाक्करं मैत्रावरुणस्य–रैवतमच्छावकस्य' इति वचनात्, वैरूपस्यैव पृष्ठसाधनत्वम्, इतराणि यथावचनमन्येषाम् । पृष्ठे प्रयुक्तानां पुनर्विधाने वैरूपविध्यानर्थक्यम् । प्रमाणाभावश्च । अतो विभज्यैव निवेशः ।

इति सर्वपृष्ठे देशविशेषव्यवस्थाधिकरणम् ॥ ५ ॥

वैरूपवैराजसाम्नोः पृष्ठकार्ये निवेशाधिकरणम् (६)

'उक्थ्यो वैरूपसामा–एकविंशष्षोडशीवैराजसामा' इत्यादौ सर्वसामकार्ये साम्नोर्निवेशः, विशेषाभावात् । इति चेत् —

वैरूपसामेत्यादौ स्यात्पृष्ठ एव निवेशनम् ॥ ३०१ ॥

प्रकृतौ, रथन्तरसामा–बृहत्सामा–इत्यादिषु पृष्ठविषये निर्देशस्य दृष्टत्वादिहापि पृष्ठद्वारेण तयोः क्रतु-संबन्ध इति न सर्वनिवृत्तिः । किन्तु पृष्टसाधनरथन्तरादेः ।

इति वैरूपवैराजसाम्नोः पृष्ठकार्ये निवेशाधिकरणम् ॥ ६ ॥

त्रिवृदग्निष्टोम इत्यत्र स्तोत्रगतसंख्याविकाराधिकरणम् (७)

'त्रिवृदग्निष्टुदग्निष्टोम' इत्यत्र त्रिवृच्छब्दस्य, लोके त्रिवृद्रज्जुरिति–वेदे त्रिवृद्रशनेति च प्रयोगात्, शस्त्रस्य महाविषयत्वलाभाय क्रतुसाधनसंख्यां बाधित्वा त्रित्वं तत्र तत्र निविशते । इति चेत् ---

त्रिवृदग्निष्टुदित्यादौ स्तोत्रीयानवके त्रिवृत् ।

त्रैगुण्यस्यावयशक्त्युपस्थाप्यस्य रूप्युपस्थाप्यस्तोत्रीयानवकबाध्यत्वात् स्तोत्रीया संख्याविकारस्त्रिवृत्त्वम् ।

इति त्रिवृदग्निष्टोम इत्यत्र स्तोत्रगतसंख्याविकाराधिकरणम् ॥ ७ ॥

उभयसाम्नि बृहद्रथंतरयोस्समुच्चयाधिकरणम् (८)

संसवादौ, 'उभे बृहद्रथन्तरे भवतः' इत्यत्र चोदकाबाधाय, एकं पृष्ठस्य विश्वजिद्वदपरं स्तोत्रान्तरस्य साधनम् । इति चेत् —

सामद्वयं संसवादौ पृष्ठस्तोत्रस्य साधनम् ॥ ३०२ ॥

तत्र 'रथन्तरं पवमाने' इत्यादि वचनात् तथात्वेऽपि विकल्दप्राप्तयोर्वाचनिकस्समुच्चयः साम्नोः पृष्ठे पृष्ठयोर्वा । स्तोत्रान्तरनिवेशेऽपि चोदकबाधतौल्यात् ।

इत्युभयसाम्नि बृहद्रथन्तरयोस्समुच्चयाधिकरणम् ॥ ८ ॥

मध्वशनघृताशनयोः षडहान्तेऽनुष्ठानाधिकरणम् (९)

द्वादशाहे, 'त्रिवृत्पञ्चदशस्सप्तदश एकविंशस्त्रिणवस्त्रयस्त्रिंशः' इति षडहं विधाय श्रुतम्— संस्थिते पृष्ठ्यषडहे मध्वाशयेत् घृतं वा' इति । गवामयनादिषु 'पृष्ठ्यषडहस्त्रयस्त्रिंशारम्भणः, त्रिवृदुत्तमः कार्यः' इति प्रातिलोम्यं विहितम् । तत्र प्रकृतौ त्रयस्त्रिंशेऽहनि संस्थिते मध्वशनाद्यनुष्ठितेर्विकृतावपि तथात्वम् । इति चेत् ।

षडहप्रातिलोम्येऽपि तदन्ते मधुभोजनम् ।

प्रकृतौ मध्वाशनं हि प्रकरणात् द्वादशाहाङ्गं—'संस्थिते षडहे' इति वाक्याद्वैमृधवत् षडहाङ्गं वा । अनुष्ठानसादेश्यात् त्रयस्त्रिंशाङ्गत्वं स्यात् । तच्च प्रकरणात् वाक्याच्च दुर्बलमिति वाक्यात् षडहाव-

साने स्यात् ।

इति मध्वाशनघृतासनयोः षडहान्तेऽनुष्ठानाधिकरणम् ॥ ९ ॥

षडहावृत्तावपि मध्वशनघृताशनयोः सकृदनुष्ठानाधिकरणम् (१०)

यत्र 'चत्वारष्षडहाः' इत्यादौ पुनःप्रयोगः, तत्र षडहतत्संस्थयोः पुनःपुनर्भावात् , तन्निमित्त-मध्वाशनावृत्तिः । इति चेत् —

आवृत्तिष्षडहावृत्तौ न मध्वाशस्य युज्यते ॥ ३०३ ॥

तद्विषयव्यापारोपरमात्मकसंस्थायाः पुनःपुनः प्रयोज्यत्वाभावात्, निमित्ताभावे नैमित्तिकमध्वाशनाभावः ।

इति षडहावृत्तवपि मध्वाशनघृताशनयोः सकृदनुष्ठानाधिकरणम् ॥ १० ॥

गवामयने मध्वशनघृताशनयोः प्रतिमासमावृत्त्यधिकरणम् (११)

गवामयनादौ यत्र विजातीयव्यवहिताः षडहास्सन्ति, तत्रापि पूर्ववत् सर्वान्ते मध्वाशनम् । इति चेत् —

व्यवेतषडहावृत्तौ तस्याप्यावृत्तिरापतेत् ।

अत्र पुनःपुनस्तद्विषयव्यापारोपरमभावात् निमित्ताविघातात् नैमित्तिकाशनावृत्तिः ।

इति गवामयने मध्वशनघृताशनयोः प्रतिमासमावृत्त्यधिकरणम् ॥ ११ ॥

द्वादशाहे सत्रिभिरपि मध्वशनाधिकरणम् (१२)

सत्रमहीनश्च द्वादशाहः । तत्र न सत्रे मध्वशनं स्यात् । यज्ञपतीनां दीक्षितानां ब्रह्मचर्य-विधानेन मध्वशनप्रतिषेधात्, वैकल्पिकघृताशनेनापि साद्गुण्योपपत्तेः । इति चेत् —

सत्रेऽपि स्यान्मध्वशनम्

ब्रह्मचारिणो मध्वशनप्रतिषेधः पुरुषार्थः, न क्रत्वर्थबाधायालम् । ज्योतिष्टोमात् यो मध्वशनप्रतिषेधः क्रत्वङ्गतया चोदकप्राप्तः, सः प्रत्यक्षवचनं नाहीनविषयत्वेन संकोचयितुमलम् । तस्यैवाङ्गान्तरे संकोचात् । तस्मात्सत्रेऽपि स्यात् ।

इति द्वादशाहे सत्रिभिरपि मध्वशनाधिकरणम् ॥ १२ ॥

मानसस्य द्वादशाहाङ्गताधिकरणम् (१३)

द्वादशाहस्य दशमेऽहनि, 'अनया त्वा पृथिव्या पात्रेण समुद्ररसया प्रजापतये जुष्टं गृह्णामि'

इति मानसं 'प्राजापत्यं गृह्णाति' इति श्रुतम्। एतच्च द्वादशभ्योऽन्यत् त्रयोदशमहः। 'द्वादशाहस्य हतरसानि छन्दांसि। तानि मानसेनाप्याययति। वाग्वै द्वादशाहो मनो मानसम्' इति च स्तुतिसाधनस्तुत्यभावेन व्यपदेशभेदेन च तथावगमात्। इति चेत् —

मानसं नाहरन्तरम् ॥ ३०४ ॥

'एष वै दशमस्याह्नो विसर्गो यन्मानसम्' इति दशमाहरङ्गत्वं गमयति। व्यपदेशभेदादिश्चावयावयविभावेनाप्युपपन्नः। ग्रहणचोदनानाञ्च, '[1]अचोदकाश्च संस्काराः' इति द्वैतीयन्यायेन यागान्तराकल्पकत्वात्। 'दशमेऽहनि मानसाय प्रसर्पन्ति' इति वचनात्, दशमस्य ग्रहस्याभ्यासान्तरं नाहरन्तरम्।

इति मानसस्य द्वाशाहाङ्गताधिकरणम् ॥ १३ ॥

सत्रस्य बहुकर्तृकत्वाधिकरणम् (१४)

सत्रिणः सत्रं एकैकशः कुर्युः। चोदकानुग्रहात्। बहुवचनस्य भिन्नप्रयोगागमनानाकर्त्रनुवादत्वेनोपपत्तेः। इति चेत् —

सत्राणि बहवः कुर्युः

'आसीरन्' इति श्रुतोपादेयकर्तृबहुत्वस्याविवक्षाहेत्वभावात्, चोदकस्योपदेशबाध्यत्वात् संहत्य बहवः कुर्युः।

इति सत्रस्य बहुकर्तृकत्वाधिकरणम् ॥ १४ ॥

सत्रे यजमानानामेव ऋत्विक्त्वाधिकरणम् (१५)

सत्रे चोदकप्राप्तैरार्त्विज्यं कार्यम्। 'ये यजमानास्त ऋत्विजः' इति यजमानोद्देशेन आर्त्विज्यं संस्कारकर्म विधीयते। तेनार्त्विज्यमन्यैः कार्यम्।

यद्वा — 'अध्वर्युर्गृहपतिं दीक्षयित्वा' इत्यादिना ऋत्विक्संस्कारकत्वेन दीक्षाविधानात् तद्यजमानशब्दोऽनुवादः। इति चेत् —

त एवार्त्विज्यकारिणः।

अप्राकृतकार्यतापत्तेः–वचनानर्थक्यप्रसङ्गाच्च, आर्त्विज्योद्देशेन यत्तदोर्व्यत्यासेन च यजमानाः कर्तारो विधीयन्त इति चोदकप्राप्तान्यनिवृत्तिः।

इति सत्रे यजमानानामेव ऋत्विक्त्वाधिकरणम् ॥ १५ ॥

---

[1] पू.मी.द. 2-2-7

सत्राहीनयोर्विवेकाधिकरणम् (१६)

प्रसङ्गात् सत्राहीनात्मकद्वादशाहयोर्लक्षणमाह —

सत्राहीनावभिमतावासियज्यादिलक्षणौ ॥ ३०५ ॥

त्रयोदशरात्रादिष्वास्युपायिचोदनाचोदितेषु सत्रशब्दस्य लोकवेदयोः प्रयोगात्, तादृक्द्वादशाहस्सत्रम् । द्विरात्रादिषु यजतिचोदनाचोदितेषु अहर्गणेषु अहीनशब्दप्रयोगात्, तादृक् द्वादशाहोऽहीनः ।

इति सत्राहीनयोर्विवेकाधिकरणम् ॥ १६ ॥

पौण्डरीके सकृदेव दक्षिणादानाधिकरणम् (१७)

'पौण्डरीको' नाम अहीनः एकादशरात्रः । तत्र 'अयुतं दक्षिणा—अश्वसहस्रमेकादशम्' इति श्रुतम् । तत्राहरङ्गत्वाद्दक्षिणायाः प्रत्यहमेकादशसहस्रं देयम् । इति चेत् —

न भिन्ने प्रत्यहं पौण्डरीकेऽयुतसहस्रके ।

कर्त्रानतिद्वाराङ्गं दक्षिणा, एकप्रयोगवचनविहितानामेकादशानामह्नां युगपत् चिकीर्षितत्वात्, तन्त्रेणोपात्त-पुरुषानतेरेकत्वात् तदर्था दक्षिणापि तन्त्रम् । यद्यपि द्वादशाहे 'अन्वहं द्वादशशतं ददाति' इति श्रुतम्; तथापि तावद्दिवसदक्षिणा एकैव । कर्त्रानतेरेकत्वात् । तस्मादिहाप्येकमेवायुतं, अश्वसहस्रञ्च दातव्यम् ।

इति पौण्डरीके सकृदेव दक्षिणादानाधिकरणम् ॥ १७ ॥

पौण्डरीके सर्वासां दक्षिणानां विभज्य नयनाधिकरणम् (१८)

प्रकृतौ माध्यंदिने सवने दक्षिणानयनं श्रुतम् । पौण्डरीकेऽप्यात्मीयदक्षिणाप्रकृतिवत्प्रत्यहं संपूर्णा नेया । संस्कारकत्वाद्वा यस्मिन् कस्मिंश्चिद्दिने नेया । इति चेत् —

विभज्य नयनं तेषाम्

द्वादशाहे 'अन्वहं द्वादशशतम्' इति विभज्य नयनात्, इहापि तद्वदेव विभज्य नयनम् ।

इति पौण्डरीके सर्वासां दक्षिणानां विभज्य नयनाधिकरणम् ॥ १८ ॥

मानवीषु पञ्चदशानामेव सामिधेनीत्वाधिकरणम् (१९)

विकृतिविशेषे 'मनोर्ऋचः सामिधेन्यः' इति श्रुतम् । तत्र प्रत्यक्षवचनात्सर्वासां प्राप्तेश्चोदकप्राप्तपाञ्चदश्यबाधः । इति चेत् —

न सर्वास्स्युर्मनोर्ऋचः ॥ ३०६ ॥

सामिधेन्युद्देशेनोपादीयमानानां त्रित्वप्राप्तौ तदतिक्रमेण चोदकात् पञ्चदश गृह्यन्ते अनियमेन, आधूननादि-मन्त्रवत् ।

इति मानवीषु पञ्चदशानामेष सामिधेनीत्वाधिकरणम् ॥ १९ ॥

वाससि मानोपावहरणयोरनुष्ठानाधिकरणम् (२९)

ज्योतिष्टोमे, 'वाससि मिनोति, वाससोपनह्यति, वाससोपावहरति' इति वचनात् तत्साधनं मानादि । इत्याह —

मानोपहृत्योर्वासस्स्यात्

इति वाससि मानोपावहरणयोरनुष्ठानाधिकरणम् ॥ २० ॥

अहर्गणेऽर्थाद्वासोऽन्तरोत्पादनाधिकरणम् (२१)

द्वादशाहाद्यहर्गणेषु, मानादिवाससो न भेदे प्रमाणमिति, एकस्मिन्नेव तत्कार्यम् । इति चेत् –

अहीने तत्तु भिद्यते

[1]हविर्धाने शकटेऽवस्थितस्य प्रत्यहं भेदेनाभिषवान्तात् कार्यमिति चेत्, अहीने तत्तुल्यापेक्षितमात्रा-नयनं नान्यवाससा विना इत्यर्थाद्भेदः ।

इत्यहर्गणेऽर्थाद्वासोऽन्तरोत्पादनाधिकरणम् ॥ २१ ॥

उपावहरणार्थमेव वासोऽन्तरोत्पादनाधिकरणम् (२२)

उपावहरणार्थवाससो यथाप्रकृति अहर्गणेऽपि मानवासोग्रहणकाले ग्राह्यम् । इति चेत् —

स्यादुपावहृतेरेव काले तद्वाससो ग्रहः ॥ ३०७ ॥

प्रकृतौ मानवाससैवोपावहरणं, अनुपपत्त्यभावात् । अहर्गणे तु, सर्वसुत्यार्थं मित्वा संनह्य स्थापिते सत्युपावहरणकाले, अनुपपत्त्या अन्योपादानम् ।

इत्युपावहरणार्थमेव वासोऽन्तरोत्पादनाधिकरणम् ॥ २२ ॥

इति लघुवार्तिकटीकायां दशमस्य षष्ठः पादः ।

---

[2] अत्र शास्त्रदीपिकायां 'हविर्धाने शकटेऽवस्थितः सोमः । प्रत्यहं भेदेनाभिषवार्थं यावानेकस्याह्नः पर्याप्तः, तावान्सोमो वाससोपावहर्तव्यः । अवशिष्टश्च शकट एव वाससोपानद्धोऽवतिष्ठते । तस्मादर्थादहर्भेदे वासोऽन्तरमुपावहरणार्थमुत्पादयितव्यम्' इति पंक्तयस्सन्ति ।

॥ अथ सप्तमः पादः ॥

ज्योतिष्टोमे पशोः प्रत्यङ्गं हविर्भेदाधिकरणम् (१)

'अग्नीषोमीयं पशुमालभेत' इत्यत्र पशुद्रव्ये देवतानिर्देशात्, पयः पुरोडाशादिवत् कृत्स्नमेकं हविः। हृदयादिवाक्यन्तु, अवदानप्रदेशनियमार्थम्—'हृदयादिप्रदेशेऽवद्यति' इति। ततश्च प्रकृतिप्राप्तद्व्यवदानबाधः। एकादशप्रदेशेभ्योऽवदाय, प्रक्षेपकाले—अवत्तानवत्तसमुदायरूपोऽवयवी देवतायै त्याज्यः। इति चेत् —

पश्वङ्गानि हवींषि स्युः

हृदयस्येत्यादौ तेषामेव हविस्संस्कारकावदानसंस्कार्यत्वश्रवणात् हविष्ट्वम्। अन्यथा बहूनां प्रदेश-लक्षणा स्यात्। विशसनश्रवणेन वपाविनाशाच्च, पशोर्देवतान्वयः प्रदेयहृदयादिप्रकृतित्वेनाप्युप-पन्नः। तस्माद्हृदयादीनामेव हविष्ट्वम्।

इति पशोः प्रत्यङ्गं हविर्भेदाधिकरणम् ॥ १ ॥

पशोर्हृदयादिभिरेवाङ्गविशेषैर्यागानुष्ठानाधिकरणम् (२)

तत्र हृदयादिषु अन्यतमेनापि कृते यागे, पशोर्देवतासंबन्धोपपत्तौ येनकेनचित् यष्टव्यम्।

यद्वा—पशुत्वस्य यागाङ्गत्वश्रुतेः तल्लक्षितोऽवयवी विशसननाशितत्वात् स्वारंभकहृदयादीन् लक्षयन्, अविशेषात्सर्वानेव लक्षयतीति सर्वेषां हविष्ट्वम्। हृदयादिवचनन्तु 'एकादश वै पशोरव-दानानि, तानि द्विर्द्विरवद्यति' इति वचनविहितद्व्यवदाननियमार्थम्। 'यान्येकादश तानि द्विर्द्विरेवा वद्यात् न त्रिः' इति। अङ्गान्तरेषु पञ्चावत्तविधानात् त्रिरवदानम्। अतस्सर्वावयवसाधनको यागः। इति चेत् —

तान्यप्येकादशैव तु

'हृदयस्याग्रेऽवद्यति—अथ जिह्वायाः—अथ वक्षसः' इति वाक्यं, अवदानविधायकं, प्राप्तावदानानुवादेन शङ्करभगवत्पादोक्तरीत्या क्रमविधायकं वा? न च हृदयादेर्हविष्ट्वानवगमात् कथं तेषु तत्प्राप्तिः? इति शङ्क्यम्—'एकादश वै पशोरवदानानि' इत्यत्र, अवदानशब्दस्य कर्मव्युत्पत्त्या द्रव्यपरस्य, एका-दशशब्दसामानाधिकरण्येन तावतां हविष्ट्वावगमात्। तत्र हृदयादिशब्दाश्रवणेऽपि क्रमविधिपरे वाक्ये हृदयाद्यनुवादसामर्थ्यात् तेषां तदात्मत्वप्रतीतेः, तानि द्विर्द्विरवद्यति इति। 'यद्यपि चतुरवत्ती यजमानः, पञ्चावत्तैव वपा कार्या' इत्यत्र, प्राकृतावदानकार्ये विशिष्टावदानान्तरविधिः। तत्र च वपाश्रवणम-विवक्षितम्। अन्यथा, 'तानि द्विर्द्विरवद्यति' इति वाक्यवैयर्थ्यात्, इति पादान्ते वक्ष्यमाणतया पञ्चावदानविधायकम्। तत्र च गणितानां हविष्ट्वं तत एवावगतं, तदा 'तानि द्विर्द्विः ....' इत्यनेनैव

त्र्यवदानव्यावृत्तेः, 'एकादश वै' इत्यस्य वैयर्थ्यं स्यात्। पञ्चावदानविधिप्राप्तस्य हृदयादिवाक्ये विधिवैयर्थ्याच्च। न च परिसंख्या — प्राप्तपरिसंख्यायां त्रैदोष्यापत्तेः। तस्मादेकादशानामेव हविष्ट्वम्। तावतैव तत्प्रकृतितया पशौ देवतासंबन्ध इति प्राप्तः कार्यः।

इति पशोर्हृदयादिभिरेवाङ्गविशेषैर्यागानुष्ठानादिकरणम् ॥ २ ॥

अनिज्याशेषैस्त्र्यङ्गैः स्विष्टकृद्धोमाधिकरणम् (३)

'त्र्यङ्गैः स्विष्टकृतं यजति' इति वचनं, तेष्वेवानियमेन ([1]सर्वेषां प्राप्तौ) त्रयाणां नियमार्थम्। इति चेत् —

इज्याशेषात् स्विष्टकृन्न

त्र्यङ्गैरित्येकपदे प्राप्ताङ्गानुवादेन त्रित्वविधौ प्रसरभेदापत्तेः, 'दोः पूर्वार्धस्य गुदं मध्यतश्श्रोणिं जघनार्धस्य' इति वचनैरन्येषां विधानात्। न च तेष्वेव त्रयाणां संभवश्शङ्क्यः; 'हृदयजिह्वावक्षो यकृत् वृक्यौ सव्यं दोरुभे पार्श्वे दक्षिणाश्रोणिर्गुदं तृतीय'मिति दैवतानि। दक्षिणं दोः सव्याश्रोणिः गुदं तृतीयम्' 'इति सौविष्टतानि' इति यज्ञसूत्रकारैः तेभ्यो भेदोक्तेः। अत इज्याशेषाणां बाधः। यद्यपीज्याशेषाणां प्राधान्यमन्येषां गुणत्वमिति विषयभेदः, तथापि प्रकृतिप्राप्तस्विष्टकृत्प्रतिपत्तित्वेन विधीयते त्र्यङ्गाणाम्। तद्गुणकैर्नान्ये संस्कर्तुं शक्या इत्यर्थाद् बाधः। अनिज्याशेषाणामप्याकीर्णकराणां प्रतिपत्त्यपेक्षात्र्यङ्गाणाम्। अतस्समानविषयत्वात् बाधः।

इत्यनिज्याशेषैस्त्र्यङ्गैः स्विष्टकृद्धोमाधिकरणम् ॥ ३ ॥

अध्यूध्न्याः इडाभक्षविकारताधिकरणम् (३)

'अध्यूध्नीं होत्रे हरन्ति' इत्यत्र, अध्यूध्नी होत्रे नियम्यते, यजुर्युक्तरथवत्। 'अनस्थिभिरिडां वर्धयन्ति' इति वचनेन तस्या इडां वर्धयन्ति' इति वचनेन तस्या इडायां प्रतिपाद्यानियमप्राप्तेः। इति चेत् —

अध्यूध्निर्होत्रैडविक्रिया ॥ ३०८ ॥

अनस्थिभिरित्यस्यानुवादसरूपस्याप्रापकतया, 'अथ यत्परिशिष्टं तत्समवत्तधान्यामावपन्ति' इत्युपक्रम्य, वनिष्ठुमित्यन्तं वाक्यं प्रापकम्। न तत्राध्यूध्नी श्रुता। अतोऽपूर्वं होत्रे विधीयमानं प्राकाशन्यायेन तदीयैडबाधकम्।

इत्यध्यूध्न्या इडाभक्षविकारताधिकरणम् ॥ ४ ॥

---

[1] धनुश्चिह्नान्तर्गतो भागो मातृकायां नास्ति।

वनिष्ठोर्भक्षविकारताधिकरणम् (५)

वनिष्ठोरिडाप्रासनवाक्यश्रुतत्वात्, अनियतप्राप्तस्सः, वनिष्ठुमग्नीधे हरन्ति' इति नियम्यते। इति चेत् —

वनिष्ठुनिहितः पात्रेऽप्यग्नीध्रौडस्य विक्रिया।

वनिष्ठोरिडासंस्कारकत्वेनोपस्तरणादिवत् प्रासनेऽपि, नेडात्वमिति पूर्ववत् तद्भागविकारः।

इति वनिष्ठोर्भक्षविकारताधिकरणम् ॥ ५ ॥

मैत्रावरुणस्यापि शेषभक्षास्तित्वाधिकरणम् (६)

मैत्रावरुणः पशावृत्विक्। सोऽत्राप्राकृतत्वान्न भक्षयेत्। इति चेत् —

प्रैषानुवचनाभ्यां स्यात् प्रशास्तुरपि भक्षणम् ॥ ३०९ ॥

प्राकृतभक्षाः प्राकृतकर्तृनियमांशेन तत्संस्कारार्थाः। प्रैषानुवचने पठन्, आध्वर्युहोत्रोः कार्यं करोतीति भक्षयेत्।

इति मैत्रावरुणस्यापि शेषभक्षास्तित्वाधिकरणम् ॥ ६ ॥

मैत्रावरुणस्य एकभागताधिकरणम् (७)

स द्वयोः कर्म कुर्वन् प्रशस्तापि द्वौ भागौ लभेत। इति चेत् —

स भक्षयेद् भागमेकं कुर्वत् कार्यद्वयीमपि।

पुरुषैक्यादेकभागस्सः। अन्यथा प्रयासतारतम्यात् प्रकृतावपि भक्षतारतम्यापत्तेः।

इति मैत्रावरुणस्य एकभागताधिकरणम् (७)

प्रतिप्रस्थातुर्भक्षाभावाधिकरणम् (८)

तत्र प्रतिप्रस्थातुरध्वर्युकार्यवपाश्रपणकर्तृत्वादिडाभक्षः। इति चेत् —

भक्षः प्रतिप्रस्थातुर्न वपाश्रपणकारिणः ॥ ३१० ॥

वपाश्रपणकर्तुर्न हृदयादिशेषभक्षः। तेषामपूर्वार्थत्वात्, वपायाश्च निःशेषं हुतत्वात्। श्लोके 'वपाश्रपणकारिणः' इत्यनेन कस्याञ्चिच्छाखायां प्रतिप्रस्थातुर्हृदयाद्यवदानकर्तृत्वमुक्तं; तदा तस्यापि भक्षः इति ध्वनितम्। यस्यामध्वर्योस्तत्कर्तृत्वं, न तस्यां भक्षः।

इति प्रतिप्रस्थातुर्भक्षाभावाधिकरणम् ॥ ८ ॥

गृहमेधीये अपूर्वाज्यभागविधानाधिकरणम् (९)

साकमेधेषु गृहमेधीया 'मरुद्भ्यो गृहमेधिभ्यस्सर्वासां दुग्धे सायं चरुम्' इति श्रुता। तत्र-'आज्यभागौ यजति' इति श्रुतम्।

न च तत्र प्रकृतिप्राप्तानुवादमात्रं-वैयर्थ्यात्। तस्मादाज्यभागश्रवणं, निर्वपतिश्रवणवत् चोदक नियामकं सत् तस्य सहायीभवति। अत उभयोरर्थवत्तेति।

औषधद्रव्यत्वेन तन्नियमसंभवात् नैतत् कृतः स्तुत्यर्थः।

विध्येकवाक्यत्वा ([1]भावा)न्नैतत्। तस्मात्कर्मान्तरम्।

प्रसिद्धयोः प्रत्यभिज्ञानान्नैतत्। अतः प्रयाजाद्यङ्गान्तरपरिसंख्यार्थम्।

त्रैदोष्यान्नैतत्। आज्यभागातिरिक्तस्य चोदकप्राप्तिः। तयोः प्रत्यक्षश्रुतेः।

युगपत्सर्वप्रापिचोदकस्य प्रत्यङ्गं व्यापारायोगात्-वैयर्थ्यतादवस्थ्यम्।

अतश्चोदकोपसंहारार्थम्। प्रत्यक्षवचनेनैव तत्राज्य([2]भाग)योः प्राप्तैश्चोदकवैयर्थ्यात्। इति चेत्-

अपूर्वो गृहमेधीय आज्यविभागविधानतः।

आज्यभागयोः श्रुतरूपातिरेकेण प्रकरणाज्ञानकल्पितं स्वापूर्वद्वारेण यागगतव्यापाररूपत्वमस्तीति तद्रूप-लक्षणार्थं वचनम्, अवैयर्थ्यात्। अतो गृहमेधीयप्रयोगवचनो [1]अप्राकृतोपहोमादौ यागीयव्यापारत्वस्य कल्पतया, क्लृप्तप्राकृतमेव गृह्णातीति विशेषः।

इति गृहमेधीये अपूर्वाज्यभागविधानाधिकरणम् ॥ ९ ॥

गृहयेधीये स्विकृदाद्यनुष्ठानाधिकरणम् (१०)

तस्याज्यभागनिराकांक्षत्वात्, इडास्विष्टकृच्च न। इति चेत् —

ततोऽधिकं यावदुक्तं स्यास्त्विष्टकृदिडादिकम् ॥ ३११ ॥

प्रत्यक्षवचनविहितानां प्रकृताविव समुच्चित्य प्रयोगवचनग्रहात्कर्तव्यमिडादिकम्।

इति गृहमेधीये स्विष्टकृदाद्यनुष्ठानाधिकरणम् ॥ १० ॥

---

[1] धनुश्चिह्नान्तर्गतो भागो मातृकायां नास्ति।

[2] ,, ,, ,,

[1] (इदमत्र योज्यम्)—यागगतं व्यापारमपेक्षमाणाः प्रत्यक्षवचनविहिताज्यभागनिराकांक्षो न प्रकृतिमपेक्षते।

गृहमेधीये प्राशित्रादिभक्षणाभावाधिकरणम् (११)

पञ्चमपूर्वपक्षे स्थित्वा चिन्ता । आज्यभागौ समानजातीयाङ्गान्तरपरिसंख्यार्थौ । स्विष्टकृत् न शेषकार्यपरिसंख्यार्थः, इडोपाह्वानदृष्टेः । इति चेत् —

स्विष्टकृत्परिसंख्यात्वे प्राशित्रादिं निवारयेत् ।

इडोपाह्वानं वाचनिकम् । तदन्यत् शंय्वन्तभक्षादि वारयेत् स्विष्टकृत् ।

इति गृहमेधीये प्राशित्रादिभक्षणाभावाधिकरणम् ॥ ११ ॥

प्रायणीयातिथ्ययोः शंय्विडान्ततानियमाधिकरणम् (१२)

ज्योतिष्टोमे शंय्वन्ता प्रायणीया संतिष्ठते न पत्नीः संयाजयन्ति, इडान्ता आतिथ्या संतिष्ठते नानूयाजान् यजति ' इति । तत्र शंय्विडान्तकृत्स्नयोर्विकल्पः । शंय्विडान्तवचनेन यो न परेष्वङ्गेष्व-कर्तव्येषु पुनः पत्नीसंयाजानुयाजप्रतिषेधः, तानेव कुर्यात्, अन्यानि न कुर्यात् इत्यर्थकः । तथा च तत्संस्थविधिपरिसंख्ययोः विकल्पः । इति चेत् —

प्रायणीयातिथ्ययोर्न विकल्प्ये शंय्विडान्तते ॥ ३१२ ॥

' न पत्नीः .... ' ' नानूयाजान् .... ' इति वाक्ये, तत्तदन्तसंस्थाविध्योः शेषभूते अर्थवादार्थे । पत्नीसंयाजाद्यकरणात् लाघवमिति । अन्यथा विकल्पवाक्यभेदपरिसंख्यानामापत्तेः । तस्मान्नियमेन शंय्विडान्ते एव प्रायणीयातिथ्ये ।

इति प्रायणीयातिथ्ययोः शंय्विडान्ततानियमाधिकरणम् ॥ १२ ॥

प्रायणीयातिथ्ययोः पूर्वाभ्यामेव शंय्विडाभ्यां संस्थाधिकरणम् (१३)

प्रकृतौ द्वौ शंयू-पत्नीसंयाजानां पुरस्तात् परस्ताच्च । इडे अपि द्वे—अनूयाजानां पुरस्तात् पत्नीसंयाजानां परस्ताच्च । तत्र विशेषाभावात् शंय्विडान्तत्वेऽनियमः ।

यद्वा पर्यग्निकृतोत्सर्गवचनवत् शंय्विडान्ताङ्गरीतिविधानात्, तदधस्तनानि कर्तव्यानि—यानि-चोत्तरशंय्विडयोः प्राचीनान्यङ्गानि, तान्यपि तथेति कर्तव्यानि ।

तथा च प्रतिषेधद्वयमर्थवत् । अन्यथा [1]वादमर्थकं स्यात् । इति चेत् —

पूर्वाभ्यामेव तु तयोः शंय्विडाभ्यां समापनम् ।

सर्वेष्वङ्गेष्वतिदेशप्राप्तेषु, शंय्विडान्तयोस्संस्थानमुपरमः । तामवस्थां प्राप्योपरन्तव्यं—न प्रवर्तितव्यं—इति

---

[1] ' न पत्नीः संयाजयन्ति इत्येतदनुवादमात्रमनर्थकं स्यात् ' इति साधु ।

विधीयते सन्तिष्ठनिना । अतः पूर्वयोः कृतयोरुपरमेण भाव्यमिति तत्रैव समापनम् ।

इति प्रायणीयातिथ्ययोः पूर्वाभ्यामेव शंखिडाभ्यां संस्थाधिकरणम् ॥ १३ ॥

'षडुपसदः' इत्यादिना, अपूर्वोपसत्कर्मविधानाधिकरणम् (१४)

ज्योतिष्टोमे विहितासूपसत्सु 'अप्रयाजास्ता अननूयाजाः' इति प्रतिषेधात्, अवशिष्टं चोदकप्राप्तं कार्यम् । इति चेत् —

स्युरपूर्वा उपसदस्त्रौवाघारविधानतः ॥ ३१३ ॥

प्रकृतौ क्लृप्तोपकारस्त्रौवाघारविधानात्, गृहमेधीयवदपूर्वास्ताः । अनूयाजादिप्रतिषधो नित्यानुवादः । न च 'नान्यामाहुतिं पुरस्ताज्जुहुयात्, यदान्यामाहुतिं पुरस्ताज्जुहुयादन्यन्मुखं कुर्यात्, स्रुवेणाघारमाघारयति' इत्याघाराभावमाशङ्क्य प्रतिप्रसवविधिरिति शङ्क्यम्; नान्यामाहुतिम् इत्यादेः आघारविधिशेषतया अर्थवादत्वात्, अभावाशङ्काया निर्मूलत्वात् ।

इति षडुपसदः इत्यादिना अपूर्वोपसत्कर्मविधानाधिकरणम् ॥ १४ ॥

वारुणेनैककपालेनेत्यादिना अपूर्वस्य अवभृथस्य विधानाधिकरणम् (१५)

अवभृथे, 'अप्सुमन्तावाज्यभागौ यजति–अपबर्हिषः प्रयाजान् यजति–अपबर्हिषावनूयाजौ यजति' इति श्रुतम् । तत्राज्यभागश्रवणम्, अप्सुमत्त्वगुणविधानार्थम् । तस्मात् बर्हिर्द्वयवर्जं सर्वं स्यात् । इति चेत् —

अपूर्वोऽवभृथोऽपि स्यादाज्यभागविधानतः ।

लिङ्गक्रमाभ्यामेव 'अप्स्वग्ने सधिष्टव–अप्सु मे सोमो अब्रवीत्' इति मन्त्रयोः प्राप्तयोः अप्सुमत्तापि प्राप्ता । अत आज्यभागावेव विधीयते इत्यपूर्वेऽवभृतः । अपबर्हिषः-इत्याद्यपि बर्हिरतिरिक्तप्रयाजादिप्राप्त्यर्थम् । न बर्हिःप्रतिषेधार्थम् ।

इति वारुणैककपालेन इत्यादिना अपूर्वस्य अवभृथस्य विधानाधिकरणम् ॥ १५ ॥

वाजपेयादौ यूपादिनियमाधिकरणम् (१५)

विकृतौ, 'खादिरो यूपो भवति' 'बृहत्पत्पृष्ठं भवति' 'यवमयः पुरोडाशः' इत्यादिषु यथाप्रकृति प्राकृतपालाशादिभिर्विकल्पः खादिरादेः । प्राप्तत्वेनाविधेयत्वात् । पलाशादिनिवृत्तिपरत्वे त्रैदोषात् । अतोऽनुवादः । इति चेत् —

बृहद्यवादि नियतं यत्र तस्य पुनर्विधिः ॥ ३१४ ॥

प्रकृतिवदेवैषां नियमविधित्वम् । बृहद्रथन्तरयोः प्रकृतिवद्विकल्पप्राप्तौ नियमः । अतः पलाशादि-निवृत्तिः ।

इति वाजपेयादौ यूपादीनां खादिरादित्वनियमाधिकरणम् ॥ १६ ॥

काम्येष्टिषु प्राकृतद्रव्यदैवतस्य निवृत्त्यधिकरणम् (१७)

यत्र विकृतौ 'श्यामाकं चरुम्' इत्यादिश्रुतं, तत्र तद्वर्जातिदेशनिराकरणात् शास्त्रप्राप्तव्रीह्यादिभि-र्विकल्पस्समुच्चयो वा । '[1]न तुल्यहेतुत्वादुभयं शब्दलक्षणम्' इति न्यायात् । इति चेत् —

प्राकृतानां विकल्पादिर्न श्रुतैर्द्रव्यदैवतैः ।

न पारमार्थिकं शास्त्रार्थत्वम् । विरुद्धानां प्रत्यक्षविशेषवचनमालोच्य तद्व्यतिरिक्ताङ्गपरत्वेन चोदकस्य व्यवस्थापनात् । तस्मच्चोदकप्राप्तस्य प्रकृतश्रुतद्रव्यदैवतेन बाधः ।

इति काम्येष्टिषु प्राकृतद्रव्यदैवतस्य निवृत्त्यधिकरणम् ॥ १७ ॥

सोमापौष्णपशौ खादिरयूपस्य निवृत्त्यधिकरणम् (१८)

'औदुम्बरो यूपो भवति' इति प्रत्यक्षश्रुतस्यौदुम्बरत्वस्य-अतिदिष्टस्य खादिरादेश्च पूर्ववद्विरो-धाभावान्न बाधः । किन्तु यूपद्वयस्य समुच्चयः । इति चेत् —

नाप्यौदुंबरयूपेन खादिरस्य समुच्चयः ॥ ३१५ ॥

उभयोरुपदेशातिदेशाभ्यां निरपेक्षत्वश्रवणात्, प्राकृतयूपे खादिरत्वादिव्युदासेनैवौदुंबरत्वविधानाच्च बाधः ।

इति सोमापौष्णपशौ खादिरत्वस्य निवृत्त्यधिकरणम् ॥ १८ ॥

ब्रह्मवर्चसकामैः व्रीहिभिरेव यागाधिकरणम् (१९)

'सोमारौद्रं चरुं निर्वपेत् शुक्लानां व्रीहीणां' 'नैर्ऋतं चरुं निर्वपेत् कृष्णानां व्रीहीणाम्' इत्यादौ व्रीहिश्रवणस्य गुणविधानार्थत्वेनाविधायकत्वात्, प्रकृतिवद्विकल्पः । इति चेत् —

बाधन्ते वैकृताश्शुद्धा व्रीहयः प्राकृतान् यवान् ।

एकस्मिन्वाक्ये, यागस्य-व्रीह्युद्देशेन गुणस्य विध्ययोगात् विशिष्टविधिरेवायमिति व्रीहिर्भिर्यवबाधः ।

इति ब्रह्मवर्चसकामैः व्रीहिभिरेव यागाधिकरणम् ॥ १९ ॥

पञ्चावदानतायाः सर्वाङ्गसाधारणताधिकरणम् (२०)

---

[1] पू.मी.द. 10·8–3

अग्नीषोमीयपशौ, 'यद्यपि चतुरवत्ती यजमानः—पञ्चवत्तैव वपा कार्या' इति श्रुतम्। तत्र वपोद्देशेन पञ्चावदानविधानात्, तदभ्यासपूर्वस्य चान्येभ्यो भिन्नत्वात् चमसाधिकरणवत् वपाया एव पञ्चावधानम्। इति चेत् —

सर्वेषु पञ्चावत्तत्वं पश्वङ्गेषु प्रवर्तते ॥ ३१६ ॥

वपाविशेषिते प्राप्तावदाने पञ्चत्वविधौ विशिष्टानुवाददोषात्, प्राकृतावदानमात्रमुद्देश्यमिति सर्वेषु पञ्चावदानम्। वपापदन्तूपलक्षणम्। न च 'पञ्चावत्ता' इत्येकपदे उद्देश्यविधेयभावायोगात्, वपामुद्दिश्य पञ्चत्वविशिष्टावदानान्तरं प्राकृतकार्ये प्राकाशन्यायेन विधीयत इति वाच्यम्; तथात्वे 'एकादश वै पशोरवदानानि 'द्विर्द्विरवद्यति' इत्यस्य वैयर्थ्यं स्यात्। प्रकृतित एव 'द्विर्हविषोऽवद्यति' इत्यस्य प्राप्तेः। तद्वरं वपापदमात्रमविवक्षितम्। तथा च पञ्चत्वसिद्ध्यै प्रकृतौ जमदग्नीनामिव हविषस्त्रिरवदानप्राप्तावर्थवत् 'द्विर्द्विरवद्यती'ति। तस्मद्वपाया हिरण्वशकलादिभिस्संख्यापूरणमिति सर्वेषां पञ्चावदानम्।

इति पञ्चावदानतायाः सर्वाङ्गसाधारणताधिकरणम् ॥ २० ॥

इति लघुवार्तिकटीकायां दशमस्य सप्तमः पादः।

॥ अथाष्टमः पादः ॥

प्रदेशानारभ्यविधानयोर्निषेधस्य पर्युदासताधिकरणम् (१)

महापितृयज्ञे श्रुतम्—'नार्षेयं वृणीते न होतारम्' इति। तथा, यजतिषु ये यजामहं करोति, नानुयाजेषु ये यजामहं करोति' इत्यनारभ्य। तत्रोभयत्रापि नञाख्यातयोस्संबन्धेन प्रतिषेधः, श्रुत्यर्थलाभात्। नञ्धात्वोस्संबन्धेन पर्युदासेन पदद्वयमपि तत्तदन्यलक्षकं स्यात्; सुबन्तयोर्नित्यसमासस्य कात्यायनोक्तेः 'अननुयाजेषु' इत्यपि। आख्यातसंबन्धे तु न दोष इति, चोदकसामान्यवचनाभ्यां प्राप्तयोः प्रतिषेधाद्विकल्पः। इति चेत् —

[1]पर्युदासो न होतारम्

निषेधस्य प्रत्यक्षविशेषशास्त्रत्वेऽपि, आनुमानिकचोदकसामान्यवचनाभ्यां वरणयेयजामहयोः प्राप्तिमुपजीव्य प्रवृत्त्यवश्यंभावेन तत्प्रतीक्षणात्। अतोऽनूयाजेषु ये यजामहस्य विकल्पे शास्त्रयोः पक्षेऽप्रामाण्यापत्त्या पर्युदास एव। कात्यायनीयन्तु, विभाषासूत्रविधानात् न्यायविरोधाच्च नाद्रत्यम्। वरञ्च लक्षणा, अप्रामाण्यात्। तेन स्तुतशस्त्राधिकरणीयम्[2]। तथा च 'प्रकृतिवद्वरणवर्जं पितृयज्ञः कार्यः—

---

[1] मातृकायामिदं नास्ति। [2] अत्र मातृकायां स्खालित्यमस्ति।

येयजनामवर्जं अनूयाजः कार्यः' इत्येकवाक्यत्वम् । अतो न विकल्पोऽननुष्ठानमेव । अयश्च प्रतिषेधनिबन्धनः प्राप्तबाधः । शरैः कुशानां प्रत्याम्नानात् । स्वयं दिनेषु लवनादेरर्थलोपात् । इति त्रेधा बाधः ।

इति प्रदेशानारभ्यविधानयोर्निषेधस्य पर्युदासताधिकरणम् ॥ १ ॥

न तौ पशौ करोति न सोमे इत्यादिनिषेधस्यार्थवादताधिकरणम् (२)

दर्शादौ, 'आज्यभागावग्नीषोमाभ्यां यजति' इति विधाय श्रुतं–'न तौ पशौ करोति न सोमे' इति । तत्रासमस्तत्वात्प्रतिषेधः । 'विकल्पभयाद्वा पर्युदासः । यद्यपि सोमेऽतिदेशोपदेशाभ्यामाज्यभागौ न स्तः ; तथापि दीक्षणीयाद्यङ्गद्वारकोऽस्य पर्युदास इति तेष्वेव सफलिष्यति । इति चेत् —

न सोम इति तु स्तुतिः ।

सोमासोमसाधारण्येन प्राप्तौ प्रतिषेधः पर्युदासो वा [1]न त्वेतदस्ति । न चाङ्गद्वारा प्राप्तप्रतिषेधः, न तौ पशावि, त्यस्य वैयर्थ्यापातात्–सोमशब्दलक्षणापाताच्च । षष्ठ्यभावाच्च न वाजपेययूपन्यायः । सप्तमी तु आधारत्वर्थानाङ्गत्वबोधिका । तस्मात्, न तौ पशावित्यस्यार्थवादो नित्यानुवादः । न च न तौ पशाविति पर्युदासः; अनन्तरविधेर्दर्शपूर्णमासविषयत्वात्, पशुचोदकासंनिधेर्न सोम इत्यर्थवादानुपपत्तिप्रसङ्गाच्च । तस्मात्प्रतिषेध इति विहितप्रतिषिद्धयो[1]र्विकल्पः ।

इति न तौ पशौकरोति न सोमे इत्यादिनिषेधस्यार्थवादताधिकरणम् ॥ २ ॥

अतिरात्रे षोडशिग्रहनिषेधस्य विकल्परूपताधिकरणम् (३)

कुत्र तर्हि प्रतिषेधः (?) इति । तत्राह —

नातिरात्रे निषेधस्स्यात्

'अतिरात्रे षोडशिनं गृह्णाति–नातिरात्रे षोडशिनं गृह्णाति' इत्यत्र विहितप्रतिषिद्धयोर्ग्रहणाग्रहणयोर्विकल्पः ; अर्थवादत्वपर्युदासयोरयोगात् । शास्त्रात् अकरणेऽपि क्रतोः फलम् । करणे फलभूयस्त्वम् ।

इत्यतिरात्रे षोडशिग्रहनिषेधस्य विकल्परूपताधिकरणम् ॥ ३ ॥

जर्त्तिलोक्तौ निषेधस्यार्थवादताधिकरणम् (४)

अग्निहोत्रे श्रूयते—'जर्तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा .... अनाहुतिवजर्तिलाश्च गवीधुकाश्च' इति । 'पयसाग्निहोत्रं जुहोति' इति च । तत्र जर्तिलगवीधुकयोः

---

[1] इदं वाक्यं मातृकायां नास्ति ।

[2] इदं पदं मातृकायां नास्ति ।

स्पष्टो विधिः । अनाहुतिवादनिन्दाकल्प्यस्तयोः प्रतिषेधः । पयोविधिश्चापरः । इति पञ्चवाक्यानि । इति चेत् —

अनाहुतिरिति स्तुतिः ॥ ३१७ ॥

अनाहुतिवादो न प्रतिषेधार्थः, पयोविधिनैव जर्तिलगवीधुकयोर्विकल्पस्य कृततया वैयर्थ्यात् । नापि जर्तिलादिविधिः, वाक्यभेदप्रसङ्गात् [1]अनाहुतिवादप्रसक्तिश्च न इति एकवाक्यत्वात्संपूर्णोऽयमर्थवादः पयोविधिशेषः ।

इति जर्तिलोक्तौ निषेधस्यार्थवादताधिकरणम् ॥ ४ ॥

त्रैयम्बकादावभिघारणानभिघारणादीनामर्थवादताधिकरणम् (५)

आधाने, 'होतव्यमग्निहोत्रं न होतव्यम्' इति मीमांसन्ते ब्रह्मवादिनः, यज्जुहुयात् अयथापूर्वमाहुती जुहुयात्–यन्न जुहुयात् अग्निः पराभवेत्–तूष्णी मे होतव्यम्' इति श्रुतम् । तथा साकमेधेषु त्र्यंबकपुरोडाशाभिकारे, 'अभिघार्या अनभिघार्या इति मीमांसान्ते–यदभिघारयेत् रुद्रस्यास्ये पशून्निदध्यात् यन्नाभिघारयेत् न रुद्रस्यास्ये पशूनपि दध्यात् अभिघार्य एव' इति ।

तत्र प्राथमिकहोतव्यवाक्ये विधिः, न जर्तिलादिश्रवणवदन्यशेषत्वम् । एवं चेत्, न होतव्यमिति निषेध एव । न मीमांसाविशेषणम् । एककोटिकमीमांसायोगात् । एवमभिघारणेऽपि । अन्त्ये तूभयत्र विहितानुवादमात्रम् । इति चेत् —

अभिघार्या नाभिघार्या इत्याद्यपि स्तुतिर्भवेत् ।

उपक्रमो द्विकोटिको मीमांसाविशेषणम् । उपसंहारे तु होमाभिघारणविधिः ।

न च रुद्रस्यास्ये इत्यादिनिन्दायाः विधिशेषत्वानुपपत्तिः ; अभिघारणस्य प्रशस्ततरत्वज्ञापकत्वात् । 'इत्येवं प्रशस्तमभिघारणं–यत् दोषमप्यनादृत्य क्रियते' इति । तस्मान्न विकल्पः । नियते एव होमाभिघारणे ।

इति त्रैयंबकादौ अभिघारणानभिघारणादीनामर्थवादताधिकरणम् ॥ ५ ॥

आधाने उपवादस्य विकल्पताधिकरणम् (६)

अग्न्याधेये वारवन्तीयादिसामगानं विधाय श्रुतम्—'न ब्रह्मा सामानि गायति' इति । तत्र ब्रह्मणो गानप्राप्त्यभावात्, उद्गातुरेव तद्विधेरनुवाद एवायम् । अतो नित्यं गानम् । इति चेत् —

अग्न्याधेये सामगानं न ब्रह्मेति निषिध्यते ॥ ३१८ ॥

---

1 'अनाहुतिवाक्ये पर्युदासप्रसक्तिश्च न' इति स्यात् ।

अनुवादवैयर्थ्यात् प्रतिषेधः । ब्रह्मशब्दस्तु ब्राह्मणपरः ।

इत्याधाने उपवादस्य विकल्पताधिकरणम् ॥ ६ ॥

दीक्षितो न ददाति न जुहोतीत्यादिनिषेधस्य पर्युदासताधिकरणम् (७)

ज्योतिष्टोमे, 'दीक्षितो न ददाति, न जुहोति, न पचति' इति श्रुतम् । तत्र प्रत्यक्षश्रुतगृह-चमसादिहोमवर्जमातिदेशिकचतुरवत्तादिहोमानां पुरुषार्थाग्निहोत्रादिहोमानाञ्च प्रतिषेधः । इति चेत् –

दीक्षितो न जुहोतीति पुरुषार्थो निषिद्ध्यते ।

क्रत्वर्थनिषेधे विकल्पापत्तेः पुरुषार्थानामेव निषेधः । भिन्नविषयत्वाच्च न विकल्पः । होमानां पुरुषार्थत्वात्, प्रतिषेधस्य प्रकरणेन क्रत्वर्थत्वात्, स्त्र्युपगमनादिप्रतिषेधवत् । न चादीक्षितोऽग्निहोत्रादि जुहुयादिति पर्युदासाशङ्का, एकवाक्यत्वाभावात् । विकल्पस्य प्रतिषेधपक्षेऽप्यभावे, श्रुत्यर्थपरित्यागे न पर्युदासप्रयोजनाभावात् । तस्मात्प्रतिषेधः ।

इति दीक्षितो न ददाति, न जुहोति इत्यादिनिषेधानां पर्युदासताधिकरणम् ॥ ७ ॥

वर्त्महोमादिभिराहवनीयस्य बाधाधिकरणम् (८)

'यदाहवनीये जुहोति' 'पदे जुहोति' 'वर्त्मनि जुहोति' 'गार्हपत्ये पत्नीसंयाजात् जुहोति' इति श्रुतम् । तत्र सामान्यशास्त्रस्यापि प्रत्यक्षत्वात्, न लिङ्गकल्प्यश्रुतिवदतिदेशवच्च प्रत्यक्षविशेषशास्त्रेण बाधः । किन्तूभयोर्विकल्पेन प्रामाण्यम् । इति चेत् —

पदे नाहवनीयस्य सामान्यस्य निवर्तनम् ॥ ३१९ ॥

सामान्यशास्त्रं, यावद्विशेषं लक्षणया स्पृशति, तावदेव विशेषशास्त्रं तद्विशेषणे तत्र होमविशेषं झटिति विधत्ते । तेनैव नैराकांक्ष्यात्, सामान्यशास्त्रं पदाद्यतिरिक्तविशेषे संकोच्यम्, इत्यंशे बाधः ।

इति वर्त्महोमादिभिराहवनीयस्य बाधाधिकरणम् ॥ ८ ॥

वैमृधादिषु साप्तदश्यविधेर्वाक्यशेषताधिकरणम् (९)

'सप्तदश सामिधेनीरनुब्रूयात्' इत्यनारभ्य विहितम् । प्रकृतेः पाञ्चदश्यं श्रुतम् । तत्र प्राकरणिकवाक्यैः क्लृप्तोपकारसामिधेनीविधानात् निवृत्ताकांक्षा विकृतिर्न प्राकृतं गृह्णाति । साप्तदश्यन्तु अनारभ्यवादप्राप्तानुवादः । इति चेत् —

वैमृधादौ सामिधेनी साप्तदश्योपसंहृतिः ।

प्रकृतिप्राप्तसामिधेन्यनुवादेन संख्यामात्रविधानान्नापूर्वत्वम् । न च वैश्यप्रयोगे क्लृप्तोपकारसाप्तदश्य-

विधानादपूर्वत्वशङ्का ; अतिदेशप्राप्तसामिधेन्युद्देशात् । किञ्च प्राकरणिकवाक्यैः साप्तदश्यस्य क्रत्वपूर्वसंबन्धः झटिति बोधनात् । अनारभ्याधीतस्य विलंबितविकृत्यन्तरसंबन्धन्तु तच्चाप्राकरणिकेन तस्य क्रतुसंबन्धे द्वारभूतं सामिधेनीस्सबन्धयत् प्राकरणिकस्यैव शेष इति न सौर्यादिषु अनारभ्यवादस्य गमनम् ।

इति वैमृधादिषु साप्तदश्यविधेः वाक्यशेषताधिकरणम् ॥ ९ ॥

पृथिव्यै स्वाहेत्यादिविधिना अविहितस्वाहाकरेषु प्रदानेषु स्वाहाकार-विधानाधिकरणम् (१०)

अनारभ्य श्रुतं, 'स्वाहाकारेण वा वषट्कारेण वा देवेभ्यो हविः प्रदीयते' इति । केषुचित् दर्वीहोमेषु 'पृथिव्यै स्वाहा' इत्यादिषु पुनः स्वाहाकारः पठितः । सोऽनारभ्यवादस्य प्राकरणिकसाप्तदश्यस्येवोपसंहारः । अतोऽन्यत्र स्वाहाकारो नाङ्गम् । इति चेत् —

न भवेद्दर्वीहोमेषु स्वाहाकारोपसंहृतिः ॥ ३२० ॥

पृथिव्यादिशब्दैर्देवताविधिः । स्वाहाकारश्रवणन्तु वषट्कारनिवृत्त्या[1]स्वाहाकारनियमार्थम् । अतो नोपसंहार[2]स्स्वाहाकारस्य ।

इति पृथिव्यै स्वाहेत्यादिविधिना अविहितस्वाहाकारेषु प्रदानेषु स्वाहाकर-नियमाधिकरणम् ॥ १० ॥

अग्न्यतिग्राह्यस्य विकृतावुपदेशाधिकरणम् (११)

अग्निरनारभ्य विहितः । तादृग्वाक्यैरेव प्रकृतौ, विकृतिष्वपि कासुचित् विनियुज्यते—'अथातोऽग्निमग्निष्टोमेनानुयजन्ति—तमुक्थ्येन तमतिरात्रेण' इत्यादिद्वादशरात्रात् । तथा, अतिग्राह्यानामग्रहाः प्रकृतौ विकृतिष्वपि कासुचिदुपदिष्टाः—'उक्थ्ये गृह्णीयात्' 'पृष्ठ्ये गृह्णीयात्' 'विश्वजिति ग्रहीतव्याः' इति । तदिदमग्न्यतिग्राह्यं यत्र न श्रुतं, तत्रैव चोदकः प्रतिदिशेत् । अतथात्वे कासुचिद्विकृतिषु पुनःश्रवणवैयर्थ्यात् । अतस्तदर्थवत्त्वाय, यत्र श्रुतं तत्रैव कार्यम् । इति चेत् —

[1]अग्न्यतिग्राह्ययोरस्ति विकृतावतिदेशनम् ।

तद्वर्ज्यातिदेशाभावात् अङ्गान्तरवत् अग्न्यतिग्राह्यमप्यतिदिश्यते । कासुचित् श्रवणन्तु प्रकृत्या समान-

---

[1] वषट्कारस्य इति मातकायाम् ।

[2] वषट्कारस्य इत्येवात्रापि मातृकापाठः ।

[1] अयं भागः (श्लोकार्धं) मातृकायाम् अन्यथा वर्तते ।

विधानार्थम्। तदपि गुणकामप्रवृत्त्यर्थम्। अग्न्याश्रितगुणकामाः 'श्येनचितं चिन्वीतं स्वर्गकामः' इत्यादिना श्रुताः, सन्निहितमग्निमाश्रयन्ति। सन्निहितश्चाग्निः प्रकृतिविकृतिसाधारण इति विकृति-संबद्धाग्न्याश्रिता गुणकामाः प्रवर्तन्ते। अतिदिष्टापकर्तौ तु, 'निवृत्तिर्वा कर्मभेदात्' इत्याष्टमिकन्या-यान्न प्रवर्तन्ते। न चानारभ्याधीतोऽग्निः प्रकृतौ प्राकरणिकोत्तरवेद्यवरोधान्न निविशत इति शङ्क्यम्— 'अथातोऽग्निमग्निष्टोमेन' इति वाक्यस्थानन्यानन्यापेक्षाग्निष्टोमसंस्थप्रकृतिसंबन्धबोधकस्य प्रकरणाद्-बलवत्त्वात् विकृतावप्यतिदेशेन भवत्येव षोडशिवाजपेयादौ। प्रकरणस्याप्यनन्यार्थत्वात् प्रकृतावुत्तर-वेद्यासहाग्नेर्विकल्पः समुच्चयो वा। साद्यस्क्रसारस्वसत्रादावसंभवान्नाग्नेः प्रवृत्तिः।

इत्यग्न्यतिग्राह्यस्य विकृतावुपदेशाधिकरणम् ॥ ११ ॥

उपस्तरणाभिघारणाभ्यां सहैव चतुरवदानाधिकरणम् (१२)

दर्शादौ, '[1]उपस्तृणाति–द्विर्हविषोऽवद्यति [2]अभिघारयति–चतुरवत्तं जुहोति' इति श्रुतम्। चतुरवत्तवाक्ये द्वितीयया होतव्याद्धविषश्चतुःखण्डितमुद्दिश्य होमो विधीयते। उपस्तरणाभिघारणे तु चतुरवत्तसंस्कारके। 'द्विर्हविषोऽवद्यति' इति वाक्यान्तरम्। ततः चतुरवदानद्रव्यावदानयोर्विकल्पः। इति चेत्—

स्यात् द्विरेवादातव्यं पुरोडाशादिकं हविः ॥ ३२१ ॥

अत्र न होमानुवादेन संख्याविशिष्टावत्तगुणविधिः, होमस्योत्पत्तिवाक्यादप्राप्तेः इति सर्वप्रदानाधिकरणे व्युत्पादनात्, चतुरवत्तविशिष्टहोमविधौ गौरवात्, चतुरवत्तवाक्यं उपस्तरणाभिघारणसहितद्रव्यवदान-मुद्दिश्याप्राप्तं होमं विदधत्, उत्पत्तिवाक्यावगतदेवतोद्देशविशिष्टत्यागमनूद्य प्रक्षेपमेव विधत्ते। चतुः-संख्या प्रचयशिष्टानूद्यते। होमाङ्गतया चतुरवत्तविधिरिति पक्षेऽपि अवत्तमेव विधीयते। संख्या तु प्राप्तानूद्यते। संख्याविशिष्टविधावपि साधननिवेशिनी संख्या। अवत्तमात्रं न साधनम्। आज्य-मपि संस्कार्यत्वात् साधनमिति हविषो द्विरेवावदानम्।

इत्युपस्तरणाभिघारणाभ्यां सहैव हविषो द्विरवदानाधिकरणम् ॥ १२ ॥

उपांशुयाजेऽपि चतुरवत्तस्यावश्यकताधिकरणम् (१३)

चतुःसंख्या होमाङ्गं विधीयत इति कृत्वा चिन्ता– चतुरवत्तस्य विहितस्य संपत्तये, उपस्तरणाभि-घारणद्रव्यवदानविधीनां पुरोडाशविषयत्वात्, तत्रैव 'चतुरवत्तं जुहोति' इत्यस्योपसंहारात्, नोपांशु-

---

[1] सकृदुपस्तृणाति इति साधु मातृका तु शास्त्रदीपिकानुसारिणी।

[2] सकृदभिघारयति ,, ,, ,,

याजाज्ये भवेत् । इति चेत् —

चतुर्गृहीतन्तु भवेदुपांशुयजने हविः ।

चतुरवत्तवाक्यात् उपांशुयाजाज्ये तदप्राप्तावपि, 'चतुर्गृहीतं जुहोति' इति वाक्यात् ध्रौवाज्ये चतुर्ग्रहणम् । कृत्वा चिन्तोद्घाटनं पूर्वाधिकरणोक्तं द्रष्टव्यम् ।

इत्युपांशुयाजेऽपि चतुरवत्तस्यावश्यकताधिकरणम् ॥ १३ ॥

दर्शपूर्णमासयोराग्नेयैन्द्राग्नयोरनुवादताधिकरणम् (१४)

दर्शादौ, 'पुराडोशाभ्यामेवासोमयाजिनं याजयेत्, यावेतावाग्नेयश्चैन्द्राग्नश्च, सान्नाय्ये न तु सोमयाजिनम्' इति । तत्र 'पुरोडाशाभ्यामेवासोमयाजिनम्' इति विधिः । तत्र च बहवः पक्षाः – स्वर्गकामो दर्शपूर्णमासाभ्यां यजेतेति योऽधिकारी श्रुतः, तस्यायं शेषः । पुरोडाशसाधनकयागकर्तुः अधिकरवाक्यश्रुतस्य अत्रासोमयाजिपदेन श्रवणात् । इत्याद्यः कल्पः ।

नैतत् ; कार्त्स्न्यनित्यत्वयोर्बाधापत्तेः । एवकारेण सान्नाय्योपांशुयाजाग्नीषोमीयाणां व्यवच्छेदात् । न चासोमयाजिनमेवेत्यन्वयशङ्क्यः, सोमयाजिनस्तदभावे यावज्जीववाक्यविरोधात् । तस्मात्तन्नामकं कर्मद्वयं दार्शिकाभ्यामन्यद्विधीयते ।

नैतत् ; 'यावेतौ:' इति प्रसिद्धानुवादः – 'पुरोडाशाभ्यामेव' इत्येवकारश्च व्यर्थस्स्यात् । अतो णिजर्थयाजनविधिः । एकवकारस्तु सान्नाय्यनिवृत्यर्थः ।

कर्तृगामिफलाश्रवणात्, कल्पयितुञ्चाशक्यत्वात्, तस्य रागतः प्राप्तेश्च । अतः कालविधिः –'सोमयागात् प्राक् पुरोडाशाभ्यामेव । न सान्नाय्येन' इति ।

तत्र सोमयाजिपदे लक्षणापत्तेः । तत आग्नेयमनूद्य पौर्णमास्यामैन्द्राग्नविधिः ।

तत्र याजयेदित्यस्यान्यतरविधित्वानुवादत्वयोरंशेऽयोगात्, एवकारवैय्यर्थ्याच्च । अतोऽसोमयाजिनोऽपि, 'तदु समेव नयेत्' इति विहितसान्नाय्यैन्द्राग्नयोर्विकल्पः ।

सोमयाजिनमिति विधेः स्तावकत्वेन तदेकवाक्यत्वम् । तस्मादनुवादः । [1]तदाह —

सान्नाय्येन त्विति विधेः पूर्वभागो भवेत् स्मृतिः ॥ ३२२ ॥

इति दर्शपूर्णमासयोराग्नेयैन्द्राग्नयोरनुवादताधिकरणम् ॥ १४ ॥

उपांशुयाजस्य ध्रौवाज्यद्रव्यताधिकरणम् (१५)

---

[1] इदं श्लोकार्धं मातृकायां नास्ति ।

उपांशुयाजे द्रव्यविशेषाश्रवणादनियमः । 'तावब्रूतामग्नीषोमावाज्यस्यैवतनावुपांशुपौर्णमास्यां यजन्' इत्यस्य कालविधित्वात् । सर्वस्मै वा एतद्यज्ञाय गृह्यते । यद्ध्रुवायामाज्यम्' इत्यस्य, वैशब्दवर्तमानोपबन्धाभ्यामविधित्वात् । इति चेत् —

उपांशुयाजे स्यादाज्यं हविर्ध्रौवविधानतः ।

विध्यभावेऽप्यसंयुक्तोत्पन्नाज्यस्य प्रयोजनाकांक्षया–उपांशुयाजस्य च द्रव्याकांक्षया परस्परसंबन्धात्, सर्वस्मा इति विधेर्वा द्रव्यलाभः । तादर्थ्यचतुर्थ्या भाव्यसमर्पणात् । समिदादिवत्पञ्चमलकारत्वात् । वैशब्दस्य प्राप्त्यभावे अनुवादकत्वानापादकत्वात् ।

इत्युपांशुयाजस्य ध्रौवाज्यद्रव्यताधिकरणम् ॥ १५ ॥

उपांशुयाजस्य प्राकृतदेवतानियमाधिकरणम् (१६)

तत्रैव देवतायामनियमः । 'विष्णुरुपांशु यष्टव्यः' इत्यादेरर्थवादत्वात् । यदि वा अविहितायां त्वानुपपत्तिः, तस्या विध्येकवाक्यत्वादिति मतम् : तदा अधिकारस्य देवताविधिषु कस्यचिदुपयोगो देवता भविष्यति इति [1]नानियमः । तदाह —

देवता तत्र तु भवेत्तान्त्रिकेष्वेव काचन ॥ ३२३ ॥

इत्युपांशुयाजस्य प्राकृतदेवतानियमाधिकरणम् ॥ १६ ॥

उपांशुयाजस्य विष्ण्वादिदेवताकत्वपौर्णमासीकर्तव्यत्वयोरधिकरणम् (१७)

तत्र धर्मसंप्रतिपत्तेः प्रजापतिर्देवता । 'यत्किञ्चित्प्राजापत्यं यज्ञे क्रियते उपांश्वेतेन क्रियते' इति वचनात् । यागोऽपि चोपांशुत्वगुणक इति ।

न प्रजापतिरुपांशुत्वधर्मा । 'यत्तूष्णीं तत्प्राजापत्यम्' इति वचनात् । तस्यार्थवादो यत्किञ्चित्प्राजापत्यम्' इति वचनात् । अतो मुख्यत्वादग्निः ।

सोऽपि न । आग्नेयैन्द्राग्नयाज्यानुवाक्यायुगलयोर्मध्ये, आश्वलायने–'इदं विष्णुः' 'त्रिर्देवः' इति याज्यानुवाक्यायुगलाम्नानात् मान्त्रवर्णिको विष्णुर्देवता । यागरत्वविशेषविहितोऽपि याज्यानुवाक्यावशादमावास्यायामेव ।

नैतत् । 'जामिवा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति' इति पुरोडाशयोर्मध्ये विधानात्, तदन्तरालस्य च पर्वणोस्सत्वात् ।

---

[1] नियमः —इति मातृकापाठ ।

पाक्षिकन्त्वस्योभयत्र तुल्यत्वम् । सोमयाजिनोऽमावास्यायामैन्द्राग्नाभावात् । असोमयाजिनः पौर्णमास्यामग्नीषोमीयाभावात् ।

तावब्रूतामिति वाक्ये पौर्णमास्यामग्नीषोमयोरुपांशुयाजे श्रवणात् । तैत्तिरीयके आग्नेयाग्नीषोमीययाज्यानुवाक्यायुगलमध्ये प्राजापत्ययुगलाम्नानात्, पौर्णमास्यामुपांशुयाजे, प्रजापतेरग्नीषोमयोश्च विकल्पः । पूर्वोक्तरीत्या अमावास्यायां विष्णुः । इति चेत् —

तत्रापि स्युर्विकल्पेन तिस्रोविष्ण्वादिदेवताः ।

सपौर्णमास्यामेव स्यात् । न कालद्वयेऽप्युपांशुयाजः । तावब्रूतामिति वाक्यस्य कालमात्रविधिपरत्वात् । पौर्णमासीविशिष्टयागानुवादेन देवताविधौ विशिष्टानुवाददोषात्—मन्त्रवर्णादग्नीषोमप्राप्तेश्च तद्ग्रहणं तिसृणामुपलक्षणम् । प्रत्यक्षकालविध्यभावे, विद्वद्वाक्यफलवाक्ययोरननुप्रवेशात् प्रयाजादिवदङ्गमुपांशुयाजस्स्यात् । पर्वद्वयेऽप्युपांशुयाजश्चेत्, 'चतुर्दशपौर्णमास्यामाहुतयो भवन्ति—त्रयोदशामावस्यायाम्' इति वषट्कारान्ते आहवनीयाधिकरणकहोमानां संख्यानुवादिलिङ्गानुपपत्तेश्च । तस्मात्पौर्णमास्यामेवोपांशुयाजः । तत्रैव विधानानुरोधेन मन्त्राः–मान्त्रवर्णिक्यश्च देवताः ।

इत्युपांशुयाजस्य विष्ण्वादिदेवताकत्वपौर्णमासीकालकर्तव्यतयोरधिकरणम् ॥ १७ ॥

एकपुरोडाशायामप्युपांशुयाजाधिकरणम् (१८)

असोमयाजिन एकपुरोडाशायां पौर्णमास्यामन्तरालकालाभावात् नोपांशुयाजस्स्यात् । न चाविशेषेण पौर्णमास्यां विधानाम् अस्तूभयत्र यागः । अन्तरालगुणस्तु द्विपुरोडाशायामिति युक्तम्; अन्तरालविशिष्टयागविधानेन तदभावे वैगुण्यापत्तेः । इति चेत् —

[1]सपौर्णमास्यामेव स्यादपि प्राक् सोमयागतः ॥ ३२४ ॥

नान्तरालकालोऽङ्गम् । पुरोडाशयोरपि प्रधानत्वेन कालविशेषणतयोपांशुयाजाङ्गत्वायोगात् । किन्तु, तदुभयोपलक्षित आग्नेयोत्तरकाल एव । सर्वत्रोपलक्षणापायेऽपि 'शंखवेलायामागन्तव्य'मित्यादौ कदाचित्तदभावेऽप्यागमनदृष्टेः । अतो तदुपलक्षिते पौर्णमासीमात्रेऽपि उपांशुयाजस्स्यात् ।

इत्येकपुरोडाशायामप्युपांशुयाजाधिकरणम् ॥ १८ ॥

इति लघुवार्तिकटीकायां दशमस्याष्टमः पादस्समाप्तः ।

समाप्तश्चाध्यायः ।

---

[1] मातृकायां विकल्पोऽयं श्लोकः ।

॥ अथैकादशोऽध्यायः ॥

तत्र प्रथमः पादः

आग्नेयादीनां समुदितानां तन्त्रेण स्वर्गफलताधिकरणम् (१)

दशमेऽध्याये बाधाभ्युच्चयचिन्तया विकृतिष्वङ्गपरिमाणे चिन्तिते, अधुना [1]उषदिष्टातिदिष्ट-साधारण्येन तन्त्रावापचिन्तया प्रकृतौ विकृतौ च प्रयोगपरिमाणं चिन्त्यते। तदुपोद्घातार्थमाद्यमधि-करणम्।

आग्नेयादिषड्यागानामितरेतरनिरपेक्षविधिविहितानां प्रत्येकं फलार्थिनां सन्निधौ, 'दर्शपूर्ण-मासाभ्यां स्वर्गकामो यजेत' इति श्रुतं फलं प्राप्तयागोद्देशेनोपादीयमानं, उद्देश्यसाहित्याविवक्षणात् प्रत्येकं संबध्यत इति, षडपि षट्सु पर्वसु पृथक् पृथक् [2]प्रयोज्या इति न तन्त्रमङ्गानि। इति चेत् —

आग्नेयादिफलं तन्त्रम्

भवेदेवं यदि यागोद्देशेन फलमुपादीयेत। स्वर्गकाममुद्दिश्य विधीयमानानां, द्वित्वावगतं तन्त्राभिधा-नावगतञ्च साहित्यं विवक्षितमिति सहितानामेव फलजनकत्वम्। न चैतावता प्रत्येकफलाकांक्षावारणं न भवति, येनानपेक्षितविधिस्स्यात्। तस्मात्सिद्धं संहत्यकारित्वम्। स्वर्गकामाधिकरणे तु स्वर्ग-कामाधिकारस्य तत्कामनायाश्चाङ्गत्वं निरस्तमिति विशेषः।

इत्याग्नेयादीनां समुदितानां तन्त्रेण स्वर्गफलताधिकरणम् ॥ १ ॥

अङ्गानामैककर्म्याधिकरणम् (२)

यान्यङ्गानि प्रयाजाज्यभागादीनि तेषां प्रत्येकं करणं प्रत्युपकारभेदस्स्यात्, सौर्यचित्रादीनां निरपेक्षविधिविहितानां फलभेददर्शनात्। पूर्ववत्संहत्यकारित्वे प्रमाणाभावाच्च। इति चेत् —

भाष्येऽङ्गोपकृतिस्तथा

करणशक्त्यैक्यात् तदुद्बोधकाङ्गजन्योपकारैक्यम्। अङ्गबहुत्वन्तु अवान्तरकार्यभेदेऽपि, यथौदन-निष्पादनलक्षणप्रधानकार्यैक्यं तद्वत्।

इत्यङ्गानामैककर्म्याधिकरणम् ॥ २ ॥

---

[1] मातृकायाम् 'अतिदिष्टसाधारण्येन' इत्येवास्ति।

[2] अत्र 'रामराम रामराम, श्रीगणेश्वरायनमः-गोपालाय नमः' इति मातृकायां लिखितमस्ति।

अङ्गानां समुच्चयाधिकरणम् (३)

इदमधिकरणं निष्प्रयोजनम्। उपकारभेदाभेदयोः अनुष्ठानविशेषाभावात्। इति वार्तिककारोऽधिकरणद्वयमेकीचकार।

अङ्गानां पृथक्शब्दोपस्थितानां पृथग्विधिविहितानाम् उपकारार्थतया विनियुक्तानाम्, एकफलविनियुक्तचित्रोद्भिदादिवत् विकल्पेन तज्जनकत्वम्। न चैकप्रयोगविधिविहितत्वात्समुच्चयश्शङ्क्यः; पूर्वमेव तत्तद्विधिभिरविधाने, अङ्गत्वाभावेन प्रयोगविधिसंग्रहानापत्तेरिति। निरपेक्षोपकारकत्वभानेऽपि बह्वङ्गाम्नानवशात् विकल्पायोगाच्च यथोत्साहं प्रयोगः। उपकारभूयस्तया च फलभूयस्त्वमिति संभवत्समुच्चयः। इति चेत् —

सा भवेदखिलैरङ्गैः

चित्रादौ प्रत्यक्षफलश्रवणात् युक्तं नैरपेक्ष्यम्। अङ्गानां पृथक् फलश्रवणात् प्रधानभावनया सहेत्थंभावाकांक्षिण्या फलाकांक्षाणां संबन्धः। सा च भावना प्रयोगवाक्येना[1]गृह्यमाणतिशेषतया सर्वाङ्गविशिष्टा विधीयत इति समुच्चयः। प्रातिस्विकवाक्येषु विधिश्रवणेऽपि भाव्यालाभादुदासते विधयः। तच्छ्रवणफलन्तु यागस्य भाव्यत्ववारणम्। प्रयोगश्रवणं प्रधानविधिप्राप्तानुवादः। उत्पत्तिमात्रपरवाक्यबोध्यानां प्रयोगवचनसंग्रह इति समुच्चयः।

इत्यङ्गानां समुच्चयाधिकरणम् ॥ ३ ॥

काम्यकर्मणां भूयोऽभ्यासाधिकरणम् (४)

सौर्यादिकाम्यं कर्मबहुफलकामनावता पुनर्न कार्यम्। कृतयागादात्मनः सकृत्करणेऽपि यावदिच्छं फलोत्पत्तेः। न चापूर्वद्वारकत्वं फलं प्रति कर्मणां युक्तम्; तस्य स्थायित्वफलजनकत्वकर्मजन्यत्वादिकल्पनागौरवात्। आत्मनस्तु कर्मसंबन्धः क्लृप्त इति तत एव यावत्कामं फलम्। इति चेत् —

काम्यावृत्त्याधिकं फलम् ॥ ३२५ ॥

विनश्यत्कर्मभिरात्मन्यपूर्वानुत्पत्तौ अकर्तुरपि फलं स्यात्। स व्यापारकत्वस्यापूर्वाधिकरणे निरस्तत्वात्। तस्य चातिशयस्य फलविरोधितया, फलान्तरार्थिना अतिशयान्तरमुत्पादनीयम्। तदेवापूर्वमिति सिद्धैवावृत्तिः फलव्यक्त्यन्तरकामनायाम्।

इति काम्यकर्मणां भूयोऽभ्यासाधिकरणम् ॥ ४ ॥

---

[3] प्रयोगवाक्येन गृह्यमानविशेषतया—इति मातृकापाठः।

अवघातादीनामातण्डुलनिर्वृत्तेरभ्यासाधिकरणम् (५)

दर्शादौ 'व्रीहीनवहन्ति' इति श्रुतोऽवघातः सर्वेषधावघातवत्सकृत्कार्यः। तावता शास्त्रचारितार्थ्यात्। तस्य च दृष्टाभावादृष्टार्थत्वम्। इति चेत् —

यावत्फलोदयं हन्तिस्सकृत्सर्वौषधे त्वसौ

'अवघातेन समीहितं भावयेत्' इति तद्विध्यर्थः। दृष्टश्च क्रत्वपेक्षिततण्डुलभावः समीहितः। तदर्थमश्रुतोऽप्यभ्यासः कार्यः। सर्वौषधेऽनुपधेयोलूखलसंस्कारस्य सकृत्करणेऽपि सिद्धैर्वैषम्यम्।

इत्यवघातादीनामातण्डुलनिर्वृत्तेरभ्यासाधिकरणम् ॥ ५ ॥

प्रयाजादीनामङ्गानां सकृदनुष्ठानाधिकरणम् (६)

फलभूमार्थिना दर्शादावङ्गजातं बहुकृत्वोऽभ्यस्यं, तत उपकारभूयस्त्वं, तेन फलभूयस्त्वम्। इति चेत् —

सकृदङ्गानुष्ठितिस्स्यात्

अङ्गावृत्तेरशास्त्रार्थतया न तदभ्यासात्फलभूमा। साङ्गप्रधानावृत्तिसाध्यस्तु सः, इति तदर्थिना साङ्गं प्रधानमावर्तनीयम्। नाङ्गमात्रं–नापि प्रधानमात्रम्।

इति प्रयाजादीनामङ्गानां सकृदनुष्ठानाधिकरणम् ॥ ६ ॥

कपिञ्जलाधिकरणम् (७)

'वसन्ताय कपिञ्जलानालभेत' इत्यादौ त्रित्वादिसंख्यानां बहुवचनार्थतया शास्त्रीयप्रयासाधिक्यमिति यथोत्साहं त्र्यादीनामन्यतमग्रहणम्। इति चेत् —

त्रयः कार्याः कपिञ्जलाः ॥ ३२६ ॥

बहुवचनार्थत्वेऽपि सर्वसंख्यानां, त्रीननुपादायान्यानुपादानात् 'षड् देया' इत्यादिवद्विशेषानुपादानाच्च, तावतैव निवृत्तव्यापारे शास्त्रे, न हिंस्यादिति निषेधप्रवृत्तेर्न त्र्यधिकग्रहः।

इति कपिञ्जलाधिकरणम् ॥ ७ ॥

उत्तरा दोहयतीत्यत्र सर्वासां गावां दोहनाधिकरणम् (८)

दार्शिकदोहाधिकारे तिसृणां मन्त्रवद्दोहं विधाय 'उत्तरा दोहयति' इति श्रुतम्। तत्र पूर्ववत् त्रित्वपर्यवसितं बहुत्वम्। न चानुवादः, प्राप्त्यभावात्। इति चेत् —

यावत्स्वं दोहने गावः

नास्यैतां रात्रिं कुमारा अपि पयो लभेरन्' इत्यस्यादृष्टार्थत्वापिशब्दवैयर्थ्ययोः परीहाराय सर्वदोहप्राप्तेः, उत्तराशब्दोऽनुवादः। यावत्यो गावस्तासामेव दोहः।

इत्युत्तरा दोहयतीत्यत्र सर्वासां गवां दोहनाधिकरणम् ॥ ८ ॥

आघाराद्यङ्गानां तन्त्रेणानुष्ठानाधिकरणम् (९)

दर्शपूर्णमासयोः षडपि यागाः प्रकरणिनः इतरेतरानालोचनेनाङ्गानि गृह्णन्ति। तादृशाश्चानुष्ठानकालेऽपि तथैवानुष्ठीयन्त इति न तन्त्रमङ्गानि। इति चेत् —

दर्शाङ्गानान्तु तन्त्रता।

प्रत्येकमङ्गग्राहिणामपि, अङ्गविधानं यथातन्त्रं, तथैवानुष्ठानमिति, एकदेशकालकर्तृकाणां तन्त्रमगृह्यमाणविशेषत्वात्। 'पौर्णमास्यां पौर्णमास्या यजेत' 'अमावास्यायाममावास्यया यजेत' इत्याभ्यां त्रिकस्यैकप्रयोगविधानात्, प्रत्येकप्रयोगे तद्बाधापत्तेरपि तन्त्रमारादुपकारकाङ्गानि।

इत्याघाराद्यङ्गानां तन्त्रेणानुष्ठानाधिकरणम् ॥ ९ ॥

कृष्णग्रीवयोः प्रथमतृतीययोर्भेदेन प्रधानाधिकरणम् (१०)

'आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवम्' इत्यत्र, आग्नेयद्वयानुष्ठानं तन्त्रम्। एकदेवताकत्वात्—सान्नायवत्। क्रमापेक्षायामेव पाठादेर्नियामकत्वात्, अत्र तदपेक्षणात्। इति चेत् —

सहप्रदानं व्यवधेनं कृष्णग्रीवयोर्भवेत् ॥ ३२७ ॥

यद्यप्याग्नेययोस्तन्त्रं संभवेत्, सौम्यस्य तूभयमध्यपाठः तन्मध्येऽनुष्ठानं गमयति। न च तदुपपद्यते तयोस्तन्त्रत्वे। तस्माद्यथाप्राप्तक्रमेणाग्नेययोर्भेदेनानुष्ठानम्। अत्र प्रधानयागयोस्तन्त्रावापचिन्ता। नारादुपकारकाङ्गानाम्। तस्य सिद्धान्तेऽपीष्टत्वात्।

इति कृष्णग्रीवयोः प्रथमतृतीययोर्भेदेन प्रधानाधिकरणम् ॥ १० ॥

इति लघुवार्तिकटीकायाम् एकादशस्य प्रथमः पादः।

॥ अथ द्वितीयः पादः ॥

आग्नेयादीनां प्रधानानां देशकालतन्त्रताधिकरणम् (१)

दर्शपूर्णमासयोः, 'समे दर्शपूर्णमासाभ्यां यजेत' 'पौर्णमास्यां पौर्णमास्या यजेत' 'अमावास्यायाममावास्यया यजेत' 'चत्वार ऋत्विजः' इत्येकमेवेति पृथक् पृथक् त्रयाणां देशादिना संबन्धः।

न च फलवाक्ये पृथगुत्पन्नानामपि तन्त्रेण फलसंबन्धात्, देशादिभिरपि तन्त्राभिधानात् तन्त्रेणैव संबन्ध इति शङ्क्यम्; फलं प्रति गुणभूतानां तथात्वेऽपि, अत्र कर्मणां प्रधानतया गुणभूतदेशादिभिः प्रत्येकमेव संबन्धौचित्यात्। 'य इष्ट्या' इत्यादिवाक्योपात्तेष्ट्यादिवत्, षट्सु पर्वसु षट् प्रयोगाः। न च फलं प्रति साहित्यबाधः शङ्क्यः; सिद्धान्ते त्रिकस्य त्रिकस्य प्रयोगभेदेऽपि फले साहित्यवदुपपत्तेः। तथा च प्रधानमात्र एवोत्पत्त्यवगतदेशकालकर्तृसंबन्धात्, अङ्गानि देशान्तरकालान्तरयोः क्रत्वन्तरेणापि क्रियन्ते। इति चेत् —

स्याद्देशकालकर्तॄणामाग्नेयादिषु तन्त्रता।

सर्वेषां भावनया संबंधेऽपि फलस्य प्रथमापेक्षितत्वात्, तत्संबन्धोत्तरकालं देशादयः संबध्यमानाः, फलं प्रति सहिततया अवगतांस्तान् सह प्रयोक्तव्यान् सहैवोपादीयमानान् प्रति उद्देश्यतया संबध्यमानास्तन्त्रेण संबध्यन्त इति, एकस्यां पौर्णमास्यां तत्कालोत्पन्ना अनुष्ठेयाः। तथा कर्तॄणामपि तन्त्रसंबन्धः। 'य इष्ट्या' इत्यत्र, यागानां भिन्नफलानां न साहित्यावगम इति युक्तः प्रथमः कालसंबन्धः। सौर्यादिफलानां युगपत्कामनायामपि नैच्छिकं तन्त्रानुष्ठानम्। प्रत्येकविधिभिः स्वस्वाङ्गयुक्तानां पृथग्विधानेनाविहितमेलनस्यायुक्तत्वात्। एवं साङ्गप्रधानव्यासक्तप्रयोगस्य देशादिसंबन्धात्, अङ्गानामपि तत्प्रयोगमध्यपातात् प्रधानदेशकालकर्तृलाभः। तदाह —

अङ्गानां मुख्यदेशाद्याः स्युः प्रयोगाङ्गभावतः ॥ ३२८ ॥

द्रव्यदेवतस्य तु तत्तद्यागनिष्पादकस्य तत्तदुद्देशेन विहितस्य वचनान्नान्यत्र संकरः। तस्मात्सिद्धं देशकालकर्तॄणां तन्त्रत्वम्।

इत्याग्नेयादीनां प्रधानानां देशकालतन्त्रताधिकरणम् ॥ १ ॥

दर्शपूर्णमासेष्टिप्रभृतिषु संघभेदेनाङ्गानां भेदेनानुष्ठानाधिकरणम् (२)

दर्शपूर्णमाससंज्ञानां षण्णाम्, एकफलानाम्, एकप्रयोगवचनविहिततया प्रयोगैक्यात्तन्त्रमङ्गानि। एक एव च प्रयोगः पर्वणोर्विततो — 'वपया प्रातस्सवने' इत्यादिवाक्यविहितपशुप्रचारवत्। इति चेत् —

दर्शे च पूर्णमासे च नाङ्गानामस्ति तन्त्रता।

एकफलत्वेन प्रयोगैक्य प्रसक्तौ, पौर्णमास्यामित्यादिवाक्याभ्यां, त्रिकत्रिककरणकप्रयोगभेदस्याहत्य विधानान्नित्यमेकप्रयोगत्वम्। प्रयोगभेदाच्चाङ्गावृत्तिः। साङ्गप्रधानव्यासक्तत्वात्प्रयोगस्य। अत एव 'चतुर्दश पौर्णमास्यामाहुतयो भवन्ति–त्रयोदशामावास्यायाम्' इति लिङ्गमुपपन्नम्। त्रिकापूर्वनिवृत्ता-

घङ्गजन्योपकाराणां चरितार्थतया, त्रिकापूर्वान्तरार्थे पुनस्संपादनात् । एवं चातुर्मास्यराजसूयादावपि प्रयोगभेदादङ्गावृत्तिः ।

इति दर्शपूर्णमासेष्टिप्रभृतिषु संघभेदेनाङ्गानां भेदेनानुष्ठानाधिकरणम् ॥ २ ॥

अध्वरकल्पायां त्रिषु संघेष्वङ्गानां भेदेनानुष्ठानाधिकरणम् (३)

अध्वरकल्पेऽष्टावाग्ना वैष्णवमष्टाकपालं निर्वपेत् प्रातस्सवने सरस्वत्याज्यभागा बार्हस्पत्यश्चरुः ; आग्नावैष्णवमेकादशकपालं निर्वपेन्माध्यंदिने सरस्वत्याज्यभागा ' इत्यादि ; आग्नावैष्णवं द्वादशकपालं निर्वपेन् तृतीयसवने सरस्वती ' इत्यादिना विहितानां नवानामपि यागानां तन्त्रमङ्गानि । एकोपक्रमावसानत्वात् । ' पुरा वाचः प्रवदितोर्निर्वपेत्, इत्यरुणोदये प्राकरणिकसर्वहविषां निर्वापापकर्षविधिना तदन्तापकर्षणात् । उपक्रमैकत्वप्राप्तावसानमपि यथोपक्रमं तन्त्रम् । इति चेत् —

हविष्यध्वरकल्पायामप्येवं संघभेदतः ॥ ३२९ ॥

प्रातःकालिकहविषामेवानियतकालप्राप्तौ, पुरा वाचः इत्यनेन नियमविधिः । अन्यकालिकानामत्यन्ताप्राप्तिरिति वैरूप्यं स्यात् । अतः कालिकानामेव नियमः पुरा वाच इति, लाघवात् । एवमङ्गप्रधानविप्रकर्ष उत्तरेषां परिहृतो भवति । अतस्त्रिकस्य त्रिकस्य साङ्गप्रयोगः कालभेदाद्विद्यते ।

इत्यध्वरकल्पायां त्रिषु संघेष्वङ्गानां भेदेनानुष्ठानाधिकरणम् ॥ ३ ॥

प्राजापत्यवसाहोमानां तन्त्रेणानुष्ठानाधिकरणम् (४)

अग्नीषोमीये, ' याज्याया अर्धर्चे प्रतिप्रस्थाता वसाहोमाञ्जुहोति ' इति श्रुतिवसाहोमः चोदकपरंपरया सप्तदशसु प्राजापत्येषु प्राप्तः । सर्वयागानां याज्यार्धर्चस्यैकत्वात्तन्त्रमित्याह —

प्राजापत्ये पशुगणे भवेत्तन्त्रं वसाहुतिः ।

इति प्राजापत्यवसाहोमानां तन्त्रेणानुष्ठानाधिकरणम् ॥ ४ ॥

ऐकादशिनेषु वसाहोमस्य भेदेनानुष्ठानाधिकरणम् (५)

एकजातीयपशुद्रव्यकनानादेवताकनानायागेषु, तन्त्रे प्रयुज्यमानेषु, कुम्भ्यैक्येन वसैक्यात् कस्यचिद्याज्यार्धर्चे होमः । इति चेत् —

भिन्नदेषेषु पशुषु न सा तन्त्रत्वमश्नुते ॥ ३३० ॥

स्वस्वयाज्यार्धर्चे स्वीयवसाप्रतिपत्तेः प्रत्येकमपेक्षणात् आवृत्तिः ।

इत्यैकादशिनेषु वसाहोमस्य भेदेनानुष्ठानाधिकरणम् ॥ ५ ॥

यूपैकादशिन्यां यूपाहुतौ तन्त्रताधिकरणम् (६)

अग्नीषोमीये यूपस्यान्तिकेऽग्निं मथित्वा यूपाहुतिं जुहुयादिति । पश्वेकादशिन्यामन्तिकदेशभेदादाहुतिभेदः–वसासुतिवत् । इति चेत् —

भवेद्यूपाहुतिस्तन्त्रं [1]पश्वेकादशिनी गता ।

अन्तिकानेकत्वस्य बाधितत्वात्, यत्र यूपो दृष्टिपथमवतरति, स देश एक इत्यगृह्यमाणविशेषत्वात्तन्त्रम् ।

इति यूपैकादशिन्यां यूपाहुतौ तन्त्रताधिकरणम् ॥ ६ ॥

साङ्गस्यावभृथस्याप्स्वनुष्ठानाधिकरणम् (७)

'अप्स्ववभृथेन चरन्ति' इत्यत्र, 'ता उपांशुकर्तव्याः' इतिवत् प्रधानमात्रमप्सु । अङ्गानि त्वाहवनीये । इति चेत् —

अप्स्वेवावभृथस्यादङ्गानामप्यनुष्ठितिः ॥ ३३१ ॥

'उच्चैः प्रवर्ग्येण' इतिवत् तत्करणिकायां भावनायां विहिता आपोऽङ्गप्रधानार्थाः । उपांशुत्वं द्वितीया संयोगात्प्रधानमात्रार्थम् ।

इति साङ्गस्यावभृथस्याप्स्वनुष्ठानाधिकरणम् ॥ ७ ॥

वरुणप्रघासेष्वाग्नेयादीनां मारुत्या भेदेनानुष्ठानाधिकरणम् (८)

वरुणप्रघासेषु विहारद्वयम् । तयोराहवनीयो विभज्य स्थापितः । तत्र श्रुतम् —'अष्टावध्वर्युरुत्तरे हवींष्यासादयति–मारुतीमेव प्रतिप्रस्थाता दक्षिणस्मिन्' इति । तत्र 'प्रावृषि वरुणप्रघासैर्यजेत' इति प्रयोगविध्यैक्यात् नवानां तन्त्रमङ्गानि । न च देशभेदात्तद्भेदः ; मारुत्याः दक्षिणविहारे आसादनमात्रविधानात् । होमस्तूत्तरस्मिन् । अतः प्रधानदेशाभेदात्तन्त्रम् । इति चेत् —

अङ्गावृत्तिर्देशभेदात्प्रधानेषु विहारयोः ।

विहारद्वये नवानामव्यवस्थयासादनप्राप्तौ नियमार्थं वचः । प्राप्तिश्च होमार्थतयेति तादृशस्य नियमात् होमोऽपि तत्रैव मारुत्याः, इति प्रधानदेशभेदेन विशेषग्रहान्नाङ्गानि तन्त्रम् । न च देशभेदेऽपि यजमानात्मनि नवाप्युत्पत्त्यपूर्वाणि, अध्वर्युकर्तृकाङ्गापूर्वाणि च जायन्ते । तत्राष्टभिरपूर्वैरंगापूर्वोद्बुद्धशक्तिभिः स्वकार्ये कर्तव्ये, पशुपुरोडाशन्यायेन मारुत्यपूर्वोद्बुद्धशक्तिकं कार्यं कुर्यादिति प्रासङ्गिकत्व-

---

[1] यूपैकादशिनी गता—इति पाठान्तरमत्र दृश्यते ।

मङ्गानामिति वाच्यम्; पशुप्रयोगमध्ये विधीयमानपुरोडाशस्य प्रासङ्गिकत्वेऽपि, नवानामेकोपक्रमावसानानामन्योन्यस्य मध्येऽन्यतमस्याप्यविधानात् तदनुपपत्तौ, स्वसमानदेशकर्तृकाङ्गजन्योपकारवत्तयैव मारुत्याः स्वफलजनकत्वमित्यङ्गावृत्तिः ।

इति वरुणप्रघासेष्वाग्नेयादीनां मारुत्या भेदेनानुष्ठानाधिकरणम् ॥ ८ ॥

उत्तरदक्षिणविहारयोः कर्त्रभेदाधिकरणम् (९)

विहारयोरध्वर्युप्रतिप्रस्थात्रोर्व्यवस्थितत्वेऽपि प्रतिविहारं प्रयोगभेदात् ब्रह्मादयस्त्रयोऽपि भिद्यन्ते । इति चेत् —

तन्त्रेणैवोपकुर्वन्ति त्रयो ब्रह्मादयस्तथा ॥ ३३२ ॥

असत्यपि भेदे तैरेवोभयत्रापि कार्यसिद्धेः । 'चातुर्मास्यानां यज्ञक्रतोः पञ्चर्त्विजः' इति वचनाच्च ब्रह्मादयस्तन्त्रम् ।

इत्युत्तरदक्षिणविहारयोः कर्त्रभेदाधिकरणम् ॥ ९ ॥

उत्तरदक्षिणविहारयोः पत्नीसंयाजानां भेदेनानुष्ठानाधिकरणम् (१०)

पत्नीसंयाजादयस्त्वापराग्निकाः देशैक्यात्तन्त्रम् । इति चेत् —

आपराग्निकहोमानामावृत्तिः कर्तृभेदतः ।

प्रतिप्रस्थातृकर्तृकाणामेव मारुत्युपकारकत्वात्, अन्येषामप्यध्वर्युकर्तृकाणामेव तथात्वाद्भेदः ।

इत्युत्तरदक्षिणविहारयोः पत्नीसंयाजानां भेदेनानुष्ठानाधिकरणम् ॥ १० ॥

वाजपेये प्राजापत्यपश्वालंभशेषस्य ब्रह्मसामकाले उत्कर्षाधिकरणम् (११)

'वाजपेये प्राजापत्यपशूनधिकृत्य 'तात्पर्यग्निकृतानुत्सृजति, ब्रह्मसाम्न्यालभते' इति श्रुतम् । तत्र 'पर्यग्निकृतानारण्यानुत्सृजन्ति' इतिवत् तदन्ताङ्गरीतिविधानात्, चोदकलोपे तदन्तापवर्गः प्राजापत्यानाम् । 'आज्येन शेषम्' इतिवत् 'ब्रह्मसाम्न्यालभते' इति कर्मान्तरविधिः । इति चेत् —

ब्रह्मसाम्नीत्येष विधिरालंभोत्कर्षगोचरः ॥ ३३३ ॥

कर्मान्तरविधित्वे, अनेकादृष्टकल्पना वाक्यभेदपश्वन्तरानयनतत्संस्कारावृत्त्यादिदोषापत्तेः, पर्यग्निकरणानन्तरमालंभप्राप्तौ तदुत्कर्षो ब्रह्मसाम्न्यालभत इति विधीयते । तद्बललभ्योत्सर्गः प्राप्तोऽनूद्यत इति नावृत्तिरुपाकरणादीनाम् ।

इति वाजपेये प्राजापत्यपश्वालंभशेषस्य ब्रह्मसामकाले उत्कर्षाधिकरणम् ॥ ११ ॥

अहीने उक्ष्णामुत्सर्गस्य कर्मशेषप्रतिषेधार्थताधिकरणम् (१२)

अस्ति पञ्चशारदीयो नामाहीनः पञ्चाहः । स पञ्चसु वर्षेष्वनुष्ठेयः । तत्र प्रथमवर्षे विशाखानक्षत्रयुक्तामायां, सप्तदशस्त्रीपशवः–सप्तदश उक्षाणश्च विहिताः । तेषु चतुस्त्रिंशत्सु पशुषु पर्यग्निकृतेषु स्त्रीपशूनामालम्भम्–उक्ष्णाञ्चोत्सर्गमाम्नाय, पुनर्द्वितीये तृतीये चतुर्थे च वर्षे तथैवाम्नाय, पञ्चमे श्रुतम्–'त्रींस्त्रीनेकैकस्मिन्नहन्यालभेते पञ्चोत्तमेऽह'न्निति । तत्र वत्सरचतुष्टयगतास्वमावास्यासु पशूनामुत्सर्गो न कर्मशेषत्यागः । प्राजापत्यन्यायेन, त्रींस्त्रीनित्यत्रालम्भोत्कर्षविधिसंभवात् । इति चेत् —

त्रींस्त्रीनिति विधिस्त्वेषस्यात्पश्वन्तरगोचरः ।

त्रींस्त्रीन्-एकैकस्मिन्–इत्यादौ त्रित्वस्य-प्रथमादिवर्षसंबन्धस्य च प्राप्तालम्भोद्देशेन विधौ वाक्यभेदापत्तेः । पञ्चोत्तमेऽहन्नित्यत्रापि संख्याह्नो विध्ययोगात्, विशिष्टकर्मान्तरविधित्वे, पूर्ववाक्येषु आरण्यपशुन्यायेन तत्तदन्ताङ्गरीतिविधौ, कर्मशेषोत्सर्गः फलं भवतीति तदन्तसमापनम् ।

इत्यहीने उक्ष्णामुत्सर्गस्य कर्मशेषप्रतिषेधार्थताधिकरणम् ॥ १२ ॥

दशपेयाभिषेचनीययोर्भेदेन प्रयोगाधिकरणम् (१३)

राजसूयेऽभिषेचनीयो नाम सोमः, ततस्संसृपां हवींषि, ततो दशपेयस्सोमः । तत्रेदं श्रुतं — 'सह सोमौ क्रीणाति अभिषेचनीयस्य दशपेयस्य च' इति । तत्र सहसोमक्रयविधेः दशपेयाङ्गानां ततः प्राचामपकर्षः, तदन्तमपकर्षेदिति न्यायात् । ततश्च सहोपक्रमात्–यथोपक्रमञ्च समापनात् तन्त्रमङ्गानि । इति चेत् —

अङ्गानां दशपेयाभिषेचनीये न तन्त्रता ॥ ३३४ ॥

संसृपां दशानामिष्टीनामपराह्णे दशपेयारम्भः पूर्वं चिरेणाभिषेचनीयस्य । सद्यो दीक्षयन्ति सद्य स्सोमं क्रीणन्ति इति दशपेयस्य सद्यस्कालतावगमात्, श्रुतक्रयवचनमुपसंवादं लक्षयति, वचनानन्तरानुगुण्यादिति ।

इति दशपेयाभिषेचनीययोर्भेदेन प्रयोगाधिकरणम् ॥ १३ ॥

वारुणीनिष्कासावभृथस्यार्थकर्मताधिकरणम् (१४)

वरुणप्रघासेषु, 'वारुण्यामिक्षा–मारुत्यामिक्षा' इति विधाय श्रुतं—'वारुण्यानिष्कासेन तुषैश्चावभृथं यन्ति' इति । तत्र प्रधानामिक्षायागस्यायं प्रचारविप्रकर्षविधिः, हृदयादिभिरिव पशोः । उत्पत्तिवाक्यावगतवरुणाय दीयमानत्वात् अवभृथशब्दोऽपि देवतासाम्याद् गौणोऽनुवादः, न तु कर्मान्तरम् ।

एवं सत्यवभृथशब्दवैयर्थ्यात्, तन्नामककर्मान्तरं पूर्वयागीयद्रव्यप्रतिपत्त्यर्थं विधीयते। इति चेत् —

निष्कासेनेति वारुण्या न प्रचारान्तरे विधिः।

'न प्रतिपत्तिविधिः' इत्यपि द्रष्टव्यम्। अवभृथशब्दबलात्कर्मान्तरविधिवत् प्रतिपत्त्यर्थतापि न युक्ता। तत्र द्रव्यस्य गुणत्वात्, क्रियाया अर्थकर्मत्वात्। वचनाच्चान्यदीयद्रव्यस्य दानमगत्या।

इति वारुणीनिष्कासावभृथस्यार्थकर्मताधिकरणम् ॥ १४ ॥

प्रायणीयनिष्कासे उदयनीयनिर्वापस्य संस्कारकर्मताधिकरणम् (१५)

ज्योतिष्टोमे, 'प्रायणीयश्चरुः-उदयनीयश्चरुः' इति विधाय श्रुतं— 'प्रायणीयस्य निष्कासे उदयनीयमभिनिर्वपति' इति। तत्र प्रायणीयनिष्कासे द्रव्यकोदयनीयधर्मककर्मान्तरविधिः।

तत्र संनिधानान्मुख्योदयनीयस्य। अतो निष्कासप्रतिपत्त्यर्थः उदयनीयनिर्वापसंयोगः। इति चेत् —

निष्कास इत्यपि तथा नैव कर्मान्तरे विधिः ॥ ३३५ ॥

निष्कासस्य सप्तम्या गुणभावावगमात्, द्वितीयया चोदयनीयस्य प्राधान्यावगमात्, तस्य च भाव्युपयोगितया संस्कारार्थत्वात्, प्रायणीयसंस्कारस्य केवलादृष्टार्थतापातात्। अत उदयनीयसंस्कारार्थः प्रायणीयनिष्कासे निर्वापः।

इति प्रायणीयनिष्कासे उदयनीयनिर्वापस्य संस्कारार्थताधिकरणम् ॥ १५ ॥

इति लघुवार्तिकटीकायाम् एकादशस्याध्यायस्य द्वितीयः पादः।

॥ अथ तृतीयः पादः ॥

वेद्याद्यङ्गानां प्रधानकालादन्यकालकर्तव्यत्वाधिकरणम् (१)

दर्शादौ वेदीध्मबर्हिरादिकं प्रयाजादिवत्प्रधानदेशकालकम्। इति चेत् —

वेद्यादेर्वचनान्मुख्यभिन्नकालादिसंगतिः।

'पूर्वेद्युर्वेदिं करोति' इत्यादिवचनात् दर्शे कालभेदः। 'अप्स्ववभृथेन' इति वचनात् अवभृथे सोमान्यदेशः। 'वडबा दक्षिणा' इति दक्षिणाभेदात् सौत्रामण्यां कर्तृभेदः। एवमन्यत्रापि यथासंभवं देशकालकर्तृभेदोऽङ्गप्रधानयोः वाचनिको द्रष्टव्यः।

इति वेद्याद्यङ्गानां प्रधानकालादन्यकालकर्तव्यताधिकरणम् ॥ १ ॥

आधानादेस्तन्त्रताधिकरणम् (२)

आधानमनारभ्याधीतमपि अग्निद्वारा सर्वकर्माङ्गमिति कृत्वा चिन्ता —

अङ्गत्वात्प्रयाजादिवत्प्रतिकर्म–प्रतिप्रयोगञ्च आधानं भेदेन स्यात् । न चागृह्यमाणविशेषत्वात्तन्त्रत्वम् ; सायमग्निहोत्रसंनिधानेन विशेषग्रहणात् । इति चेत् —

सर्वेषु तन्त्रमाधानम् ।

'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्यादौ स्वतन्त्रकालविधानात्तन्त्रत्वम् । न चाधानकाले विशेषग्रहणमस्ति । सर्वक्रत्वर्थं 'यैरस्म्यधिकृतो यांश्च शक्ष्ये प्रयोक्तुम्' इति संकल्पनात् । तस्मात्तन्त्रत्वम् ।

इत्याधानादेस्तन्त्रताधिकरणम् ॥ २ ॥

अग्नीषोमीयादिपशौ यूपतन्त्रताधिकरणम् (३)

अग्नीषोमीये उपदिष्टो यूपः । सवनीयानुबंध्ययोरतिदिष्टः । तत्रौपवसथ्योत्पन्नो यूपच्छेदो हि 'दीक्षासु यूपं छिनत्ति' इत्यपकृष्यमाणः, सन्निधानात् अध्वरकल्पानिर्वापन्यायेनाग्नीषोमीयस्यैवापकृष्यते। ततश्च तदपवर्गे यूपापवर्गात्, अन्ययोः पश्वोः स्वस्वकाले यूपान्तरोत्पादः । इति चेत् —

यूपस्सोमपशुत्रये ॥ ३३६ ॥

'तन्त्रम्' इत्यनुषङ्गः । अध्वरकल्पानिर्वापस्य प्रधानकालाबाधनियमविभित्वाभ्यामाद्यस्यापकर्षः । अत्र तु, अप्राप्तविधानप्रधानकालबाधयोः सर्वेषु साम्यात् अगृह्यमाणविशेषतया तन्त्रं यूपः पशुत्रयस्य ।

इत्यग्नीषोमीयादिपशौ यूपतन्त्रताधिकरणम् ॥ ३ ॥

यूपसंस्कारतन्त्रताधिकरणम् (४)

समानेऽपि यूपेछेदनमात्रापकर्षो जोषणादिसंस्काराणामग्नीषोमीयापवर्गादावृत्तिः प्रतिपशु । इति चेत् —

तत्तक्षणाद्यपि तथा

'यूपं छिनत्ति' इत्यस्य नायमर्थः 'यूपं सन्तं छिनत्ति' इति । असिद्धत्वात्पूर्वं यूपस्य । किन्तु, 'छेदनेन यूपं संस्कुर्यात्' इति । न च तन्मात्रेण तत्करणमिति छेदनस्य तत्कालयोग्यसंस्कारोपलक्षकत्वमिति, अगृह्यमाणविशेषसंस्कारास्तन्त्रम् । छेदनमात्रापकर्षेऽपि, औपवसथ्ये क्रियमाणास्तक्षणादयोद्वारिणो यूपस्य तन्त्रत्वात् आतिथ्याबर्हिस्संस्कारवत्तन्त्रत्वम् ।

इति यूपसंस्कारतन्त्रताधिकरणम् ॥ ४ ॥

स्वरुतन्त्रताधिकरणम् (५)

'यूपस्य स्वरुं करोति' इति श्रुतः स्वरुः अग्नीषोमीयपश्वङ्गनकाले गृहीतः, तदपवर्गे अपवृज्यते इति, अन्ययोरन्योत्पादनं, 'यः प्रथमश्शकलः परापतेत् तं स्वरुं कुर्यात्' इति तु, 'एकस्मिन्प्रहरणे' इति व्याख्येयम्। प्रपरणान्तरजः प्रथमस्त्वन्यस्य। इति चेत् —

तन्त्रं स्यादपि तत्स्वरुः।

प्रहणानुपादानात् यूपापेक्षया प्रथमस्त्वेक इति तन्त्रम्। व्यामोहदोषनाशपरिहाराय छेदनकाल एव ग्रहणात् अगृह्यमाणविशेषत्वादपि तन्त्रम्।

इति स्वरुतन्त्रताधिकरणम् ॥ ५ ॥

कृष्णविषाणाप्रासनस्यान्त्याहनियमाधिकरणम् (६)

ज्योतिष्टोमे, 'कृष्णविषाणया कण्डूयते' इति विधाय श्रुतं; 'नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति' इति। तदहर्गणेषु प्राप्तम्। तत्राद्यन्तयोरन्यतरत्र विषाणाप्रासनम्, न चरमेऽहनि। इति चेत् —

[1]अहर्गणे विषाणायाः प्रासनं चरमेऽहनि ॥ ३३७ ॥

दक्षिणादानोत्तरकालपदार्थेषु पाणिकण्डूयनस्यार्थकृतत्वे नाशास्त्रीयत्वात्, द्वितीयादिसुत्यासु दक्षिणानयनात् प्राक्पदार्थेषु विषाणाकण्डूयनस्य चोदकप्राप्तस्याबाधाय, अन्त्यसुत्यादक्षिणाएयनोत्तरकलं प्रासनम्।

इति कृष्णविषाणाप्रासयस्यान्त्याहनियमाधिकरणम् ॥ ६ ॥

राजसूये नाबीजेषु वाग्विसर्गस्य चरमकालनियमाधिकरणम् (७)

दर्शादौ, 'प्रणीताः प्रणेष्यन्वाचं यच्छति, तां सहविष्कृतावाचं विसृजति' इति श्रुतम्। हविष्कृदाह्वानकाल इति यावत्। राजसूये, 'अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणां, सोमाय वनस्पतये श्यामाकं चरुम्' इत्यादिनानाबीजेष्टिषु, कृष्णाजिनास्तरणादिफलीकरणान्तः एकः पदार्थः-तेनैवानुसमयः इत्युक्तं पञ्चमे। तत्राद्यस्य वा-अन्त्यस्य वा हविष्कृदाह्वानकाले तद्वाग्विसर्गः। उभयथापि केषाञ्चित् धर्मबाधतौल्यात्। पूर्ववदत्र वाग्विसर्गस्यार्थकृतत्वाभावात्, 'विसृजति' इति प्रत्यक्षतयैव श्रवणात्। इति चेत् —

अन्त्याह्वाने वाग्विसर्गो नानाबीजावहन्तिषु।

---

[2] मातृकायामयं श्लोकोऽपूर्णो वर्तते।

'वाचं यच्छति आ हविष्कृदाह्वानात्' इति अवधिसमर्पकत्वेन तदेकवाक्यभेदोऽदृष्टकल्पना च। अतोऽन्त्याह्वानकाले वाग्विसर्गः।

इति राजसूये नानाबीजेषु वाग्विसर्गस्य चरमकालनियमाधिकरणम् ॥ ७ ॥

अग्नीषोमीये पौरोडाशिककाल एव वाग्विसर्गाधिकरणम् (८)

अग्नीषोमीयपशुपुरोडाशस्य प्रासङ्गिकत्वात्। [1]इति चेत् —

पशौ पौरोडाशिके स्यादाह्वाने वाग्विसर्जनम् ॥ ३३८ ॥

न वाग्यम आरादुपकारकः, कर्तृसंस्कारको विगुणास्स्युरिति पुरोडाशकाले वाग्विसर्गः।

इत्यग्नीषोमीये पौरोडाशिककाल एव वाग्विसर्गाधिकरणम् ॥ ८ ॥

अग्निचयनेऽग्निविमोकस्य मतभेदेन व्यवस्थाधिकरणम् (९)

अग्नौ श्रुतं–'अग्निं युनज्मि शवसा घृतेनेति जुहोति, अग्निमेव तद्युनक्ति, पञ्चभिर्युनक्ति पाङ्क्तो यज्ञः' इत्यग्नियोगः; तथा 'इमं स्तनमूर्जस्वन्तं धयापामित्याज्यस्य पूर्णां स्रुचं जुहोत्येष वा अग्नेर्विमोकः' इति।

तत्राग्नेः सर्वार्थत्वात्, तत्संस्कारो योगस्सर्वार्थसाङ्गप्रधानापवर्गे विमोकः — इति प्रापय्य, 'पांक्तो यज्ञः' इति यज्ञशब्देन योगस्य प्रधानार्थत्वावगमात् तदपवर्गे विमोकः। इति भाष्यम्। तदाह —

प्रधानमात्रापवर्गे भवेदग्निविमोचनम्।

इत्यग्निचयने अग्निविमोकस्य मतभेदेन व्यवस्थाधिकरणम् ॥ ९ ॥

वार्तिककारस्तु, वाक्यशेषात् प्रधानार्थत्वमिति प्रापय्य, अग्नेरङ्गप्रधानार्थत्वेन तत्संस्कारो योगः सर्वार्थः। योगोत्पत्तिवाक्ये यज्ञशब्दाभावेन ततः सर्वार्थत्वप्रतीतेः। पञ्चत्वसंख्याविधानार्थत्वात्। न च द्वादशाहे [1] अहरहर्युनक्ति' 'अहरहर्विमुञ्चति' इत्यस्मात् केवलप्रधानर्थत्वमिति युक्तम्; तस्य पूर्वोक्तयुक्त्या 'सर्वादौ योग;–सर्वान्ते विमोकः' इति प्रसक्तौ, अहरहर्योगविमोकविधायिवचनत्वात्। अनुवादमात्रमनर्थकं स्यात्। तस्मात् साङ्गार्थो योगः, साङ्गापवर्गे विमोकः। इति सिद्धान्तितवान्।

---

[1] अत्र पूर्वपक्षः न स्पष्टं लिरूपितः। स चेत्थम्—'पश्वर्थमनुष्ठितैरेव प्रयाजाद्यङ्गैः पशुपुरोडस्यापि प्रसङ्गादुपकारलाभात्तदर्थं पार्थक्येन तेषामनुष्ठानं न भवति। एवं वाग्यमोऽपि पश्वर्थमनुष्ठितः प्रसङ्गात्पुरोडाशस्याप्युपकरोतु। न तदर्थं पार्थक्येनानुष्ठेय इति पूर्वपक्षसारः।

तदाह —

साङ्गान्तेग्निऽविमोको हि वार्तिके संप्रदर्शितः ॥ ३३९ ॥

इति प्रकृतविषये वार्तिककारमत् ॥ १० ॥

उपसत्कालीन सुब्रह्मण्याह्वानस्य तन्त्रेणानुष्ठानाधिकरणम् (११)

सुत्याकालं ज्योतिष्टोमे सुब्रह्मण्याह्वानं अहर्गणे चोदकप्राप्तं, प्रधानभेदात् भिद्यते । इति चेत् –

सुब्रह्मण्योपसत्काला तन्त्रेण स्यादहर्गणे ।

प्रधानसंनिधावुपसत्कालेऽनुष्ठीयमानमाह्वानमगृह्यमाणविशेषत्वात्तन्त्रम् ।

इत्युपसत्कालीनसुब्रह्मण्याह्वानस्य तन्त्रेणानुष्ठानाधिकरणम् ॥ ११ ॥

सुत्याकालीनसुब्रह्मण्याह्वानस्य भेदेनानुष्ठानाधिकरणम् (१२)

सुत्याकालीनमपि सुब्रह्मण्याह्वानं प्रथमसुत्याकालकृतं यूपाहुतिवत् एकस्य सन्निधानेऽपि सर्वार्थम् । इति चेत् —

भिद्यत सुत्याकालातुकालभेदेन सान्वहम् ॥ ३४० ॥

कर्मकालस्य सन्निधिविशेषेण गृह्यमाणविशेषत्वात्, तदहरपवर्गे तदाह्वानसंस्कारापवर्गात् अहरन्तरेषु तत्कार्यम् । अतो न तन्त्रम् ।

इति सुत्याकालीनसुब्रह्मण्याह्वानस्य भेदेनानुष्ठानाधिकरणम् ॥ १२ ॥

देशपात्रर्त्विजामन्यप्रयोगे पूर्वदेशाद्यादानस्यैच्छिकताधिकरणम् (१३)

समादिदेशानां ऋत्विजां जुह्वादिपात्राणाञ्च प्रतिप्रयोगं भेदः । निरिष्टिकोपधाने शिष्टाचार-विरोधात् । इष्टान्निर्गताः – निरिष्टाः । कुत्सिताः निरिष्टाः निरिष्टिकाः । पुनः प्रयोगानर्हाः इति यावत्[1] । तस्मादन्ये ग्राह्याः । इति चेत् —

प्रतिप्रयोगं देशादिभेदापेक्षा न युज्यते ॥

एवंजातीयके शिष्टानां पुनरुपादानविगानं नास्ति – परिहितवस्त्रस्य प्रक्षालितस्य परेद्युरुपादानवत् । अतस्ते वा–अन्ये वा ।

इति देशपात्रर्त्विजामन्यप्रयोगे पूर्वदेशाद्यादानस्यैच्छिकताधिकरणम् ॥ १३ ॥

---

[1] निरिष्टकोपादानं–अथवा निरिष्टिकोपादानं—इत्यत्र शास्त्रदीपिका—जैमिनीयन्यायमालाविस्तर—भाट्टदीपिका—शंभुभट्टीयादिषु तारतम्यं दृश्यते । अयन्तु ग्रन्थकारः निरिष्टिकोपादानम्' इतीमं पक्षामाश्रयति ।

पात्राणां तन्त्रत्य नियमाधिकरणम् (१४)

पात्राणामपि देशादिवदनियमः। प्राथमिकप्रयोगजनितसंस्कारानपेक्षणात्। न च 'आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च' इति परिधानीये कर्मणि पात्रप्रतिपत्त्यवगमात्, तत्त्यागेन लोपश्शङ्क्यः; तेषां तृतीयया गुणभावावगमेन पात्रान्तरैरपि दाहसंभवात्। इति चेत् —

आन्तात्पात्राणि धार्येरन् प्रतिपत्तिविधानतः ॥ ३४१ ॥

यद्यपि गुणभावः पात्राणां, तथापि, प्रथमस्य त्यागे द्वितीयोपादानात्पूर्वमपि यजमानमरणसंभवात्, तत्र दाहावैगुण्याय द्वितीयग्रहणपर्यन्तं धारणीयम्। धारिते च तस्मिन्, तेनैव द्वितीयादिप्रयोगोपपत्तेः, नान्योपादाने मानमस्ति। किञ्च न केवलं दाहे गुणभाव एव पात्राणाम्; 'दक्षिणे हस्ते जुहूमासादयति–सव्य उपभृतं–नासिकयोः स्रुवौ श्रोत्रयोः प्राशित्रहरणम्' इत्यादिना पात्राणां प्रतिपाद्यत्वावगमात्। आद्यानां त्यागे प्रतिपत्तिलोपात् कर्मवैगुण्यं स्यात्। अत आन्ताद्धारणम्।

इति पात्राणां तन्त्रस्य नियमाधिकरणम् ॥ १४ ॥

पवमानेष्टित एव पात्राणां धारणाधिकरणम् (१५)

तानि मूलप्रकृतित्वाद्दर्शपूर्णमासयोः, तावारभ्य धार्याणि। न पवमानेष्टिम्। इति चेत् —

आरभ्य पवमानेष्टिं भवत्येषां विधारणम्।

पवमानेष्ट्यनन्तरं दर्शपूर्णमासारंभात्पूर्वं यजमानविपत्तिसंभवात् पवमानेष्टिमारभ्य धारणम्।

इति पवमानेष्टित एव पात्राणां धारणाधिकरणम् ॥ १५ ॥

सर्वसोमानामुपरिष्टात्प्राजापत्यप्रचाराधिकरणम् (१६)

वाजपेये सप्तदश प्राजापत्यान् प्रकृत्य श्रूयते, 'उपरिष्टात्सोमानां प्राजापत्यैश्चरन्ति' इति। न च तत्र आर्भवकाले केषाञ्चित्सोमानामुपरिष्टात् चोदकानुग्रहाय प्रचारविधिरिति युक्तम्—वचनवैयर्थ्यात्। अतिदेशेनैव तत्कालत्वसिद्धेः।

न च प्राकृतकालप्रत्यासत्तिलिप्सया शस्त्रवतां सोमानामुपरिष्टादिति वक्तव्यम्; प्रत्यासत्तिमात्राच्चोदकाननुग्रहात्।

तस्मादप्राकृताङ्गत्वात् प्राकृतसोमाभ्यासोक्थ्यादिस्थाने प्राकृताग्निष्टोमप्रचारादूर्ध्वं प्राजापत्यहृदयादिप्रचारः। इति चेत् —

ऊर्ध्वं सकलसोमानां प्राजापत्यप्रचारणम् ॥ ३४२ ॥

एतादृगनुमानस्य शास्त्रार्थेऽप्रामाण्यात् वचनार्थासंकोचाय, प्राकृतवैकृतसकलप्रचारादूर्ध्वं प्राजापत्यप्रचारः।

इति सर्वसामानामुपरिष्टात् प्राजापत्यप्रचाराधिकरणम् ॥ १६ ॥

सवनीयपुरोडाशे देवतोत्कर्षाधिकरणम् (१७)

सवनीयपशौ प्राकृतसूक्तवाकस्य विकृतः पाठः। स चाग्निमारुतादूर्ध्वमनूयाजोत्कर्षादुत्कृष्यते। सवनीयहविष्षु पाशुकं तन्त्रं प्रसज्यते इत्यग्रिमेऽध्याये वक्ष्यते। तत्र 'प्रासङ्गिकञ्च नोत्कर्षे' दिति पाञ्चमिकन्यायेन 'भृज्जन्निन्द्राय हरिवते धानाः' इत्यादिपदानि नोत्कृष्यन्ते। इति चेत् —

उत्कृष्यन्ते पदापेक्षाः शब्दा हरिवदादयः।

'अग्निमद्यहोतारमवृणीतायं सुन्वन्यजमानः' इति तन्त्रिपदापेक्षानि स्वार्थबोधकप्रसङ्गिपदानि तदुत्कर्षे उत्क्रष्टव्यानि। न च तावता मन्त्रलिङ्गविरोधः; उत्कृष्टैरपि तैः सवनीयहविर्देवतानामेव प्रकाशनात्।

इति सवनीयपुरोडाशे देवतोत्कर्षाधिकरणम् ॥ १७ ॥

इत्येकादशस्य तृतीयः पादः।

॥ अथ चतुर्थः पादः ॥

राजसूये सोमापौष्णादिकेऽङ्गानां भेदेनानुष्ठानाधिकरणम् (१)

राजसूये, अनुक्तदेशकालानि पृथग्दक्षिणावन्ति कर्माणि, 'धात्रे पुरोडाशं द्वादश कपालं निर्वपति –अनुमत्यै चरुं–राकायै चरुं– सिनीवाल्यै चरुं–कुह्वै चरुं– मिथुनौ गावौ दक्षिणा, आग्नावैष्णवमेकादशकपालं निर्वपति ..... वामनोवहीदक्षिणा, पौष्णं चरुं–([1]निर्वपति) श्यामो दक्षिणा' इत्यादीनि। तत्र देशकालफलकर्तृणामभेदात् तन्त्रमङ्गानि। तेभ्य एव ऋत्विग्भ्यः तत्तद्दक्षिणादानोपपत्त्या तस्य कर्तृभेदानापादकत्वात्। इति चेत् —

अङ्गावृत्तिः कर्तृभेदात् भिन्नदक्षिणकर्मणम् ॥ ३४३ ॥

दक्षिणाभेदकृतानतिभेदे तन्निमित्तकर्तृरूपमपि भिन्नम्। वामनानतैराग्नावैष्णवः कार्यः, श्यामानतैः सोमापौष्णः' इति श्रुतव्यवस्थाया अबाधाय च दक्षिणाभेदे प्रयोगभेदः।

इति राजसूये सोमापौष्णादिके, अङ्गानां भेदेनानुष्ठानाधिकरणम् ॥ १ ॥

राजसूये वृतकर्तृतन्त्रताधिकरणम् (२)

दक्षिणाभेदात्कर्तृभेदवत्, तदधिष्ठानमपि भिद्यते। प्रयोगभेदे सति प्रथमप्रयोगार्थं ये वरण-

---

[1] इदं पदं वेदपाठे नास्ति। अतः कुण्डलीकृतमस्माभिः।

भरणाभ्यामुपात्ताः, ते तत्प्रयोगापवर्गेऽपवृक्ता इति, पुनः प्रयोगान्तरार्थे ते वा—अन्ये वा—वरीतव्याः। न तु त एवेति नियमः। इति चेत् —

राजसूये कर्तृभेदेऽप्यधिष्ठानं न भिद्यते।

कृत्स्नराजसूयस्यैकफलत्वेन, पुरा सर्वचिकीर्षायां चिकीर्षितार्थे सहायवरणमगृह्यमाणविशेषत्वात्सर्वार्थमित्युपक्रममारभ्य त एवान्तात्कुर्युः। नन्वेकफलत्वेऽपि 'बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे—ऐन्द्रमेकादशकपालं राजन्यस्य गृहे' इत्यादिना देशभेदश्श्रुतः। तथा 'षडेव पूर्वेद्युर्निरूप्याणि—षडुत्तरेद्युः' इति कालकर्तृभेदेन प्रयोगभेदात्, यदा यः प्रयोक्तव्यः, तदर्थमेव तत्कालं वरणम्, पौर्णमास्यमावास्या प्रयोगयोरिव। इति चेत् — सत्यमेवमङ्गभूतं वरणं भिन्नमेव। तथापि लौकिकमुपसंवादसमं वरणं तन्त्रम्। लाघवात् अविघ्नपरिसमाप्तये च। अन्यथा एककर्मसमाप्तौ न ते याजयेयुः—अन्ये च न लभ्येरन्—तदा कर्मलोप एव स्यात्। निरन्तरं प्रयोक्तव्या यागाः, न दर्शपूर्णमासयोरिव मध्ये विरामस्संभवति। ततोऽपि त एवान्तात्कर्तार इति कर्तृरूपभेदेऽप्यधिष्ठानैक्यम्।

इति राजसूये वृतकर्तृतन्त्रताधिकरणम् ॥ २ ॥

अवेष्टावङ्गानां भेदेनानुष्ठानाधिकरणम् (३)

अवेष्टिः, 'आग्नेयमष्टाकपालं हिरण्यं दक्षिणा; ऐन्द्रमेकादशकपालमृषभो दक्षिणा, वैश्वदेवं चरुं पिशङ्गी पष्ठौ ही दक्षिणा, मैत्रावरुणीमामिक्षां वशा दक्षिणा 'बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा' इति। तत्रेयमिष्टी राजसूयान्तर्गतैव। राजसूये 'दिशो व्यवस्थापयति दिशामभिजित्यै' इति दिग्व्यवस्थापनं विधाय, अर्थवादः श्रुतः[1]; 'ईश्वरो वा एष दिशोऽनून्मदितोः यं दिशोऽनुव्यवस्थापयन्ति, दिशामवेष्टयो भवन्ति, दिक्ष्वेव प्रतितिष्ठत्यनुन्मादाय, पञ्च देवता यजति' इति। एतयान्नाद्यकामं याजयेत्' इति बहिःप्रयोगोऽप्यन्नाद्यकामाय विहितः। स त्रिवर्णाधिकार इत्युक्तं द्वितीये। तत्र क्रतुमध्यप्रयोगे दक्षिणाभेदेऽपि, मध्ये निधानलिङ्गादैकतन्त्र्यम्। न च बहिः प्रयोग एव मध्ये निधानमिति शङ्क्यम्; यथोत्पन्नस्य यथादक्षिणस्य च बहिःप्रयोगमात्रविधानात्, अन्तःप्रयोगभेदे बहिरपि तथात्वापत्तेः। अवेष्टिरिति चैकवचनमपि प्रयोगैक्यं गमयति। इति चेत् —

भवत्यवेष्टौ पञ्चानां हविषां भिन्नतन्त्रता ॥ ३४४ ॥

राजसूयमध्योत्पन्नानि दक्षिणाभेदवन्त्येव मध्ये प्रयोक्तव्यानि भिन्नतन्त्राणि। 'एतयान्नाद्यकामं ....' इत्येकप्रयोगविधानात्—मध्ये निधानलिङ्गाच्च दक्षिणाभेदमनादृत्य बहिरेकप्रयोगत्वम्। प्रमाणवशाद्वै-

---

[1] 'विधाय' इत्यनेन श्रुतः इत्यस्य समानकर्तृकत्वं कथम्।

रूप्यस्याप्यलङ्कारत्वात् ।

इत्यवेष्टावङ्गानां भेदेनानुष्ठानाधिकरणम् ॥ ३ ॥

काम्यपवमानेष्टिहविषां भेदेनानुष्ठानाधिकरणम् (४)

आधाने, 'अग्नये पवमानाय–अग्नये पावकाय–अग्नये शुचये' इति पवमानहवींषि श्रुतानि । तत्र, 'अह्नो निरुप्याणि–सर्वाणि सहनिरूप्याणि, यः कामयेतोत्तरमुत्तरं वसीयान् स्यामिति, तस्याग्नये पवमानाय निरूप्य, पावकशचिभ्यां समाने बर्हिषि निर्वपेत्' इति श्रुतम् । तत्र काम्यानामपि त्रयाणां समानतन्त्रता । प्राप्तकर्मणि प्रयोगभेदस्य फलसंबन्धस्य च विधौ वाक्यभेदप्रसङ्गात् । इति चेत् —

कामाय तन्त्रभेदस्यात्पवमानहविस्त्रये ।

यागाश्रितेन प्रयोगभेदस्यैव दध्यादिवत्फले विधानात्, प्रथमं निरूप्य द्वितीयतृतीयौ सहप्रयोक्तव्यौ ।

इति काम्यपवमानेष्टिहविषां भेदेनानुष्ठानाधिकरणम् ॥ ४ ॥

द्वादशाहे दीक्षोपसत्सुत्यानां प्रत्येकं द्वादशाहताधिकरणम् (५)

द्वादशाहे द्वादशाप्यहानि [1]कार्याणि । ततश्च द्वादश पञ्चविंशतिरहानि भवन्ति । न च द्वादशाहशब्दविरोधः ; तस्य नामत्वात् । न च तस्य गुणविधित्वात्, द्वादशसाद्यस्कं सदीक्षोपसत्कं कार्यमिति शङ्क्यम् ; गुणविधित्वेऽपि, सहितानामेकस्मिन् फले चोदितानां तन्त्रमसुत्याकालाङ्गानि । तथा च, चतुरहे उपसदः–चतुरहे सुत्याः–इति द्वादशस्वेवाहस्सु सर्वसमापनम् । इति चेत् —

स्युर्द्वादशाहसुत्यानां तन्त्रं दीक्षोपसद्गुणाः ॥ ३४५ ॥

दीक्षोपसदां तन्त्रत्वेऽपि, 'द्वादश दीक्षाः–द्वादशोपसदः' इति वचनार्थवत्त्वाय तावतीर्दीक्षा उपसदश्च कृत्वा, द्वादश सुत्याः क्रमेण कार्याः । द्वादशाहशब्दो यजिसामानाधिकरण्यात् नामधेयं प्रधानयाग-विषयम् । ततश्च 'षट्त्रिंशदहो वा एष यद्द्वादशाहः' इति लिङ्गमप्युपपन्नतरं भवति ।

इति द्वादशाहे दीक्षोपसत्सुत्यानां प्रत्येकं द्वादशाहताधिकरणम् ॥ ५ ॥

द्वादशाहे प्रधानैरपृथक्कालानामङ्गानां भेदेनानुष्ठानाधिकरणम् (६)

सुत्याकालान्यप्यङ्गानि, सवनीयपशुः–सवनीयहवींषि–इत्यादीनि प्रयोगैक्यात्तन्त्राणि । इति चेत् —

सुत्याकालास्तु भिद्यन्ते सवनीयादिका गुणाः ।

---

[1] द्वादशदीक्षाद्वादशोपसद्युक्तानि इति योजयितव्यम् ।

प्रधानकालानां तत्तत्प्रधानार्थतया विशेषग्रहात्, तदपवर्गेऽपवर्गात्, अन्यार्थे तत्तत्सुत्यास्वावर्त्यानि ।

इति द्वादशाहे प्रधानैरपृथक्कालानामङ्गानां भेदेनानुष्ठानाधिकरणम् ॥ ६ ॥

उपसत्काले सुब्रह्मण्याह्वानस्याविकारेण कर्तव्यताधिकरणम् (७)

प्रकृतावुपसत्काले सुब्रह्मण्याह्वानं, 'इत्यहे सुत्यामागच्छ मघवन्' इति श्रुतम् । इति शब्दः, चतुरहे-त्र्यहे-इत्यादिसंख्योपलक्षणम् । द्वादशाहे चोपसत्कालं तन्त्रमित्युक्तम् । तत्र एकधा शब्दस्येव प्रथमोपसदि त्रयोदशाहे-चतुर्दशाहे-इत्यारभ्य चतुर्विंशत्यहमित्यन्तमुपलक्षणीयम् । एवमन्यास्वप्युपसत्सु यथास्वमभ्यासः । इति चेत् —

सुब्रह्मण्योपसत्काला नाह्वामभ्यासमृच्छति ॥ ३४६ ॥

'सुत्यामागच्छ मघवन्' इत्येवं सुत्यासंबन्धि देवतासंस्कारमात्रं विवक्षितम् । संख्याहशब्दौ निर्देशमात्रार्थावविक्षितौ । अतः सकृदेव वक्तव्यं तन्त्रम् ।

इत्युपसत्काले सुब्रह्मण्याह्वानस्याविकारेण कर्तव्यताधिकरणम् ॥ ७ ॥

वाजपेये प्राजापत्येषु कुंभ्यादीनां तन्त्रताधिकरणम् (८)

प्राजापत्यपशुषु एकदेवतेषु कुंभी – हृदयशूलं–वपा श्रपणी च तन्त्रम् । विभवात् । इत्युत्तरविवक्षया प्राप्यते । इत्याह —

कुंभीहृदयशूलाद्याः तन्त्रं स्युः पाशुके गणे ।

इति वाजपेये प्राजापत्येषु कुंभ्यादीनां तन्त्रताधिकरणम् ॥ ८ ॥

भिन्नदेवताकेष्वपि कुंभ्यादीनां तन्त्रताधिकरणम् (९)

भिन्नदैवत्यपशुषु कुंभ्यादीनां तन्त्रत्वे व्यत्यासशङ्का स्यात् । अतः कुंभ्यादिभेदः । इति चेत्—

तथैव भिन्नदैवत्ये

चिन्हकरणेनापि व्यत्यासपरीहारात् तन्त्रम् । वसायाश्चिन्हासंभवेऽपि विभज्य स्वयाज्यार्धर्चे होमकरणान्न वैगुण्यम् ।

इति भिन्नदेवताकेष्वपि कुंभ्यादीनां तन्त्रताधिकरणम् ॥ ९ ॥

ऐकादशिनेषु नानाजातीयेषु पशुषु कुंभ्यादीनां भेदाधिकरणम् (१०)

'आग्नेयः कृष्णग्रीवस्सारस्वतीमेषी' इत्यादिभिन्नजातीयपशुष्वपि तन्त्रम् । इति चेत् —

न तु जात्यन्तरे तथा ॥ ३४७ ॥

पंक्तिवैषम्येण कस्यचित्सिद्धत्वं कस्यचिदसिद्धत्वमिति स्यात् । तस्मात्कुंभ्यादिभेदो भिन्नजातीयमात्रे ।

इत्यैकादशिनेषु नानाजातीयेषु पशुषु कुंभ्यादीनां भेदाधिकरणम् ॥ १० ॥

अश्वप्रतिग्रहेष्टौ प्रतिपुरोडाशं कपालभेदाधिकरणम् (११)

'यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणाञ्चतुष्कपालान्निर्वपेत्' इति श्रुतम् । पौण्डरीकादौ बह्वश्वदाने बहुषु पुरोडाशेषु, चत्वारि कपालानि दीर्घाणि कृत्वा तत्र सर्वे पुरोडाशाः श्रप्याः इति तन्त्रं कपालानि । इति चेत् —

कपालानि न तन्त्रं स्युरनेकाश्वप्रतिग्रहे ।

कपालावयवेष्वेव सर्वेषां श्रवणापत्तेः चतुष्कपालत्वविरोधः, 'सर्वाणि कपालान्यभि प्रथयति' इति यावत्कपालं प्रथनानुपपत्तिश्च, तन्त्रत्वे कपालानां स्यात् । अतो भेदः कपालानाम् ।

इत्यश्वप्रतिग्रहेष्टो प्रतिपुरोडाशं कपालभेदाधिकरणम् ॥ ११ ॥

व्रीह्यवहननादौ प्रतिप्रहारं मन्त्रस्य नावृत्त्यधिकरणम् (१२)

दर्शादौ, 'अवरक्षोदिवस्सपत्नं वध्यासम्' इत्यवहन्ति' इति श्रुतो मन्त्रः प्रतिप्रहारमावर्त्यः । सर्वस्य हन्तित्वात् तदङ्गत्वाच्च मन्त्रस्य । इति चेत् —

सकृद्भवेद्धन्ति मन्त्रः

तण्डुलभाव्यकावघाताभ्यासाभावात् न मन्त्रावृत्तिः ।

इति व्रीह्यवहननादौ प्रतिप्रहारं मन्त्रस्यानावृत्त्यधिकरणम् ॥ १२ ॥

नानाबीजेष्टौ प्रतिप्रहारं मन्त्रावृत्त्यधिकरणम् (१३)

'अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणां--सोमाय वनस्पतये श्यामाकं चरुं' इत्यादि नानाबीजेष्टिष्वपि सर्वावघातचिकीर्षया प्रयुक्तस्य मन्त्रस्यागृह्यमाणविशेषत्वात्तन्त्रं स्यात् । इति चेत् —

नानाबीजेषु भिद्यते ॥ ३४८ ॥

समन्त्रकावघातस्य प्रतिकर्म चोदकप्राप्तिः । तादृशस्यैव तत्तद्बीजसंस्कारायावृत्तिः ।

इति नानाबीजेष्टौ प्रतिप्रहारं मन्त्रावृत्त्यधिकरणम् ॥ १३ ॥

प्रतिनिर्वापादिमन्त्रावृत्त्यधिकरणम् (१४)

दर्शादौ, 'चतुरो मुष्टीन्निर्वपति' 'अयुङ्गायुङ्गान्मुष्टील्लुँनाति' 'त्रिधातु पञ्चधातु वा वेदिं स्तृणाति' 'चतुर्जुह्वां गृह्णाति' इति श्रुतम्। तत्र मन्त्राः 'देवस्य त्वा सवितुः प्रसवे बर्हिर्देवसदनं दामि' 'ऊर्णाम्रदसं त्वा स्तृणामि' 'शुक्रं त्वा शुक्रायाम्' इति च। तत्र ससंख्यानामेककर्मत्वात् अवघातमन्त्रवत् सकृत्प्रयोगः इति चेत् —

निर्वापादिबहुत्वेन तन्मन्त्रावृत्तिरिष्यते।

अवहतानामेव पुनः पुनरवघातात्, मन्त्रस्तत्र सकृद्भवेत्। इह तु, अन्येऽन्ये निरूप्यन्ते – लूयन्ते – गृह्यन्ते च–इति सर्वेषां समन्त्रकत्वाय पुनः पुनर्मन्त्राणामावृत्तिः।

इति प्रतिनिर्वापादिमन्त्राणामावृत्त्यधिकरणम् ॥ १४ ॥

वेदिप्रोक्षणे प्रत्यावृत्तिमन्त्रानावृत्त्यधिकरणम् (१५)

दर्शादौ, वेदिरसि बर्हिषे त्वा स्वाहेति त्रिर्वेदिं प्रोक्षति' इति श्रुतम्। तत्र संख्यया प्रोक्षण-भेदात्, प्रतिप्रधानं गुणस्य मन्त्रस्यावृत्तिः। अनेन मन्त्रेण त्रिः प्रोक्षति–इति विस्पष्टवचनाच्च मन्त्रा-वृत्तिः। इति चेत् —

त्रिर्वेदिं प्रोक्षतीत्यादौ मन्त्र आदौ सकृद्भवेत् ॥ ३४९ ॥

न मन्त्रस्य त्रित्वान्वयः। किन्तु 'अनेन प्रोक्षति' इति क्रियान्वयः। त्रित्वमपि क्रियाङ्गम्। तत्र च, द्वित्रिचतुर्भ्यस्सुच्' इति क्रियाभ्यावृत्तौ सुज्विधानात्, आवृत्तिमन्त्रोभयविशिष्टप्रोक्षणविधेस्सकृन्मन्त्रः।

इति वेदिप्रोक्षणे प्रत्यावृत्तिमन्त्रानावृत्त्यधिकरणम् ॥ १५ ॥

कण्डूयनमन्त्रस्यानावृत्त्यधिकरणम् (१६)

ज्योतिष्टोमे कृष्णविषाणया कण्डूयनमन्त्रः – 'कृष्यै त्वा सुसस्यायै' इति। तत्रानेकेष्वङ्गेषु युगपत् कण्डूत्पत्तौ कण्डूकृतदुःखस्य, तदभावसंस्कार्यस्य चाङ्गस्य प्रधानस्यानेकत्वात्, प्रत्यङ्गं संस्कारक-मन्त्रावृत्तिः। अन्यथा तदङ्गकण्डूयनस्य वैकल्यापत्तेः। इति चेत् —

कण्डूनां यौगपद्येऽपि कृष्यै त्वेति मनुः सकृत्।

नाङ्गसंस्कारः कण्डूयनम्। दुःखाक्षिप्तमात्मानमतातदुःखं कर्तुम्। ततश्च युगपत्सर्वचिकीर्षायां प्रसक्तो मन्त्रोऽगृह्यमाणविशेषत्वात्तन्त्रम्।

इति कण्डूयनमन्त्रस्यानावृत्त्यधिकरणम् ॥ १६ ॥

स्वप्नादिमन्त्रानावृत्त्यधिकरणम् (१७)

तत्रैव स्वप्नार्थो मन्त्रः, 'त्वमग्ने व्रतपा असि' इति। नदीतरणमन्त्रः, 'देवीरापो अपां-पात्' इति। अभिवृष्टस्य, 'उन्दतीर्बलं धत्त' इति। अमेध्यदृष्टौ, 'अबद्धं मनो दरिद्रं चक्षुः' इति। तद्यदा पुरुः प्रतिबुध्यदीक्षितस्त्वपिति, अनेकस्रोतसं वा नदीं तरति, सन्तानेन वाभिवृष्यते, युगपच्चानेकान्यमेध्यानि पश्यति, [1]तत्राविशेषात्तत्तन्मन्त्रावृत्तिः। इति चेत्—

सकृन्मध्ये प्रबोधादावपि स्वप्नादिमन्त्रकाः ॥३५०॥

सर्वां रात्रिं निद्रामभिसंधाय[2]–सर्वां नदीं–न त्वेकस्रोतोमात्रां, तथा वर्षधारादीनपीति सकृन्मन्त्रः।

इति स्वप्नादिमन्त्रानावृत्त्यधिकरणम् ॥ १७ ॥

दीक्षितस्य प्रयाणे मन्त्रानावृत्त्यधिकरणम् (१८)

दीक्षितस्य प्रस्थानमन्त्रः, 'भद्रादभिश्रेः' इति। सः पथि विश्रम्य विश्रम्य गमनेऽपि स्यात् इति चेत् —

सकृत्प्रस्थानमन्त्रस्स्याद्विश्रम्य गमनेष्वपि।

आसामीहितप्राप्तेः प्रयाणैक्यात् सकृत् तच्चिकीर्षया मन्त्रः।

इति दीक्षितस्य प्रयाणे मन्त्रानावृत्त्यधिकरणम् ॥ १८ ॥

उपरवमन्त्रस्यावृत्त्यधिकरणम् (१९)

ज्योतिष्टोमे सन्त्युपरवाख्याश्चत्वारो गर्ताः– [3]पीठपादचतुष्टयाकाराः–बाहुमात्राः खाताः। तत्र मन्त्रः, 'रक्षोहणो वलगहनो वैष्णवान् खनामि' इति। तत्र बहुवचनात् युगपत् चतुःप्रकाशनोपपत्तौ न मन्त्रावृत्तिः। इति चेत् —

भिद्यते प्रत्युपरवं मन्त्रः खननसाधनः ॥३५१॥

रवेयभेदेन खननक्रियाभेदेन सन्निपाती मन्त्रः क्रियाभेदादावर्त्यः। प्रातिपदिकार्थकर्मत्वे विवक्षिते। बद्यवचनं पूजार्थम्।

इत्युपरमन्त्रस्यावृत्त्यधिकरणम् ॥ १९ ॥

---

[1] विशेषग्रहणात्—इति स्यात्।

[2] मन्त्रं प्रयुंक्ते—इति शेषः।

[3] पादपीठ—इति स्यात्।

हविष्कृदादिमन्त्राणामावृत्त्यधिकरणम् (२०)

ज्योतिष्टोमे अनुसवनं सवनीयाः पुरोडाशाः। तत्र चोदकप्राप्तं हविष्कृदाह्वानं सर्वेषां तन्त्रम्। तथा वाजपेये क्रतुपशून् प्राजापत्यांश्च सहोपक्रम्य- प्राजापत्यानां यदा प्रह्मसाम्न्यालम्भः तदा प्रातः सवनकाले क्रतुदश्वर्थाध्रिगुवचनं प्राजापत्यानामपि तन्त्रम्। तथा 'आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवम्' इत्यत्र, कृष्णग्रीवयोः भिन्नकालीनप्रदाने मनोतापुरोऽनुवाक्ये नन्त्रम्। सर्वेषां अकरणमन्त्रतया असन्निपातित्वात्। पुरोऽनुवाक्याया अपि याज्याव्यवधानादसंनिपातित्वात्। तस्मात्सर्वार्थे सकृत्प्रयोगः। इति चेत् —

हविष्कृदध्रिगुमुखाः भिद्यन्ते कालभेदतः।

अकरणमन्त्राणामपि तत्तदर्थप्रकाशनेनोपकारकत्वात्, कालान्तरीयप्रकाशनस्याप्यन्यकालीनार्थप्रकाशनाकार्यकरत्वायोगेन गृह्यमाणविशेषत्वादावृत्तिः। अत्र हविष्कृदाह्वानमनुदाहरणम्।

इति हविष्कृदादिमन्त्राणामावृत्यधिकरणम् ॥ २० ॥

इति श्रीलघुवार्तिकटीकायां लघुन्याससुधाव्याख्यायाम् एकादशस्य चतुर्थः पादः।

समाप्तश्चाध्यायः।

श्रीगणेशाय नमः। छा छा छा श्रीरघुनाथाय नमः। गोपालाय नमः।

लिखितं हरिपादेन ब्राह्मणा। छा छा

॥ अथ द्वादशोऽध्यायः ॥

तत्र प्रथमः पादः

अग्नीषोमीयप्रयाजादिभिः पुरोडाशस्योपकाराधिकरणम् (१)

अनेकोद्देशेन सकृदनुष्ठानात्मके तन्त्रे विचारिते, ततो बहिरङ्गस्य–आन्योद्देशेनानुष्ठितस्यानुद्देश्यं प्रत्युपकारकत्वरूपप्रसङ्गनिरूपणायाध्यायान्तरं प्रस्तूयते।

अग्नीषोमीयपशावैद्दिको विद्यन्तः प्रवर्तते। 'अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पुरोडाशमनु निर्वपति' इति विहितपुरोडाशेऽप्यैष्टिकविध्यन्तः। तस्यपश्वर्थानुष्ठितान्यङ्गानि न पुरोडाशयागस्योपकुर्वन्ति इति तदर्थं पृथगनुष्ठेयानि। पशुकाले क्रियमाणानि प्रधानकालत्वादर्थान्येव। अन्यार्थानुष्ठितं नान्यस्योपकारकं दृष्टमन्यत्र। पुरोडाशयागश्च विधीयमानः, स्वाङ्गयुक्त एव विहित इति, यथाविधि तथैवानुष्ठेयः, न प्रधानमात्रम्। प्रकृतौ यथा प्रयाजानन्तर्यमाज्यभागाङ्गं तदानन्तर्यञ्च प्रधानाङ्गं,

तथैवेहाप्यतिदिष्टम्। तदिह पाशुकप्रयाजेषु प्रसज्यमानेषु, आज्यभागयोः प्रयाजानन्तर्यगुणहानात् विगुणौ नोपकारसमर्थौ। यदि पशावाज्यभागौ स्तः, तदा वैकल्पिकत्वात् तयोः प्रसङ्गोपकारकाले पुरोडाशयागे तदानन्तबाधाद्वैगुण्यम्। पञ्चत्वसंख्यापरिच्छिन्नाश्च प्रयाजाः पुरोडाशाङ्गम्–पशौ त्वेकादशत्व परिच्छिन्नाः। अनूयाजाश्च त्रित्वाच्छिन्नाः शुद्धाज्यद्रव्यकाश्च पुरोडाशाङ्गम् – पशोस्त्वेकादशत्वपरिच्छिन्नाः पृषदाज्यद्रव्यकाश्च। तस्मात्प्रसंगोपकारकत्वे बह्वसमञ्जसम्। इति चेत् —

पश्वर्थानुष्ठितैरङ्गैः पुरोडाशेऽप्युपक्रिया ॥ ३५२ ॥

पुरोडाशप्रयोगवचनो हि, तं पशुतन्त्रे विततेः तदीयांगेषु कृतकरिष्यमाणतया तत्कार्येषूपकारेष्वारब्धारिप्सितरूपेण मनसि विपरिवर्तमानेषु, तन्मध्ये पुरोडाशभावनां चोदकसमर्पितप्रयाजाद्यंगजन्योपकारयुक्तं विदधत्, लाघवात् पश्वर्थैरेवोपकारैस्तद्वत्तामुपजीव्य, यान्यंगानि पशुतो लभ्यन्ते तद्वत्तामेव विदधाति। यद्विशिष्टञ्च प्रधानं विधीयते तेषामेव च प्रधानकालत्वं क्रमश्चांगम्। तेन प्रधानमात्रानुष्ठानेऽपि न शास्त्रविरोधो नापि क्रमादिलोपाद्वैगुण्यम्। न चैवं पौर्णमास्यार्थानुष्ठितैरङ्गैरेव दर्शेऽप्युपकारस्स्यादिति शङ्क्यम्; तत्र वाक्यद्वयेन साङ्गप्रयोगस्य पृथक्पृथग्विधानात्, तदुल्लङ्घने शास्त्राप्रामाण्यापत्तेः। न च प्रकृतावुद्देशोऽङ्गम्, आर्थिकत्वात्, तस्य च चोदकेनाप्रतिदेशात्। तस्मात्प्रासङ्गिकान्यङ्गानि।

इत्यग्नीषोमीयप्रयाजादिभिः पुरोडाशस्योपकाराधिकरणम् ॥ १ ॥

पुरोडाशे आज्यभागयोः कर्तव्यताधिकरणम् (२)

प्रासङ्गिकं पुरोडाशयागं विदधत् प्रयोगवचनः, पश्वार्थानुष्ठितांगजन्योपकारेणैवोपकारवत्त विदधत्, चोदकमानुमानिकं बाधत इत्यवघाताज्यभागादेरकरणम्। इति चेत् —

तत्राज्यभागौ कर्तव्यौ स्यातां तौ न पशौ यदि।

प्रायोगवचनस्तु प्राप्तानां पदार्थानां विधिमात्रे व्याप्रियते। प्राप्तिस्तु, उपदेशादतिदेशाद्वा। तथा च न चोदकलोपः। पदार्थविशिष्टोपकारप्राप्त्या प्रयोगविधिलोपापत्तेः। तथा च प्रयोगवचनश्चोदकप्रापितोपकारविशिष्टं प्रयोगं विदधत्, न पश्वार्थानुष्ठिताजङ्गन्योपकारं प्रासङ्गिकं विदधाति, अन्यथासिद्धत्वात्, अन्यांगजन्योपकारविशिष्टमेव विधत्त इति, एकदेशे बाध्यते प्रयोगवचनो नांगान्तरेष्विति सिद्धमाज्यभागादेरनुष्टानम्।

इति पुरोडाशे आज्यभागयोः कर्तव्यताधिकरणम् ॥ २ ॥

सोमे दार्शिकवेद्यकरणाधिकरणम् (३)

ज्योतिष्टोमे महावेदिकरणानन्तरप्रवृत्तदर्शविकारेषु प्राकृती वेदिर्हविरासादनार्थे कार्या। तृतीये

महावेद्याः अङ्गप्रचारार्थत्वोक्तावपि हविरासादनस्य तस्यामनुक्तेः । इति चेत् —

सौमिकीष्टिषु वेदिस्यात्

प्रचारार्थस्याप्यासादने प्रसङ्गोपकारित्वात् । वेदिमात्रे हविरासादनं प्रकृतौ, नत्वात्मार्थायां, तस्यार्थिकत्वात् ।

इति सोमे दार्शिकवेद्यकरणाधिकरणम् ॥ ३ ॥

सौम्यचर्वादिहोमस्यैष्टिकपात्रैरनुष्ठानाधिकरणम् (४)

सोमाङ्गग्रहचमसादिभिरेव प्रसङ्गसिद्धेस्तदीयेष्टिषु जुह्वादयो न प्रवर्तन्ते । इति चेत् —

तत्पात्राणि तु नेष्टिषु ॥ ३५३ ॥

इष्ट्यङ्गहोमादेरन्येनाकरणात्, अवश्यकर्तव्ये वैगुण्यपरिहाराय जुह्वादिपात्रप्रयुक्तिः ।

इति सौम्यचर्वादिहोमस्यैष्टिकपात्रैरनुष्ठानाधिकरणम् ॥ ४ ॥

शामित्रे पशुपुरोडाशश्रपणाभावाधिकरणम् (५)

तत्रैव शामित्रे प्रासाङ्गिकं पुरोडाशश्रपणम् । इति चेत् —

शामित्रोऽग्निः पुरोडाशश्रपणे न प्रसज्यते ।

पशुश्रपणेन पुरोडाशस्याश्रपितत्वात्, अवश्यश्रपयितव्ये तस्मिन् अवैगुण्याय गार्हपत्यादावेव श्रपणम् ।

इति शामित्रे पुरोडाशश्रपणाभावाधिकरणम् ॥ ५ ॥

कौण्डपायिनामयनेऽग्निहोत्रद्रव्यस्य प्राजहिते श्रपणाधिकरणम् (६)

कौण्डपायिनामयने मासाग्निहोत्रहविश्श्रपणं चोदकप्राप्तशालामुखीये कार्यम् । ज्योतिष्टोमे, 'अत ऊर्ध्वं गार्हपत्यो भवति' इति वचनात् । इति चेत् —

श्रप्यं प्राजहिते कौण्डपायिनामयनं हविः ॥ ३५४ ॥

चोदकान्नामातिदेशप्राबल्यस्य सप्तमान्त्ये स्थितत्वात्, प्राजहिते मुख्यगार्हपत्ये स्यात् । तत्र सिद्धमेव नामप्राबल्यं प्रसङ्गनिराकरणार्थमुक्तम् ।

इति कौण्डपायिनामनयनेऽग्निहोत्रद्रव्यस्य प्राजहिते श्रपणाधिकरणम् ॥ ६ ॥

हविर्धानशकटान्यशकटेनौषधद्रव्यकपुरोडाशनिर्वापाधिकरणम् ॥ ७ ॥

ज्योतिष्टोमे सोमधारणार्थानसोः प्रवृत्त्यनन्तरकालीनसवनीयादिनिर्वापस्तयोरन्यतरत्र कार्यः ।

'अनसोऽपि निर्वपति' इति वचनस्य तथाप्यविरोधात्। इति चेत् —

सवनीयादिनिर्वापो न हविर्धानयोर्भवति।

पश्चाद्गार्हपत्यस्य निर्वापदेशः। मन्त्रवत् नियमवच्च स्थापितयोस्तत्रानयने वैगुण्यं स्यात्। अतोऽन्यदनोऽत्र पृथगुत्पाद्यम्।

इति हविर्धानशकटान्यशकटेनौषधद्रव्यकपुरोडाशनिर्वापाधिकरणम् ॥ ७ ॥

प्रायणीयादिषु दीक्षाजागरणस्य प्रसङ्गाभावाधिकरणम् (८)

दीक्षाकालीनजागरणजन्यादृष्टस्य प्रायणीयादिष्वपि प्रसङ्गसिद्धत्वात् न पृथग्जागरणम्। इति चेत् —

प्रायणीयादिषु पृथग्जागरः सौमिकाद्भवेम् ॥ ३५५ ॥

यज्ञसाधनरक्षार्थत्वात्तस्य न प्रसङ्गसिद्धत्वमिति पृथक्कार्यं जागरणम्।

इति प्रायणीयादिषु दीक्षाजागरणस्य प्रसङ्गाभावाधिकरणम् ॥ ८ ॥

विहारभेदेन मन्त्रभेदाधिकरणम् (९)

वरुणप्रघासेषु दक्षिणोत्तरविहारयोः निर्वापमन्त्रोऽध्वर्युप्रतिप्रस्थात्रोरन्यतरेण पठितोऽप्यनुष्ठानोपयोगिस्मृतिजनक इत्यन्यतरेण पठनीयः। इति चेत् —

अध्वर्युमन्त्रा भिन्नास्स्युः प्राघासिकविहारयोः।

उत्तमपुरुषविरोधात् नान्योच्चारितोऽन्यस्योपकारी–इति भेदेन पठनीयः। सकृदसकृत्प्रसंगात्तन्त्रावापचिन्ताप्यत्र कृता।

इति विहारभेदेन मन्त्रभेदाधिकरणम् ॥ ९ ॥

दीक्षणीयादिष्वग्न्यन्वाधानस्याभावाधिकरणम् (१०)

सोमाङ्गेष्टिषु चोदकप्राप्तमग्न्यन्वाधानं कार्यम्। इति चेत् —

इष्टिकर्मसु सोमाङ्गेष्वन्वाधानं न विद्यते ॥ ३५६ ॥

सोमार्थे विहृत्य धारितस्याग्नेस्तेनैव धारणेन प्रसङ्गसिद्धकार्यत्वात् द्वितीयादिधारणस्य प्रकृतौ लौकिकत्वात्, धार्यमाणस्य धारणाय न पुनः कर्तव्यम्।

इति दीक्षणीयादिष्वग्न्यन्वाधानस्याभावाधिकरणम् (१०)

दीक्षणीयादिषु व्रतोपायनाभावाधिकरणम् (११)

प्राकृतं व्रतोपायनं चोदकानुग्रहात् कार्यम्। इति चेत् —

व्रतोपायनमप्येवं सोमङ्गेनैव सिद्धितः।

सौमार्थेनैव सत्यवदनब्रह्मचर्यादिरूपेण आसमाप्त्यविसृष्टेन प्रसङ्गसिद्धेः पुनर्नोपियम्।

इति दीक्षणीयादिषु व्रतोपायनाभावाधिकरणम् ॥ ११ ॥

ऐष्टिकेष्वग्न्यन्वाधानानुष्ठानाधिकरणम् (१२)

न प्रकृतावग्न्यन्वाधानमग्निधारणमात्रार्थं, किन्तु देवतापरिग्रहार्थमपि। 'ममाग्ने वर्च इत्यग्निं परिगृह्णाति, देवता एव पूर्वेद्युर्गृहीत्वा श्वोभूते यजते' इति वचनात्। अतः प्रायणीयादिष्वपि स्यात्।

न स्यात्। दृष्टाग्निधारणमात्रप्रयोजनस्य, अदृष्टदेवतापरिग्रहार्थत्वस्यार्थवादमात्रात्कल्पनायोगात्। तथापि दीक्षणीयया तत्सिद्धेश्च। 'आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणोऽग्निरवमो देवतानां विष्णुः परमो देवता एव तदुभयतो यजमानः परिगृह्य दीक्षित' इति श्रवणात्। न च 'दीक्षाः सोमस्य' इति वचनात् प्रधानदेवतामात्रपरिग्रहार्थत्वं शङ्क्यम्—वैश्वदेवग्रहे सर्वान्तर्भावात्। तत्र 'अग्निर्वसुभिस्सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वेदेवैः' इति वचनात् समुदायशक्त्यकल्पनात् अवयवशक्त्यैवोपपत्तेश्च। ततः प्रसंगसिद्धित्वादङ्गदेवतानां दीक्षणीयातिरिक्तेषु न कार्यम्। तस्यान्तु देवतापरिग्रहार्थत्वपक्षे कार्यम्। तदाह —

ग्रहणार्थाग्न्याहितिश्चेत् दीक्षेष्टौ सा परं भवेत् ॥ ३५७ ॥

इत्यैष्टिकेष्वग्न्यन्वाधानानुष्ठानाधिकरणम् ॥ १२ ॥

ऐष्टिकेषु पत्नीसंनहनाननुष्ठानाधिकरणम् (१३)

दार्शपौर्णमासिकं पत्नीसंनहनं प्रायणीयादिषु चोदकप्राप्तेः कार्यम्। इति चेत् —

सोमेष्टिषु न कर्तव्यं पत्नीसंनहनं तथा।

वासोधारणार्थत्वे–सन्नद्धया कर्म कार्यम् – इत्यर्थत्वे वा सोमार्थेन 'योक्त्रेण पत्नीं दीक्षयति' इत्यनेन प्रासङ्गिकत्वान्न कार्यं सन्नहनम्।

इत्यैष्टिकेषु पत्नीसंनहनाननुष्ठानाधिकरणम् ॥ १३ ॥

ऐष्टिकेष्वारण्यभोजनाभावाधिकरणम् (१४)

आरण्याशनमपि प्राकृतं वृत्त्यर्थत्वात् पयोव्रतादिना वृत्तिसिद्धेर्न कार्यम्। इत्याह —

आरण्यभुक्तिरप्येवम्

इत्यैष्टिकेष्वारण्यभोजनाभावाधिकरणम् ॥ १५ ॥

ऐष्टिकेषु शेषभक्षानुष्ठानाधिकरणम् (१६)

शेषभक्षाणामपि वृत्त्यर्थत्वान्न कार्यम् । इति चेत् —

कर्तव्यं शेषभक्षणम् ॥ ३५८ ॥

'इडां भक्षयति' इत्यादिना द्वितीयानिर्देशात् प्रतिपत्त्यर्थत्वं षष्ठादिसिद्धं, तस्यैव प्रयोजनकथनम् ।

इत्यैष्टिकेषु शेषभक्षानुष्ठानाधिकरणम् ॥ १६ ॥

ऐष्टिकेष्वन्वाहार्यदानाभावाधिकरणम् (१७)

दीक्षणीयाद्यासु सोमाङ्गेष्टिषु चोदकप्राप्तान्वाहार्यो दातव्यः । 'दक्षिणा सोमस्य' इति द्वादशशतदक्षिणायाः प्रधानार्थत्वात् । इति चेत् —

अन्वाहार्यं न दातव्यम्

प्रसङ्गसिद्धत्वान्न दातव्यम् । दक्षिणाभेदे कर्तृभेदात्, अङ्गप्रधानयोरेककर्तृकत्वं न स्यात् । यैः प्रधानं कर्तव्यं, तैरवश्यमङ्गान्यपि कर्तव्यानि । अङ्गान्यकुर्वद्भिः प्रधानकरणायोगात् । अतोऽपि प्रासङ्गिकत्वमिति नान्वहार्यस्य दानम् ।

इत्यैष्टिकेष्वन्वाहार्य दानाभावाधिकरणम् ॥ १७ ॥

ऐष्टिकेषु शेषभक्षस्य संस्कारार्थतया कर्तव्यत्वाधिकरणम् (१८)

ऋत्विजां शेषभक्षणं, अन्वाहार्यदानवन्निवर्तेत सोमाङ्गेष्टिषु । इति चेत् —

भक्षणन्त्वृत्विजां भवेत् ।

यजमानवच्छेषप्रतिपत्त्यर्थं ऋत्विग्भिर्भक्षणं कार्यम् । न हविश्शेषभक्षण[1]मानत्यर्थमित्यत्र दशमे प्रसाधनात् ।

इत्यैष्टिकेषु शेषभक्षणस्य संस्कारार्थतया कर्तव्यत्वाधिकरणम् ॥ १८ ॥

ऐष्टिकेषु होतुर्वरणसद्भावाधिकरणम् (१९)

दर्शादौ होतृवरणमानत्यर्थत्वात्, सौमिकेन वरणेन प्रसङ्गादानतिसिद्धेर्दीक्षणीयादिषु न कर्तव्यम् । न च प्रवृत्ते होतरि क्रियमाणमदृष्टार्थम्; ऋतुयाज्यावरणवत् । नानत्यर्थम् । इति शङ्क्यम्—पूर्वेद्युर्वेदि-

---

[1] इदं पदं मातृकायां नास्ति ।

करणानुमतिदानाय प्रवृत्ते ब्रह्मणि, प्रणीताप्रणयनकाले पुनर्वरणस्य दृष्टार्थत्वात् । अन्यथा ब्रह्मणोऽपि प्रतीष्टिवरणापत्तेः । तस्मान्न होतुर्वरणम् । इति चेत् —

एतासु होतुर्वरणमदृष्टार्थत्वतो भवेत् ॥ ३५९ ॥

प्रवृत्तस्य वरणं न कथञ्चन दृष्टार्थम् । ब्रह्मवरणन्तु वेद्यपकर्षवशात् पाठं बाधित्वा दर्शे पूर्वेद्युरपकृष्यते । न च होतृवरणे तत्संभवः । 'अवृतः सामिधेनीरन्वाह' इति वचनात् । अतोऽदृष्टार्थत्वात्सोमाङ्गेष्टिषु होतुर्वरणं स्यात् ।

इत्यैष्टिकेषु होतुर्वरणसद्भावाधिकरणम् ॥ १९ ॥

आतिथ्यायां बर्हिषः प्रतिकर्म प्रोक्षणाभावाधिकरणम् (२०)

'यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्य' इत्यत्र बर्हिस्साधारण्यविधिरित्युक्तं चतुर्थद्वितीयचरणान्त्ये । तत्र प्रोक्षणादिबर्हिस्संस्कारः प्रतिकर्म आवर्तनीयः । आतिथ्यामध्यगतत्वाभावादितरयोर्न प्रसङ्गः, आतिथ्याकालत्वेन विशेषग्रहणान्न तन्त्रम् । अत आवर्तनीयम् । इति चेत् —

प्रोक्षणं सकृदेव स्यादातिथ्येष्ट्यादिबर्हिषाम् ।

बर्हिषस्साधारण्येनातिथ्यापवर्गेऽप्यनपवृक्तत्वात्, तन्मध्यकृतसंस्काराः प्रसङ्गादन्ययोरप्युपकुर्वन्ति, यूपानपवर्गात्तत्संस्कारा इव सवनीयानुबन्ध्ययोः । तत्राकर्मकालत्वात्संस्काराणां तन्त्रत्वम् । अत्र प्रसङ्गः इत्येतावान् भेदः ।

इत्यातिथ्यायां बर्हिषः प्रतिकर्मप्रोक्षणाभावाधिकरणम् ॥ २० ॥

आतिथ्यायांस्तरणमन्त्रावृत्त्यधिकरणम् (२१)

तस्यैव प्राग्वंशादादायोत्तरवेदिपश्चाद्भागे पश्वर्थस्तरणे न मन्त्रः, पूर्ववत् प्रसङ्गसंभवात् । इति चेत् —

तस्यास्तरणमन्त्रस्स्यादावर्त्यः पशुकर्मणि ॥ ३६० ॥

'बर्हिषा वेदिं स्तृणाति' इति द्वितीयया वेदिसंस्कारार्थत्वावगमात् स्तरणस्य, संस्कार्य देशभेदात्समन्त्रकरणावृत्तिः । अन्यथा तद्धविरासादनवैगुण्यं स्यात् । अतः ऊर्णाम्रदासमिति मन्त्रावृत्तिः ।

इत्यातिथ्यायांस्तरणमन्त्रावृत्त्यधिकरणम् ॥ २१ ॥

बर्हिषो देशान्तरनयने संनहनहरणमन्त्रयोरप्रयोगाधिकरणम् (२२)

प्राग्वंशादानयने 'पूषा ते ग्रंथिं ग्रथ्नातु' इति सन्नहनमन्त्रः, 'बृहस्पतेर्मूर्ध्ना हरामि' इति हरणमन्त्रश्चावर्त्यः । संनाहहरणयोरावृत्तेः । इति चेत् —

पशौ संनाहहरणमन्त्रयोर्नास्त्यनुष्ठितिः ।

प्रकृतावरण्ये लूनस्य बर्हिषो विहारदेशप्रापणार्थं संनाहहरणयोरेव मन्त्रवत्त्वम् । न गार्हपत्यादाहवनीय-देशनयने तद्वहनेऽपि मन्त्रः ।

इति बर्हिषो देशान्तरनयने संनहनहरणमन्त्रयोरप्रयोगाधिकरणम् ॥ २२ ॥

इति द्वादशस्य प्रथमः पादः ।

॥ अथ द्वितीयः पादः ॥

विहाराग्नेर्वैदिककर्ममात्रार्थताधिकरणम् (१)

सामर्थ्यलक्षणलिङ्गान्मांसपाकप्रतिषेधदर्शनाच्च, तदितरसकलाग्निकार्यार्थं गार्हपत्याद्यग्नयः । इति चेत् —

अग्नयो गार्हपत्याद्या वैदिकेष्वेव कर्मसु ॥ ३६१ ॥

'गार्हपत्ये हवींषि श्रपयति' 'पत्नीसंयाजाञ्जुहोति' 'दक्षिणाग्नावन्वाहार्यं पचति' 'यदाहवनीये जुहोति' इत्यादिवचनप्रतिपाद्यप्रयोजनाना भूयः कार्यानपेक्षणात्, न सामर्थ्यात्सर्वार्थत्वम्–प्राप्तपाक-प्रतिषेधो वा ।

इति विहाराग्ने वैदिककर्ममात्रार्थताधिकरणम् ॥ १ ॥

सवनीयपशौ पशुपुरोडाशस्य कर्तव्यताधिकरणम् (२)

सवनीयपशावग्नीषोमीयाच्चोदकप्राप्तः पशुपुरोडाशो न कार्यः । प्रकृतौ तस्य छिद्रापिधानार्थत्व-श्रवणात् । 'सुषिरो ह वा एतर्हि पशुः, यर्हि वपामुत्खिदति, यद् व्रीहिमयाः पुरोडाशा निरुप्यन्ते, अपिहित्या अछिद्रतायै' इति । सवनीयपशौ तु, 'अनुसवनं सवनीयाः पुरोडाशा निरूप्यन्ते–अपिहित्यै' इति श्रुतैरेव तत्कार्यकरणात् । 'पुरोडाशेन माध्यंदिने सवने' इति श्रुतश्चेद्विकल्पोऽस्तूभयो-स्तुल्यार्थयोः । इति चेत् —

नियतस्स्यात्पुरोडाशस्सवनीयपशावपि ।

लिङ्गस्य पाक्षिकत्ववारणाय देवतासंस्कारार्थः पुरोडाशो नियतः । छिद्रापिधानन्त्वर्थवादः, प्रत्यक्ष-विरोधात् ।

इति सवनीयपशौ पशुपुरोडाशस्य कर्तव्यताधिकरणम् ॥ २ ॥

सवनीयपुरोडाशे हविष्कृदाह्वानस्याभावाधिकरणम् (३)

पशावपि हविष्कृदाह्वानमस्तीति कृत्वा चिन्त्यते ; तदीयपात्रप्रोक्षणोत्तरकालमाहूता हविष्कृत् प्रसङ्गात्सवनीयपुरोडाशेष्वप्युपकरोतीति न पृथगाह्वातव्येत्याह —

सवनीयेषु न पृथगाह्वानं स्याद्धविष्कृतः ॥ ३६२ ॥

इति सवनीयपुरोडाशे हविष्कृदाह्वानस्याभावाधिकरणम् ॥ ३ ॥

तृतीयसवने हविष्कृदाह्वानस्यापुनरावृत्त्यधिकरणम् (४)

तृतीयसवने सौम्यश्चरुराग्नेयो द्विकपालश्च, सवनीयपशौ पक्वे क्रियेते । तयोः पृथक् हविष्कृदाह्वातव्या, सवनीयार्थाहूतायास्तत्सिद्धावपवृक्तेः । इति चेत् —

तथैव सौम्यचर्वादौ, पाशुकेनैव सिद्धितः ।

प्रकृतौ सहायार्थं हविष्कृदाहूता । पत्नीसंयाजान्ते निनीय 'मुखं विमृज्योत्तिष्ठति' इत्युत्थानविधानं यावत् स्थितैवेति सवनीयपशावपि तदीयपत्नीसंयाजान्तमनपवृक्ता प्रसङ्गादुपकरोतीति न तयोः पृथगाह्वातव्या । सवनीयपशुस्तन्त्री । सवनीयपुरोडाशाः प्रसङ्गिनः इत्यग्रे वक्ष्यमाणत्वाच्च । अतस्सवनीयपश्वर्थपात्रप्रोक्षणकालाहूता हविष्कृत् पशोः पत्नीसंयाजान्तं नोत्थितेति तत एव सवनीयानां प्रसङ्गसिद्धेर्न तदर्थे हविष्कृदाह्वानं सौम्यचर्वादिवत् । तथा च एकादशान्ते, 'हविष्कृदध्रिगुमुखा भिद्यन्ते कालभेदतः' इत्यत्र सवनत्रयेऽपि सवनीयानामर्थे पृथगाह्वातव्या, कालभेदेन विशेषग्रहणात् इत्यनादरात्, अध्रिगुवचनाद्येव तत्रोदाहरणम् ।

इति तृतीयसवने हविष्कृदाह्वानस्यापुनरावृत्त्यधिकरणम् ॥ ४ ॥

निशि यज्ञेऽमावास्यातन्त्रप्रयोगाधिकरणम् (५)

काम्येष्टिकाण्डे, 'अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेत्–यो रक्षोभ्यो बिभीयात्' इति विधाय पुनः श्रुतं '[1]अमावस्यात्रिकप्रकरणाभावाद्वाक्ये च निशिपदसमानाधिकरणत्वान्निरपेक्षवृत्तित्वाच्च काले, न दर्शतन्त्रोपजीविनी निशीष्टिः स्वाङ्गानि पृथक् प्रयुज्यात् । इति चेत् —

निशीष्टौ दर्शसंयुक्तमङ्गजातं प्रसज्यते ॥ ३६३ ॥

यस्मिन्काले दर्शप्रवृत्तिः तन्नियतकालत्वान्निशीष्टेः अर्थालोचनेनाग्न्यन्वाधानव्रतोपायनाद्युपजीव्येतरेष्विध्मबर्हिस्सामिधेन्यादिषु प्रयोग इत्यंशे दर्शतन्त्रोपजीविजीविनी निशीष्टिः । यदा तु सायममाप्रवृत्तिः परेद्युरन्वाधानं ततः परेद्युर्दर्शयागः तत्र दर्शस्याप्रवृत्तत्वात् साङ्गमेव तन्त्रं प्रयुंक्ते तद्विधिः, सौर्यादिविधिवत् ।

इति निशियज्ञेऽमावास्यातन्त्रप्रयोगाधिकरणम् ॥ ५ ॥

विकृतिष्वप्यारंभणीयानुष्ठानाधिकरणम् (६)

आरंभणीया प्रकृतौ न प्रतियोगमावर्तनीयेत्युक्तं नवमे —

---

[1] 'अमावास्यायां निशि यजेत' इति इदं वाक्यमत्र योज्यम् ।

आरंभणीया नावृत्ताविष्टयोरावृत्तिमश्नुते ।

इत्यत्र । तथा च सकृत्संस्कृतो यजमानो यावज्जीवमनपवृक्तसंस्कार इति प्रसङ्गसिद्धत्वान्न सौर्यादावारंभणीया स्यात् । इति चेत् —

नारंभणीया विकृतौ प्रकृत्यर्था प्रसज्यते ।

आरप्स्यमानसंयोगादारंभद्वारकमङ्गमारंभणीया, प्रकृतौ तत्प्रयोगारंभे भवेत् । विकृतेः पृथगारंभवत्त्वात् चोदकप्राप्ता कथं न कार्या ? तस्मात्सर्वविकृतिषु पृथगत्रंभणीया स्यात् ।

इति विकृतिष्वप्यारंभणीयानुष्ठानाधिकरणम् ॥ ६ ॥

प्रधानानां धर्मविरोधे बहूनां धर्मानुष्ठानाधिकरणम् (७)

पञ्चदशरात्रेऽग्निष्टुत्प्रथममहः । तत्र नामातिदेशादाग्नेयी सुब्रह्मण्या । ततस्तिस्रस्सुत्याः, 'ज्योतिर्गौरायु' स्संज्ञाः । तास्वपि नामातिदेशादैन्द्री । अन्येषां द्वादशाहाच्चोदकेनैन्द्री । तत्रोपसत्कालीनसुब्रह्मण्याह्वाने मुख्यत्वादाग्नेयी इति प्रापय्य बहुत्वादैन्द्री इति सिद्धान्तितम् ।

नैतदुदाहरणं युक्तम् । देवतासंस्कारार्थाह्वानस्य संस्कार्यभेदे आवृत्तेरेव न्याय्यत्वात् । अतोऽन्यदुदाहार्यम् ।

काम्येष्टिषु, 'अग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं–दधिमधुघृतमापोधानास्तत्संसृष्टं प्राजापत्यं पशुकामः' इति श्रुतम् । तत्र प्राजापत्यानां पञ्चानां यागभेद इत्यष्टमप्रथमचरणान्त्योक्तन्यायात्सिद्धम् । त एते सप्त यागाः–आग्नेयः–ऐन्द्रः–प्राजापत्याश्च । तत्र ऐन्द्रः पुरोडाशो हविस्सामान्यात् देवतांशसाम्याच्चैन्द्राग्नविकारः । प्राजापत्यं दधिसान्नाय्यविकारः । तयोः वृधन्वन्तावाज्यभागौ । मधुघृतापामुपांशुयाजविकारत्वम् । 'आज्यधर्मामधूदके' इत्यष्टमेऽभिधानात् । तेषु वात्रघ्नावाज्यभागौ । तत्र मुख्यत्वादैन्द्रपुरोडाशप्राजापत्यदध्नोर्वृधन्वन्तावाज्यभागौ । इति चेत् —

विरुद्धसमवाये स्याद्भूयसामनुरोधनम् ॥ ३६४ ॥

मुख्यत्वात्प्रथमप्रतीतावपि भूयोऽनुग्रहमालोच्य वार्त्रघ्नावेव गृह्येते । सोऽयं प्राप्तबाधः ।

इति प्रधानानां धर्मविरोधे बहूनां धर्मानुष्ठानाधिकरणम् ॥ ७ ॥

तुल्यसंख्याकानां धर्मविरोधे प्रथमस्यैव धर्मानुष्ठानाधिकरणम् (८)

अध्वरकल्पायां, 'आग्नावैष्णवं द्वादशकपालं निर्वपेदपराह्णे–सरस्वतीमाज्यस्य यजेत–बार्हस्पत्यश्चरुः' इति । तत्र आग्नावैष्णवो द्विदैवत्य औषधद्रव्यकत्वात् द्वादशकपालत्वेन चैन्द्राग्नविकारः । प्राकृतावैन्द्राग्न एकादशकपालो द्वादशकपालो वेति वचनात् । सारस्वताज्यभागमन्त्रयोरनियमः । इति चेत् —

तत्र तत्समतायान्तु भवेन्मुख्यानुरोधनम् ।

आग्नावैष्णवस्यानुपसंजातविरोधित्वात् वृधन्वन्तावेव । शक्यन्त्वत्र वक्तुं अग्नीषोमीयविकार इति । भामतीनिबन्धे गुणोपसंहारार्थे, अग्नीषोमीये प्रकृतौ एकादशकपालत्वद्वादशकपालत्वयोर्विकल्पाभिधानात् पञ्चाक्षरत्वसाम्याच्च । अत्र चोदाहरणमन्यद्गवेष्यम् ।

तथा च यन्नवमे,

विकृतावतिदेशोऽस्ति नैव पार्वणहोमयोः ।

इत्यत्र, अध्वरकल्पायां पौर्णमासीत्रिकात् पूर्वकार्यकारित्वात् पार्वणहोमोऽस्तीत्युक्तं, तन्न विरुध्यते । आद्यत्रिकयोरेव वा अतिदेशो नान्त्यत्रिक इति द्रष्टव्यम् ।

इति तुल्यसंख्याकानां धर्मविरोधे प्रथमस्यैव धर्मानुष्ठानाधिकरणम् ॥ ८ ॥

अङ्गगुणविरोधे प्रधानगुणस्यैव प्राबल्याधिकरणम् (९)

'य इष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेत' इत्यत्र, एकत्रिदीक्षा-पक्षे उभयोर्दीक्षणीयासुत्ययोः पर्वकालत्वासंभवात् अनियमो मुख्यानुग्रहो वा । इति चेत् —

सुत्यायां नियतं पर्व

प्रधानसाद्गुण्यायाङ्गतदङ्गानां साद्गुण्यम् । अत्र तु साक्षादेव प्रधानसाद्गुण्याय सुत्याया एव पर्व-कालत्वम् ।

इत्यङ्गगुणविरोधे प्रधानगुणस्यैव प्राबल्याधिकरणम् ॥ ९ ॥

परिधौ परिधियूपोभयधर्मानुष्ठानाधिकरणम् (१०)

'परिधौ पशुं नियुंजीत' इत्यत्र परिधिधर्मानिध्मसंनहनमार्जनादीन्, यूपधर्मानञ्जनपरिव्याणा-दींश्च लभत इत्याह —

द्विधर्मा परिधिर्भवेत् ॥ ३६५ ॥

इति परिधौ परिधियूपोभयधर्मानुष्ठानाधिकरणम् ॥ १० ॥

परिधौ विरोधियूपधर्माननुष्ठानाधिकरणम् (११)

तत्रैव ये विरुद्धधर्माः, सत्वक्तवात्वक्तवादयः तेषु प्रधानहविस्संबन्धात् यूपधर्मास्तक्षणोच्छ्य-णादयः स्युः । न हविरधिकरणाग्निपरिधायकपरिधिधर्माः । इति चेत् —

तत्र न स्युर्यूपधर्मा ये स्वधर्मविरोधिनः ।

अपरित्यक्तस्वधर्मापरिधिर्नियोजने विधीयते । तत्र कार्यप्रयुक्ता धर्माः प्रथमावगतपरिधित्वा-विघातिनः कार्याः ।

इति परिधौ विरोधियूपधर्माननुष्ठानाधिकरणम् ॥ ११ ॥

सवनीयपुरोडाशयोः पशोरेव तन्त्रिताधिकरणम् (१२)

सवनीयपशोः प्रातस्सवनिकपुरोडाशादीनाञ्च तन्त्रित्वप्रसंगित्वयोर्न विशेषग्रहः । पशोरपि हृद-यादिप्रचारस्य तार्तीयसवनिकत्वात् । आग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति' इति प्रातस्सवनिकपुरोडा-शांगानूयाजोत्कर्षणाच्च । इति चेत् —

पशुतन्त्रान्तर्गत्वात्पुरोडाशाः प्रसङ्गिनः ॥ ३६६ ॥

'अग्निमद्यहोतारमवृणीत' इति अग्नीषोमीयपठितमैत्रावरुणप्रैषस्य चोदकप्राप्तस्य सवनीयेऽविकृतः प्रत्यक्षतः पाठः, 'अयं सुतासुती यजमानः' इत्यनर्थकः पशोः प्रसंगित्वे स्यात् । अनूयाजा अपि, 'अनूयाजै-स्तृतीयसवने' इति अवगततृतीयसवनसंबन्धिपशोरेव । 'अनुसवनं पुरोडाशा निरूप्यन्ते' इति वचनात् तेषां तत्र सनास्यवगमात् । तस्मात्पशुस्तन्त्री, पुरोडाशाः प्रसंगिनः ।

इति सवनीयपुरोडाशयोः पशोरेव तन्त्रिताधिकरणम् ॥ १२ ॥

समानतन्त्रप्रकृतिविकृत्योर्विकृतितन्त्रानुष्ठानाधिकरणम् (१३)

यावज्जीवमनुष्ठेयदर्शादेः कामनायां निमित्ते वा अनुष्ठेयविकृतीनाञ्च प्रयोगैक्यं कृत्वा चिन्ता ।

क्वचित् 'राक्षोघ्न्यः सामिधेन्यः' इति श्रुतं परित्यज्य, प्रथमप्रवृत्तप्राकृतसामिधेन्यो वाच्याः । जीवान्तर्गतकाले कामादिना पश्चात्प्रवृत्तविकृतिधर्मा विरुद्धा न ग्राह्याः । तासां प्रसंगित्वात । इति चेत् —

विकृतिश्चेत्प्रकृत्येकतन्त्रा सा तन्त्रिणी भवेत् ।

वैकृतविशेषाम्नानस्यात्यन्तवैय्यर्थ्यपरिहाराय विकृतिस्तन्त्रिणी, प्रकृतिः प्रसंगिनी ।

इति समानतन्त्रप्रकृतिविकृत्योर्विकृतितन्त्रानुष्ठानाधिकरणम् ॥ १३ ॥

आग्रयणे प्रसूनबर्हिषामेव ग्रहणाधिकरणम् (१४)

आग्रयणे द्यावापृथिव्य एककपालो वैश्वदेविकैककपालप्रकृतिक इत्युक्तं सप्तमे । तत्र प्रसून-बर्हिः ततः प्राप्तमपि न ग्राह्यम् । ऐन्द्राग्नादीनामनियतबर्हिषां मुख्यत्वबहुत्वाभ्यां तन्त्रित्वात् । इति चेत् —

बर्हिराग्रयणे कांस्यभोजिन्यायेन पुष्पितम् ॥ ३६७ ॥

नानियमः शास्त्रार्थः, किन्तु बर्हिमात्रम् । तत् प्रसूनमयग्रहणेऽप्वविरुद्धम् । अतः कांस्यभोजिन्यायात् प्रसूननियमो द्यावापृथिव्यानुरोधात् ।

इत्याग्रयणे प्रसूनबर्हिषामेव ग्रहणाधिकरणम् ॥ १४ ॥

द्यावापृथिव्यादीनां सर्वेषामेव तन्त्रित्वाधिकरणम् (१५)

एवं चेत्, विरुद्धे(ष्व)पि नवप्रयाजादौ द्यावापृथिवीयमेव ग्राह्यम् । तस्य तन्त्रित्वात् । इति चेत् —

द्यावापृथिव्यस्यैव स्यात्तावता नैव तन्त्रिता ।

इतरेतरानालोचनेन विहिताः सर्वे तन्त्रिणः । तत्राविरुद्धेष्वेकानुसरणं, विरुद्धेषु तु मुख्यत्वभूयस्त्वाभ्यामैन्द्राग्नादिधर्मा एव ग्राह्याः ।

इति द्यावापृथिव्यादीनां सर्वेषामेव तन्त्रित्वाधिकरणम् ॥ १५ ॥

इति द्वादशस्य द्वितीयः पादः ।

॥ अथ तृतीयः पादः ॥

अष्टरात्रे वत्सत्वगहतवाससोः समुच्चयाधिकरणम् (१)

अष्टरात्रे विश्वजित् प्रथममहः । तत्र नामातिदेशात् एकाहविश्वजिद्धर्मः 'अवभृथादुदेत्य वत्सत्वचं परिधत्ते' इति प्राप्तः । अन्येषु सप्तसु, अहतं वा सोऽग्निष्टोमात् । तत्र महाव्रते 'तार्प्यादिवच्च वासांसि विस्रंसयति' इति बहुत्वादर्शनात् असति समुच्चये भूयोऽनुग्रहादहतग्रहणं, दक्षिणायामिव । इति चेत् —

वत्सत्वग्वाससोर्भिन्नकार्यत्वेन समुच्चयः ॥ ३६८ ॥

गुह्याच्छादने वत्सत्वचोऽयोग्यत्वान् कंकतादिवदुत्तरीयत्वमिति भिन्नविषयत्वात् समुच्चयः । दक्षिणात्वेकानत्यर्था इति विशेषः ।

इत्यष्टरात्रे वत्सत्वगहतवाससोः समुच्चयाधिकरणम् ॥ १ ॥

अनुनिर्वप्य पुरोडाशानां पुरोडाशस्यैव तन्त्रित्वाधिकरणम् (२)

अग्नीषोमीयपशुपुरोडाशमनु, 'अष्टौ देवसुवां हविंषि निर्वपति' इत्यत्र बहुत्वाद्देवसुवास्तन्त्रिणः, पशुपुरोडाशः प्रसंगी । इति चेत् —

अग्नौ दैक्षपशोस्तन्त्रे प्रसङ्गिहविरष्टकम् ।

तेषां तत्र पुरोडाशमध्ये विधानेन ते प्रसंगिनः । पुरोडाशस्तन्त्री ।

इति अनुनिर्वाप्य पुरोडाशानां पुरोडाशस्यैव तन्त्रित्वाधिकरणम् ॥ २ ॥

भिन्नोपकारकाणां गुणानां समुच्चयाधिकरणम् (३)

दर्शादावाघारौ प्रकृत्य 'ऋजुमाघारयति' 'सन्ततमाघारयति' इति श्रुतसान्तत्यादिकमेकाघारार्थत्वात् विकल्पते । चेत् —

समुचिता ऋजुत्वाद्याः ।

अविरुद्धत्वात् ।

इति भिन्नोपकारकाणां गुणानां समुच्चयाधिकरणम् ॥ ३ ॥

प्रयोजनैक्ये गुणानां विकल्पाधिकरणम् (४)

दर्शादौ 'व्रीहिभिर्यजेत' 'यवैर्यजेत' इति विहितयोः सर्वाङ्गोपसंहारिप्रयोगवचनानुग्रहाय ग्रहयागन्यायेन अभ्यासेन मिश्रीकृत्य वा समुच्चयः । इति चेत् —

व्रीह्याद्यास्तु विकल्पिताः ॥ ३६९ ॥

एकस्मिन्नुपकारे पुरोडाशनिर्वृत्तिद्वारा प्रयोगनिर्वृत्तौ अन्योन्यानपेक्षतया विनियुक्तानां विकल्पस्स्यात् । ग्रहणेषु तु द्रव्यदेवतासंयोगानामदृष्टार्थानामपर्यायविधानात्, प्रकरणेन युगपद्ग्रहणे, युक्तं यदभ्यस्यते यागः । व्रीहियवौ त्वन्योन्यनिरपेक्षवाक्याभ्यां यागद्रव्यपुरोडाशप्रकृतिभूतौ विधीयमानौ तद्द्वारे प्रयोगवचनः पर्यायेणैव गृह्णाति, न युगपत् । येन बलात् प्रधानाभ्यासस्स्यात् । मिश्रणे तु शास्त्रद्वयमप्यप्रमाणं स्यात् । 'समर्थः पदविधिः' 'करणे तृतीया' इति सूत्रयोरेकवाक्यतया निरपेक्षसाधने तृतीयाविधिप्रतीतेः । अतो व्रीहिप्रयोगे तैरेव कार्यसिद्धेः यवानामनुपादानम् । एवमितरत्रापि । यथा पाशुकैरङ्गैः कार्यसिद्धेः पुरोडाशानाम् । नन्वन्यार्थेन नान्यस्य कार्यसिद्धिः प्रसंगः । नहि व्रीहियवयोरन्यार्थत्वं, इति चेत् ; सत्यम् । अन्येन कार्यसिद्धेरन्यस्य निवृत्तिः इत्येतावता साम्येन प्रसङ्गत्वम् ।

इति प्रयोजनैक्ये गुणानां विकल्पाधिकरणम् ॥ ४ ॥

वैगुण्यसमाधानार्थानां प्रायश्चित्तानां विकल्पाधिकरणम् (५)

'अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत् यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाति[1]पातयेत्' 'वैश्वानरं द्वादशकपालं निर्वपेदमावास्यां वा पौर्णमासीं वातिपाद्य' इत्यादिप्रायश्चित्तानि

---

[1] '.... .... पादयेत्' इति स्यात् ।

दोषनिर्घातप्रयोजनानि । तेषां समुच्चयः, अदृष्टार्थत्वात् । इति चेत् —

वैश्वानरी पाथिकृतीत्याद्या अपि विकल्पिताः ।

भिन्नभिन्नवाक्येन निरपेक्षतया दोषनिर्घाताय विधानात् विकल्पः ।

इति वैगुण्यसमाधानार्थानां प्रायश्चित्तानां विकल्पाधिकरणम् ॥ ५ ॥

नैमित्तिकप्रायश्चित्तानां समुच्चयाधिकरणम् (६)

यानि न दोषनिर्घातानि, निमित्ते विधीयन्ते 'भिन्ने जुहोति' '[1]स्कन्ने जुहोति' इत्यादीनि तेषां दर्शादिषु समुच्चयः ।

इति नैमित्तिकप्रायश्चित्तानां समुच्चयाधिकरणम् ॥ ६ ॥

कर्मकालेऽनध्यायेऽपि मन्त्राणां प्रयोगाधिकरणम् (७)

'पर्वणि नाध्येतव्यम्' इत्यादिमन्त्राध्ययनधर्माः मन्त्रप्रयोगार्थत्वात् कर्मकालेऽपि स्युः । इति चेत् —

मन्त्राध्ययनधर्माणां कर्मकालेषु नादरः ॥ ३७० ॥

ग्रहणाध्ययनाङ्गमेते अविघ्नपरिसमाप्त्यर्थाः न कर्मणि प्रयोगेष्वादर्तव्याः । किञ्च पर्वकालत्वात्कर्मणां तत्र निषेधे कर्मैव न स्यात् ।

इति कर्मकालेऽनध्यायेऽपि मन्त्राणां प्रयोगाधिकरणम् ॥ ७ ॥

कर्मणि प्रावचनस्वरेणैव मन्त्रोच्चारणाधिकरणम् (८)

ये मन्त्रा मन्त्रसमाम्नाये, अन्यस्वरेण समाम्नाताः – ब्राह्मणस्वरेण, तत्र ब्राह्मणस्वर एव प्रयोगे आदर्तव्यः । तस्य आदर्तव्यत्वात् । इति चेत् —

कार्यः प्रयोगो मन्त्राणां स्वस्वरेणैव कर्मसु ।

लिङ्गविनियोज्यमन्त्रेषु प्रत्यक्षब्राह्मणं गुणार्थवादपरिसंख्यार्थविनियोज्येष्वपि मन्त्रविधिपरं ब्राह्मणं, न स्वरविधिपरम् । इतरं पूर्वपरब्राह्मणस्वराविच्छेदाय । तस्मान्मन्त्र एव कर्मसु प्रयोगे ।

इति प्रावचनिकस्वरेणैव मन्त्रोच्चारणाधिकरणम् ॥ ८ ॥

---

[1] अत्र मातृकायामनन्विता पंक्तिः । सा समीकृतात्र ।

ब्राह्मणोत्पन्नमन्त्रस्य भाषिकस्वरेणैवोच्चारणाधिकरणम् (९)

ब्राह्मण एवोत्पन्ना मन्त्राः ब्राह्मणेन विनियुक्ताः । तत्रापि मन्त्रविधिपरत्वात् ब्राह्मणस्य स्वराविधायकत्वात् न स्वरादरः । इति चेत् —

ये पुनर्ब्राह्मणाधीतास्तेषां भवति तत्स्वरः ॥ ३७१ ॥

अवगतस्वरस्यैव मन्त्रस्य प्रयोगकृत्यत्वात् स्वरान्तरानवगमात् अविनियुक्तोऽपि ब्राह्मणस्वरस्यात्तन्मन्त्रेषु ।

इति ब्राह्मणोत्पन्नमन्त्रस्य भाषिकस्वरेणैवोच्चारणाधिकरणम् ॥ ९ ॥

मन्त्राणां पाठानन्तरमेव पदार्थानुष्ठानाधिकरणम् (१०)

मन्त्रस्योपक्रमे मध्ये तत्समवेताभिधाने वा कर्मोपक्रमः । इति चेत् —

मन्त्राणामवसानेन कर्मादीन्त्सन्निपातयेत् ।

सर्वान्ते मन्त्रजनितस्मृतिभ्रंशात्पूर्वं कर्मोपक्रमः । अन्यथा कृत्स्नमन्त्रविनियोगवैयर्थ्यात् ।

इति मन्त्राणां पाठानन्तरमेव कर्मानुष्ठानाधिकरणम् ॥ १० ॥

वसोर्धारायां मन्त्रान्ते कर्मसन्निपाताधिकरणम् (११)

'सन्ततां वसोर्धारां जुहोति' इत्यत्र सान्तत्यस्य साहित्यरूपत्वात् मन्त्रकर्मणोः सहोपक्रमः । इति चेत् —

समान एव न्यायोऽयं वसुधाराहुतिष्वपि ॥ ३७२ ॥

सन्ततशब्दोऽयं, धारा जुहोतीति विहितहोमानां जुहोत्युपात्तानाम् अविच्छेदवाची, न मन्त्रसाहित्यवाची । मन्त्रस्यानुपात्तत्वात् । ततः पूर्व एव न्यायः ।

इति वसोर्धारायां मन्त्रान्ते कर्मसंनिपाताधिकरणम् ॥ ११ ॥

आघारेऽपि मन्त्रान्ते कर्मसंनिपाताधिकरणम् (१२)

'सन्ततमाघारयति' इत्यत्र कर्मण एकत्वात् मन्त्रसाहित्यं सन्ततशब्दार्थ इति मन्त्रकर्मणोस्सहोपक्रमः । इति चेत् —

स्यादाघारेऽप्ययं न्यायः

दीर्घमन्त्रसाहित्यस्य क्षणिकक्रियायामयोगात्, आघार्यमाणद्रव्यस्य दीर्घधारस्याविच्छेदपरः सन्ततशब्द इति पूर्व एव न्यायः ।

इत्याघारेऽपि मन्त्रान्ते कर्मसन्निपाताधिकरणम् ॥ १२ ॥

एककार्यमन्त्राणां विकल्पाधिकरणम् (१३)

'भागो वां विभजतु' 'पूषा वां विभजतु' इत्यादिमन्त्राणाम् एकविभागप्रकाशकानां व्रीहियववद्विकल्प इत्याह —

मन्त्रा ग्राह्या विकल्पिताः ।

इत्येककार्याणां मन्त्राणां विकल्पाधिकरणम् ॥ १३ ॥

संख्याविहितमन्त्राणां समुच्चयाधिकरणम् (१४)

'तां चतुर्भिरभ्रिमादत्ते' इति विनियुक्तमन्त्राणामप्येकार्थत्वाद्विकल्पः । इति चेत् —

चतुर्भिरभ्रिमित्यादौ भवेत्तेषां समुच्चयः ॥ ३७३ ॥

कर्माङ्गभूतचतुस्संख्यानुरोधात् मन्त्रसमुच्चयः । तत्रान्त्यमन्त्रस्य साक्षात्कर्माङ्गत्वम् । आद्यानां त्रयाणां संस्कारद्वारा ।

इति संख्याविहितमन्त्राणां समुच्चयाधिकरणम् ॥ १४ ॥

ब्राह्मणविहितमन्त्राणां विकल्पाधिकरणम् (१५)

'उरु प्रथा उरु प्रथस्वेति पुरोडाशं प्रथयति' 'उरु प्रथस्वोरु ते यज्ञपतिः प्रथतामिति पुरोडाशं प्रथयति' इत्यादिना विनियुक्तानां, लिङ्गादेव विनियोगे वचनं मन्त्रसमुच्चयार्थम् । इति चेत् —

उरु प्रथस्वेत्यादीना न भवेत्तु समुच्चयः ।

लिङ्गविनियुक्तेषु ब्राह्मणं गुणाद्यर्थम् । अन्यत्र मन्त्रविनियोगार्थम् । अतो न समुच्चयः । पूर्वत्र संख्याविरोधात्समुच्चयः । न चात्र तदस्ति । येषान्तु 'चित्पतिस्त्वा पुनातु' इत्यादीनां लिंगविनियोज्यानामपि ब्राह्मणविनियोगः, तत्र समुच्चयार्थं ब्राह्मणम् । विधेयगुणाद्यभावात् । 'चित्पतिस्त्वा पुनात्वित्येतैः प्रतिमन्त्रं' इति यज्ञसूत्राच्च ।

इति ब्राह्मणविहितमन्त्राणां विकल्पाधिकरणम् ॥ १५ ॥

हौत्राणां मन्त्राणां समुच्चयाधिकरणम् (१६)

यूपस्योच्छ्रयणे करणमन्त्रश्चाध्वर्यवः 'उद्दिवं स्तभानान्तरिक्षं पृणपृथिवीमुपरेण दृंह' इति । उच्छ्रीयमाणाय प्रेषितहोतृमन्त्रः—'उच्छ्रयस्व वनस्पते वर्ष्मन् पृथिव्या अधि' इति । अनयोर्यूपोच्छ्रयणधारणरूपैकप्रयोजनत्वाद्विकल्पः । इति चेत् —

समुच्चयो भवेदेव क्रियमाणानुवादिनाम् ॥ ३७४ ॥

करणमन्त्रः उच्छ्रयणं करोमीत्येतं स्मारयति । हौत्रस्तु क्रियमाणसमुच्छ्रयणमनुवदन्नध्वर्योर्यूपोच्छ्रयणं कर्तव्यमिति स्मृतिं जनयति । तत्र स्मार्यस्योच्छ्रयणस्यैकत्वेऽपि कर्तव्यमित्यस्य करोमीत्यस्य च स्मृति-प्रकारस्यान्यत्वात्कार्यैक्याभावेन समुच्चयः ।

इति हौत्राणां मन्त्राणां समुच्चयाधिकरणम् ॥ १६ ॥

अत्रैव वर्णकान्तरम् (१७)

उच्छ्रयस्वेत्यृगेका । समिद्धस्योच्छ्रयमाण इति द्वितीया । ऊर्ध्व ऊषुण इति तृतीया । ऊर्ध्वो नः पाहीति चतुर्थी । ता एताः क्रियमाणानुवादिन्यो हौत्रा यूपोच्छ्रयणकर्तव्यतास्मरणकार्यस्यैकत्वाद्विकल्पन्त इति चेत् —

समुच्चयो भवेदेव क्रियमाणानुवादिनाम् ।

प्रथममन्त्रोत्पन्नस्मृतेरुत्तरोत्तरमनुस्यूतेः पृथक्प्रयोजनत्वात्समुच्चयः । पूर्वं क्रियमाणानुवादिनां प्रथममन्त्रेण समुच्चयो भवेदिति योजना । अत्र क्रियमाणानुवादिनां चतुर्णां समुच्चयः ।

इति वर्णकान्तरम् ॥ १७ ॥

इति द्वादशस्य तृतीयः पादः ।

॥ अथ चतुर्थः पादः ॥

जयस्तुत्याशीरभिधानानां समुच्चयाधिकरणम् (१)

दीक्षितस्य वाङ्नियमात्पूर्वजपाय मन्त्राः श्रूयन्ते–सारस्वती–आग्नावैष्णवी–बार्हस्पती–इति । तत्रानुवचनशब्दाभिधेयजपकार्यस्यैक्याद्विकल्पः । इति चेत् —

जपस्तुत्यादिमन्त्राणां धर्मार्थत्वात्समुच्चयः ॥ ३७५ ॥

जपस्यादृष्टार्थत्वेनैककार्यत्वानवगमात्समुच्चयः । अत एव सूत्रं 'एकेषामग्नावैष्णवीं सारस्वतीं बार्हस्पत्यामुत्तमामनूच्य वाग्यन्तव्या' इति ।

इति जपस्तुत्याशीरभिधानानां समुच्चयाधिकरणम् ॥ १ ॥

ऐन्द्राबार्हस्पत्ये द्विविधयाज्यानुवाक्ययोर्विकल्पाधिकरणम् (२)

जपमन्त्रवत्, अग्निमूर्धेत्यादीनां स्तुत्यर्थानुवाक्यायुगले, इदं वामास्ये हविः इत्यादिके याज्यानुवाक्ये इव समुच्चीयेते । इति चेत् —

याज्यानुवाक्यायुगलममेकं स्याद्विकल्पितम् ।

तत्र पुरोऽनुवाक्यासमाख्यानुपपत्त्या समुच्चयेऽपि, इहैकार्थत्वाद्विकल्पिते ।
इत्यैन्द्राबार्हस्पत्ये द्विविधयाज्यानुवाक्ययोर्विकल्पाधिकरणम् ॥ २ ॥

सोमक्रयसाधनानामजादीनां समुच्चयाधिकरणम् (३)

'एकहायन्या क्रीणाति' 'अजया क्रीणाति' 'वाससा क्रीणाति' इत्यादिदशक्रयद्रव्याणि विकल्पन्ते । यद्यप्येकस्यैयं पुनश्श्रुतिरिति न्यायेन क्रयभेदः, तथापि क्रयद्वारेण द्रव्यविकल्पः क्रयविकल्पपर्यवसितः । इति चेत् —

समुच्चेयाः क्रयास्सर्वे

आनतिसौकर्यात्, 'तं वै दशभिः क्रीणाति' इति वचनाच्च समुच्चयः । व्रीहियवयोस्तु नैवं किञ्चित्समुच्चायकमिति वैषम्यम् ।

इति सोमक्रयसाधनानामजादीनां समुच्चयाधिकरणम् ॥ ३ ॥

उपयजनादिप्रतिपत्तिकर्मणां समुच्चयाधिकरणम् (४)

अग्नीषोमीये 'गुदेनोपयजति' इति श्रुतम् । ऐकादशिनेषु तच्चोदकप्राप्तम् । तत्रैकादशानां गुदयागे विकल्पः । तृतीयया द्रव्यस्य गुणत्वावगमात् क्रियाया अर्थकर्मत्वात् । इति चेत् —

गुदयागे समुच्चयः ॥ ३७६ ॥

श्रुत्यार्थातद्वय अनुनिष्पन्नगुदस्य प्रयाजशेषन्यायेन प्रतिपाद्यत्वात्समुच्चयः । तृतीयाया भङ्गवारणाय अर्थकर्मत्वेऽपि न दोषः इति चेत् केचित् । तत् हृदयादीनामेव दशमे हविष्ट्वावगमादयुक्तम् ।

इत्युपयजनादिप्रतिपत्तिकर्मणां समुच्चयाधिकरणम् ॥ ४ ॥

आधाने विविधसंख्याकानां दक्षिणानां विकल्पाधिकरणम् (५)

अग्न्याधेयदक्षिणानां, एका देया षड् देया इत्याद्यपरिमितं देयमित्यन्तं यावच्छ्रुतानां क्रयद्रव्यवदानतिसौकर्यार्थं समुच्चयः । इति चेत् —

अग्न्याधेये दक्षिणास्स्युस्संख्याभेदाद्विकल्पिताः ।
समुच्चये श्रुतसंख्याबाधेन संख्यान्तरोपजननापत्तेर्विकल्पः ।

इत्याधाने विविधसंख्याकानां दक्षिणानां विकल्पाधिकरणम् ॥ ५ ॥

पशुगणेषु जाघनीनां विकल्पाधिकरणम् (६)

दर्शादावाज्येन विकल्पार्थं, 'जाघन्यापत्नीः संयाजयन्ति' इति श्रुतम् । पशौ पुनस्तदेव

श्रुतम् । तदैकादशिनेषु चोदकप्राप्तम् । तत्र जाघनीप्रतिपत्त्यर्थत्वाय पशौ चोदकप्राप्तस्य पुनर्वचनम् । हृदयाद्यर्थालब्धपश्वनुनिष्पन्नस्य प्रतिपत्त्यर्थत्वाच्च । इति चेत् —

जाघनीनां पशुगणेन भवेत्तु समुयः ॥ ३७७ ॥

विकल्पप्राप्तस्य अग्नीषोमीये पुनर्विधानं नियमार्थम् । आज्येन विकल्प्यमाना गुणत्वेनैव प्राप्ता नियम्यत इति विकल्पः पशुगणे ।

इति पशुगणेषु जाघनीनां विकल्पाधिकरणम् ॥ ६ ॥

उखाग्निविकल्पाधिकरणम् (७)

अग्नावुख्यं प्रकृत्य श्रुतम्—'वृक्षाग्राज्ज्वलतो ब्रह्मवर्चसकामस्याहृत्यावदध्यात्, भ्राष्ट्रादन्नाद्यकामस्य' इति । तत्र कामायाधानमात्रविधानात् नित्य उख्योऽग्निः पुनः क्रत्वर्थोऽवधेयः । इति चेत्—

वार्क्षादिना स्यात्काम्येन नित्योख्यविनिवर्तनम् ।

होमार्थं प्राप्तावधानमाश्रित्य कामाय विधीयमाने वार्क्षो नित्यं निवर्तयेत् ।

इत्युखाग्निविकल्पाधिकरणम् ॥ ७ ॥

काम्याग्नेराहवनीयधर्माभावाधिकरणम् (८)

स वर्क्षादिः, आह्वयते यस्मिन्नित्याहवनीयस्स्यात् । इति चेत् —

काम्यो नाहवनीयस्स्यादाधानादेरभावतः ॥ ३७८ ॥

आधानजसंस्कारविशेषवाचको ह्याहवनीयशब्दो न तदभावे स्यात् । ततश्च न गतश्रीस्त्वनिमित्तधारणादि ।

इति काम्याग्नेराहवनीयधर्माभावाधिकरणम् ॥ ८ ॥

काम्याग्नेरसंस्कृतताधिकरणम् (९)

तर्हि होमार्थत्वात्संस्काराणां वार्क्षादेश्च होमार्थत्वात्, तेषु ते स्युः । इति चेत् —

तेषु नाधानसंस्कारः

अरणीमन्थनादेरशक्यत्वात् असंस्कृतस्यैव संस्कृतस्थाने विधानात् न शक्यानामप्यनुष्ठानम् । संस्कृतयूपकार्ये विहितखलेवाली परिध्यापिष्विव यूपधर्माः—अभ्युदयेष्टिदधिपयसोरिव प्रणीता धर्माः । अविरुद्धसंस्कारा यजमानहविरादयः कथं न कार्याः ? इति केचित् —

इति काम्याग्नेरसंस्कृतताधिकरणम् ॥ ९ ॥

उख्याग्नेर्धारणाभावाधिकरणम् (१०)

नित्योख्यः कर्मान्तेऽपि धार्यः । 'न प्रति संदध्यात्' इति धारणप्रतिषेधस्य प्रापकप्रमाण-कल्पकत्वात्, तयोश्च विधिप्रतिषेधयोः विकल्पापादकत्वात् धारणविकल्पः । इति चेत् —

नित्योख्यस्य न धारणम् ।

आहवनीयधारणं गतश्रियो नित्यविहितम् । तदुख्याग्नौ चोदकप्राप्तं, न प्रतिसमिध्यो यत्प्रतिसमिद्धं भ्रातृव्यमस्मिन् जनयेत् इत्यनेन पर्युदस्यते, नार्षेयं वृणीते इतिवत् । अतो न विकल्पो नित्यं वर्तनं धारणस्य ।

इत्युख्याग्नेर्धारणाभावाधिकरणम् ॥ १० ॥

शुक्रस्पर्शादीनामेकयजमानकर्तृकताधिकरणम् (११)

सत्राहीनात्मकद्वादशाहादौ, 'शुक्रं यजमानोऽन्वारभते' इत्यादिसर्वैः कार्यमविशेषात् । इति चेत् —

कश्चिदेव परार्थानि कुर्यात् बहुषु यष्टृषु ॥ ३७९ ॥

एकेन कृते शुक्रग्रहसंस्कारसंपत्तेर्न सर्वैः कार्यम् ।

इति शुक्रस्पर्शादीनामेकयजमानकर्तृकताधिकरणम् ॥ ११ ॥

अहीने शुक्रस्पर्शादावेकस्यैव यजमानस्य कर्तृत्वाधिकरणम् (१२)

स यः कश्चित्स्यात् विशेषाग्रहणात् इत्याह —

तेषु यः कश्चिदेव स्यात् ।

अहीन इति शेषः ।

इत्यहीने शुक्रस्पर्शादावेकस्यैव यजमानस्य कर्तृत्वाधिकरणम् ॥ १२ ॥

सत्रे शुक्रस्पर्शादौ गृहपतेरेव कर्तृत्वाधिकरणम् (१३)

अहीनवत्सत्रेऽपि शुक्रान्वारंभणं येन केनचित्कार्यम् । इति चेत् —

सत्रे गृहपतिर्मतः ।

गृहपत्यः निरिज्यनामार्त्विजो वैषम्यात् स एव कुर्यात् ।

इति सत्रे शुक्रस्पर्शादौ गृहपतेरेव कर्तृत्वाधिकरणम् ।

सत्रेऽञ्जनादिसंस्काराणां सर्वगामित्वाधिकरणम् (१४)

अञ्जनाभ्यञ्जदनादयोऽपि गृहपतेरेव युक्ताः। संस्काराधिक्ये फलाधिक्येन, गृहस्य = यागस्य पतिरिति समासोपपत्तेः। इति चेत् —

सर्वेऽपि सत्रे कुर्वीरन् संस्कारानञ्जनादिकान् ॥ ३८० ॥

फलित्वप्रयोजकसंस्काराः सर्वेषां स्युः। फलित्वाविशेषात्। गृहपतिसमाख्या तु आर्त्विज्यपदार्थाकरणात्। फलाधिक्यन्तु 'स भूयिष्ठामृद्धिमाध्नोति' इति वचनात्। न संस्काराधिक्यात्। तस्मात् सर्वे संस्कारान्कुर्युः।

इति सत्रेऽञ्जनादिसंस्काराणां सर्वगामित्वाधिकरणम् ॥ १४ ॥

याजमानार्त्विज्ययोरार्त्विज्यस्यैव बलवत्वाधिकरणम् (१५)

सत्रेषु याजमानार्त्विज्ययोः क्वचिद्विरोधे प्राप्ते चोदकप्राप्तयाजमानं कार्यम्। इति चेत् —

याजमानार्त्विज्ययोर्विप्रतिषेधे परं बलि।

'ये यजमानास्त ऋत्विजः' इति यजमानानां प्रत्यक्षवचनेनार्त्विज्ये विधानात् 'यो होता सोऽध्वर्युः' इति कौण्डपायिनकर्मण्याध्वर्यववदार्त्विज्यमेव कुर्युः। पदार्थगुणकर्तॄन्प्रति गुणत्वात् संस्काराणामत्रफलिनामेव गुणभूतत्वात्।

इति याजमानार्त्विज्ययोरार्त्विज्यस्यैव बलवत्त्वाधिकरणम् ॥ १५ ॥

ब्राह्मणस्यैवार्त्विज्याधिकाराधिकरणम् (१६)

आर्त्विज्यमध्ययनसंपन्नास्त्रयोऽपि कुर्युः। याजनाध्यापनप्रतिग्रहाः ब्राह्मणस्यैव वृत्त्युपाया इति नियमस्य पुरुषार्थत्वात्, तदुल्लङ्घने पुरुषः प्रत्यवेयात्। न क्रतुवैगुण्यम्। अतस्त्रयोऽप्यृत्विजस्सर्वकर्मसु। इति चेत् —

आर्त्विज्यं ब्राह्मण एव कुर्युस्सर्वेषु कर्मसु ॥ ३८१ ॥

ब्राह्मणानामार्त्विज्यमिति यक्षसूत्रकाराः क्रत्वर्थेनापि स्मरन्ति। याज्ञवल्क्योऽपि, 'प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा' इति। श्रीमद्रामायणेऽपि,

'क्षत्रियो याजको यस्य चण्डालस्य विशेषतः।
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः ॥'

इति क्षत्रियस्य याजकत्वनिराकरणात् क्रतुवैगुण्यमेव दर्शितम्।

'राजयाजकयाज्यस्य विनश्यति यथा हविः'

इति हविर्नाशेन क्रतुवैगुण्यमेव दर्शयति। लिङ्गानि च 'ब्राह्मणानामिदं हविः' इत्यादीनि तत्र तत्रोपलभ्यन्ते। तस्मात् ब्राह्मणानामेवार्त्विज्यम्।

इति ब्राह्मणस्यैवार्त्विज्याधिकाराधिकरणम् ॥ १६ ॥

जैमिनीयन्यायपुष्पमालेयं परमेश्वरः ! ।
त्वत्पादपद्मभूषास्तु ऋजुना मां पथा नय ॥
विश्वेश्वरप्रेरितेन श्रितविश्वेशमूर्तिना ।
उत्तमश्लोकतीर्थेन तत्प्रीत्यै ग्रथितः स्फुटम् ॥

इति लघुवार्तिकटीकायां लघुन्यायसुधायां द्वादशस्याध्यायस्य
चतुर्थः पादः ।

समाप्तश्चध्यायः ।

॥ श्रीगोपालाय ॥

लिखितं हरिपाण्डे ब्राह्मणा

श्रीराम

पत्रसंख्या ४३१

गांमीरेरिदम्—गम्भीरराजात्मजस्येदम्

श्रीभट्टगोस्वामी गम्भीरात्मजानाम्

प.सं. ४३१ — ग्रं-६३४०

— o —

अवधेयम्

'लघुवार्तिकटीका लघुन्यायसुधा' इति ग्रन्थकारेण ~~उत्पलदत्तमिश्रेण~~ अस्य ग्रन्थस्य नाम कृतम्। 'लघुवार्तिक'पदेन तत्तदधिकरणार्थसंग्रहः अनुष्टुप्श्लोकैः कृतो निर्दिश्यते। तादृशाः श्लोकाः ३६६ संख्याकाः अत्र सन्ति। तट्टीका 'लघुन्यायसुधा' इति ग्रन्थकारेणैव व्यपदिश्यमाना, तेषामेव श्लोकानां वाक्यशैल्या विरचितं व्याख्यानं निर्दिशति। जैमिनीयन्यायमालाविस्तरवत्, श्लोकरूपस्य मूलग्रन्थस्य – वाक्यात्मकस्य तद्व्याख्यानस्य च कर्ता एक एवायम् ~~उत्पलदत्तमिश्रः~~।

एतेषामेव श्लोकानां पार्थक्येन (विना व्याख्यानं मूलग्रन्थमात्रस्य) अनेनैव प्रबन्धालेखनं कृतमस्ति। तस्य नामापि 'पूर्वमीमांसाचित्रपटः' इति ग्रन्थकारेणैव कृतमस्ति। श्लोकात्मकयोरनयोरुभयोः ग्रन्थयोः तत्र तत्र स्वल्पतरो भेदो वरीवर्ति। अथापि अनयोः प्रबन्धयोर्भेदो नास्ति – ऐकप्रबन्ध्यमेवानयोः। अतः 'पूर्वमीमांसाचित्रपट' मार्गमुपेक्ष्य, लघुवार्तिकग्रन्थानुसारेणैव श्लोकानामकाराद्यनुक्रमणिका संपादितात्र। तत्रापि श्लोकानामादिरेव दत्तः। एकस्मिन् श्लोके अर्धद्वयात्मके – द्वित्राण्यधिकरणानि संगृह्यन्तेऽत्र। पादचतुष्टयात्मकस्य श्लोकस्य, प्रथमपादमात्रानुक्रमणिकायां प्रदर्श्यते। अतः ३६६ अधिकरणानां परं निर्देशोऽत्र संपन्नः। सहस्राधिकरणात्मकस्य समग्रस्य पूर्वमीमांसाशास्त्रस्य संग्रहः अस्मिन् ग्रन्थे वर्तत एव। श्लोकानुक्रमणिकायां तस्य तृतीयांश एव प्रदर्शितोऽस्ति। तदवलम्बनेन अन्तः प्रविश्य निरीक्षणेन शेषपूरणं कर्तव्यं भवति।

(संपादकः)

लघुवार्तिकटीकायां लघुन्यायसुधायां विद्यमानानां श्लोकानामकाराद्यनुक्रमणी

श्लोकानामादिः	पुटम्
अ	
अंश्वदाभ्यः	33
अक्रीतरा	154
अग्नयस्तु	85
अग्निः पाव	
अग्निश्चिनु	34
अग्निहोत्रा	36
,,	128
अग्निहोत्रि	171
अग्नौ दीक्षा	
अग्नौ दैक्ष	
अग्न्याधेये	
,,	
अङ्गतासू	45
अङ्गप्रधा	79
अङ्गहीनो	136
अङ्गानां द	
अङ्गानां प	104
अङ्गानां मु	
अङ्गावृत्तिः	
अतिदेशः	
अथैषज्यो	27
अध्यूहनं	27
अध्वर्युम	27
अनारभ्य	73
अनिरुप्ते	153
अनुज्ञातैः	70
अनुज्ञानु	71
अनूबन्ध्या	
अनूयाजो	120
अनैन्द्रेष्वि	48
अन्वाहार्य	
,,	
अपूर्वस्सो	178
अप्स्वेवाव	
अभिवादा	140
अर्थवादो	59
अर्थायवा	4
अश्वमेधा	
अश्वेष्टिर्वै	64
अहर्गणे	
अहीनस	183
अहीनस्य	
आ	
आग्नेयप	181
आज्येनशे	

आदितस्स्या 181
आधानस्ये 130
आन्तात्पात्रा
आरम्भणी
आरभ्यैव 181
आवृत्तिष्ष

इ

इज्याशेषा
इतरत्र 167
इदं ब्रह्म 66
इषेत्वादौ 22
इष्टकाम 127

उ

उक्तानां भ 70
उच्चैस्त्वाद्या 51
उत्करादौ
उत्कर्षेऽव 156
उत्कर्षो ना 57
" 120
उपसद्द्वा 56
उरुप्रथ
उरूकेति 214

ऊ

ऊर्ध्वं सक
ऊह आज्य
ऊह प्रव 20

ऋ

ऋतुयाज्या
ऋत्विग्दत्तं 20
ऋत्विग्दानं

ए

एकस्मादे 177
एकां पञ्च
एकैकेना 122
एवमेवे

ऐ

ऐन्द्रं कर्मा 150
ऐन्द्रवाय 68

क

कण्डूनां यौ
कण्वे समु 205
कपालानि
कर्तव्य स 43
कर्तारोऽध्व 53
कर्मणां या 111
कर्मप्राप्ति 148
कामाय रे 29
काम्यं नित्य 74
काम्यनैमि 128
कार्यः प्रयो
कालद्वय 36
किञ्चिन्निरु 154
कुशकार्ये
कृत्स्ने हवि 66
कृष्णलेना
त्त्वाश्रुत्यादी 115

क्रत्वर्थपु 93
क्रत्वाद्यना 131
क्रमाद्याज्या 46
क्वचित्प्रश 15
क्षाणेनिमि 149

ग

गवादिदा
गव्यादिपृ
गीतिभेदा 201
गुणकामा
गेहादि न 139
गोदोहनं 94
ग्रहंसाद
ग्राह्यस्स्वस्था

च

चमसानां 85
चरुरोद
चरूपधा 33
चित्पतिस्त्वे 22

छ

छिद्रापि धा

ज

जगत्या सा
जञ्जभ्यमा 62

त

तच्चप्रति 140
ततस्स्थानं 54
ततोऽधिकं
तत्कार्यका 14
तत्र तत्स
तत्रत्वभ्य 211
तत्र द्रव्यं 173
तत्र नस्यु
तत्राज्यभा
तत्रान्वाहा
तत्रापि सा 160
तथाघारः 10
तथामास 194
तथैव भि
तथैव सौ
तथैवाव 156
तदुद्वापं
तद्वद्गुणे 102
तन्नौ सहे 90
तन्त्रेणैवो
तस्मिन्धूर्गा
तस्मिन्पेषः
तस्मिन्भवे 111
तस्यां न स्युः
तार्प्येण ना
तेषु नाघा
तेषु यः क
त्यागांशेना 95
त्रयाणामे 135
त्रैशोकं वि 198

द

दधिक्रतु 104
दर्वीहोमा 186
दर्शार्थं ना 215
दर्शेन वै 108
दशतेश 88
देवतात
देवतारु 212
देशस्स्यात्सां 83
द्यावापृथि
द्रव्यादिव 37
द्वादशप्र 155
द्वादशाहे 155
द्वादशाहो 179
द्वाभ्यां भव 150
द्व्याम्नातम 88

ध

धर्मः प्रति

न

नकालान्नि 168
न च श्रुति 3
न चाग्निहो 28
न तस्यै शृ 195
न देवता 189
न निर्वापे 193
न पृष्ठ्यानां
न प्रस्थानी 67
न प्राकृत
न भवेद् 67
नयनं सो 101
न रथन्त 30
न वेदाः क 5
न संवदे 62
न सौर्यादि 181
न स्वामिनः 143
नाज्यभागौ
नास्ति रात्रे
नाद्योपादा
नानुमत्या
नापि वास
नाप्याघारा 25
नाप्यौदुंब
नामुष्मिक
नारंभणी
नालंभे स्या 32
नित्यं कार्यं 141
नियतस्स्या 196
नियुक्ते तु 146
निर्वापादि
निवृत्तिर्य 50
निषिद्धोऽपि 213
निष्कासेने
नैवात्रस्थ
नोपवापः 96
न्यायेनैवं 147

प

पञ्च सञ्च 170
पदेनाह
पणक्रयो 86
परिव्याण 76
पवमाने 75
पशौ पौरो
पशौ सन्ना
पश्चादुद्गा 158
पश्चेकत्व 96
पाठश्श्रुते 130
पात्नीवत 49
पात्राणि स 42
पाशानित्ये 209
पूर्वं सावि 124
पृषदाज्ये 123
प्रतिपत्तिः 97
प्रतिपत्ति 101
प्रतिनिध्य 145
" 146
प्रतीष्टकं 191
प्रदेयध 216
प्रयाजैका 125
प्रयाजोय
प्रयोक्रपू 187
प्राकाशद
प्राकृतं स्या 173
प्राकृतेऽश्वा 212
प्राकृत्यान
प्रागाधिक 199
प्राग्जातक 110
प्राजापत्य 117
प्राजापत्या 123
प्राजापत्यै
प्रातर्मध्यं 119
प्राधान्यमि 114
प्रामाण्यमु 8
प्रायणीया
प्रायश्चित्त 175
प्रासनं प्र 101
प्रैष प्रैषा 89
प्रैषानुव
प्रैषानुव
प्रोक्षणं ह 188
प्रोक्षतीत्या 19

फ

फलादीनां 180

ब

बृहद्यवा
बृहद्रथ
ब्रह्मसाम्नी
ब्रह्मेतरे

भ

भक्षः प्रति
भवत्यवे
भवेदेत 165

भवेद्वैश्व 165
भिद्यते रु 35
भिद्यते सु
भिन्नदेवे
भिन्ने प्रकृ 157
भृतिभेदो 164

म

मतंवार्ति
मन्त्राणाम
मन्त्राणां मु
मन्त्रार्थ वा 1
मन्त्रास्तेये 20
मिश्रणेप
मुख्याभावे 142
मुख्येन स्या 78

य

यजमान 89
यजुर्मन्त्र 21
यजुर्युक्त
यज्ञोपवी 60
यद्याचारे 7
यागेजुहो 103
याजमाना
याज्यानुवा
"
याज्यायां य 71
यावत्स्याद्द 162
यूपस्य लौ 208
यूपावटा 90
यूपाहुतिः
योवैसंव 112
यौगिकः प्रौ 13

र

रशना स 113
रात्रिसत्रं 106

ल

लक्षणानी 103
लिङ्गैर्भक्षा 47
लुप्यतेज

व

वत्सञ्चोपा 89
वषट्कार 69
वसन्तादि 31
वाक्यैक्ये तु
वाजिनं न 96
वार्क्षादिना
वासोऽनसोः 175
विकृताव 206
विकृतिश्चे
विकृतौत 209
विद्यते य 194
विधिपाठ 118
विधिभ्यु 152
विधिरेवो 61
विधिस्थम
विभज्य द
विभज्य न 84

वृतेषु ऋ 84
वेदिरङ्ग 80
वैद्यसोम 64
वैश्वानरी
व्यवस्थया 98
व्यूढोविका
व्रतेकाल 151
व्रतोपाय
व्रीहिप्रति 210
व्रीहीणां न 147
व्रीह्यादिस्था 203

श

शतोवथ्यादि 185
शब्दार्थ आ 6
शब्दान्तरे 23
शमनीयो
शामित्रोऽग्निः
शुक्रामं थि
शृतदध्नो 204
शेषलक्ष 37
श्यावोऽश्वस्स
श्येनाङ्गार्थं 91
श्रुतत्वात्कृ
श्रुतिलक्ष 115

ष

षडहावृ 184
षोडशीप्र

स

स एव हो 103
संस्थान्तर 129
सकृत्प्रस्था
सकृदङ्गा
संख्यामुष्टि
सत्राधिका
सत्राहीना
सत्रेऽपि स्या
सत्रेषु ब्रा 160
सत्रेषु भि 159
सदृक् प्रति 144
सदोमाना 87
सद्यो विकृ 132
संदिग्धम 16
सपौर्णमा
सभवेद
समिदाद्याः 207
समुच्चयो
संबध्यन्ते 103
सराजन्य
सर्ववेद
सर्वस्याद
सर्वस्वार
सर्वेषां ऋ 116
सर्वेषु त
सर्वेष्वप
सवनीय 91

सवनीय 92
सवनीया
सवनीयः 119
सहप्रदा
साङ्गान्तेऽग्नि
साधारणे
सान्नाय्येन
सासदश्य 40
सामद्वयं
सामसंस्का 197
सामिधेनी 126
साम्नां स्याद 202
साम्नामाग 126
सारस्वते 117
सुब्रह्मण्यो
सुरावाजि 182
सोमे प्रधा 81
सोमेष्टिषु
सोमोद्भवे 191
सौत्य एका 179
सोर्यादाव 176
स्त्रीपुंसयो 134
स्फ्यादिनोद्ध 38
स्मृत्याचार 8
स्यात्पदार्था 121
स्यात्प्रधान 51
स्यादाघारे
स्युत्कर्षः 58
स्यादुपाव
स्याद्धानम 136
स्याद्द्विरे वा
स्युरपूर्वा
स्युर्द्वादशा
स्वदानेदे 101
स्वयोन्यामे
स्वर्ल्यूपा 98

ह

हविर्भेदे 184
हविष्कृद
हविष्कृदे 44
हविष्यध्व
हिरण्यग
हेतुवन्नि 2
होत्रादीनां 68
होत्राद्यास्ते 82

लघुवार्तिकटीकायां लघुन्यायसुधायाः विषयवाक्यानाम्
अकाराद्यनुक्रमणिका

वाक्यानामादिः	पृष्ठम्
अ	
अंशुं गृह्णाति	127
अक्ताश्शर्कराः	16
अक्षैर्दीव्यति	124
अखण्डामकृष्णां	77
अगन्म सुवः	189
अग्न आयाहि	46
अग्नये कृ	124
,,	295
,,	303
अग्नये जुष्टं	187
,,	207
अग्नये दात्रे	315
अग्नयेऽनीकवते	128
अग्नमे पथि	319
अग्नये पव	33
,,	42
,,	245
,,	246
,,	301
अग्नये पाव	,,
अग्नये रक्षोघ्नं	314
अग्नये शुचये	301
अग्नये स्वाहा	124
अग्नये स्वाहा	240
अग्नये स्विष्ट	35
अग्ना ३ इ	49
अग्निं यजति	247
अग्निं युनज्मि	296
अग्निं स्विष्ट	246
अग्निमग्ने	221
अग्निमद्य	299
,,	317
अग्निमावह	221
अग्निमुखा	65
अग्निमुप	175
अग्निर्ज्योतिः	10
अग्निर्मूर्धा	202
,,	323
अग्निर्वसुभिः	310
अग्निर्वायुः	28
अग्निर्वै ब्रा	14
अग्निर्होता	216
अग्निष्टोमे	58
अग्निहोत्रं जुहोति	10
,,	25
,,	116
अग्निहोत्रं जुहाति	130
अग्निहोत्रं जुहाति	171
अग्निहोत्रहवण्या	130
अग्नीदग्नीन्	46
,,	89
,,	167
अग्नीछेद	84
अग्नीवरुणौ	247
अग्नीषोमीयं	10
,,	26
,,	168
,,	268
अग्नीषोमीयस्य	221
,,	306
अग्नीषोमौ	54
,,	134
,,	135
अग्ने धूमकेतो	195
अग्नेरहं	189
अग्रवतीं	256
अग्रवन्त्युद	60
अजया क्रीणाति	324
अजोऽग्नीषोमीयः	15
अण्व्याधारया	25
,,	26

अण्व्याधारया 256
अथ ऊर्ध्वं गार्हं 308
अतिरात्रे 276
अतिरात्रेण 78
अतिहायेडो 98
अत्रह्येव 244
अथ यत्परि 269
अथातोऽग्निं 34
" 279
" 280
अथान्येन 129
अथैतस्य 69
अथैष एकत्रिकः 250
अथैष ज्योतिः 27
अथैष भूः 237
अथैषोऽभिः 244
अथोत्तरं पक्षः 259
अदक्षिणानि 226
अदाभ्यं 127
अदितिः पाशं 208
अदितिमोदनेन 222
अदो हविः 131
अधस्तात्समिधं 60
अध्यूह्नीं 269
अध्वर्युं 82
" 84
अध्वर्युर्गृह 124
अनयात्वा 264
अनवानं 71
अनसोऽधि 309
अनस्थिभि 269
अनुत्पाद्य 141
अनुप्रस 72
अनुसवनं 317
" 313
अनूयाजैस्तृतीय 317
अनो ददाति 174
अन्तरानूच्यं 41
अन्तर्वेदि 100
अन्या अन्याः 201
अन्वहं द्वादश 266
अन्हो निरुप्याणि 301
अपः प्रणयति 100
" 104
अपबर्हिषः 273
अपबर्हिषौ "
अपरपक्षे 167
अपरिमितं 164
अपशवो वा 15
अप्यग्निष्टोमे 253
" 254
अप्रयाजास्ताः 273
अप्सुजो वेतसः 4
अप्सुमन्तौ 273
अप्सु मे सोमो "
अप्स्वग्ने स "
अप्स्ववभृतेन 293
अबद्धं मनः 305
अभिक्रामं 40
अभिघारयति 65
" 280
अभिधार्य 277
अभित्वांशूर 199
अभिषुत्य 149
अभीन्धत एव 155
अभीषुणः 202
अमावास्यायां 24
" 123
" 280
" 314
अमृताहुर्ति 223
अयं पुरो 15
अयं यजमानः 194
अयं सहस्र 202
अयं सुतासुती 317
अयज्ञियाः 143
अयुङ्गायुङ्गान् 304
अयुतं दक्षिणा 266
अरुणया 38
" 55
अरुणया 167
अर्कं गृह्णाति 241
अर्धं बहि 81
अर्धमन्त "

अर्धिनोदी 237
अल्पं जुहोति 68
अवभृतादुदेत्य 318
अवरक्षोदिवः 303
अवहन्ति 102
अविप्लुत 166
अवृतस्सामि 312
अशीतिशतं 259
अश्वश्श्यावः 239
अश्वसहस्रं 266
अश्वस्तूपरः 212
अश्विनोः 56
अष्टाक्षरेण 261
अष्टाध्वर्युः 290
अष्टावुपभृति 98
" 99
" 123
अष्टौ देवसुवां 318
अष्टौ हवींषि 13
असावादित्यः 181
अहतं वासः 167
अहरहर्युनक्ति 196
अहरहविमुञ्चति "
अहेबुध्निय 19

आ

आकूतिमग्निं 235
आकूत्यै प्रयुजे 234
आग्नावैष्णवं 118
आग्नावैष्णवं 128
" "
" 206
" 289
" 310
" 184
" 315
" 192
आग्निमारु 109
" 119
" 317
आग्नेयं कृष्णाग्रीवं 287
" 306
आग्नेयं च 43
आग्नेयः कृष्णग्रीवः 211
" 302
आग्नेयः पशुः 75
आग्नेयमष्टा 30
" 25
" 300
आग्नेया ग्रहाः 195
" 249
आग्नेयी सुब्र 195
आग्नेयो वै 131
" 132
आग्नेयोऽष्टा 12
" 160
" 246
आग्नेय्याग्नीध्र 46
आग्रयणा 253
आधारमाद्या 10
" 25
आचान्तेन 3
आज्यभागौ 271
" 276
आज्येन यूप 173
आज्येन शेषं 217
" 291
आज्यैस्स्तुवते 9
" 19
आत्मने वा 87
आत्मार्थे पृ 146
आदित्यः प्राय 8
" 216
" 122
आदित्यात्साम 50
आदित्यो यू 14
आद्यन्तौ प्रा 258
आपोवऋत्वि 10
आमनम 111
" 242
आमिक्षा वै 105
आयुर्दा अ 87
आवृत्तं धूर्षु 251
आर्षेयं वृणीते 136
आश्ववालः 8
आश्विनं ग्रहं 75

आश्विनं ग्रहं 76
" 113
आश्विनोद 130
आसन्नानि 80
आसीनः पुरो 248
आसीरन् 265
आसोमं व 221
आहवनीये 175
आहिताग्नि 161
" 298

इ

इडां भक्षयति 311
इतरमन्यः 115
इतिहस्माह 164
इत्यहेसुत्यां 302
इदं दक्षिणार्थं 163
इदं ब्रह्मणे 225
इदं ब्रह्मणः 66
इदं मे भक्षार्थं 163
इदं मे क्रत्वर्थं "
इदं वामास्ये 323
इदं विष्णुः 282
इदं होतुः 66
इन्द्र ऊर्ध्वो 10
" 25
इन्द्र पीतस्य 48
इन्द्रस्य व 240
इन्द्रा गच्छ 194
इन्द्राग्नी इदं 54
इन्द्राय वा 68
इन्द्राय रा "
इन्धानास्त 89
इमं स्तनं 296
इयति श 80
इयं गौः 195
इयं वै समिद्ध 126
इषुं विष्टुति 169
इषेत्वो र्जे 22
" 55
इष्ट काभिः 127

ई

ईशानमस्य 256
ईशानाय 217
ईश्वरो वा 300
ईषामालभेत 32

उ

उक्थ्यान्निर्गृह्णाति 253
उक्थ्ये गृह्णीयात् 279
उक्थ्यो वै रूप 262
उरवाञ्चाधि 83
उरवास्थाली 222
उच्चैर्ऋचा 50
उच्चैः प्रवर्ग्येण 99
" 191
" 290
उच्चैर्गेयम् 205
उच्चैर्निगदेन 11
उच्चैस्साम्ना 50
उच्छ्रयस्व 322
" 323
उतयत्सुन्वन्ति 81
उत विष्णो 220
उत्तरयोर्गायति 198
उत्तरवेद्यां 173
उत्तरादो हयति 284
उत्तरार्धात् 97
" 247
उत्तरेऽइ 253
" 254
" 255
उत्तरं ब 14
उत्ताना वै 6
उत्तिष्ठन्नन्वाह 46
उत्करे वाजिनं 234
उदगयन 167
उदङ्मुखो 139
उदयनीयः 293
उद्दिवं स्तभान 322
उद्भिदा यजेत 11
उन्दतीर्बलं धत्त 305
उपनयत मेध्या 211
उपनयनादि 139
उपवर्ती 256
उपव्ययते 41

उपव्ययते 59
उपवेषेण 100
उपरिष्टात्सोमानां 298
उपरि हि 244
उपशय एव 175
उपशयो "
उपसद्भि 34
उपस्तृणाति 65
" 280
उपहूत उप 71
उपहूतामनु 194
उपांशु य 50
" 21
उपांशु य 24
उपात्र वपन्ति 173
" 174
उपोषेऽन्ये 76
उभयीर्ददाति 235
उभे वृह 264
उरुप्रथस्व 322
उरुप्रथा "
उर्वरावेदिः 220
उलपराजीः 43

ऊ

ऊर्वै 2
ऊरू वा एतौ 173
ऊर्जोऽवरुद्ध्यै 1
" 2
ऊर्णाम्रदसं 304
ऊर्ध्व ऊषुणः 323
ऊर्ध्वो नः पाहि "

ऋ

ऋक्सामो वाच 260
ऋचं नोहेत् 218
ऋचस्सामानि 20
ऋजुमाघा 25
" 329
ऋतौ यजति 83
ऋत्विगाचार्यौ 228
ऋत्विग्भ्यो दक्षिणां 84
" 225
" 237
ऋत्विज उप 87
ऋत्विजो वृ 84
ऋद्धिकामाः 115
" 137
" 160
ऋभूणां त्वा 137

ए

एकं वृणीते 136
" 164
एकया स्तुवत 15
एकं साम 197
" 261
" 249
एकं हि तत्र 252
एकधास्य 211
एकधा ब्र 224
एकविंशतिं 41
" 55
" 74
" 126
" 252
एकविंश 254
एकविंशः 263
एकविंशेन 244
" 252
एकया पुन 156
एकहायन्या 96
" 324
एकस्मै वै 107
एकादश वै 65
एकादश प्र 125
" 233
एकादश वै 268
" 269
" 275
एकाष्टकायां 155
एका देया 324
" 164
एका दीक्षा 154
एकाद्वे 235
एकेषामाम्ना 323
एको मम 116

एतयानि 137
एतयान्नाद्य 300
एतद्ब्राह्मणाः 20
एतद्ब्राह्मणानि 170
एतस्यै व 29
एतेन राजा 159
एतेन सहस्र 27
एतानि वै 38
" 94
एतावता 94
एषवा अना 166
एषवाव 57
" 58
" 129
" 132
एष वै दश 265

ऐ

ऐकादशिनात् 261
ऐन्द्रमेकादश 300
ऐन्द्रमृषभं 231
ऐन्द्रवायवं 25
ऐन्द्रवायवा 256
" 157
" 158
" 259
" 260
ऐन्द्राग्न एका 170
ऐन्द्राग्नं द्वाद 36
ऐन्द्राग्नमेका 36
" 46
ऐन्द्र्या गार्ह 53
" 207
ऐरं कृत्वा 24
ऐरं कृत्वो 204

औ

औदुम्बरं 67
औदुम्बरः 239
औदुम्बरी 3
औदुम्बरो 1
" 6
" 274
औपानुवाक्यं 127

क

कयानश्चित्रः 202
कण्वरथन्तरं 205
" 248
कवतीषु 101
काण्वं भवति 243
काकुभः प्रगाथः 199
कायएक 170
काममनू 58
कृष्णविषाणया 295
कृष्यै त्वा सुसस्यायै 304
क्लृप्तीर्यजमान 88
केशश्मश्रु 86
कौत्सं भवति 243
क्रीते सोमे 101
क्रौञ्चानि भवन्ति 243
क्षत्रियोयाज 327
क्षौमे व सामौ 138

ख

खल उत्तरवेदिः 220
खले वाली 220
" 232
खादिरोयूपो 273

ग

गणेषु द्वाद 176
गात्रं गात्रमस्य 215
गायत्रछन्दस 50
गायत्रमेत 185
गार्हपत्ये 278
" 313
गुदेनोप 324
गुरुर्वन्द्यः 139
गोसव उभे 206
गोदोहनेन 73
गौरगुलवेन 243
गौरनूबंध्यः 246
गौश्चावश्च 10
" 236
ग्रहं व गृहीत्वा 114
" 121
" 154
ग्रहं संमार्ष्टि 39

ग्रहैर्जुहोति 68

घ

घृते चरुं 224
घृते श्रपयति 219
" 223

च

चतुरवत्तं 65
" 66
" 103
" 122
" 147
" 180
चतुरहे 155
चतुर्गृहीतं 99
" 281
चतुर्गृहीतं वा 11
चतुरुत्तर 201
चतुरो मुष्टी 32
" 122
" 231
" 304
चतुर्जुह्वां 98
" 304
चतुर्थे चतुर्थे 255
चतुर्दश पौ 283
" 288
चतुर्दशभिः 252
चतुर्ध्रुवायां 98
चतुर्विंशति 164
" 165
चतुर्विंशत्यः 301
चतुस्त्रिंशत् 212
चतुर्होतारं 166
चतुर्होत्रा 80
" 166
" 181
" 190
चत्वार ऋत्विजः 287
चत्वारष्षडहा 264
चत्वारि चत्वारि 223
चत्वारि त्रिवृन्त्य 184
चत्वारो भवन्ति "
चमसाध्व 82
चमसैर्जु 68
चरुमुप 33
चातुर्मास्यानां 291
चात्वाले कृष्ण 101
चित्पतिस्त्वा 22
" 115
" 322
चित्रया यजेत 133
" 9
चित्रापौर्ण 155
चित्रिणीरुप 127
चुच्छुषाकारं 224

छ

छन्दाँसि वै 260
छागस्य 168
" 216

ज

जर्तिलय वा 276
जाघन्या 57
" 324
जामि वा एतत् 25
" 282
जायमानो 141
जुषन्तां यु 96
ज्येष्ठो वा एष 112
ज्योतिर्गौरायुः 106
" 176
" 315
ज्योतिष्टोमेन 114

त

तं पराञ्चं 121
" 254
तं वै दशभिः 324
तदग्नीषोमीयस्य 103
तदुसमेव 281
तप्ते पयसि 26
" 42
" 96
तस्मा एतं 64
तस्माज्जज्ञ 62

तस्माद्ब्राह्म 62
तस्मादग्नि 128
तस्माच्छूद्रो 136
तस्माद्द्वाभ्यां 173
तस्मात्प्रणीताः 191
तस्य धेनुः 237
तस्या एकां 250
ता उपांशु 91
" 108
" 290
तां चतुर्भि 322
तानि द्विर्द्वि 168
तानो यज्ञ 202
तामपरुध्य 62
तान्पर्यग्नि 291
तार्प्यादिवच्च 318
तावब्रूतां 282
तार्प्यं यजमानः 243
ता अनुष्ठयो 212
तिष्ठन्याज्यां 248
तिष्ठन्तं पशुं 119
तिस्र एव 56
तिस्रोऽनुष्टुभः 185
तुथोवो विश्व 237
तृतीयसवने 254
तृतीयिनः "
तृप्त एवैनं.... 189
तेन पुनः 157
तेनह्यन्नं 2
त्रिः प्रथमां 41
" 192
" 252
त्रिंशत्सं प 13
त्रिरनुवाकः 125
त्रिवत्सस्साण्डः 195
" 238
त्रिवृद्बहि 8
त्रिवृद्भवति 55
" 76
त्रिवृदग्नि 263
त्रिवृत्पञ्च 114
" 263
त्रिधातुपञ्च 304
त्रिर्देवः 282
त्रयोदशामा 283
" 288
त्रिच्छन्दा आ 251
त्रीणि ह वै 244
" 126
त्रींस्त्रीनेकैक 292
त्रीणि ह वै 252
त्रीन् वृणीते 136
त्रीन् परिधीन् 190
त्यजदेकं 146
" 147
त्रैधातव्या 35
त्र्यङ्गैस्त्विष्ट 269
त्वमग्ने व्रत 305
त्वं ह्यग्ने प्रथ 248
त्वामिद्धि 199
त्वाष्ट्रं पात्नी 33
" 217
त्रैशोकं साम 198
त्सरा वा एषा 190

द

दक्षिणाग्नौ 313
दक्षिणासोमस्य 311
